.. 2. sabhAparva Kumbhaghonam Edition ..

॥ २. सभापर्व ॥

सभापर्व - अध्याय ००१

॥ श्रीः ॥

२.१. अध्यायः १

Mahabharata - Sabha Parva - Chapter Topics

मयस्यार्जुनम्प्रति प्रत्युपकारप्रार्थना ॥१.।कृष्णे उपकृते अहमुपकृत मयम्प्रति अर्जुनस्योक्तिः ॥२.।कृष्णाज्ञय मये

Mahabharata - Sabha Parva - Chapter Text

२-१-० (११२५५)
॥ श्रीवेदव्यासाय नमः ॥ २-१-०क्ष् (१३७३)
ग्नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं चैव (व्यासं)ततो जयमुदीरयेत् ॥ २-१-१ (११२५६)
जनमेजय उवाच। २-१-२क्ष् (१३७४)
अर्जुनो जयतां श्रेष्ठो मोचयित्वा मयं तदा।
किं चकार महातेजास्तन्मे ब्रूहि द्विजोत्तम ॥ २-१-२ (११२५७)
वैशम्पायन उवाच। २-१-३क्ष् (१३७५)
शृणु राजन्नवहितश्चरितं पूर्वकस्य ते।
मोक्षयित्वा मयं तत्र पार्थः शस्त्रभृतां वरः ॥ २-१-३ (११२५८)
गाण्डिवं कार्मुकश्रेष्ठं तूणी चाक्षयसायकौ।
दिव्यान्यस्त्राणि राजेन्द्र दुर्लभानि नृपैर्भुवि ॥ २-१-४ (११२५९)
रथध्वजपताकाश्च श्वेताश्वांश्च स वीर्यवान्।
एतानि पावकात्प्राप्य मुदा परमया युतः।
तस्थौ पार्थो महावीर्यस्तदा सह मयेन सः'॥ २-१-५ (११२६०)
ततोऽब्रवीन्मयः पार्थं वासुदेवस्य सन्निधौ।
ग्पाण्डवेन परित्रातस्तत्कृतं प्रत्यनुस्मरन्'॥ २-१-६ (११२६१)
प्राञ्जलिः श्लक्ष्णया वाचा पूजयित्वा पुनः पुनः। २-१-७ (११२६२)
मय उवाच।
अस्माच्च कृष्णात्सङ्क्रुद्धात्पावकाच्च दिधक्षतः ॥ २-१-७क्ष् (१३७६)
त्वया त्रातोऽस्मि कौन्तेय ब्रूहि किं करवाणि ते।

ग्अहं हि विश्वकर्मा वै असुराणां परन्तप ॥ २-१-८ (११२६३)
तस्मात्ते विस्मयं किञ्चित्कुर्यामन्यैः सुदुष्करम् ॥ २-१-९ (११२६४)
वैशम्पायन उवाच। २-१-१०क्ष् (१३७७)
एवमुक्तो महावीर्यः पार्थो मायाविदं मयम्।
ध्यात्वा मुहूर्तं कौन्तेयः प्रहसन्वाक्यमब्रवीत्'॥ २-१-१० (११२६५)
कृतमेव त्वया सर्वं स्वस्ति गच्छ महाऽसुर।
प्रीतिमान्भव मे नित्यं प्रीतिमन्तो वयं च ते ॥ २-१-११ (११२६६)
प्रोपकारादर्थं हि नादास्यामीति मे व्रतम्'। २-१-१२ (११२६७)
उवाच।
युक्तमेतत्त्वयि विभो यदात्थ पुरुषर्षभ ॥ २-१-१२क्ष् (१३७८)
प्रीतिपूर्वमहं किञ्चित्कर्तुमिच्छामि तेऽर्जुन।
अहं हि विश्वकर्मा वै दानवानां महाकविः ॥ २-१-१३ (११२६८)
ग्सोऽहं वै त्वत्कृते किञ्चित्कर्तुमिच्छामि पाण्डव।
ग्दानवानां पुरा पार्थ प्रासादा हि मया कृताः ॥ २-१-१४ (११२६९)
रम्याणि सुखगर्भाणि भोगाढ्यानि सहस्रशः।
उद्यानानि च रम्याणि सरांसि विविधानि च ॥ २-१-१५ (११२७०)
विचित्राणि च वस्त्राणि कामगानि रथानि च।
नगराणि विशालानि साट्टप्राकारवन्ति च ॥ २-१-१६ (११२७१)
वाहनानि च मुख्यानि विचित्राणि सहस्रशः।
बिलानि रमणीयानि सुखयुक्तानि वै भृशम्।
एते कृता मया तस्मादिच्छामि फल्गुन'॥ २-१-१७ (११२७२)
अर्जुन उवाच। २-१-१८क्ष् (१३७९)
प्राणकृच्छ्राद्विनिर्मुक्तमात्मानं मन्यसे मया।
एवं गते न शक्ष्यामि किञ्चित्कारयितुं त्वया ॥ २-१-१८ (११२७३)
न चापि तव सङ्कल्पं मोघमिच्छामि दानव।
कृष्णस्य क्रियतां किञ्चित्तथा प्रतिकृतं मयि ॥ २-१-१९ (११२७४)
वैशम्पायन उवाच। २-१-२०क्ष् (१३८०)
चोदितो वासुदेवस्तु मयं प्रति नरर्षभ।
मुहूर्तमिव सन्दध्यौ किमयं चोद्यतामिति ॥ २-१-२० (११२७५)
ततो विचिन्त्य मनसा लोकनाथः प्रजापतिः।
चोदयामास तं कृष्णः सभा वै क्रियतामिति ॥ २-१-२१ (११२७६)
यदि त्वं कर्तुकामोऽसि प्रियं शिल्पवतां वर।
धर्मराजस्य दयितां यादृशीमिह मन्यसे ॥ २-१-२२ (११२७७)
यां क्रियां नानुकुर्युस्ते मानवाः प्रेक्ष्य विष्ठिताः।
मनुष्यलोके सकले तादृशीं कुरु वै सभाम् ॥ २-१-२३ (११२७८)
यत्र द्विव्यानभिप्रायान्पश्येम विहितांस्त्वया।

आसुरान्मानुपांश्चैव तादृशीं कुरु वै सभाम् ॥ २-१-२४ (११२७९)
वैशम्पायन उवाच। २-१-२५x (१३८१)
प्रतिगृह्य तु तद्वाक्यं सम्प्रहृष्टो मयस्तदा।
विमानप्रतिमां चक्रे पाण्डवस्य शुभां सभाम् ॥ २-१-२५ (११२८०)
ततः कृष्णश्च पार्थश्च धर्मराजे युधिष्ठिरे।
सर्वमेतत्समावेद्य दर्शयामासतुर्मयम् ॥ २-१-२६ (११२८१)
तस्मै युधिष्ठिरः पूजां यथार्हमकरोत्तदा।
स तु तां प्रतिजग्राह मयः सत्कृत्य भारत ॥ २-१-२७ (११२८२)
स पूर्वदेवचरितं तदा तत्र विशाम्पते।
कथयामास दैतेयः पाण्डुपुत्रेषु भारत ॥ २-१-२८ (११२८३)
स कालं कञ्चिदाश्वस्य विश्वकर्मा विचिन्त्य तु।
सभां प्रचक्रमे कर्तुं पाण्डवानां महात्मनाम् ॥ २-१-२९ (११२८४)
अभिप्रायेण पार्थानां कृष्णस्य च महात्मनः।
पुण्येऽहनि महातेजाः कृतकौतुकमङ्गलः ॥ २-१-३० (११२८५)
तर्पयित्वा द्विजश्रेष्ठान्पायसेन सहस्रशः।
धनं बहुविधं दत्त्वा तेभ्य एव च वीर्यवान् ॥ २-१-३१ (११२८६)
सर्वर्तुगुणसम्पन्नां दिव्यरूपां मनोरमाम्।
दशकिष्कुसहस्रां तां मापयामास सर्वतः ॥ ॥ २-१-३१ (११२८७)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि प्रथमोऽध्यायः ॥ १.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१-१ सभाओ २-१-२८ पूर्वदेवो वृषपर्वा दानवस्तस्य चरितं बिन्दुसरसि यज्ञकरणादि ॥

सभापर्व - अध्याय ००२
॥ श्रीः ॥
२.२. अध्यायः २

Mahabharata - Sabha Parva - Chapter Topics
द्वारकां गच्छतः श्रीकृष्णस्य युधिष्ठरादिभिः सारत्यादिकरणम् ॥१.।अर्धयोजनपर्यन्तं गतानां कृष्णपाण्डवानां प

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

उषित्वा खाण्डवप्रस्थे सुखवासं जनार्दनः।
पार्थैः प्रीतिसमायुक्तैः पूजनार्होऽभिपूजितः ॥ २-२-१ (११२८८)
गमनाय मतिं चक्रे पितुर्दर्शनलालसः।
धर्मराजमथामन्त्र्य पृथां च पृथुलोचनः ॥ २-२-२ (११२८९)
ववन्दे चरणौ मूर्ध्ना जगद्वन्द्यः पितृष्वसुः।
स तया मूर्ध्न्युपाघ्रातः परिष्वक्तश्च केशवः ॥ २-२-३ (११२९०)
ददर्शानन्तरं कृष्णो भगिनीं स्वां महायशाः।
तामुपेत्य हृषीकेशः प्रीत्या बाष्पसमन्वितः ॥ २-२-४ (११२९१)
अर्थ्यं तथ्यं हितं वाक्यं लघु युक्तमनुत्तरम्।
उवाच भगवान्भद्रां सुभद्रां भद्रभाषिणीम् ॥ २-२-५ (११२९२)
तया स्वजनगामीनि श्रावितो वचनानि सः।
सम्पूजितश्चाप्यसकृच्छिरसा चाभिवादितः ॥ २-२-६ (११२९३)
तामनुज्ञाय वार्ष्णेयः प्रतिनन्द्य च भामिनीम्।
ददर्शानन्तरं कृष्णां धौम्यं चापि जनार्दनः ॥ २-२-७ (११२९४)
ववन्दे च यथान्यायं धौम्यं पुरुषसत्तमः।
द्रौपदीं सान्त्वयित्वा च सुभद्रां परिदाय च ॥ २-२-८ (११२९५)
भ्रातृनभ्यगमद्विद्वान्पार्थेन सहितो बली।
भ्रातृभिः पञ्चभिः कृष्णो वृतः शक्र इवामरैः ॥ २-२-९ (११२९६)
यात्राकालस्य योग्यानि कर्माणि गरुडध्वजः।
कर्तुकामः शुचिर्भूत्वा स्नातवान्समलङ्कृतः ॥ २-२-१० (११२९७)
अर्चयामास देवांश्च द्विजांश्च यदुपुङ्गवः।
माल्यजाप्यनमस्कारैर्गन्धैरुच्चावचैरपि ॥ २-२-११ (११२९८)
स कृत्वा सर्वकार्याणि प्रतस्थे तस्थुपां वरः।
उपेत्य स यदुश्रेष्ठो बाह्यकक्षाद्विनिर्गतः ॥ २-२-१२ (११२९९)
स्वस्ति वाच्यार्हतो विप्रान्दधिपात्रफलाक्षतैः।
वसु प्रदाय च ततः प्रदक्षिणमथाकरोत् ॥ २-२-१३ (११३००)
काञ्चनं रथमास्थाय ताक्ष्र्यकेतनमाशुगम्।
गदाचक्रासिशार्ङ्गाद्यैरायुधैरावृतं शुभम् ॥ २-२-१४ (११३०१)
सुतिथावथ नक्षत्रे मुहूर्ते च गुणान्विते।
प्रययौ पुण्डरीकाक्षः शैब्यसुग्रीववाहनः ॥ २-२-१५ (११३०२)
अन्वारुरोह चाप्येनं प्रेम्णा राजा युधिष्ठिरः।
अपास्य चास्य यन्तारं दारुकं यन्तृसत्तमम् ॥ २-२-१६ (११३०३)
अभीषून्सम्प्रजग्राह स्वयं कुरुपतिस्तदा।
उपारुह्यार्जुनश्चाऽपि चामरव्यजनं सितम् ॥ २-२-१७ (११३०४)
रुक्मदण्डं बृहद्बाहुर्विदुधाव प्रदक्षिणम्।

तथैव भीमसेनोऽपि रथमारुह्य वीर्यवान् ॥ २-२-१८ (११३०५)
ग्छत्रं शतशलाकं च दिव्यमाल्योपशोभितम्।
वैडूर्यमणिदण्डं च चामीकरविभूषितम्। २-२-१९ (११३०६)
दधार तरसा भीमः मुच्छत्रं शार्ङ्गधन्वने।
भीमसेनार्जुनौ चापि यमावरिनिषूदनौ'॥ २-२-२० (११३०७)
पृष्ठतोऽनुययुः कृष्णमृत्विक्पौरजनैर्वृता।
स तथा भ्रातृभिः सर्वैः केशवः परवीरहा ॥ २-२-२१ (११३०८)
अन्वीयमानः शुशुभे शिष्यैरिव गुरुः प्रियैः।
ग्अभिमन्युं च सौभद्रं वृद्धैः परिवृतस्तथा ॥ २-२-२२ (११३०९)
रथमारोप्य निर्यातो धौम्यो ब्राह्मणपुङ्गवः।
इन्द्रप्रस्थमतिक्रम्य क्रोशमात्रं महाद्युतिः'।
पार्थमामन्त्र्य गोविन्दः परिष्वज्य सुपीडितम् ॥ २-२-२३ (११३१०)
युधिष्ठरं पूजयित्वा भीमसेनं यमौ तथा।
परिष्वक्तो भृशं तैस्तु यमाभ्यामभिवादितः ॥ २-२-२४ (११३११)
योजनार्धमथो गत्वा कृष्णः परपुरञ्जयः।
युधिष्ठिरं समामन्त्र्य निवर्तस्वेति भारत ॥ २-२-२५ (११३१२)
ततोऽभिवाद्य गोविन्दः पादौ जग्राह धर्मवित्।
उत्थाप्य धर्मराजस्तु मूर्ध्न्युपाघ्राय केशवम् ॥ २-२-२६ (११३१३)
पाण्डवो यादवश्रेष्ठं कृष्णं कमललोचनम्।
गम्यतामित्यनुज्ञाप्य धर्मराजो युधिष्ठिरः ॥ २-२-२७ (११३१४)
ततस्तैः संविदं कृत्वा यथावन्मधुसूदनः।
निवर्त्य च तथा कृच्छ्रात्पाण्डवान्सपदानुगान् ॥ २-२-२८ (११३१५)
स्वां पुरीं प्रययौ हृष्टो यथा शक्रोऽमरावतीम् ॥
लोचनैरनुजग्मुस्ते तमादृष्टिपथात्तदा ॥ २-२-२९ (११३१६)
मनोभिरनुजग्मुस्ते कृष्णं प्रीतिसमन्वयात्।
अतृप्तमनसामेव तेषां केशवदर्शने ॥ २-२-३० (११३१७)
क्षिप्रमन्तर्दधे शौरिश्चक्षुषां प्रियदर्शनः।
अकामा एव पार्थास्ते गोविन्दगमानसाः ॥ २-२-३१ (११३१८)
निवृत्योपययुस्तूर्णं स्वं पुरं पुरुषर्षभाः।
स्यन्दनेनाथ कृष्णोऽपि त्वरितं द्वारकामगात् ॥ २-२-३२ (११३१९)
सात्वतेन च वीरेण पृष्ठतो यायिना तदा।
दारुकेण च सूतेन सहितो देवकीसुतः।
स गतो द्वारकां विष्णुर्गरुत्मानिव वेगवान् ॥ २-२-३३ (११३२०)
वैशम्पायन उवाच। २-२-३४क्ष् (१३८२)
निवृत्य धर्मराजस्तु सह भ्रातृभिरच्युतः।
सुहृत्परिवृतो राजा प्रविवेश पुरोत्तमम् ॥ २-२-३४ (११३२१)

विसृज्य सुहृदः सर्वान्भ्रातॄन्पुत्रांश्च धर्मराट्।
मुमोद पुरुषव्याघ्रो द्रौपद्या सहितो नृप ॥ २-२-३५ (११३२२)
केशवोपि मुदा युक्तः प्रविवेश पुरोत्तमम्।
पूज्यमानो यदुश्रेष्ठैरुग्रसेनमुखैस्तथा ॥ २-२-३६ (११३२३)
आहुकं पितरं वृद्धं मातरं च यशस्विनीम्।
अभिवाद्य बलं चैव स्थितः कमललोचनः ॥ २-२-३७ (११३२४)
प्रद्युम्नसाम्बनिशठांश्चारुदेष्णं गदं तथा।
अनिरुद्धं च भानुं च परिष्वज्य जनार्दनः ॥ २-२-३८ (११३२५)
स वृद्धैरभ्यनुज्ञातो रुक्मिण्या भवनं ययौ।
गस तत्र भवने दिव्ये प्रमुमोद सुखी सुखम् ॥ २-२-३९ (११३२६)
एतस्मिन्नन्तरे राजन्मयो दैत्याधिपस्तदा।
विधिवत्कल्पयामास सभां धर्मसुताय वै ॥ ॥ २-२-४० (११३२७)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि द्वितीयोऽध्यायः ॥ २.।

सभापर्व - अध्याय ००३
॥ श्रीः ॥
२.३. अध्यायः ३

Mahabharata - Sabha Parva - Chapter Topics
सभानिर्माणसामग्र्यानयनाय बिन्दुसरः प्रति मयस्य गमनम् ।।१.।गदाशङ्खाभ्यां सह सामग्रीं गृहीत्वा मयस्य खाण

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

अथाब्रवीन्मयः पार्थमर्जुनं जयतां वरम्।
आपृच्छे त्वां गमिष्यामि पुनरेष्यामि चाप्यहम् ॥ २-३-१ (११३२८)
गविश्रुतां त्रिषु लोकेषु पार्थ दिव्यां सभां तव।
प्राणिनां विस्मयकरीं तव प्रियविवर्धिनीम्।
पाण्डवानां च सर्वेषां करिष्यामि धनञ्जय'॥ २-३-२ (११३२९)
उत्तरेण तु कैलासं मैनाकं पर्वतं प्रति।
यियक्षमाणेषु पुरा दानवेषु मया कृतम् ॥ २-३-३ (११३३०)
चित्रं मणिमयं भाण्डं रम्यं बिन्दुसारः प्रति।

सभायां सत्यसन्धस्य यदासीद्वृषपर्वणः ॥ २-३-४ (११३३१)
आगमिष्यामि तद्गृह्य यदि तिष्ठति भारत।
ततः सभां करिष्यामि पाण्डवस्य यशस्विनीम् ॥ २-३-५ (११३३२)
मनः प्रह्लादिनीं चित्रां सर्वरत्नविभूषिताम्।
अस्ति बिन्दुसारस्युग्रा गदा च कुरुनन्दन ॥ २-३-६ (११३३३)
निहिता यौवनाश्वेन राज्ञा हत्वा रणे रिपून्।
सुवर्णबिन्दुभिश्चित्रा गुर्वी भारसहा दृढा ॥ २-३-७ (११३३४)
सा वै शतसहस्रस्य सम्मिता शत्रुघातिनी।
अनुरूपा च भीमस्य गाण्डीवं भवतो यथा ॥ २-३-८ (११३३५)
वारुणश्च महाशङ्खो देवदत्तः सुघोषवान्।
सर्वमेतत्प्रदास्यामि भवते नात्र संशयः ॥ २-३-९ (११३३६)
वैशम्पायन उवाच। २-३-१०क्ष् (१३८३)
इत्युक्त्वा सोऽसुरः पार्थं प्रागुदीचीं दिशं गतः।
अथोत्तरेण कैलासान्मैनाकं पर्वतं प्रति ॥ २-३-१० (११३३७)
हिरण्यशृङ्गः सुमहान्महामणिमयो गिरिः।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ॥ २-३-११ (११३३८)
द्रष्टुं भागीरथीं गङ्गामुवास बहुलाः समाः।
यत्रेष्टं सर्वभूतानामीश्वरेण महात्मना ॥ २-३-१२ (११३३९)
आहृताः क्रतवो मुख्याः शतं भरतसत्तम।
यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः ॥ २-३-१३ (११३४०)
शोभार्थं विहितास्तत्र न तु दृष्टान्ततः कृताः।
यत्रेष्ट्वा स गतः सिद्धिं सहस्राक्षः शचीपतिः ॥ २-३-१४ (११३४१)
यत्र भूतपतिः सृष्ट्वा सर्वाँल्लोकान्सनातनः।
अपस्यते तिग्मतेजाः स्थितो भूतैः सहस्रशः ॥ २-३-१५ (११३४२)
नरनारायणौ ब्रह्मा यमः स्थाणुश्च पञ्चमः।
उपासते यत्र परं सहस्रयुगपर्यये ॥ २-३-१६ (११३४३)
यत्रेष्टं वासुदेवेन सत्रैर्वर्षगणान्बहून्।
श्रद्दधानेन सततं धर्मसम्प्रतिपत्तये ॥ २-३-१७ (११३४४)
सुवर्णमालिनो यूपाश्चैत्याश्चाप्यतिभास्वराः।
ददौ यत्र सहस्राणि प्रयुतानि च केशवः ॥ २-३-१८ (११३४५)
तत्र गत्वा स जग्राह गदां शङ्खं च भारत।
ग्तस्माद्गिरेरुपादाय शिलाः सुरुचिरावहाः'।
स्फाटिकं च सभाद्रव्यं यदासीद्वृषपर्वणः ॥ २-३-१९ (११३४६)
किङ्करैः सह रक्षोभिर्यदरक्षन्महद्धनम्।
तदगृह्णान्मयस्तत्र गत्वा सर्वं महाऽसुरः ॥ २-३-२० (११३४७)
तदाहृत्य च तां चक्रे सोऽसुरोऽप्रतिमां सभाम्।

विश्रुतां त्रिषु लोकेषु दिव्यां मणिमयीं शुभाम् ॥ २-३-२१ (११३४८)
गदां च भीमसेनाय प्रवरां प्रददौ तदा।
देवदत्तं चार्जुनाय शङ्खप्रवरमुत्तमम् ॥ २-३-२२ (११३४९)
यस्य शङ्खस्य नादेन भूतानि प्रचकम्पिरे।
ग्स कालं कञ्चिदाश्वस्य विश्वकर्मा विचिन्त्य च ॥ २-३-२३ (११३५०)
सभां प्रचक्रमे कर्तुं पाण्डवानां महात्मनाम्।
अभिप्रायेण पार्थानां कृष्णस्य च महात्मनः ॥ २-३-२४ (११३५१)
सर्वर्तुगुणसम्पन्नां दिव्यरूपामलङ्कृताम्।
तर्पयित्वा द्विजश्रेष्ठान्पायसेन सहस्रशः।
सभा च सा महाराज शातकुम्भमयद्रुमा ॥ २-३-२५ (११३५२)
दशकिष्कुसहस्राणि समन्तादायताभवत्।
यथा वह्नेर्यथार्कस्य सोमस्य च यथा सभा ॥ २-३-२६ (११३५३)
भ्राजमाना तथाऽत्यर्थं दधार परमं वपुः।
अभिघ्नतीव प्रभया प्रभामर्कस्य भास्वराम् ॥ २-३-२७ (११३५४)
प्रबभौ ज्वलमानेव दिव्या दिव्येन वर्चसा।
नवमेघप्रतीकाशा दिवमाकृत्य विष्ठिता।
आयता विपुला रम्या विपाप्मा विगतक्लमा ॥ २-३-२८ (११३५५)
उत्तमद्रव्यसम्पन्ना रत्नप्राकारतोरणा।
बहुचित्रा बहुधना सुकृता विश्वकर्मणा ॥ २-३-२९ (११३५६)
न दाशार्ही सुधर्मा वा ब्रह्मणो वाथ तादृशी।
सभा रूपेण सम्पन्ना यां चक्रे मतिमान्मयः ॥ २-३-३० (११३५७)
तां स्म तत्र मयेनोक्ता रक्षन्ति च वहन्ति च।
सभामष्टौ सहस्राणि किङ्करा नाम राक्षसाः ॥ २-३-३१ (११३५८)
अन्तरिक्षचरा घोरा महाकाया महाबलाः।
रक्ताक्षाः पिङ्गलाक्षाश्च शुक्तिकर्णाः प्रहारिणः ॥ २-३-३२ (११३५९)
तस्यां सभायां नलिनीं चकाराप्रतिमां मयः।
वैदूर्यपत्रविततां मणिनालमयाम्बुजाम् ॥ २-३-३३ (११३६०)
पद्मसौगन्धिकवतीं नानाद्विजगणायुताम्।
पुष्पितैः पङ्कजैश्चित्रां कूर्मैर्मत्स्यैश्च काञ्चनैः।
चित्रस्फटिकसोपानां निष्पङ्कसलिलां शुभाम् ॥ २-३-३४ (११३६१)
मन्दानिलसमुद्धूतां मुक्ताबिन्दुभिराचिताम्।
महामणिशिलापट्टबद्धपर्यन्तवेदिकाम् ॥ २-३-३५ (११३६२)
मणिरत्नचितां तां तु केचिदभ्येत्य पार्थिवाः।
दृष्ट्वापि नाभ्यजानन्त तेऽज्ञानात्प्रपतन्त्युत ॥ २-३-३६ (११३६३)
तां सभामभितो नित्यं पुष्पवन्तो महाद्रुमाः।
आसन्नानाविधा लोलाः शीतच्छाया मनोरमाः ॥ २-३-३७ (११३६४)

काननानि सुगन्धीनि पुष्करिण्यश्च सर्वशः।
हंसकारण्डवोपेताश्चक्रवाकोपशोभिताः ॥ २-३-३८ (११३६५)
जलजानां च पद्मानां स्थलजानां च सर्वशः।
मारुतो गन्धमादाय पाण्डवान्स्म निषेवते ॥ २-३-३९ (११३६६)
ईदृशीं तां सभां कृत्वा मासैः परिचतुर्दशैः।
निष्ठितां धर्मराजाय मयो राजन्न्यवेदयत् ॥ ॥ २-३-४० (११३६७)

इति श्रीमन्महाभारते सभापर्वणि तृतीयोऽध्यायः ॥ ३.।

सभापर्व - अध्याय ००४
॥ श्रीः ॥
२.४. अध्यायः ४

Mahabharata - Sabha Parva - Chapter Topics
ब्राह्मणान्भोजयित्वा युधिष्ठिरस्य सभाप्रवेशः ॥१.।ऋषीणां क्षत्रियाणां देवगन्धर्वादीनां च तत्रोपवेशनम् ॥२.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ग्तां तु कृत्वा सभां श्रेष्ठां मयश्चार्जुनमब्रवीत्।
भूतानां च महावीर्यो ध्वजाग्रे किङ्करो गणः ॥ २-४-१ (११३६८)
तव विष्फारघोषेण मेघवन्निनदिष्यति।
अयं हि सूर्यसङ्काशो ज्वलनस्य रथो महान् ॥ २.। २-४-२ (११३६९)
इमे च दिविजाः श्वेता वीर्यवन्तो हयोत्तमाः।
मायामयः कृतो ह्येष ध्वजो वानरलक्षणः ॥ २-४-३ (११३७०)
असज्जमानो वृक्षेषु धूमकेतुरिवोच्छ्रितः।
बहुवर्णं हि लक्ष्येत ध्वजं वानरलक्षणम् ॥ २-४-४ (११३७१)
ध्वजोत्कटं ह्यनवमं युद्धे द्रक्ष्यसि विष्ठितम्।
एव वीरः सव्यसाचिन्ध्वजस्यान्ते भविष्यति ॥ २-४-५ (११३७२)
वैशम्पायन उवाच। २-४-६क्ष् (१३८४)
इत्युक्त्वाऽऽलिङ्ग्य वीभत्सुं विसृष्टः प्रययौ मयः'। २-४-६ (११३७३)
ततः प्रवेशनं तस्यां चक्रे राजा युधिष्ठिरः।
अयुतं भोजयित्वा तु ब्राह्मणानां नराधिपः ॥ २-४-७ (११३७४)

साज्येन पायसेनैव मधुना मिश्रितेन च।
भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वाराहहारिणैः।
कृसरेणाथ जीवन्त्या हविष्येण च सर्वशः ॥ २-४-८ (११३७५)
मांसप्रकारैर्विविधैः खाद्यैश्चापि तथा नृप।
चोष्यैश्च विविधै राजन्पेयैश्च बहुविस्तरैः ॥ २-४-९ (११३७६)
अहतैश्चैव वासोभिर्माल्यैरुच्चावचैरपि।
तर्पयामास विप्रेन्द्रान्नानादिग्भ्यः समागतान् ॥ २-४-१० (११३७७)
ददौ तेभ्यः सहस्राणि गवां प्रत्येकशः पुनः।
पुण्याहघोषस्तत्रासीद्दिवस्पृगिव भारत ॥ २-४-११ (११३७८)
वादित्रैर्विविधैर्दिव्यैर्गन्धैरुच्चावचैरपि।
पूजयित्वा कुरुश्रेष्ठो देवतानि निवेश्य च ॥ २-४-१२ (११३७९)
तत्र मल्ला नटा झल्लाः सूता वैतालिकास्तथा।
उपतस्थुर्महात्मानं धर्मपुत्रं युधिष्ठिरम् ॥ २-४-१३ (११३८०)
तथा स कृत्वा पूजां तां भ्रातृभिः सह पाण्डवः।
तस्यां सभायां रम्यायां रेमे शक्रो यथा दिवि ॥ २-४-१४ (११३८१)
सभायामृषयस्तस्यां पाण्डवैः सह आसते।
आसाञ्चक्रुर्नरेन्द्राश्च नानादेशसमागताः ॥ २-४-१५ (११३८२)
असितो देवलः सत्यः सर्पिर्माली महाशिराः।
अर्वा वसुः सुमित्रश्च मैत्रेयः शुनको बलिः ॥ २-४-१६ (११३८३)
बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः।
सुमन्तुर्जैमिनिः पैलो व्यासशिष्यास्तथा वयम् ॥ २-४-१७ (११३८४)
तित्तिरिर्याज्ञवल्क्यश्च ससुतो रोमहर्षणः।
अप्सुहोम्यश्च धौम्यश्च अणीमाण्डव्यकौशिकौ ॥ २-४-१८ (११३८५)
दामोष्णीपस्त्रैबलीश्च पर्णादो घटजानुकः।
मौञ्जायनो वायुभक्षः पाराशर्यश्च सारिकः ॥ २-४-१९ (११३८६)
बलिवाकः सिनीवाकः सप्तपालः कृतश्रमः।
जातूकर्णः शिखावांश्च आलम्बः पारिजातकः ॥ २-४-२० (११३८७)
पर्वतश्च महाभागो मार्कण्डेयो महामुनिः।
पवित्रपाणिः सावर्णो भालुकिर्गालवस्तथा ॥ २-४-२१ (११३८८)
जङ्घाबन्धुश्च रैभ्यश्च कोपवेगस्तथा भृगुः।
हरिबभ्रुश्च कौण्डिन्यो बभ्रुमाली सनातनः ॥ २-४-२२ (११३८९)
काक्षीवानौशिजश्चैव नाचिकेतोऽथ गौतमः।
पैङ्ग्यो वराहः शुनकः शाण्डिल्यश्च महातपाः ॥ २-४-२३ (११३९०)
कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च।
मुनयो धर्मविद्वांसो धृतात्मानो जितेन्द्रियाः ॥ २-४-२४ (११३९१)
एते चान्ये च बहवो वेदवेदाङ्गपारगाः।

उपासते महात्मानं सभायामृषिसत्तमाः ॥ २-४-२५ (११३९२)
कथयन्तः कथाः पुण्या धर्मज्ञाः शुचयोऽमलाः।
तथैव क्षत्रियश्रेष्ठा धर्मराजमुपासते ॥ २-४-२६ (११३९३)
श्रीमान्महात्मा धर्मात्मा मुञ्जकेतुर्विवर्धनः।
सङ्ग्रामजिद्दुर्मुखश्च उग्रसेनश्च वीर्यवान्। २-४-२७ (११३९४)
कक्षसेनः क्षितिपतिः क्षेमकश्चापराजितः।
कम्बोजराजः कमठः कम्पनश्च महाबलः ॥ २-४-२८ (११३९५)
सततं कम्पयामास यवनानेक एव यः।
बलपौरुषसम्पन्नान्कृतास्त्रानमितौजसः।
यथाऽसुरान्कालकेयान्देवो वज्रधरस्तथा ॥ २-४-२९ (११३९६)
जटासुरो मद्रकानां च राजा
कुन्तिः पुलिन्दश्च किरातराजः।
तथाङ्गवाङ्गौ सहपुण्ड्रकेण
पाण्ड्योड्रराजौ च सहान्ध्रकेण ॥ २-४-३० (११३९७)
अङ्गो वङ्गः सुमित्रश्च शैब्यश्चामित्रकर्शनः।
किरातराजः सुमना यवनाधिपतिस्तथा ॥ २-४-३१ (११३९८)
चाणूरो देवरातश्च भोजो भीमरथश्च यः।
श्रुतायुधश्च कालिङ्गो जयसेनश्च मागधः ॥ २-४-३२ (११३९९)
सुकर्मा चेकितानश्च पुरुश्चामित्रकर्शनः।
केतुमान्वसुदानश्च वैदेहोऽथ कृतक्षणः ॥ २-४-३३ (११४००)
सुधर्मा चानिरुद्धश्च श्रुतायुश्च महाबलः।
अनूपराजो दुर्धर्षः क्रमजिच्च सुदर्शनः ॥ २-४-३४ (११४०१)
शिशुपालः सहसुतः करूपाधिपतिस्तथा।
वृष्णीनां चैव दुर्धर्षाः कुमारा देवरूपिणः ॥ २-४-३५ (११४०२)
आहुको विपृथुश्चैव गदः सारण एव च।
अक्रूरः कृतवर्मा च सत्यकश्च शिनेः सुतः ॥ २-४-३६ (११४०३)
भीष्मकोऽथाकृतिश्चैव द्युमत्सेनश्च वीर्यवान्।
केकयाश्च महेष्वासा यज्ञसेनश्च सोमकिः ॥ २-४-३७ (११४०४)
केतुमान्वसुमांश्चैव कृतास्त्रश्च महाबलः।
एते चान्ये च बहवः क्षत्रिया मुख्यसंमताः। २-४-३८ (११४०५)
उपासते सभायां स्म कुन्तीपुत्रं युधिष्ठिरम्।
अर्जुनं ये व संश्रित्य राजपुत्रा महाबलाः ॥ २-४-३९ (११४०६)
अशिक्षन्त धनुर्वेदं रौरवाजिनवाससः।
तत्रैव शिक्षिता राजन्कुमारा वृष्णिनन्दनाः। २-४-४० (११४०७)
रौक्मिणेयश्च साम्बश्च युयुधानश्च सात्यकिः।
सुधर्मा चानिरुद्धश्च शैब्यश्च नरपुङ्गवः ॥ २-४-४१ (११४०८)

एते चान्ये च बहवो राजानः पृथिवीपते।
धनञ्जयसखा चात्र नित्यमास्ते स्म तुम्बुरुः ॥ २-४-४२ (११४०९)
उपासते महात्मानमासीनं सप्तविंशतिः।
चित्रसेनः सहामात्यो गन्धर्वाप्सरसस्तथा ॥ २-४-४३ (११४१०)
गीतवादित्रकुशलाः साम्यतालविशारदाः।
प्रमाणेऽथ लये स्थाने किन्नराः कृतनिश्रमाः ॥ २-४-४४ (११४११)
सञ्चोदितास्तुम्बुरुणा गन्धर्वसहितास्तदा।
गायन्ति दिव्यतानैस्ते यथान्यायं मनस्विनः ॥ २-४-४५ (११४१२)
पाण्डुपुत्रानृषींश्चैव रमयन्त उपासते।
तस्यां सभायामासीनाः सुव्रताः सत्यसङ्गराः ॥ २-४-४६ (११४१३)
दिवीव देवा ब्रह्माणं युधिष्ठिरमुपासते ॥ ॥ २-४-४७ (११४१४)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि चतुर्थोऽध्यायः ॥ ४.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-४-२९ कालकेयाः कालकाया अपत्यान्यसुराः ॥

सभापर्व - अध्याय ००५
॥ श्रीः ॥
२.५. अध्यायः ५

Mahabharata - Sabha Parva - Chapter Topics
तत्रागतेन युधिष्ठिरपूजितेन नारदेन कुशलप्रश्नव्याजेन राजनीतिकथनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

अथ तत्रोपविष्टेषु पाण्डवेषु महात्मसु।
महत्सु चोपविष्टेषु गन्धर्वेषु च भारत ॥ २-५-१ (११४१५)
वेदोपनिषदां वेत्ता ऋषिः सुरगणार्चितः।
इतिहासपुराणज्ञः क्रियाकल्पविशेषवित् ॥ २-५-२ (११४१६)
ग्स्तुतस्तोमग्रहस्तोभपदक्रमविभागवित्।
शिक्षाक्षरविभागज्ञः पुराकल्पविशेषवित् ॥ २-५-३ (११४१७)

आदिकल्पार्थवेत्ता च कल्पसूत्रार्थतत्त्ववित्।
ब्रह्मचर्यव्रतपर ऊहापोहविशारदः ॥ २-५-४ (११४१८)
नृत्तगान्धर्वसेवी च सर्वत्राप्रतिमस्तथा।
अष्टादशानां विद्यानां कोशभूतो महाद्युतिः'॥ २-५-५ (११४१९)
न्यायविद्धर्मतत्त्वज्ञः षडङ्गविदनुत्तमः।
ऐक्यसंयोगनानात्वसमवायविशारदः ॥ २-५-६ (११४२०)
वक्ता प्रगल्भो मेधावी स्मृतिमान्नयवित्कविः।
परापरविभागज्ञः प्रमाणकृतनिश्चयः ॥ २-५-७ (११४२१)
पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित्।
उत्तरोत्तरवक्ता च वदतोपि बृहस्पतेः ॥ २-५-८ (११४२२)
धर्मकामार्थमोक्षेषु यथावत्कृतनिश्चयः।
तथा भुवनकोशस्य सर्वस्यास्य महामतिः ॥ २-५-९ (११४२३)
प्रत्यक्षदर्शी लोकस्य तिर्यगूर्ध्वमधस्तथा।
साङ्ख्ययोगविभागज्ञो निर्विवित्सुः सुरासुरान् ॥ २-५-१० (११४२४)
सन्धिविग्रहतत्त्वज्ञस्त्वनुमानविभागवित्।
षाड्गुण्यविधियुक्तश्च सर्वशास्त्रविशारदः ॥ २-५-११ (११४२५)
युद्धगान्धर्वसेवी च सर्वत्राप्रतिघस्तथा।
एतैश्चान्यैश्च बहुभिर्युक्तो गुणगणैर्मुनिः ॥ २-५-१२ (११४२६)
लोकाननुचरन्सर्वानागमत्तां सभां नृप।
नारदः सुमहातेजा ऋषिभिः सहितस्तदा ॥ २-५-१३ (११४२७)
पारिजातेन राजेन्द्र पर्वतेन च धीमता।
सुमुखेन च सौम्येन देवर्षिरमितद्युतिः ॥ २-५-१४ (११४२८)
सभास्थान्पाण्डवान्द्रष्टुं प्रीयमाणो मनोजवः।
जयाशीर्भिस्तु तं विप्रो धर्मराजानमार्चयत् ॥ २-५-१५ (११४२९)
तमागतमृषिं दृष्ट्वा नारदं सर्वधर्मवित्।
सहसा पाण्डवश्रेष्ठः प्रत्युत्थायानुजैः सह ॥ २-५-१६ (११४३०)
अभ्यवादयत प्रीत्या विनयावनतस्तदा।
तदर्हमासनं तस्मै सम्प्रदाय यथाविधि ॥ २-५-१७ (११४३१)
गां चैव मधुपर्कं च सम्प्रदायार्घ्यमेव च।
अर्चयामास रत्नैश्च सर्वकामैश्च धर्मवित् ॥ २-५-१८ (११४३२)
तुतोष च यथावच्च पूजां प्राप्य युधिष्ठिरात्।
सोऽर्चितः पाण्डवैः सर्वैर्महर्षिर्वेदपारगः।
धर्मकामार्थसंयुक्तं पप्रच्छेदं युधिष्ठिरम् ॥ २-५-१९ (११४३३)
नारद उवाच। २-५-२०क्ष् (१३८५)
कच्चिदर्थाश्च कल्पन्ते धर्मे च रमते मनः।
सुखानि चानुभूयन्ते मनश्च न विहन्यते ॥ २-५-२० (११४३४)

कच्चिदाचरितां पूर्वैर्नरदेवपितामहैः।
वर्तसे वृत्तिमक्षुद्रां धर्मार्थसहितां त्रिषु ॥ २-५-२१ (११४३५)
कच्चिदर्थेन वा धर्मं धर्मेणार्थमथापि वा।
उभौ वा प्रीतिसारेण न कामेन प्रबाधसे ॥ २-५-२२ (११४३६)
कच्चिदर्थं च धर्मं च कामं च जयतां वर।
विभज्य काले कालज्ञः सदा वरद सेवसे ॥ २-५-२३ (११४३७)
कच्चिद्राजगुणैः षड्भिः सप्तोपायांस्तथाऽनघ।
बलाबलं तथा सम्यक्चतुर्दश परीक्षसे ॥ २-५-२४ (११४३८)
कच्चिदात्मानमन्वीक्ष्य परांश्च जयतां वर।
तथा सन्धाय कर्माणि अष्टौ भारत सेवसे ॥ २-५-२५ (११४३९)
कच्चित्प्रकृतयः सप्त न लुप्ता भरतर्षभ।
आढ्यास्तथा व्यसनिनः स्वनुरक्ताश्च सर्वशः ॥ २-५-२६ (११४४०)
कच्चिन्न कृतकैर्दूतैर्ये चाप्यपरिशङ्किताः।
त्वत्तो वा तव चामात्यैर्भिद्यते मन्त्रितं तथा ॥ २-५-२७ (११४४१)
मित्रोदासीनशत्रूणां कच्चिद्वेत्सि चिकीर्षितम्।
कच्चित्सन्धिं यथाकालं विग्रहं चोपसेवसे ॥ २-५-२८ (११४४२)
कच्चिद्वृत्तिमुदासीने मध्यमे चानुमन्यसे।
कच्चिदात्मसमा वृद्धाः शुद्धाः सम्बोधनक्षमाः ॥ २-५-२९ (११४४३)
कुलीनाश्चानुरक्ताश्च कृतास्ते वीरमन्त्रिणः।
विजयो मन्त्रमूलो हि राज्ञो भवति भारत ॥ २-५-३० (११४४४)
कच्चित्संवृतमन्त्रैस्ते अमात्यैः शास्त्रकोविदैः।
राष्ट्रं सुरक्षितं तात शत्रुभिर्न विलुप्यते ॥ २-५-३१ (११४४५)
कच्चिन्निद्रावशं नैषि कच्चित्काले विबुद्ध्यसे।
कच्चिच्चापररात्रेषु चिन्तयस्यर्थमर्थवित् ॥ २-५-३२ (११४४६)
कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह।
कच्चित्ते मन्त्रितो मन्त्रो न राष्ट्रं परिधावति ॥ २-५-३३ (११४४७)
कच्चिदर्थान्विनिश्चित्य लघुमूलान्महोदयान्।
क्षिप्रमारभसे कर्तुं न विघ्नयसि तादृशान् ॥ २-५-३४ (११४४८)
कच्चिन्न स्रवे कर्मान्ताः परोक्षास्ते विशङ्किताः।
सर्वे वा पुनरुत्सृष्टाः संसृष्टं चात्र कारणम् ॥ २-५-३५ (११४४९)
आप्तैरलुब्धैः क्रमिकैस्ते च कच्चिदनुष्ठिताः।
कच्चिद्राजन्कृतान्येव कृतप्रायाणि वा पुनः ॥ २-५-३६ (११४५०)
विदुस्ते वीर कर्माणि नानवाप्तानि कानिचित्।
कच्चित्कारणिका धर्मे सर्वशास्त्रेषु कोविदाः।
कारयन्ति कुमारांश्च योधमुख्यांश्च सर्वशः ॥ २-५-३७ (११४५१)
कच्चित्सहस्रैर्मूर्खाणामेकं क्रीणासि पण्डितम्।

पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्नः श्रेयसं परम् ॥ २-५-३८ (११४५२)
कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः।
यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥ २-५-३९ (११४५३)
एकोप्यमात्यो मेधावी शूरो दान्तो विचक्षणः।
राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ॥ २-५-४० (११४५४)
कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ २-५-४१ (११४५५)
कच्चिद्द्विषामविदितः प्रतिपन्नश्च सरवदा।
नित्ययुक्तो रिपून्सर्वान्वीक्षसे रिपुसूदन ॥ २-५-४२ (११४५६)
कच्चिद्विनयसम्पन्नः कुलपुत्रो बहुश्रुतः।
अनसूयुरनुप्रष्टा सत्कृतस्ते पुरोहितः ॥ २-५-४३ (११४५७)
कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः।
हुतं च होष्यमाणं च काले वेदयते सदा ॥ २-५-४४ (११४५८)
कच्चिदङ्गेषु निष्णातो ज्योतिपः प्रतिपादकः।
उत्पातेषु च सर्वेषु दैवज्ञः कुशलस्तव ॥ २-५-४५ (११४५९)
कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः।
जघन्याश्च जघन्येषु भृत्याः कर्मसु योजिताः ॥ २-५-४६ (११४६०)
अमात्यानुपधातीतान्पितृपैतामहाञ्शुचीन्।
श्रेष्ठाञ्श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु ॥ २-५-४७ (११४६१)
कच्चिन्नोग्रेण दण्डेन भृशमुद्विजसे प्रजाः।
राष्ट्रं तवानुशासन्ति मन्त्रिणो भरतर्षभ ॥ २-५-४८ (११४६२)
कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा।
उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः ॥ २-५-४९ (११४६३)
कच्चिद्धृष्टश्च शूरश्च मतिमान्धृतिमाञ्शुचिः।
कुलीनश्चानुरक्तश्च दक्षः सेनापतिस्तथा। २-५-५० (११४६४)
कच्चिद्बलस्य ते मुख्याः सर्वयुद्धविशारदाः।
धृष्टावदाता विक्रान्तास्त्वया सत्कृत्य मानिताः ॥ २-५-५१ (११४६५)
कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम्।
सम्प्राप्तकाले दातव्यं ददासि न विकर्षसि ॥ २-५-५२ (११४६६)
कालातिक्रमणादेते भक्तवेतनयोर्भृताः।
भर्तुः कुप्यन्ति दौर्गत्यात्सोऽनर्थः सुमहान्स्मृतः ॥ २-५-५३ (११४६७)
कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः।
कच्चित्प्राणांस्तवार्थेषु सन्त्यजन्ति सदा युधि ॥ २-५-५४ (११४६८)
कच्चिन्नैको बहूनर्थान्सर्वशः साम्परायिकान्।
अनुशास्ति यथाकामं कामात्मा शासनातिगः ॥ २-५-५५ (११४६९)
कच्चित्पुरुषकारेण पुरुषः कर्म शोभयन्।

लभते मानमधिकं भूयो वा भक्तवेतनम् ॥ २-५-५६ (११४७०)
कच्चिद्विद्याविनीतांश्च नराञ्ज्ञानविशारदान्।
यथार्हं गुणतश्चैव दानेनाभ्युपपद्यसे ॥ २-५-५७ (११४७१)
कच्चिद्दारान्मनुष्याणां तवार्थे मृत्युमीयुषाम्।
व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ॥ २-५-५८ (११४७२)
कच्चिद्भयादुपगतं क्षीणं वा रिपुमागतम्।
युद्धे वा विजितं पार्थ पुत्रवत्परिरक्षसि ॥ २-५-५९ (११४७३)
कच्चित्त्वमेव सर्वस्याः पृथिव्याः पृथिवीपते।
समश्चानभिशङ्क्यश्च यथा माता यथा पिता ॥ २-५-६० (११४७४)
कच्चिद्व्यसनिनं शत्रुं निशम्य भरतर्षभ।
अभियासि जवेनैव समीक्ष्य त्रिविधं बलम् ॥ २-५-६१ (११४७५)
यात्रामारभसे दिष्ट्या प्राप्तकालमरिन्दम।
पार्ष्णिमूलं च विज्ञाय व्यवसायं पराजयम् ॥ २-५-६२ (११४७६)
बलस्य च महाराज दत्त्वा वेतनमग्रतः।
कच्चिच्च बलमुख्येभ्यः परराष्ट्रे परन्तप।
उपच्छन्नानि रत्नानि प्रयच्छसि यथार्हतः ॥ २-५-६३ (११४७७)
कच्चिदात्मानमेवाग्रे विजित्य विजितेन्द्रियः।
पारञ्जिगीषसे पार्थ प्रमत्तानजितेन्द्रियान् ॥ २-५-६४ (११४७८)
कच्चित्ते यास्यतः शत्रून्पूर्वं यान्ति स्वनुष्ठिताः।
साम दानं च भेदश्च दण्डश्च विधिवद्गुणाः ॥ २-५-६५ (११४७९)
तांश्च विक्रमसे जेतुं जित्वा च परिरक्षसि ॥
कच्चिदष्टाङ्गसंयुक्ता चतुर्विधबला चमूः। २-५-६६ (११४८०)
बलमुख्यैः सुनीता ते द्विषतां प्रतिवर्धिनी ॥
कच्चिल्लवं च मुष्टिं च परराष्ट्रे परन्तप। २-५-६७ (११४८१)
अविहाय महाराज निहंसि समरे रिपून् ॥
कच्चित्स्वपरराष्ट्रेषु बहवोऽधिकृतास्तव। २-५-६८ (११४८२)
अर्थान्समधितिष्ठन्ति रक्षन्ति च परस्परम् ॥ २-५-६९ (११४८३)
कच्चिदभ्यवहार्याणि गात्रसंस्पर्शनानि च।
घ्रेयाणि च महाराज रक्षन्त्यनुमतास्तव। २-५-७० (११४८४)
कच्चित्कोशश्च कोष्ठं च वाहनं द्वारमायुधम् ॥
आयश्च कृतकल्याणैस्तव भक्तैरनुष्ठितः ॥ २-५-७१ (११४८५)
कच्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशाम्पते ॥
रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान्। २-५-७२ (११४८६)
कच्चिन्न पाने द्यूते वा क्रीडासु प्रमदासु च।
प्रतिजानन्ति पूर्वाह्णे व्ययं व्यसनजं तव ॥ २-५-७३ (११४८७)
कच्चिदायस्य चार्धेन चतुर्भागेन वा पुनः।

पादभागैस्त्रिभिर्वापि व्ययः संशुद्ध्यते तव ॥ २-५-७४ (११४८८)
कच्चिज्ज्ञातीन्गुरून्वृद्धा-
न्वणिजः शिल्पिनः श्रितान्।
अभीक्ष्णमनुगृह्णासि
धनधान्येन दुर्गतान् ॥ २-५-७५ (११४८९)
कच्चिच्चायव्यये युक्ताः सर्वे गणकलेखकाः।
अनुतिष्ठन्ति पूर्वाह्णे नित्यमायं व्ययं तव ॥ २-५-७६ (११४९०)
कच्चिदर्थेषु सम्प्रौढान्हितकामाननुप्रियान्।
नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषम् ॥ २-५-७७ (११४९१)
कच्चिद्विदित्वा पुरुषानुत्तमाधममध्यमान्।
त्वं कर्मस्वनुरूपेषु नियोजयसि भारत ॥ २-५-७८ (११४९२)
कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशाम्पते।
अप्राप्तव्यवहारा वा तव कर्मस्वनुष्ठिताः ॥ २-५-७९ (११४९३)
कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा।
त्वया वा पीड्यते राष्ट्रं कच्चित्तुष्टाः कृषीवलाः २-५-८० (११४९४)
कच्चिद्राष्ट्रे तटाकानि पूर्णानि च बृहन्ति च।
भागशो विनिविष्टानि न कृषिर्देवमातृका ॥ २-५-८१ (११४९५)
कच्चिन्नं भक्तं बीजं च कर्षकस्यावसीदति।
प्रत्येकं च शतं वृद्ध्या ददास्यृणमनुग्रहम् ॥ २-५-८२ (११४९६)
कच्चित्स्वनुष्ठिता तात वार्ता ते साधुभिर्जनैः।
वार्तायां संश्रितस्तात लोकोऽयं सुखमेधते ॥ २-५-८३ (११४९७)
कच्चिच्छूराः कृतप्रज्ञाः पञ्चपञ्च स्वनुष्ठिताः।
क्षेमं कुर्वन्ति संहत्य राजञ्जनपदे तव ॥ २-५-८४ (११४९८)
कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत्कृताः।
ग्रामवच्च कृताः प्रान्तास्ते च सर्वे त्वदर्पणाः ॥ २-५-८५ (११४९९)
कच्चिद्बलेनानुगताः समानि विषमाणि च।
पुराणि चौरान्निघ्नन्तश्चरन्ति विषये तव ॥ २-५-८६ (११५००)
कच्चित्स्त्रियः सान्त्वयसि कच्चित्ताश्च सुरक्षिताः।
कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे ॥ २-५-८७ (११५०१)
कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिन्त्य च।
प्रियाण्यनुभवञ्शेषे न त्वमन्तः पुरे नृप ॥ २-५-८८ (११५०२)
कच्चिद्द्वौ प्रथमौ यामौ रात्रेः सुप्त्वा विशाम्पते।
सञ्चिन्तयसि धर्मार्थौ याम उत्थाय पश्चिमे ॥ २-५-८९ (११५०३)
कच्चिद्दर्शयसे नित्यं मनुष्यान्समलङ्कृतः।
उत्थाय काले कालज्ञैः सह पाण्डव मन्त्रिभिः ॥ २-५-९० (११५०४)
कच्चिद्रक्ताम्बरधराः खड्गहस्ताः स्वलङ्कृताः।

उपासते त्वामभितो रक्षणार्थमरिन्दम ॥ २-५-९१ (११५०५)
कच्चिद्दण्ड्येषु यमवत्पूज्येषु च विशाम्पते।
परीक्ष्य वर्तसे सम्यगप्रियेषु प्रियेषु च ॥ २-५-९२ (११५०६)
कच्चिच्छारीरमाबाधमौषधैर्नियमेन वा।
मानसं वृद्धसेवाभिः सदा पार्थापकर्षसि ॥ २-५-९३ (११५०७)
कच्चिद्वैद्याश्चिकित्सायामष्टाङ्गायां विशारदाः।
सुहृदश्चानुरक्ताश्च शरीरे ते हिताः सदा ॥ २-५-९४ (११५०८)
कच्चिन्न लोभान्मोहाद्वा मानाद्वापि विशाम्पते।
अर्थिप्रत्यर्थिनः प्राप्तान्नापास्यसि कथञ्चन ॥ २-५-९५ (११५०९)
कच्चिन्न लोभान्मोहाद्वा विश्रम्भात्प्रणयेन वा।
आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणात्सि वै ॥ २-५-९६ (११५१०)
कच्चित्पौरा न सहिता ये च ते राष्ट्रवासिनः।
त्वया सह विरुध्यन्ते परैः क्रीताः कथञ्चन ॥ २-५-९७ (११५११)
कच्चिन्न दुर्बलः शत्रुर्बलेन परिपीडितः।
मन्त्रेण बलवान्कश्चिदुभाभ्यां च कथञ्चन ॥ २-५-९८ (११५१२)
कच्चित्सर्वेऽनुरक्तास्त्वां भूमिपालाः प्रधानतः।
कच्चित्प्राणांस्त्वदर्थेषु सन्त्यजन्ति त्वया हृताः ॥ २-५-९९ (११५१३)
कच्चित्ते सर्वविद्यासु गुणतोऽर्चा प्रवर्तते।
ब्राह्मणानां च साधूनां तव नैः श्रेयसी शुभा।
दक्षिणास्त्वं ददास्येषां नित्यं स्वर्गापवर्गदाः ॥ २-५-१०० (११५१४)
कच्चिद्धर्मे त्रयीमूले पूर्वैराचरिते जनैः।
यतमानस्तथा कर्तुं तस्मिन्कर्मणि वर्तसे ॥ २-५-१०१ (११५१५)
कच्चित्तव गृहेऽन्नानि स्वादून्यश्नन्ति वै द्विजाः।
गुणवन्ति गुणोपेतास्तवाध्यक्षं सदक्षिणम् ॥ २-५-१०२ (११५१६)
कच्चित्क्रतूनेकचित्तो वाजपेयांश्च सर्वशः।
पौण्डरीकांश्च कार्त्स्न्येन यतसे कर्तुमात्मवान् ॥ २-५-१०३ (११५१७)
कच्चिज्ज्ञातीन्गुरून्वृद्धान्दैवतांस्तापसानपि।
चैत्यांश्च वृक्षान्कल्याणान्ब्राह्मणांश्च नमस्यसि ॥ २-५-१०४ (११५१८)
कच्चिच्छोको न मन्युर्वा त्वया प्रोत्पाद्यतेऽनघ।
अपि मङ्गलहस्तश्च जनः पार्श्वे न तिष्ठति ॥ २-५-१०५ (११५१९)
कच्चिदेषा च ते बुद्धिर्वृत्तिरेषा च तेऽनघ।
आयुष्या च यशस्या च धर्मकामार्थदर्शिनी ॥ २-५-१०६ (११५२०)
एतया वर्तमानस्य बुद्ध्या राष्ट्रं न सीदति।
विजित्य च महीं राजा सोत्यन्तं सुखमेधते ॥ २-५-१०७ (११५२१)
कच्चिदार्यो विशुद्धात्मा क्षारितश्चौरकर्मणि।
अदृष्टशास्त्रकुशलैर्न लोभाद्बध्यते शुचि ॥ २-५-१०८ (११५२२)

दुष्टो गृहीतस्तत्कारितज्ञैर्दृष्टः सकारणः।
कच्चिन्न मुच्यते स्तेनो द्रव्यलोभान्नरर्षभ ॥ २-५-१०९ (११५२३)
उत्पन्नानकच्चिदाढ्यस्य दरिद्रस्य च भारत।
अर्थान्न मिथ्या पश्यन्ति तवामात्या हृता धनैः ॥ २-५-११० (११५२४)
नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम्।
अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तिताम्।
एकचिन्तनमर्थानामनर्थज्ञैश्च चिन्तनम् ॥ २-५-१११ (११५२५)
निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम्।
मङ्गलाद्यप्रयोगं च प्रत्युत्थानं च सर्वतः ॥ २-५-११२ (११५२६)
कच्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश।
प्रायशोयैर्विनश्यन्ति कृतमूलापि पार्थिवः ॥ २-५-११३ (११५२७)
कच्चित्ते सफला वेदाः कच्चित्ते सफळं धनम्।
कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ॥ २-५-११४ (११५२८)
युधिष्ठिर उवाच । २-५-११५क्ष् (१३८६)
कथं वै सफला वेदाः कथं वै सफलं धनम्।
कथं वै सफला दाराः कथं वै सफलं श्रुतम् ॥ २-५-११५ (११५२९)
नारद उवाच। २-५-११६क्ष् (१३८७)
अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम्।
रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम् ॥ २-५-११६ (११५३०)
वैशम्पायन उवाच। २-५-११७क्ष् (१३८८)
एतदाख्याय स मुनिर्नारदो वै महातपाः।
पप्रच्छानन्तरमिदं धर्मात्मानं युधिष्ठिरम् ॥ २-५-११७ (११५३१)
नारद उवाच। २-५-११८क्ष् (१३८९)
कच्चिदभ्यागता दूराद्वणिजो लाभकारणात्।
यथोक्तमवहार्यन्ते शुल्कं शुल्कोपजीविभिः ॥ २-५-११८ (११५३२)
कच्चित्ते पुरुषा राजन्पुरे राष्ट्रे च मानिताः।
उपानयन्ति पण्यानि उपाधाभिरवञ्चिताः ॥ २-५-११९ (११५३३)
कच्चिच्छृणोषि वृद्धानां धर्मार्थसहिता गिरः।
नित्यमर्थविदां तात यथाधर्मार्थदर्शिनाम् ॥ २-५-१२० (११५३४)
कच्चित्ते कृषितन्त्रेषु गोषु पुष्पफलेषु च।
धर्मार्थं च द्विजातिभ्यो दीयेते मधुसर्पिषी ॥ २-५-१२१ (११५३५)
द्रव्योपकरणं किञ्चित्सर्वदा सर्वशिल्पिनाम्।
चातुर्मास्यावरं सम्यङ्नियतं सम्प्रयच्छसि ॥ २-५-१२२ (११५३६)
कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि।
सतां मध्ये महाराज सत्करोषि च पूजयन् ॥ २-५-१२३ (११५३७)
कच्चित्सूत्राणि सर्वाणि गृह्णासि भरतर्षभ।

हस्तिसूत्राश्वसूत्राणि रथसूत्राणि वा विभो ॥ २-५-१२४ (११५३८)
कच्चिदभ्यस्यते सम्यग्गृहे ते भरतर्षभ।
धनुर्वेदस्य सूत्रं वै यन्त्रसूत्रं च नागरम् ॥ २-५-१२५ (११५३९)
कच्चिदस्त्राणि सर्वाणि ब्रह्मदण्डश्च तेऽनघ।
विषयोगास्तथा सर्वे विदिताः शत्रुनाशनाः ॥ २-५-१२६ (११५४०)
कच्चिदग्निभयाच्चैव सर्वं व्यालभयात्तथा।
रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षशि ॥ २-५-१२७ (११५४१)
कच्चिदन्धांश्च मूकांश्च पङ्गून्व्यङ्गानबान्धवान्।
पितेव पासि धर्मज्ञ तथा प्रव्रजितानपि ॥ २-५-१२८ (११५४२)
षडवर्था महाराज कच्चित्ते पृष्ठतः कृताः।
निद्राऽऽलस्यं भयं क्रोधो मार्दवं दीर्घसूत्रता ॥ २-५-१२९ (११५४३)
वैशम्पायन उवाच। २-५-१३०क्ष् (१३९०)
ततः कुरूणामृषभो महात्मा
श्रुत्वा गिरो ब्राह्मणसत्तमस्य।
प्रणम्य पादावभिवाद्य तुष्टो
राजाऽब्रवीन्नारदं देवरूपम् ॥ २-५-१३० (११५४४)
एवं करिष्यामि यथा त्वयोक्तं
प्रज्ञा हि मे भूय एवाभिवृद्धा।
उक्त्वा तथा चैव चकार राजा
लेभे महीं सागरमेखलां च ॥ २-५-१३१ (११५४५)
नारद उवाच। २-५-१३२क्ष् (१३९१)
एवं यो वर्तते राजा चातुर्वर्ण्यस्य रक्षणे।
स विहृत्येह सुसुखी शुक्रस्यैति सलोकताम् ॥ ॥ २-५-१३२ (११५४६)

इति श्रीमन्महाभारते सभापर्वणि पञ्चमोऽध्यायः ॥ ५.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-५-२४ षड्गुणाः सन्धिविग्रहादयः ।सप्तोपायाः मन्त्रौषधेन्द्रजालसहिताः सामादयः।स वपरपक्षबलावलसहिता एतएव चतुर्दश

२-५-२५ अष्टौ कर्माणि- कृषिर्वणिक्पतो दुर्ग सेतुः कुञ्जरबन्धनम् ।खन्याकरकरादानं शून्यानां च निवेशनमित्युक्तानि ॥

२-५-२६ सप्तप्रकृतयः स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलाख्याः ॥

२-५-२७ कच्चिन्न तर्कैर्दूतैर्वा इति ख-पाठः ॥

२-५-२८ शुचयो जीवितक्षमाः इति ख-पाठः ॥

२-५-३५ कर्मान्ताः कृष्यादयः ॥

२-५-३७ कारणिकाः युद्धोपकरणयुक्ताः ॥

२-५-
४१ मन्त्री पुरोहितश्चैव युवराजश्चमूपतिः ।पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वेश इकस्तथा १, कारागाराधिकारी च द्रव्यसञ्चयकृ

२-५-६७ अष्टाङ्गसंयुक्ता-
रथा नागा हया योधाः पत्तयः कर्मकारकाः ।चारा दैशिकमुख्याश च ध्वजिन्यष्टाङ्गिका मता।चतुर्विधबला मौलमैत्रमृत्याट

२-५-६८ लवः सस्यच्छेदनकालः ।मुष्टिः सस्यानां गोपनकालः ॥

२-५-७१ कोष्ठं धान्यस्थानम् ॥

२-५-७३ कच्चिन्नेति पानादिव्यसनजं व्ययं तव पूर्वाह्णे धर्माचरणकाले भृत्या न प्रत इजानन्ति नावेदयन्ति ॥

२-५-७६ अनुतिष्ठन्ति निवेदयन्ति ॥

२-५-७९ अप्राप्तव्यवहारा अप्रौढाः ॥

२-५-८४ प्रतिग्रामं पञ्चपञ्चेति ।तेच-प्रशास्ता समाहर्ता संविधाता लेखकः साक्षी चे ति ॥

२-५-८८ आत्ययिकमकल्याणम् ॥

२-५-९३ आबाधं दुःखम् ।नियमेन पथ्याशनादिना ॥

२-५-९४ निदानं पूर्वलिङ्गानि रूपाण्युपशयस्तथा ।सम्प्राप्तिरौषधी रोगी परिचारक एवं चेत्यष्टाङ्गानि ॥

२-५-१०२ तवाध्यक्षं त्वत्समक्षण् ॥

२-५-१०८ क्षारितः मिथ्यापवादैः पातितः ॥

२-५-११३ कृतमूलाः अपीति छेदः ॥

२-५-१२६ ब्रह्मदण्डः अभिचारः ॥

सभापर्व - अध्याय ००६

॥ श्रीः ॥

२.६. अध्यायः ६

Mahabharata - Sabha Parva - Chapter Topics

उत्तमसभालाभगर्वितेन युधिष्ठिरेण सभाविषयकप्रश्ने नारदस्य इन्द्रादिसभावर्ण नप्रतिज्ञानम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

वैशमापायन उवाच।

सम्पूज्याथाभ्यनुज्ञातो महर्षेर्वचनात्परम्।
प्रत्युवाचानुपूर्व्येण धर्मराजो युधिष्ठिरः ॥२-६-१ (११५४७)
भगवत्याय्यमाहैतं यथावद्धर्मनिश्चयम्।
यथाशक्ति यथान्यायं क्रियतेऽयं विधिर्मया ॥२-६-२ (११५४८)
राजभिर्यद्यथा कार्यं, पुरा वै तन्न संशयः।

यथान्यायोपनीतार्थं कृतं हेतुमदर्थवत् ॥ २-६-३ (११५४९)
वयं तु सत्पथं तेषां यातुमिच्छामहे प्रभो।
न तु शक्यं तथा गन्तुं यथा तैर्नियतात्मभिः ॥ २-६-४ (११५५०)
वैशम्पायन उवाच। २-६-५क्ष् (१३९२)
एकमुक्त्वा स धर्मात्मा वाक्यं तदभिपूज्य च।
ग तं तु विश्रान्तमासीनं देवर्षिममितद्युतिम्'॥
मुहूर्तात्प्राप्तकालं च दृष्ट्वा लोकचरं मुनिम् ॥ २-६-५ (११५५१)
नादरदं सुस्थमासीनमुपासीनो युधिष्ठिरः।
अपृच्छत्पाण्डवस्तत्र राजमध्ये माहद्युतिः ॥ २-६-६ (११५५२)
भवात्सञ्चरते लोकान्सदा नानाविधान्बहून्।
ब्रह्मणा निर्मितान्पूर्वं प्रेक्षमाणो मनोजवः। २-६-७ (११५५३)
ईदृशी भविता काचिद्दृष्टपूर्वा सभा क्वचित्।
इतो वा श्रेयसी ब्रह्मंस्तन्ममाचक्ष्व पृच्छतः ॥ २-६-८ (११५५४)
वैशम्पायन उवाच। २-६-९क्ष् (१३९३)
तच्छ्रुत्वा नारदस्तस्य धर्मराजस्य भाषितम्।
पाण्डवं प्रत्युवाचेदं स्मयन्मधुरया गिरा ॥ २-६-९ (११५५५)
नारद उवाच। २-६-१०क्ष् (१३९४)
मानुषेषु न मे तात दृष्टपूर्वा न च श्रुता।
सभा मणिमयी राजन्यथेयं तव भारत ॥ २-६-१० (११५५६)
सभां तु पितृराजस्य वरुणस्य च धीमतः।
कथयिष्ये तथेन्द्रस्य कैलासनिलयस्य च ॥ २-६-११ (११५५७)
ब्रह्मणश्च सभां दिव्यां कथयिष्ये गतक्लमाम्।
दिव्यादिव्यैरभिप्रायैरुपेतां विश्वरूपिणीम् ॥ २-६-१२ (११५५८)
देवैः पितृगणैः साध्यैर्यज्वभिर्नियतात्मभिः।
जुष्टां मुनिगणैः शान्तैर्वेदयज्ञैः सदक्षिणैः ॥
यदि ते श्रवणे बुद्धिर्वर्तते भरतर्षभ ॥ २-६-१३ (११५५९)
नारदेनैवमुक्तस्तु धर्मराजो युधिष्ठिरः।
प्राञ्जलिर्भ्रातृभिः सार्धं तैश्च सर्वैर्द्विजोत्तमैः ॥ २-६-१४ (११५६०)
नारदं प्रत्यवाचेदं धर्मराजो महामनाः।
सभाः कथय ताः सर्वाः श्रोतुमिच्छामहे वयम् ॥ २-६-१५ (११५६१)
किन्द्रव्यास्ताः सभा ब्रह्मन्किंविस्ताराः किमायताः।
पितामहं च के तस्यां सभायां पर्युपासते ॥ २-६-१६ (११५६२)
वासवं देवराजं च यमं वैवस्वतं च के।
वरुणं च कुबेरं च सभायां पर्युपासते ॥ २-६-१७ (११५६३)
एतत्सर्वं यथान्यायं ब्रह्मर्षे वदतस्तव।
श्रोतुमिच्छाम सहिताः परं कौतूहलं हि नः ॥ २-६-१८ (११५६४)

एवमुक्तः पाण्डवेन नारदः प्रत्यभाषत।
क्रमेण राजन्दिव्यास्ताः श्रूयन्तामिह नः सभाः ॥ ॥ २-६-१९ (११५६५)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि षष्ठोऽध्यायः ॥ ६.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-६-११ कैलासनिलयस्य कुबेरस्य ॥

सभापर्व - अध्याय ००७
॥ श्रीः ॥
२.७. अध्यायः ७

Mahabharata - Sabha Parva - Chapter Topics
इन्द्रसभावर्णनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

नारद उवाच ॥

शक्रस्य तु सभा दिव्या भास्वरा कर्मनिर्मिता।
स्वयं शक्रेण कौरव्य निर्जितार्कसमप्रभा ॥ २-७-१ (११५६६)
विस्तीर्णा योजनशतं शतमध्यर्धमायता।
वैहायसी कामगमा पञ्चयोजनमुच्छ्रिता। २-७-२ (११५६७)
जराशोकक्लमापेता निरातङ्का शिवा शुभा।
वेश्मासनवती रम्या दिव्यपादपशोभिता ॥ २-७-३ (११५६८)
तस्यां देवेश्वरः पार्थ सभायां परमासने।
आस्ते शच्या महेन्द्राण्या श्रिया लक्ष्म्या च भारत। २-७-४ (११५६९)
बिभ्रद्वपुरनिर्देश्यं किरीटी लोहिताङ्गदः।
विरजोम्बरश्चित्रमाल्यो ह्रीकीर्तिद्युतिभिः सह ॥ २-७-५ (११५७०)
तस्यामुपासते नित्यं महात्मानं शतक्रतुम्।
मरुतः सर्वशो राजन्सर्वे च गृहमेधिनः ॥ २-७-६ (११५७१)
सिद्धा देवर्षयश्चैव साध्या देवगणास्तथा।
मरुत्त्वन्तश्च सहिता भास्वन्तो हेममालिनः ॥ २-७-७ (११५७२)
एते सानुचराः सर्वे दिव्यरूपाः स्वलङ्कृताः।

उपासते महात्मान देवराजमरिन्दमम् ॥ २-७-८ (११५७३)
तथा देवर्षयः सर्वे पार्तं शक्रमुपासते।
अमला धूतपाप्मानो दीप्यमाना इवाग्नयः ॥ २-७-९ (११५७४)
तेजस्विनः सोमसुतो विशोका विगतज्वराः।
पराशरः पर्वतश्च तथा सावर्णिगालवौ ॥ २-७-१० (११५७५)
ग्एकतश्च द्वितश्चैव त्रितश्चैव महामतिः'।
शङ्खश्च लिखितश्चैव तथा गौरशिरा मुनिः।
दुर्वासाः क्रोधनः श्येनस्तथा दीर्घतमा मुनिः ॥ २-७-११ (११५७६)
पवित्रपाणिः सावर्णिर्याज्ञवल्क्योऽथ भालुकिः।
उद्दालकः श्वेतकेतुस्ताण्डो भाण्डायनिस्तथा ॥ २-७-१२ (११५७७)
हविष्मांश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः ॥
हृद्यश्चोदरशाण्डिल्यः पाराशर्यः कृषीवलः ॥ २-७-१३ (११५७८)
वातस्कन्धो विशाखश्च विधाता काल एव च।
करालदन्तस्त्वष्टा च विश्वकर्मा च तुम्बुरुः ॥ २-७-१४ (११५७९)
अयोनिजा योनिजाश्च वायुभक्षा हुताशिनः।
ईशानं सर्वलोकस्य वज्रिणं समुपासते ॥ २-७-१५ (११५८०)
सहदेवः सुनीथश्च वाल्मीकिश्च महातपाः।
समीकः सत्यवाक्चैव प्रचेताः सत्यसङ्गरः ॥ २-७-१६ (११५८१)
मेधातिथिर्वामदेवः पुलस्त्यः पुलहः क्रतुः।
मरुत्तश्च मरीचिश्च स्थाणुश्चात्र महातपाः ॥ २-७-१७ (११५८२)
कक्षीवान्गौतमस्तार्क्ष्यस्तथा वैश्वानरो मुनिः।
मुनिः कालकवृक्षीय आश्राव्योऽथ हिरण्मयः ॥ २-७-१८ (११५८३)
संवर्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान्।
दिव्या आपस्तथौषध्यः श्रद्धा मेधा सरस्वती ॥ २-७-१९ (११५८४)
अर्थो धर्मश्च कामश्च विद्युतश्चैव पाण्डव।
जलवाहास्तथा मेघा वायवः स्तनयित्नवः ॥ २-७-२० (११५८५)
प्राचीदिग्यज्ञवाहाश्च पावकाः सप्तविंशतिः।
अग्नीषोमौ तथेन्द्राग्नी मित्रश्च सविताऽर्यमा ॥ २-७-२१ (११५८६)
भगो विश्वे साध्याश्च गुरुः शुक्रस्तथैव च।
विश्वावसुश्चित्रसेनः सुमनस्तरुणस्तथा ॥ २-७-२२ (११५८७)
यज्ञाश्च दक्षिणाश्चैवं ग्रहास्तोभाश्च भारत।
यज्ञवाहाश्च ये मन्त्राः सर्वे तत्र समासते ॥ २-७-२३ (११५८८)
तथैवाप्सरसो राजन् ग्रम्भोर्वश्यथ मेनका।
घृताची पञ्चचूडा च विप्रचित्तिपुरोगमाः ॥ २-७-२४ (११५८९)
विद्याधराश्च राजेन्द्र' गन्धर्वाश्च मनोरमाः।
नृत्यवादित्रगीतैश्च हास्यैश्च विविधैरपि ॥ २-७-२५ (११५९०)

रमयन्ति स्म नृपते देवराजं शतक्रतुम्।
स्तुतिभिर्मङ्गलैश्चैव वस्तुवन्तः कर्मभिस्तथा ॥ २-७-२६ (११५९१)
विक्रमैश्च महात्मानं बलवृत्रनिषूदनम्।
ब्रह्मराजर्षयश्चैव सर्वे देवर्षयस्तथा ॥ २-७-२७ (११५९२)
विमानैर्विविधैर्दिव्यैर्दीप्यमाना इवाग्नयः।
स्रग्विणो भूषिताः सर्वे यान्ति चायान्ति चापरे ॥ २-७-२८ (११५९३)
बृहस्पतिश्च शुक्रश्च नित्यमास्तां हि तत्र वै ॥
एते चान्ये च बहवो महात्मानो यतव्रताः ॥ २-७-२९ (११५९४)
विमानैश्चन्द्रसङ्काशैः सोमवत्प्रियदर्शनाः।
ब्रह्मणो वचनाद्राजन्भृगुः सप्तर्षयस्तथा ॥ २-७-३० (११५९५)
एषा सभा मया राजन्दृष्टा पुष्करमालिनी।
शतक्रतोर्महाबाहो याम्यामपि सभां शृणु ॥ ॥ २-७-३१ (११५९६)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि सप्तमोऽध्यायः ॥ ७.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-७-१३ पाराशर्यः कपिष्ठल इति घ ।पाठः ॥
२-७-
२१ ब्रह्मणोङ्गात्प्रसूतोऽग्निरङ्गिरा इति विश्रुतः ।दक्षिणाग्निर्गार्हपत्या हवनीयाविति त्रयी।निर्मन्थ्यो वैद्युतः शूरः संवर्तो लौ
७-३१ पुष्करमालिनी नामतः ॥

सभापर्व - अध्याय ००८
॥ श्रीः ॥
२.८. अध्यायः ८

Mahabharata - Sabha Parva - Chapter Topics
यमसभावर्णमम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

नारद उवाच।

कथयिष्ये सभां याम्यां युधिष्ठिर निबोध ताम्।
वैवस्वतस्य यां पार्थ विश्वकर्मा चकार ह ॥ २-८-१ (११५९७)

तैजसी सा सभा राजन्बभूव शतयोजना।
विस्तारायामसम्पन्ना भूयसी चापि पाण्डव ॥ २-८-२ (११५९८)
अर्कप्रकाशा भ्राजिष्णुः सर्वतः कामरूपिणी।
नातिशीता च चात्युष्णा मनसश्च प्रहर्षिणी ॥ २-८-३ (११५९९)
न शोको न जरा तस्यां क्षुत्पिपासे न चाप्रियम्।
न च दैन्यं क्लमो वाऽपि प्रतिकूलं न चाप्युत ॥ २-८-४ (११६००)
सर्वे कामाः स्थितास्तस्यां ये दिव्या ये च मानुषाः।
रसवच्च प्रभूतं च भक्ष्यं भोज्यमरिन्दम ॥ २-८-५ (११६०१)
लेह्यं चोष्यं च पेयं च हृद्यं स्वादु मनोहरम्।
पुण्यगन्धाः स्रजस्तस्य नित्यं कामफला द्रुमाः ॥ २-८-६ (११६०२)
रसवन्ति च तोयानि शीतान्युष्णानि चैव हि।
तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः ॥ २-८-७ (११६०३)
यमं वैवस्वतं तात प्रहृष्टाः पर्युपासते।
ययातिर्नहुषः पुरुर्मान्धाता सोमको नुगः ॥ २-८-८ (११६०४)
त्रसदस्युश्च राजर्षिः कृतवीर्यः श्रुतश्रवाः।
अरिष्टनेमिः सिद्धश्च कृतवेगः कृतिर्निमिः ॥ २-८-९ (११६०५)
प्रतर्दनः शिबिर्मत्स्यः पृथुलाक्षो बृहद्रथः।
वार्तो मरुत्तः कुषिकः साङ्काश्यः साङ्कृतिर्ध्रुवः ॥ २-८-१० (११६०६)
चतुरश्वः सदस्योर्मिः कार्तवीर्यश्च पार्थिवः।
भरतः सुरथश्चैव सुनीथो निशठोऽनलः ॥ २-८-११ (११६०७)
दिवोदासश्च सुमना अम्बरीषो भगीरथः।
व्यश्वः सदश्वो वाघ्र्यश्वः पृथुवेगः पृथुश्रवाः ॥ २-८-१२ (११६०८)
पृपदश्वो वसुमनाः क्षुपश्च सुमहाबलः।
रुषद्गुर्वृषसेनश्च पुरुकुत्सो ध्वजी रथी ॥ २-८-१३ (११६०९)
आर्ष्टिषेणो दिलीपश्च महात्मा चाप्युशीनरः।
औशीनरिः पुण्डरीकः शर्यातिः शरभः शुचिः ॥ २-८-१४ (११६१०)
अङ्गो रिष्टश्च वेनश्च दुष्यन्तः सृञ्जयो जयः।
भाङ्गासुरिः सुनीथश्च निषधोऽथ वहीनरः ॥ २-८-१५ (११६११)
करन्धमो बाह्लिकश्च सुद्युम्नो बलवान्मधुः।
ऐलो मरुत्तश्च तथा बलवान्पृथिवीपतिः ॥ २-८-१६ (११६१२)
कपोतरोमा तृणकः सहदेवार्जुनौ तथा।
व्यश्वः साश्वः कृशाश्वश्च शशबिन्दुश्च पार्थिवः ॥ २-८-१७ (११६१३)
रामो दाशरथिश्चैव लक्ष्मणोऽथ प्रतर्दनः।
अलर्कः कक्षसेनश्च गयो गौराओश्व एव च ॥ २-८-१८ (११६१४)
जामदग्न्यश्च रामश्च नाभागसगरौ तथा।
भूरिद्युम्नो महाश्वश्च पृथाशावो जनकस्तथा ॥ २-८-१९ (११६१५)

राजा वैन्यो वारिसेनः पुरिजिज्जनमेजयः।
ब्रह्मदत्तस्त्रिगर्तिश्च राजोपरिचरस्तथा ॥ २-८-२० (११६१६)
इन्द्रद्युम्नो भीमजानुर्गौरपृष्ठोऽनघो लयः।
पद्मोऽथ मुचुकुन्दश्च भूरिद्युम्नः प्रसेनजित् ॥ २-८-२१ (११६१७)
अरिष्टनेमिः सुद्युम्नः पृथुलाश्वोऽष्टकस्तथा।
शतं मत्स्या नृपतयः शतं नीपाः शतं हयाः ॥ २-८-२२ (११६१८)
धृतराष्ट्राश्चैकशतमशीतिर्जनमेजयाः।
शतं च ब्रह्मदत्तानां वीरिणामीरिणां शतम् ॥ २-८-२३ (११६१९)
भीष्माणां द्वे शतेऽप्यत्र भीमानां तु तथा शतम्।
शतं च प्रतिविन्ध्यानां शतं नागाः शतं हयाः ॥ २-८-२४ (११६२०)
पलाशानां शतं ज्ञेयं शतं काशकुशादयः।
शान्तनुश्चैव राजेन्द्र पाण्डुश्चैव पिता तव ॥ २-८-२५ (११६२१)
उशङ्गवः शतरथो देवराजो जयद्रथः।
वृषदर्भश्च राजर्षिर्बुद्धिमान्सहमन्त्रिभिः ॥ २-८-२६ (११६२२)
अथापरे सहस्राणि ये गताः शसबिन्दवः।
इष्ट्वाऽश्वमेधैर्बहुभिर्महद्भिर्भूरिदक्षिणैः ॥ २-८-२७ (११६२३)
एते राजर्षयः पुण्याः कीर्तिमन्तो बहुश्रुताः।
तस्यां सभायां राजेन्द्र वैवस्वतमुपासते ॥ २-८-२८ (११६२४)
अगस्त्योऽथ मतङ्गश्च कालो मृत्युस्तथैव च।
यज्वानश्चैव सिद्धाश्च ये न योगशरीरिणः ॥ २-८-२९ (११६२५)
अग्निष्वात्ताश्च पितरः फेनपाश्चोष्मपाश्च ये।
सुधावन्तो बर्हिषदो मूर्तिमन्तस्तथाऽपरे ॥ २-८-३० (११६२६)
कालचक्रं च साक्षाच्च भगवान्हव्यवाहनः।
नरा दुष्कृतकर्माणो दक्षिणायनमृत्यवः ॥ २-८-३१ (११६२७)
कालस्य नयने युक्ता यमस्य पुरुपाश्च ये।
तस्यां शिंशुपपालाशास्तथा काशकुशादयः ॥ २-८-३२ (११६२८)
उपासते धर्मराजं मूर्तिमन्तो जनाधिप।
एते चान्ये च बहवः पितृराजसभासदः।
न शक्याः परिसङ्ख्यातुं नामभिः कर्मभिस्तथा । २-८-३३ (११६२९)
असम्बाधा हि सा पार्थ रम्या कामगमा सभा।
दीर्घकालं तपस्तप्त्वा निर्मिता विश्वकर्मणा। २-८-३४ (११६३०)
ज्वलन्ती भासमाना च तेजसा स्वेन भारत।
तामुग्रतपसो यान्ति सुव्रताः सत्यवादिनः ॥ २-८-३५ (११६३१)
शान्ताः सन्यासिनः शुद्धाः पूताः पुण्येन कर्मणा।
सर्वे भास्वरदेहाश्च सर्वे च विरजोम्बराः ॥ २-८-३६ (११६३२)
चित्राङ्गदाश्चित्रमाल्याः सर्वे ज्वलितकुण्डलाः।

सुकृतैः कर्मभिः पुण्यैः पारिबर्हैश्च भूषिताः ॥ २-८-३७ (११६३३)
गन्धर्वाश्च महात्मानः सङ्घशश्चाप्सरोगणाः।
वादित्रं नृत्तगीतं च हास्यं लास्यं च सर्वशः ॥ २-८-३८ (११६३४)
पुण्याश्च गन्धाः शब्दाश्च तस्यां पार्थ समन्ततः।
दिव्यानि चैव माल्यानि उपतिष्ठन्ति नित्यशः ॥ २-८-३९ (११६३५)
शतं शतसहस्राणि धर्मिणां तं प्रजेश्वरम्।
उपासते महात्मानं रूपयुक्ता मनस्विनः ॥ २-८-४० (११६३६)
ईदृशी सा सभा राजन्पितृराज्ञो महात्मनः।
वरुणस्यापि वक्ष्यामि सभां पुष्करमालिनीम् ॥ ॥ २-८-४१ (११६३७)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि अष्टमोऽध्यायः ॥ ८.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-८-
१८ रामइति रामलक्ष्मणयोर्विष्णुशेषरूपेण स्वस्थानस्थयोरपि रूपान्तरेण उपासकानु ग्रहार्थमत्रावस्थानम् ॥
२-८-
२३ धृतराष्टाश्चैकशतमिति पुराणेषु प्रायेणाधिकारिणामेव कीर्तनात्तेषां च प्रति कल्पं समाननामरूपकर्मत्वादनेककल्पं धर्मसभ
२-८-३१ दुष्कृतकर्माणो विद्याविहीनकर्ममात्रनिष्टाः ॥

सभापर्व - अध्याय ००९
॥ श्रीः ॥
२.९. अध्यायः ९

Mahabharata - Sabha Parva - Chapter Topics
वरुणसभावर्णनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

नारद उवाच ॥

युधिष्ठिर सभा दिव्या वरुणस्यामितप्रभा।
प्रमाणेन यथा याम्या शुभप्राकारतोरणा ॥ २-९-१ (११६३८)
अन्तः सलिलमास्थाय विहिता विश्वकर्मणा।
दिव्यै रत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युता ॥ २-९-२ (११६३९)

नीलपीतैः सिताः श्यामैः सितैर्लोहितकैरपि।
अवतानैस्तथा गुल्मैर्मञ्जरीजालधारिभिः ॥ २-९-३ (११६४०)
तथा शकुनयस्तस्यां विचित्रा मधुरस्वराः।
अनिर्देश्या वपुष्मन्तः शतशोऽथ सहस्रशः ॥ २-९-४ (११६४१)
सा सभा सुखसंस्पर्शा न शीता न च धर्मदा।
वेश्मासनवती रम्या सिता वरुणपालिता ॥ २-९-५ (११६४२)
यस्यामास्ते स वरुणो वारुण्या च समन्वितः।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः ॥ २-९-६ (११६४३)
ग्द्वितीयेन तु नाम्ना वै गौरीति भुवि विश्रुता।
पत्न्या सवरुणो देवः प्रमोदति सुखी सुखम्'॥ २-९-७ (११६४४)
स्रग्विणो दिव्यगन्धाश्च दिव्यगन्धानुलेपनाः।
आदित्यास्तत्र वरुणं जलेश्वरमुपासते ॥ २-९-८ (११६४५)
वासुकिस्तक्षकश्चैव नागश्चैरावतस्तथा।
कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्यवान् ॥ २-९-९ (११६४६)
कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ।
मणिमान्कुण्डधारश्च कर्कोटकधनञ्जयौ ॥ २-९-१० (११६४७)
पाणिमान्कुण्डधारश्च बलवान्पृथिवीपते।
प्रह्रादो मुषिकादश्च तथैव जनमेजयः ॥ २-९-११ (११६४८)
पताकिनो मण्डलिनः फणवन्तश्च सर्वशः।
ग अर्थो धर्मश्च कामश्च वसुः कपिल एव च ॥ २-९-१२ (११६४९)
अनन्तश्च महानागो यं दृष्ट्वा जलजेश्वरः।
अभ्यर्चयति सत्कारैरासनेन च तं विभुः ॥ २-९-१३ (११६५०)
वासुकिप्रमुखाश्चैव सर्वे प्राञ्जलयः स्थिताः।
अनुज्ञाताश्च शेषेण यथार्हमुपविश्य च ॥ २-९-१४ (११६५१)
एते चान्ये च बहवः सर्पास्तस्यां युधिष्ठिर।
ग्वैनतेयश्च गरुडो ये चास्य परिचारिणः'।
उपासते महात्मानं वरुणं विगतक्लमाः ॥ २-९-१५ (११६५२)
बलिर्वैरोचनो राजा नरकः पृथिवीञ्जयः।
संह्रादो विप्रचित्तिश्च कालखञ्जाश्च दानवाः ॥ २-९-१६ (११६५३)
सुहनुर्दुर्मुखः शङ्खः सुमनाः सुमतिस्ततः।
घटोदरो महापार्श्वः क्रथनः पिठरस्तथा ॥ २-९-१७ (११६५४)
विश्वरूपः स्वरूपश्च विरूपोऽथ महाशिराः।
दशग्रीवश्च वाली च मेघवासा दशावरः ॥ २-९-१८ (११६५५)
टिट्टिभो विटभूतश्च संह्रादश्चेन्द्रतापनः।
दैत्यदानवसङ्घाश्च सर्वे रुचिरकुण्डलाः ॥ २-९-१९ (११६५६)
स्रग्विणो मौलिनश्चैव तथा दिव्यपरिच्छदाः।

सर्वे लब्धवराः शूराः सर्वे विगतमृत्यवः ॥ २-९-२० (११६५७)
ते तस्यां वरुणं देवं धर्मपाशधरं सदा।
उपासते महात्मानं सर्वे सुचरितव्रताः ॥ २-९-२१ (११६५८)
तथा समुद्राश्चत्वारो नदी भागीरथी च सा।
कालिन्दी विदिशा वेणा नर्दमा वेगवाहिनी ॥ २-९-२२ (११६५९)
विपाशा च शतद्रुश्च चन्द्रभागा सरस्वती।
इरावती वितस्ता च सिन्धुर्देवनदी तथा ॥ २-९-२३ (११६६०)
गोदावरी कृष्णवेणी कावेरी च सरिद्वरा।
किम्पुना च विशल्या च तथा वैतरणी नदी ॥ २-९-२४ (११६६१)
तृतीया ज्येष्ठिला चैव शोणश्चापि महानदः।
चर्मण्वती तथा चैव पर्णाशा च महानदी ॥ २-९-२५ (११६६२)
सरयूर्वारवत्याऽथ लाङ्गली च सरिद्वरा।
करतोया तथाऽऽत्रेयी लौहित्यश्च महानदः ॥ २-९-२६ (११६६३)
लङ्घती गोमती चैव सन्ध्या त्रिस्रोतसी तथा।
एताश्चान्याश्च राजेन्द्र सुतीर्था लोकविश्रुताः ॥ २-९-२७ (११६६४)
सरितः सर्वतश्चान्यास्तीर्थानि च सरांसि च।
कूपाश्च सप्रस्रवणा देहवन्तो युधिष्ठिर। २-९-२८ (११६६५)
पल्वलानि तटाकानि देहवन्त्यथ भारत।
दिशस्तथा मही चैव तथा सर्वे महीधराः ॥ २-९-२९ (११६६६)
उपासते महात्मानं सर्वे जलचरास्तथा।
गीतवादित्रवन्तश्च गन्धर्वाप्सरसां गणाः ॥ २-९-३० (११६६७)
स्तुवन्तो वरुणं तस्यां सर्व एव समासते।
महीधरा रत्नवन्तो रसा ये च प्रतिष्ठिताः ॥ २-९-३१ (११६६८)
कथयन्तः सुमधुराः कथास्तत्र समासते।
वारुणश्च तथा मन्त्री सुनाभः पर्युपासते ॥ २-९-३२ (११६६९)
पुत्रपौत्रैः परिवृतो गोनाम्ना पुष्करेण च।
सर्वे विग्रहवन्तस्ते तमीश्वरमुपासते ॥ २-९-३३ (११६७०)
एषा मया सम्पतता वारुणी भरतर्षभ।
दृष्टपूर्वा सभा रम्या कुबेरस्य सभां शृणु ॥ ॥ २-९-३४ (११६७१)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि नवमोऽध्यायः ॥ ९.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-९-३४ सम्पतता समागच्छता ॥

सभापर्व - अध्याय ०१०
॥ श्रीः ॥
२.१०. अध्यायः १०

Mahabharata - Sabha Parva - Chapter Topics
कुबेरसभावर्णनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

नारद उवाच।

सभा वैश्रवणी राजञ्शतयोजनमायता।
विस्तीर्णा सप्ततिश्चैव योजनानि सितप्रभा ॥ २-१०-१ (११६७२)
तपसा निर्जिता राजन्स्वयं वैश्रवणेन सा।
शशिप्रभा प्रावरणा कैलासशिखरोपमा ॥ २-१०-२ (११६७३)
गुह्यकैरुह्यमाना सा खे विषक्तेव शोभते।
दिव्या हेममयैरुच्चैः प्रासादैरुपशोभिता ॥ २-१०-३ (११६७४)
महारत्नवती चित्रा दिव्यगन्धा मनोरमा।
सिताभ्रशिखराकारा प्लवमानेव दृश्यते। २-१०-४ (११६७५)
दिव्या हेममयै रङ्गैर्विद्युद्भिरिव चित्रिता।
तस्यां वैश्रवणो राजा विचित्राभरणाम्बरः ॥ २-१०-५ (११६७६)
स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुण्डलः।
ग्सह पत्न्या महाराज ऋद्ध्या सह विराजते। २-१०-६ (११६७७)
सर्वाभरणभूषिण्या वपुष्मत्या धनेश्वरः'।
दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते।
दिव्यपादोपधाने च निषण्णः परमासने ॥ २-१०-७ (११६७८)
मन्दाराणामुदाराणां वनानि परिलोडयन्।
सौगन्धीकवनानां च गन्धं गन्धवहो वहन् ॥ २-१०-८ (११६७९)
नलिन्याश्चालकाख्याया नन्दनस्य वनस्य च।
शीतो हृदयसंह्लादी वायुस्तमुपसेवते ॥ २-१०-९ (११६८०)
तत्र देवाः सगन्धर्वा गणैरप्सरसां वृताः।
दिव्यतानैर्महाराज गायन्तिस्म सभागताः ॥ २-१०-१० (११६८१)
मिश्रकेशी च रम्भा च चित्रसेना शुचिस्मिता।
चारुनेत्रा घृताची च मेनका पुञ्जिकस्थला ॥ २-१०-११ (११६८२)
विश्वाची सहजन्या च प्रम्लोचा उर्वशी ॥ २-१०-१२ (११६८३)

वर्गा च सौरभेयी च समीची बुद्बुदा लता।
एताः सहस्रशश्चान्या नृत्तगीतविशारदाः ॥ २-१०-१३ (११६८४)
उपतिष्ठन्ति धनदं गन्धर्वाप्सरसां गणाः।
अनिशं दिव्यवादित्रैर्नृत्तगीतैश्च स सभा ॥ २-१०-१४ (११६८५)
अशून्या रुचिरा भाति गन्धर्वाप्सरसां गणैः।
किन्नरा नाम गन्धर्वा नरा नाम तथाऽपरे ॥ २-१०-१५ (११६८६)
माणिभद्रोऽथ धनदः श्वेतभद्रश्च गुह्यकः।
कशेरको गण्डकण्डूः प्रद्योतश्च महाबलः ॥ २-१०-१६ (११६८७)
कुस्तम्बरुः पिशाचश्च गजकर्णो विशालकः।
वराहकर्णस्ताम्रौष्ठः फलकक्षः फलोदकः ॥ २-१०-१७ (११६८८)
हंसचूडः शङ्खावर्तो हेमनेत्रो विभीषणः।
पुष्पाननः पिङ्गलकः शोणितोदः प्रवालकः ॥ २-१०-१८ (११६८९)
वृक्षवास्यनिकेतश्च चीरवासाश्च भारत।
एते चान्ये च बहवो यक्षाः शतसहस्रशः ॥ २-१०-१९ (११६९०)
सदा भगवती लक्ष्मीस्तत्रैव नलकूबरः।
अहं च बहुशस्तस्यां भवन्त्यन्ये च मद्विधाः ॥ २-१०-२० (११६९१)
ब्रह्मर्षयो भवन्त्यत्र तथा देवर्षयोऽपरे।
क्रव्यादाश्च तथैवान्ये गन्धर्वाश्च महाबलाः ॥ २-१०-२१ (११६९२)
उपासते महात्मानं तस्यां धनदमीश्वरम्।
भगवान्भूतसङ्घैश्च वृतः शतसहस्रशः ॥ २-१०-२२ (११६९३)
उमापतिः पशुपतिः शूलभृद्भगनेत्रहा।
त्र्यम्बको राजशार्दूल देवी च विगतक्लमा ॥ २-१०-२३ (११६९४)
वामनैर्विकटैः कुब्जैः क्षतजाक्षैर्महारवैः।
मेदोमांसाशनैरुग्रैरुग्रधन्वा महाबलः ॥ २-१०-२४ (११६९५)
नानाप्रहरणैरुग्रैर्वातैरिव महाजवैः।
वृतः सखायमन्वास्ते सदैव धनदं नृप ॥ २-१०-२५ (११६९६)
प्रहृष्टाः शतशश्चान्ये बहुशः सपरिच्छदाः।
गन्धर्वाणां च पतयो विश्वावसुर्हहा हुहूः ॥ २-१०-२६ (११६९७)
तुम्बुरुः प्रवतश्चैव शैलूषश्च तथाऽपरः।
चित्रसेनश्च गीतज्ञस्तथा चित्ररथोपि च ॥ २-१०-२७ (११६९८)
एते चान्ये च गन्धर्वा धनेश्वरमुपासते।
विद्याधराधिपश्चैव चक्रधर्मा सहानुजैः ॥ २-१०-२८ (११६९९)
उपाचरति तत्र स्म धनानामीश्वरं प्रभुम्।
किन्नराः शतशस्तत्र धनानामीश्वरं प्रभुम् ॥ २-१०-२९ (११७००)
आसते चापि राजानो भगदत्तपुरोगमाः।
द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम् ॥ २-१०-३० (११७०१)

राक्षसाधिपतिश्चैव महेन्द्रो गन्धमादनः।
सह यक्षैः सगन्धर्वैः सह सर्वैर्निशाचरैः ॥ २-१०-३१ (११७०२)
विभीषणश्च धर्मिष्ठ उपास्ते भ्रातरं प्रभुम्।
हिमवान्पारियात्रश्च विन्ध्यकैलासमन्दराः ॥ २-१०-३२ (११७०३)
मलयो दर्दुरश्चैव महेन्द्रो गन्धमादनः।
इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्वतौ ॥ २-१०-३३ (११७०४)
एते चान्ये च बहवः सर्वे मेरुपुरोगमाः।
उपासते महात्मानं धनानामीश्वरं प्रभुम् ॥ २-१०-३४ (११७०५)
न्दीश्वरश्च भगवान्महाकालस्तथैव च।
शङ्कुकर्णमुखाः सर्वे दिव्याः पारिषदास्तथा ॥ २-१०-३५ (११७०६)
काष्ठः कुटी मुखो दन्ती विजयश्च तपोधिकः।
श्वेतश्च वृषभस्तत्र नर्दन्नास्ते महाबलः ॥ २-१०-३६ (११७०७)
धनदं राक्षसाश्चान्ये पिशाचाश्च उपासते।
पारिषदैः परिवृतमुपायान्तं महेश्वरम् ॥ २-१०-३७ (११७०८)
सदा हि देवदेवेशं शिवं त्रैलोक्यभावनम्।
प्रणम्य मूर्ध्ना पौलस्त्यो बहुरूपमुमापतिम् ॥ २-१०-३८ (११७०९)
ततोऽभ्यनुज्ञां सम्प्राप्य महादेवाद्धनेश्वरः।
आस्ते कदाचिद्भगवान्भवो धनपतेः सखा ॥ २-१०-३९ (११७१०)
निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ।
सर्वान्निधीन्प्रगृह्याथ उपास्तां वै धनेश्वरम् ॥ २-१०-४० (११७११)
सा सभा तादृशी रम्या मया दृष्टान्तरिक्षगा।
पितामहसभां राजन्कीर्तयिष्ये निबोध ताम् ॥ ॥ २-१०-४१ (११७१२)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि दशमोऽध्यायः ॥ १०.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१०-५ रङ्गैरितिच्छेदः ॥
२-१०-
३९ आस्ते इत्यावृत्त्या योजनीयम् ।यदा भवः कदाचित्कुबेरसभामध्यास्ते तदा कुबेरोऽपि भवादनुज्ञां प्राप्य तन्निकटे आस्ते

सभापर्व - अध्याय ०११
॥ श्रीः ॥
२.११. अध्यायः ११

Mahabharata - Sabha Parva - Chapter Topics
ब्रह्मसभावर्णनम् ॥११.।

Mahabharata - Sabha Parva - Chapter Text

नारद उवाच ॥

पितामहसभां तात कथ्यमानां निबोध मे।
शक्यते या न निर्देष्टुमेवंरूपेति भारत ॥ २-११-१ (११७१३)
पुरा देवयुगे राजन्नादित्यो भगवान्दिवः।
आगच्छन्मानुषं लोकं दिदृक्षुर्विगतक्लमः ॥ २-११-२ (११७१४)
चरन्मानुषरूपेण सभां दृष्ट्वा स्वयम्भुवः।
स तामकथयन्मह्यं दृष्ट्वा तत्त्वेन पाण्डव ॥ २-११-३ (११७१५)
अप्रमेयां सभां दिव्यां मानसीं भरतर्षभ।
अनिर्देश्यां प्रभावेण सर्वभूतमनोरमाम् ॥ २-११-४ (११७१६)
श्रुत्वा गुणानहं तस्याः सभायाः पाण्डवर्षभ।
दर्शनेप्सुस्तथा राजन्नादित्यमिदमब्रुवम्। २-११-५ (११७१७)
भगवन्द्रष्टुमिच्छामि पितामहसभां शुभाम्।
येन वा तपसा शक्या कर्मणा वाऽपि गोपते ॥ २-११-६ (११७१८)
औषधैर्या तथा युक्तैरुत्तमा पापनाशिनी।
तन्ममाचक्ष्व भगवन्पश्येयं तां सभां यथा ॥ २-११-७ (११७१९)
स तन्मम वचः श्रुत्वा सहस्रांशुर्दिवाकरः।
प्रोवाच भारतश्रेष्ठ व्रतं वर्षसहस्रकम् ॥ २-११-८ (११७२०)
ब्रह्मव्रतमुपास्स्व त्वं प्रयतेनान्तरात्मना।
ततोऽहं हिमवत्पृष्ठे समारब्दो महाव्रतम् ॥ २-११-९ (११७२१)
ततः स भगवान्सूर्यो मामुपादाय वीर्यवान्।
आगच्छत्तां सभां ब्राह्मीं विपाप्मा विगतक्लमः ? २-११-१० (११७२२)
एवंरूपेति सा शक्या न निर्देष्टुं नराधिप।
क्षणेन हि बिभर्त्यन्यदनिर्देश्यं वपुस्तथा ॥ २-११-११ (११७२३)
न वेद परिमाणं वा संस्थानं चापि भारत।
न च रूपं मया तादृक् दृष्टपूर्वं कदाचन ॥ २-११-१२ (११७२४)
सुसुखा सा सदा राजन्न शीता न च घर्मदा।
न क्षुत्पिपासे न ग्लानिं प्राप्यतां प्राप्तुवन्त्युत ॥ २-११-१३ (११७२५)
नानारूपैरिव कृता मणिभिः सा सुभास्वरैः।
स्तम्भैर्न च धृता सा तु शाश्वती न च सा क्षरा ॥ २-११-१४ (११७२६)
दिव्यैर्नानाविधैर्भावैर्भासद्भिरमितप्रभैः ॥ २-११-१५ (११७२७)

अति चन्द्रं च सूर्यं च शिखिनं च स्वयम्प्रभा।
दीप्यते नाकपृष्ठस्था भर्त्सयन्वीव भास्करम् ॥ २-११-१६ (११७२८)
तस्यां स भगवानास्ते विदधद्देवमायया।
स्वयमेकोऽनिशं राजन्सर्वलोकपितामहः ॥ २-११-१७ (११७२९)
उपतिष्ठन्ति चाप्येनं प्रजानां पतयः प्रभुम्।
दक्षः प्रचेताः पुलहो मरीचिः कश्यपः प्रभुः ॥ २-११-१८ (११७३०)
भृगुरत्रिर्वसिष्ठश्च गौतमोऽथ तथाङ्गिराः।
पुलस्त्यश्च क्रतुश्चैव प्रह्लादः कर्दमस्तथा। २-११-१९ (११७३१)
अथर्वाङ्गिरसश्चैव वालखिल्या मरीचिपाः।
मनोऽन्तरिक्षं विद्याश्च वायुस्तेजो जलं मही ॥ २-११-२० (११७३२)
शब्दस्पर्शौ तथा रूपं रसो गन्धश्च भारत।
प्रकृतिश्च विकारश्च यच्चान्यत्कारणं भुवः ॥ २-११-२१ (११७३३)
अगस्त्यश्च महातेजा मार्कण्डेयश्च वीर्यवान्।
जमदग्निर्भरद्वाजः संवर्तश्च्यवनस्तथा ॥ २-११-२२ (११७३४)
दुर्वासाश्च महाभाग ऋष्णशृङ्गश्च धार्मिकः।
सनत्कुमारो भगवान्योगाचार्यो महातपाः ॥ २-११-२३ (११७३५)
असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित्।
ऋषभो जितशत्रुश्च महावीर्यस्तथा मणिः ॥ २-११-२४ (११७३६)
आयुर्वेदस्तथाऽष्टाङ्गो देहवांस्तत्र भारत।
चन्द्रमाः सह नक्षत्रैरादित्यश्च गभस्तिमान् ॥ २-११-२५ (११७३७)
वायवः क्रतवश्चैव सङ्कल्पः प्राण एव च।
मूर्तिमन्तो महात्मानो महाव्रतपरायणाः ॥ २-११-२६ (११७३८)
एते चान्ये च बहवो ब्रह्माणं समुपस्थिताः।
अर्थो धर्मश्च कामश्च हर्षो द्वेषस्तपो दमः ॥ २-११-२७ (११७३९)
आयान्ति तस्यां सहिता गन्धर्वाप्सरसां गणाः।
विंशतिः सप्त चैवान्ये लोकपालाश्च सर्वशः ॥ २-११-२८ (११७४०)
शुक्रो बृहस्पतिश्चैव बुधोऽङ्गारक एव च।
शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च ॥ २-११-२९ (११७४१)
मन्त्रो रथन्तरं चैव हरिमान्वसुमानपि।
आदित्याः साधिराजानो नामद्वन्द्वैरुदाहृताः ॥ २-११-३० (११७४२)
मरुतो विश्वकर्मा च वसवश्चैव भारत।
तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ॥ २-११-३१ (११७४३)
ऋग्वेदः सामवेदश्च यजुर्वेदश्च पाण्डव।
अथर्ववेदश्च तथा सर्वशास्त्राणि चैव ह ॥ २-११-३२ (११७४४)
इतिहासोपवेदाश्च वेदाङ्गानि च सर्वशः।
ग्रहा यज्ञाश्च सोमश्च देवताश्चापि सर्वशः ॥ २-११-३३ (११७४५)

सावित्री दुर्गतरणी वाणी सप्तविधा तथा।
मेधा धृतिः श्रुतिश्चैव प्रज्ञा बुद्धिर्यशः क्षमा ॥ २-११-३४ (११७४६)
सामानि स्तुतिशस्त्राणि गाथाश्च विविधास्तथा।
भाष्याणि तर्कयुक्तानि देहवन्ति विशाम्पते ॥ २-११-३५ (११७४७)
नाटका विविधाः काव्याः कथाख्यायिकारिकाः ।
तत्रतिष्ठन्ति ते पुण्या ये चान्ये गुरुपूजकाः ॥ २-११-३६ (११७४८)
क्षणा लवा मुहूर्ताश्च दिवा रात्रिस्तथैव च।
अर्धमासाश्च मासाश्च ऋतवः षट् च भारत ॥ २-११-३७ (११७४९)
संवत्सराः पञ्चयुगमहोरात्रश्चतुर्विधः।
कालचक्रं च तद्दिव्यं नित्यमक्षयमव्ययम् ॥ २-११-३८ (११७५०)
धर्मचक्रं तथा चापि नित्यमास्ते युधिष्ठिर।
अदितिर्दितिर्दनुश्चैव सुरसा विनता इरा ॥ २-११-३९ (११७५१)
कालिका सुरभी देवी सरमा चाथ गौतमी ॥ २-११-४० (११७५२)
प्रभा कद्रूश्च वै देव्यौ देवतानां च मातरः।
रुद्राणी श्रीश्च लक्ष्मीश्च भद्रा षष्ठी तथाऽपरा ॥ २-११-४१ (११७५३)
पृथिवी गां गता देवी ह्रीः स्वाहा कीर्तिरेव च।
सुरा देवी शची चैव तथा पुष्टिररुन्धती ॥ २-११-४२ (११७५४)
संवृत्तिराशा नियतिः सृष्टिर्देवी रतिस्तथा।
एताश्चान्याश्चवै देव्य उपतस्थुः प्रजापतिम् ॥ २-११-४३ (११७५५)
आदित्या वसवो रुद्रा मरुतश्चास्विनावपि।
विश्वेदेवाश्च साध्याश्च पितरश्च मनोजवाः ॥ २-११-४४ (११७५६)
पितृणां च गणान्विद्धि सप्तैव पुरुषर्षभ।
मूर्तिमन्तो वै चत्वारस्त्रयश्चापि शरीरिणः ॥ २-११-४५ (११७५७)
वैराजश्च महाभागा अग्निष्वात्ताश्च भारत।
गार्हपत्या नाकचराः पितरो लोकविश्रुताः ॥ २-११-४६ (११७५८)
सोमपा एकशृङ्गाश्च चतुर्वेदाः कलास्तथा।
एते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप ॥ २-११-४७ (११७५९)
एतैराप्यायितैः पुर्वं सोमश्चाप्याय्यते पुनः।
त एते पितरः सर्वे प्रजापतिमुपस्थिताः ॥ २-११-४८ (११७६०)
उपासते च संहृष्टा ब्रह्माणममितौजसम्।
राक्षसाश्च पिशाचाश्च दानवा गुह्यकास्तथा ॥ २-११-४९ (११७६१)
नागाः सुपर्णाः पशवः पितामहमुपासते।
स्थावरा जङ्गमाश्चैव महाभूतास्तथाऽपरे ॥ २-११-५० (११७६२)
पुरन्दरश्च देवेन्द्रो वरुणो धनदो यमः।
महादेवः सहोमोऽत्र सदा गच्छति सर्वशः ॥ २-११-५१ (११७६३)
महासेनश्च राजेन्द्र सदोपास्ते पितामहम्।

देवो नारायणस्तस्यां तथा देवर्षयश्च ये ॥ २-११-५२ (११७६४)
ऋषयो वालखिल्याश्च योनिजायोनिजास्तथा।
यच्च किञ्चित्त्रिलोकेऽस्मिन्दृश्यते स्थाणु जङ्गमम्।
सर्वं तस्यां मया दृष्टमिति विद्धि नराधिप ॥ २-११-५३ (११७६५)
अष्टाशीतिसहस्राणि ऋषीणामूर्ध्वरेतसाम्।
प्रजावतां च पञ्चाशदृषीणामपि पाण्डव ॥ २-११-५४ (११७६६)
ते स्म तत्र यथाकामं दृष्ट्वा सर्वे दिवौकसः।
प्रणम्य शिरसा तस्मै सर्वे यान्ति यथागमम् ॥ २-११-५५ (११७६७)
अतिथीनागतान्देवान्दैत्यान्नागांस्तथा द्विजान्।
यक्षान्सुपर्णान्कालेयान्गन्धर्वाप्सरसस्तथा ॥ २-११-५६ (११७६८)
महाभागानमितधीर्ब्रह्मा लोकपितामहः।
दयावान्सर्वभूतेषु यथार्हं प्रतिपद्यते ॥ २-११-५७ (११७६९)
प्रतिगृह्य तु विश्वात्मा स्वयं स्वयम्भूरमितद्युतिः।
सान्त्वमानार्थसम्भोगैर्युनक्ति मनुजाधिप ॥ २-११-५८ (११७७०)
तथा तैरुपयातैश्च प्रतियद्भिश्च भारत।
आकुला सा सभातात भवति स्म सुखप्रदा ॥ २-११-५९ (११७७१)
सर्वतेजोमयी दिव्या ब्रह्मर्षिगणसेविता।
ब्राह्मया श्रिया दीप्यमाना शुशुभे विगतक्लमा ॥ २-११-६० (११७७२)
सा सभा तादृशी दृष्टा मया लोकेषु दुर्लभा।
सभेयं राजशार्दूल मनुष्येषु यथा तव ॥ २-११-६१ (११७७३)
एता मया दृष्टपूर्वाः सभा देवेषु भारत।
सभेयं मानुषे लोके सर्वश्रेष्ठतमा तव ॥ ॥ २-११-६२ (११७७४)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि एकादशोऽध्यायः ॥ ११.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-११-२ देवयुगे कृतयुगे ॥
२-११-३० मामद्भन्द्वैरग्नीषोमेन्द्राभ्यादिभिः ॥
२-११-
३८ संवत्सराः षष्टिः प्रभवादयः ।तेच पञ्चपञ्च एकैकं युगम्।चतुर्विधो मानुषोऽहोरात्रः षष्टिघटिकाभिः।पैत्रो मासेन।दैव

सभापर्व - अध्याय ०१२
॥ श्रीः ॥
२.१२. अध्यायः १२

Mahabharata - Sabha Parva - Chapter Topics

इन्द्रसभास्थहरिश्चन्द्रचरिते युधिष्ठिरेण पृष्टे तत्कथाप्रसङ्गेन नारदकृता राजसूयप्रशंसा ॥१. ।युधिष्ठरम्प्रति पाण्डुस

Mahabharata - Sabha Parva - Chapter Text

युधिष्ठिर उवाच ॥

प्रायशो राजलोकस्ते कथितो वदतां वर।
वैवस्वतसभायां तु यथा वदसि मे प्रभो ॥ २-१२-१ (११७७५)
वरुणस्य सभायां तु नागास्ते कथिता विभो।
दैत्येन्द्राश्चापि भूयिष्ठाः सरितः सागरास्तथा ॥ २-१२-२ (११७७६)
तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा।
गन्धर्वाप्सरसश्चैव भगवांश्च वृषध्वजः ॥ २-१२-३ (११७७७)
पितामहसभायां तु कथितास्ते महर्षभः।
सर्वे देवनिकायाश्च सर्वशास्त्राणि चैव ह ॥ २-१२-४ (११७७८)
शक्रस्य तु सभायां तु देवाः सङ्कीर्तिता मुने।
उद्देशतश्च गन्धर्वा विविधाश्च महर्षयः ॥ २-१२-५ (११७७९)
एक एव तु राजर्षिर्हरिश्चन्द्रो महामुने।
कथितस्ते सभायां वै देवेन्द्रस्य महात्मनः ॥ २-१२-६ (११७८०)
किं कर्म तेनाचरितं तपो वा नियतव्रत।
येनासौ सह शक्रेण स्पर्धते सुमहायशाः ॥ २-१२-७ (११७८१)
पितृलोकगतश्चैव त्वया विप्र पिता मम।
दृष्टः पाण्डुर्महाभागः कथं वाऽपि समागतः ॥ २-१२-८ (११७८२)
किमुक्तवांश्च भगवंस्तन्ममाचक्ष्व सुव्रत।
त्वत्तः श्रोतुं सर्वमिदं परं कौतूहलं हि मे ॥ २-१२-९ (११७८३)
नारद उवाच। २-१२-१०क्ष् (१३९५)
यन्मां पृच्छसि राजेन्द्र हरिश्चन्द्रं प्रति प्रभो।
तत्तेऽहं सम्प्रवक्ष्यामि माहात्म्यं तस्य धीमतः ॥ २-१२-१० (११७८४)
ग इक्ष्वाकूणां कुले जातस्त्रिशङ्कुर्नाम पार्थिवः।
अयोध्याधिपतिर्वीरो विश्वामित्रेण संस्थितः ॥ २-१२-११ (११७८५)
तस्य सत्यवती नाम पत्नी केकयवंशजा।
तस्यां गर्भः समभवद्धर्मेण कुरुनन्दन ॥ २-१२-१२ (११७८६)
सा च काले महाभागा राजन्मासं प्रविश्य च।
कुमारं जनयामास हरिश्चन्द्रमकल्मषम्।
स वै राजा हरिश्चन्द्रस्त्रैशङ्कव इति स्मृतः'॥ २-१२-१३ (११७८७)

स राजा बलवानासीत्सम्राट् सर्वमहीक्षिताम्।
तस्य सर्वे महीपालाः शासनावनताः स्थिताः ॥ २-१२-१४ (११७८८)
तेनैकं रथमास्थाय जैत्रं हेमविभूषितम्।
शस्त्रप्रतापेन जिता द्वीपाः सप्त जनेश्वर ॥ २-१२-१५ (११७८९)
स निर्जित्य महीं कृत्स्नां सशैलवनकाननाम्।
आजहार महाराज राजसूयं महाक्रतुम् ॥ २-१२-१६ (११७९०)
तस्य सर्वे महीपाला धनान्याजह्रुराज्ञया।
द्विजानां परिवेष्टारस्तस्मिन्यज्ञे च तेऽभवन् ॥ २-१२-१७ (११७९१)
ग्समाप्तयज्ञो विधिवद्धरिश्चन्द्रः प्रतापवान्।
अभिषिक्तश्च शुशुभे साम्राज्येन नराधिपः ॥ २-१२-१८ (११७९२)
राजसूयेऽभिषिक्तश्च समाप्तवरदक्षिणे'॥ २-१२-१९ (११७९३)
प्रादाच्च द्रविणं प्रीत्या याचकानां नरेश्वरः।
यथोक्तवन्तस्ते तस्मिंस्ततः पञ्चगुणाधिकम् ॥ २-१२-२० (११७९४)
अतर्पयच्च विविधैर्वसुभिर्ब्राह्मणांस्तदा।
प्रसर्पकाले सम्प्राप्ते नानादिग्भ्यः समागतान् ॥ २-१२-२१ (११७९५)
भक्ष्यभोज्यैश्च विविधैर्यथाकामपुरस्कृतैः।
रत्नौघतर्पितैस्तुष्टैर्द्विजैश्च समुदाहृतम्।
तेजस्वी च यशस्वी च नृपेभ्योऽभ्यधिकोऽभवत् । २-१२-२२ (११७९६)
एतस्मात्कारणाद्राजन्हरिश्चन्द्रो विराजते।
तेभ्यो राजसहस्रेभ्यस्तद्विद्धि भरतर्षभ ॥ २-१२-२३ (११७९७)
समाप्य च हरिश्चन्द्रो महायज्ञं प्रतापवान्।
अभिषिक्तश्च शुशुभे साम्राज्येन नराधिप ॥ २-१२-२४ (११७९८)
ये चान्ये च महीपाला राजसूयं महाक्रतुम्।
यजन्ते ते सहेन्द्रेण मोदन्ते भरतर्षभ। २-१२-२५ (११७९९)
ये चापि नि नं प्राप्ताः सङ्ग्रामेष्वपलायिनः।
ते तत्सदनम् ताद्य मोन्दते भरतर्षभ ॥ २-१२-२६ (११८००)
तपसा ये च तीव्रेण त्यजन्तीह कलेवरम्।
ते तत्स्थानं समासाद्य श्रीमन्तो भान्ति नित्यशः ॥ २-१२-२७ (११८०१)
पिता च त्वाऽऽह कौन्तेय पाण्डुः कौरवनन्दन।
हरिश्चन्द्रे श्रियं दृष्ट्वा नृपतौ जातविस्मयः ॥ २-१२-२८ (११८०२)
विज्ञाय मानुषं लोकमायान्तं मां नराधिप।
प्रोवाच प्रणतो भूत्वा वदेथास्त्वं युधिष्ठिरम् ॥ २-१२-२९ (११८०३)
समर्थोऽसि महीं जेतुं भ्रातरस्ते स्थिता वशे।
राजसूयं क्रतुश्रेष्ठमहारस्वेति भारत ॥ २-१२-३० (११८०४)
त्वयीष्टवति पुत्रेऽहं हरिश्चन्द्रवदाशु वै।
मोदिष्ये बहुलाः शश्वत्समाः शक्रस्य संसदि ॥ २-१२-३१ (११८०५)

एवं भवतु वक्ष्येऽहं तव पुत्रं नराधिपम्।
भूलोकं यदि गच्छेयमिति पाण्डुमथाब्रुवम् ॥ २-१२-३२ (११८०६)
तस्य त्वं पुरुषव्याघ्र सङ्कल्पं कुरु पाण्डव।
गन्तासित्वं महेन्द्रस्य पूर्वैः सह सलोकताम् ॥ २-१२-३३ (११८०७)
बहुविघ्नश्च नृपते क्रतुरेष स्मृतो महान्।
छिद्राण्यस्य वाञ्छन्ति यज्ञघ्ना ब्रह्मराक्षसाः ॥ २-१२-३४ (११८०८)
युद्धं च क्षत्रशमनं पृथिवीक्षयकारणम्।
किञ्चिदेव निमित्तं च भवत्यत्र क्षयावहम् ॥ २-१२-३५ (११८०९)
एतत्सञ्चिन्त्य राजेन्द्र यत्क्षमं तत्समाचर।
अप्रमत्तोत्थितो नित्यं चातुर्वर्ण्यस्य रक्षणे ॥ २-१२-३६ (११८१०)
भव एधस्व मोदस्व धनैस्तर्पय च द्विजान्।
एतत्ते विस्तरेणोक्तं यन्मां त्वं परिपृच्छसि।
आपृच्छे त्वां गमिष्यामि दाशार्हनगरीं प्रति ॥ २-१२-३७ (११८११)
वैशम्पायन उवाच। २-१२-३८क्ष् (१३९६)
एवमाख्याय पार्थेभ्यो नारदो जनमेजय।
जगाम तैर्वृतो राजन्नृषिभिर्यैः समागतः ॥ २-१२-३८ (११८१२)
गते तु नारदे पार्थो भ्रातृभिः सह कौरवः।
राजसूयं क्रतुश्रेष्ठं चिन्तयामास पार्थिवः ॥ ॥ २-१२-३९ (११८१३)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि द्वादशोऽध्यायः ॥ १२.।

सभापर्व - अध्याय ०१३
॥ श्रीः ॥
२.१३. अध्यायः १३

Mahabharata - Sabha Parva - Chapter Topics

मन्त्रिभिः सह संमन्त्र्य कृतराजसूयकरणनिश्चयस्य युधिष्ठिरस्य श्रीकृष्णम्प रति दूतप्रेषणम् ॥१.।दूतेन सह इन्द्रप्र

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ऋषेस्तद्वचनं श्रुत्वा निशश्वास युधिष्ठिरः।
चिन्तयन्राजसूयेष्टिं न लेभे शर्म भारत ॥ २-१३-१ (११८१४)

राजर्षीणां च तं श्रुत्वा महिमानं महात्मनाम्।
यज्वनां कर्मभिः पुण्यैर्लोकप्राप्तिं समीक्ष्य च ॥ २-१३-२ (११८१५)
हरिश्चन्द्रं च राजर्षिं रोजमानं विशेषतः।
यज्वानं यज्ञमाहर्तुं राजसूयमियेष सः ॥ २-१३-३ (११८१६)
युधिष्ठिरस्ततः सर्वानर्चयित्वा सभासदः।
प्रत्यर्चितश्च तैः सर्वैर्यज्ञायैव मनो दधे ॥ २-१३-४ (११८१७)
स राजसूयं राजेन्द्र कुरूणामृषभस्तदा।
आहर्तुं प्रवणं चक्रे मनः सञ्चिन्त्य चासकृत् ॥ २-१३-५ (११८१८)
भूयश्चाद्भुतवीर्यौजा धर्ममेवानुचिन्तयन्।
किं हितं सर्वलोकानां भवेदिति मनो दधे ॥ २-१३-६ (११८१९)
अनुगृह्णन्प्रजाः सर्वाः सर्वधर्मभृतां वरः।
अविशेषेण सर्वेषां हितं चक्रे युधिष्ठिरः ॥ २-१३-७ (११८२०)
सर्वेषां दीयतां देयं मुष्णन्कोपमदावुभौ।
साधु धर्मेति धर्मेति नान्यच्छ्रूयेत भाषितम् ॥ २-१३-८ (११८२१)
एवं गते ततस्तस्मिन्पितरीवाश्वसञ्जनाः।
न तस्य विद्यते द्वेष्टा ततोऽस्याजातशत्रुता ॥ २-१३-९ (११८२२)
परिग्रहान्नरेन्द्रस्य भीमस्य परिपालनात्।
शत्रूणां क्षपणाच्चैव बीभत्सोः सव्यसाचिनः ॥ २-१३-१० (११८२३)
ग्बलीनां सम्यगुत्थानान्नकुलस्य यशस्विनः'।
धीमतः सहदेवस्य धर्माणामनुशासनात् ॥ २-१३-११ (११८२४)
वैनत्यात्सर्वतश्चैव नकुलस्य स्वभावतः।
अविग्रहा वीतभयाः स्वकर्मनिरताः सदा ॥ २-१३-१२ (११८२५)
निकामवर्षाः स्फीताश्च आसञ्जनपदास्तथा।
वार्धुषी यज्ञसत्वानि गोरक्षं कर्षणं वणिक् ॥ २-१३-१३ (११८२६)
विशेषात्सर्वमेवैतत्सञ्जज्ञे राजकर्मणा।
अनुकर्षं च निष्कर्षं व्याधिपावकमूर्छनम् ॥ २-१३-१४ (११८२७)
सर्वमेव न तत्रासीद्धर्मनित्ये युधिष्ठिरे।
दस्युभ्यो वञ्चकेभ्यश्च राज्ञः प्रति परस्परम् ॥ २-१३-१५ (११८२८)
राजवल्लभतश्चैव नाश्रूयत मृषाकृतम्।
प्रियं कर्तुमुपस्थातुं बलिकर्म स्वकर्मजम् ॥ २-१३-१६ (११८२९)
अभिहर्तुं नृपाः षट्सु पृथक्जात्यैश्च नैगमैः।
ववृधे विषयस्तत्र धर्मनित्ये युधिष्ठिरे ॥ २-१३-१७ (११८३०)
कामतोऽप्युपयुञ्जानै राजसैर्लोभजैर्जनैः।
सर्वव्यापी सर्वगुणी सर्वसाहः स सर्वराट् ॥ २-१३-१८ (११८३१)
यस्मिन्नधिकृतः सम्राड् भ्राजमानो महायशाः।
यत्र राजन्दश दिशः पितृतो मातृतस्तथा।

अनुरक्ताः प्रजा आसन्नागोपाला द्विजातयः ॥ २-१३-१९ (११८३२)
स मन्त्रिणः समानाय्य भ्रातृंश्च वदतां वरः।
राजसूयं प्रति तदा पुनः पुनरपृच्छत ॥ २-१३-२० (११८३३)
ते पृच्छ्यमानाः सहिता वचोऽर्थ्यं मन्त्रिणस्तदा।
युधिष्ठिरं महाप्राज्ञं यियक्षुमिदमब्रुवन् ॥ २-१३-२१ (११८३४)
येनाभिषिक्तो नृपतिर्वारुणं गुणमृच्छति।
तेन राजाऽपि तं कुत्स्नं सम्राड्गुणमभीप्सृति ॥ २-१३-२२ (११८३५)
तस्य सम्राड्गुणार्हस्य भवतः कुरुनन्दन।
राजसूयस्य समयं मन्यन्ते सुहृदस्तव ॥ २-१३-२३ (११८३६)
तस्य यज्ञस्य समयः स्वाधीनः क्षत्रसम्पदा।
साम्ना षडग्नयो यस्मिंश्चीयन्ते शंसितव्रतैः ॥ २-१३-२४ (११८३७)
दर्वीहोमानुपादाय सर्वान्यः प्राप्नुते क्रतून्।
अभिषेकं च यज्ञान्ते सर्वजित्तेन चोच्यते ॥ २-१३-२५ (११८३८)
समर्थोऽसि महाबाहो सर्वे ते वशगा वयम्।
अचिरात्त्वं महाराज राजसूयमवाप्स्यसि ॥ २-१३-२६ (११८३९)
अविचार्य महाराज राजसूये मनः कुरु।
इत्येवं सुहृदः सर्वे पृथक्च सह चाब्रुवन् ॥ २-१३-२७ (११८४०)
स धर्म्यं पाण्डवस्तेषां वचः श्रुत्वा विशाम्पते।
धृष्टमिष्टं वरिष्टं च जग्राह मनसाऽरिहा ॥ २-१३-२८ (११८४१)
श्रुत्वा सुहृद्वचस्तच्च जानंश्चाप्यात्मनः क्षमम्।
ग्स प्रशस्तक्रियारम्भः परीक्षामुपचक्रमे ॥ २-१३-२९ (११८४२)
वैशम्पायन उवाच ॥ २-१३-३०क्ष् (१३९७)
चतुर्भिर्भीमसेनाद्यैर्भ्रातृभिः सहितो हितम्।
एवमुक्तस्तथा पार्थो धर्म एव मनो दधे ॥ २-१३-३० (११८४३)
स राजसूयं राजेन्द्रः कुरूणामृषभः क्रतुम्।
जगाम मनसा सद्य आहरिष्यन्युधिष्ठिरः ॥ २-१३-३१ (११८४४)
भूयस्त्वद्भुतवीर्योपि धर्ममेवानुपालयन् '।
पुनः पुनर्मनो दध्रे राजसूयाय भारत ॥ २-१३-३२ (११८४५)
स भ्रातृभिः पुनर्धीमानृत्विग्भिश्च महात्मभिः।
मन्त्रिभिश्चापि सहितो धर्मराजो युधिष्ठिरः ॥ २-१३-३३ (११८४६)
धौम्यद्वैपायनाद्यैश्च मन्त्रयामास मन्त्रवित्।
ग्विराटद्रुपदाभ्यां च सात्यकेन च धीमता ॥ २-१३-३४ (११८४७)
युधामन्यूत्तमौजोभ्यां सौभद्रेण च धीमता।
द्रौपदेयैः परं शूरैर्मन्त्रयामास संवृतः ॥ २-१३-३५ (११८४८)
युधिष्ठिर उवाच'॥ २-१३-३६क्ष् (१३९८)
भवन्तो राजसूयस्य सम्राडर्हस्य सुक्रतोः।

श्रद्दधानस्य वदत ममावाप्तिः कथं भवेत् ॥ २-१३-३६ (११८४९)
वैशम्पायन उवाच। २-१३-३७क्ष् (१३९९)
एवमुक्तास्तु ते तेन राज्ञा राजीवलोचन।
इदमूचुर्वचः काले धर्मराजं युधिष्ठिरम् ॥ २-१३-३७ (११८५०)
अर्हस्त्वमसि धर्मज्ञ राजसूयं महाक्रतुम्।
अथैवमुक्ते नृपतावृत्विग्भिर्ऋषिभिस्तथा ॥ २-१३-३८ (११८५१)
मन्त्रिणो भ्रातरश्चास्य तद्वचः प्रत्यपूजयन्।
स तु राजा महाप्राज्ञः पुनरेवात्मनाऽऽत्मवान् ॥ २-१३-३९ (११८५२)
भूयो विममृशे पार्थो लोकानां हितकाम्यया।
सामर्थ्ययोगं सम्प्रेक्ष्य देशकालौ व्ययागमौ ॥ २-१३-४० (११८५३)
विमृश्य सम्यक् च धिया कुर्वन्प्राज्ञो न सीदति।
नहि यज्ञसमारम्भः केवलात्मविनिश्चयात् ॥ २-१३-४१ (११८५४)
भवतीति समाज्ञाय यत्नतः कार्यमुद्वहन्।
स निश्चयार्थं कार्यस्य कृष्णमेव जनार्दनम् ॥ २-१३-४२ (११८५५)
सर्वलोकात्परं मत्वा जगाम मनसा हरिम्।
अप्रमेयं महाबाहुं कामाज्जातमजं नृषु ॥ २-१३-४३ (११८५६)
पाण्डवस्तर्कयामास कर्मभिर्देवसंमतैः।
नास्य किञ्चिदविज्ञातं नास्य किञ्चिदकर्मजम् ॥ २-१३-४४ (११८५७)
न स किञ्चिन्न विषहेदिति कृष्णममन्यत।
स तु तां नैष्ठिकीं बुद्धिं कृत्वा पार्थो युधिष्ठिरः ॥ २-१३-४५ (११८५८)
गुरुवद्भूतगुरवे प्राहिणोद्दूतमञ्जसा।
शीघ्रगेन रथेनाशु स दूतः प्राप्य यादवान् ॥ २-१३-४६ (११८५९)
द्वारकावासिनं कृष्णं द्वारवत्यां समासदत्।
ґ स प्रभुं प्राञ्जलिर्भूत्वा व्यज्ञापयत माधवम् ॥ २-१३-४७ (११८६०)
दूत उवाच ॥ २-१३-४८क्ष् (१४००)
धर्मराजो हृषीकेश धौम्यव्यासादिभिः सह।
पाञ्चालमात्स्यसहितैर्भ्रातृभिश्चैव सर्वशः ॥ २-१३-४८ (११८६१)
त्वद्दर्शनं महाबाहो काङ्क्षते स युधिष्ठिरः ॥ २-१३-४९ (११८६२)
वैशम्पायन उवाच ॥ २-१३-५०क्ष् (१४०१)
इन्द्रसेनवचः श्रुत्वा यादवप्रवरो बली'।
दर्शनाकाङ्क्षिणं पार्थं दर्शनाकाङ्क्षयाच्युतः ॥ २-१३-५० (११८६३)
ґआमन्त्र्य राजन्सुहृदो वसुदेवं च माधवः'।
इन्द्रसेनेन सहित इन्द्रप्रस्थमगात्तदा।
व्यतीत्य विविधान्देशांस्त्वरावान्क्षिप्रवाहनवः ॥ २-१३-५१ (११८६४)
इन्द्रप्रस्थगतं पार्थमभ्यगच्छज्जनार्दनः।
स गृहे पितृवद्भ्रात्रा धर्मराजेन पूजितः ॥ २-१३-५२ (११८६५)

भीमेन च ततोऽपश्यत्स्वसारं प्रीतिमान्पितुः।
प्रीतः प्रीतेन सुहृदा रेमे स सहितस्तदा ॥ २-१३-५३ (११८६६)
अर्जुनेन यमाभ्यां च गुरुवत्पर्युपासितः।
तं विश्रान्तं शुभे देशे क्षणिनं कल्पमच्युतम्।
धर्मराजः समागम्य ज्ञापयत्स्वप्रयोजनम् ॥ २-१३-५४ (११८६७)
युधिष्ठिर उवाच ॥ २-१३-५क्ष् (१४०२)
प्रार्थितो राजसूयो मे न चासौ केवलेप्सया।
प्राप्यते येन तत्ते हि विदितं कृष्ण सर्वशः ॥ २-१३-५५ (११८६८)
यस्मिन्सर्वं सम्भवति यश्च सर्वत्र पूज्यते।
यश्च सर्वेश्वरो राजा राजसूयं स विन्दति ॥ २-१३-५६ (११८६९)
तं राजसूयं सुहृदः कार्यमाहुः समेत्य मे।
तत्र मे निश्चिततमं तव कृष्ण गिरा भवेत् ॥ २-१३-५७ (११८७०)
केचिद्धि सौहृदा देवे न दोषं परिचक्षते।
स्वार्थहेतोस्तथैवान्ये प्रियमेव वदन्त्युत ॥ २-१३-५८ (११८७१)
प्रियमेव परीप्सन्ते केचिदात्मनि यद्धितम्।
एवम्प्रायाश्च दृश्यन्ते जनवादाः प्रयोजने ॥ २-१३-५९ (११८७२)
त्वं तु हेतूनतीत्यैतान्कामक्रोधौ व्युदस्य च।
परमं यत्क्षमं लोके यथावद्वक्तुमर्हसि ॥ ॥ २-१३-६० (११८७३)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि त्रयोदशोऽध्यायः ॥ १३.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१३-१३ वार्धुषी वृद्ध्युपजीविका ।यज्ञसत्वानि कतूना सामर्थ्यानि सद्यः पुष्कलफलप् रदत्वादिविषयाणि ॥
२-१३-
१४ अनुकर्ष दारिद्र्याद्राजकीयद्रव्यस्यातीतवर्षस्य ऋणत्वेन धारणम् ।निष्कर्ष करार्थं प्रजापीडनम्।अवर्षणं चातिवर्षं इति
२-१३-
१७ नैगमैर्वणिग्भिः सह आसन्निति शेवः ।इतरे नृपा विणिग्वद्येन करदीकृता इत्यर् थः।तत्र तस्मिन् विषयोदेशः ॥
२-१३-१८ लोभजैर्विमोहोत्थैराजसरैर्वृत्तिविशेषैस्तृष्णादिभिस्तादृशैरपि ववृधे वृद्ध इमानभूत् ॥
२-१३-२२ येन कारेण वारुणं गुणं वृद्धिं ।तेन कारणेना ॥
२-१३-५२ भ्रात्रा पितृष्वसृजेन ॥
२-१३-५४ क्षणिनं सावसरम् ।कल्पं समर्थम् ॥

सभापर्व - अध्याय ०१४
॥ श्रीः ॥

२.१४. अध्यायः १४

Mahabharata - Sabha Parva - Chapter Topics

जरासन्धशौर्यकथनादिरूपं श्रीकृष्णवाक्यम् ॥

Mahabharata - Sabha Parva - Chapter Text

कृष्ण उवाच ॥

सर्वैर्गुणैर्महाराज राजसूयं त्वमर्हसि।
जानतस्त्वेव ते सर्वं किञ्चिद्वक्ष्यामि भारत ॥ २-१४-१ (११८७४)
जामदग्न्येन रामेण क्षत्रं यदवशेषितम्।
तस्मादवरजं लोके यदिदं क्षत्रसंज्ञितम् ॥ २-१४-२ (११८७५)
कृतोऽयं कलुसङ्कल्पः क्षत्रियैर्वसुधाधिप।
निदेशवाग्भिस्तत्तेह विदितं भरतर्षभ ॥ २-१४-३ (११८७६)
ऐलस्येक्ष्वाकुवंशस्य प्रकृतिं परिचक्षते।
राजानः श्रेणिबद्धाश्च तथाऽन्ये क्षत्रिया भुवि ॥ २-१४-४ (११८७७)
ऐलवंश्याश्च ये राजंस्तथैवेक्ष्वाकवो नृपाः।
तानि चैकशतं विद्धि कुलानि भरतर्षभ ॥ २-१४-५ (११८७८)
ययातेस्त्वेव भोजानां विस्तरो गुणतो महान्।
भजतेऽद्य महाराज विस्तरं सचतुर्दिशम् ॥ २-१४-६ (११८७९)
तेषां तथैव तां लक्ष्मीं सर्वक्षत्रमुपासते।
इदानीमेव वै राजञ्जरासन्धो महीपतिः ॥ २-१४-७ (११८८०)
अभिभूय श्रियं तेषां कुलानामभिषेचितः।
स्थितो मूर्ध्नि नरेन्द्राणामोजसाऽऽक्रम्य सर्वशः ॥ २-१४-८ (११८८१)
सोऽवनीं मध्यमां भुक्त्वा मिथो भेदममन्यत।
प्रभुर्यस्तु परो राजा यस्मिन्नेकवशे जगत् ॥ २-१४-९ (११८८२)
स साम्राज्यं महाराज प्राप्तो भवति योगतः।
तं स राजा जरासन्धं संश्रित्य किल सर्वशः ॥ २-१४-१० (११८८३)
राजन्सेनापतिर्जातः शिशुपालः प्रतापवान्।
तमेव च महाराज शिष्यवत्समुपस्थितः ॥ २-१४-११ (११८८४)
वक्रः करूषाधिपतिर्मायायोधी महाबलः ॥
अपरौ च महावीर्यौ महात्मानौ समाश्रितौ ॥ २-१४-१२ (११८८५)
जरासन्धं महावीर्यं तौ हिंसडिम्बिकावुभौ।
वक्रदन्तः करूषस्य करभो मेघवाहनः।
मूर्ध्ना दिव्यं मणिं बिभ्रद्यमद्भुतमणिं विदुः ॥ २-१४-१३ (११८८६)

मरुं च नरकं चैव शास्ति यो यवनाधिपः।
अपर्यन्तबलो राजा प्रतीच्यां वरुणो यथा ॥ २-१४-१४ (११८८७)
भगदत्तो महाराज वृद्धस्तव पितुः सखा।
स वाचा प्रणतस्तस्य कर्मणा च विशेषतः ॥ २-१४-१५ (११८८८)
स्नेहबद्धश्च मनसा पितृवद्भक्तिमांस्त्वयि।
प्रतीच्यां दक्षिणं चान्तं पृथिव्याः प्रति यो नृपः ॥ २-१४-१६ (११८८९)
मातुलो भवतः शूरः पुरुजित्कुन्तिवर्धनः।
स ते सन्नितिमानेकः स्नेहतः शत्रुसूदनः ॥ २-१४-१७ (११८९०)
जरासन्धं गतस्त्वेव पुरा यो न मया हतः।
पुरुषोत्तमविज्ञातो योसौ चेदिषु दुर्मतिः ॥ २-१४-१८ (११८९१)
आत्मानं प्रतिजानाति लोकेऽस्मिन्पुरुषोत्तमम्।
आदत्ते सततं मोहाद्यः स चिह्नं च मामकम् ॥ २-१४-१९ (११८९२)
वङ्गपुण्ड्रकिरातेषु राजा बलसमन्वितः।
पौण्ड्रको वासुदेवेति योसौ लोकेऽभिविश्रुतः ॥ २-१४-२० (११८९३)
चतुर्थभाङ्महाराज भोज इन्द्रसखो बली।
विद्याबलाद्यो व्यजयत्स पाण्ड्यक्रथकैशिकान् ॥ २-१४-२१ (११८९४)
भ्राता तस्याकृतिः शूरो जामदग्न्यसमोऽभवत्।
स भक्तो मागधं राजा भीष्मकः परवीरहा ॥ २-१४-२२ (११८९५)
प्रियाण्याचरतः प्रह्वान्सदा सम्बन्धिनस्ततः।
भजतो न भजत्यस्मानप्रियेषु व्यवस्थितः ॥ २-१४-२३ (११८९६)
न कुलं सबलं राजन्नभ्यजानात्तथाऽऽत्मनः।
पश्यमानो यशो दीप्तं जरासन्धमुपस्थितः ॥ २-१४-२४ (११८९७)
उदीच्याश्च तथा भोजाः कुलान्यष्टादश प्रभो।
जरासन्धभयादेव प्रतीचीं दिशमास्थिताः ॥ २-१४-२५ (११८९८)
शूरसेना भद्रकारा बोधाः शाल्वाः पटच्चराः।
सुस्थलाश्च सुकुट्टाश्च कुलिन्दाः कुन्तिभिः सह ॥ २-१४-२६ (११८९९)
शाल्वायनाश्च राजानः सोदर्यानुचरैः सह।
दक्षिणा ये च पञ्चालाः पूर्वाः कुन्तिषु कोसलाः ॥ २-१४-२७ (११९००)
तथोत्तरां दिशं चापि परित्यज्य भयार्दिताः।
मत्स्याः सन्न्यस्तपादाश्च दक्षिणां दिशमाश्रिताः ॥ २-१४-२८ (११९०१)
तथैव सर्वपञ्चाला जरासन्धभायर्दिताः।
स्वराज्यं सम्परित्यज्य विद्रुताः सर्वतोदिशम् ॥ २-१४-२९ (११९०२)
ग अग्रतो ह्यस्य पाञ्चालास्तत्रानीके महात्मनः।
अनिर्गते सारबले मागधेभ्यो गिरिव्रजात् ॥ २-१४-३० (११९०३)
उग्रसेनसुतः कंसः पुरा निर्जित्य बान्धवान्'।
बार्हद्रथसुते देव्यावुपागच्छद्वृथामतिः ॥ २-१४-३१ (११९०४)

अस्तिः प्रास्तिश्च नाम्ना ते सहदेवानुजेऽबले।
बलेन तेन स्वज्ञातीनभिभूय वृथामतिः ॥ २-१४-३२ (११९०५)
श्रैष्ठ्यं प्राप्तः स तस्यासीदतीवापनयो महान्।
भोजराजन्यवृद्धैश्च पीड्यमानैर्दुरात्मना ॥ २-१४-३३ (११९०६)
ज्ञातित्राणमभीप्सद्भिरस्मत्सम्भावना कृता।
दत्वाऽऽक्रूराय सुतनुं तामाहुकसुतां तदा ॥ २-१४-३४ (११९०७)
सङ्कर्षणद्वितीयेन ज्ञातिकार्यं मया कृतम्।
हतौ कंससुनामानौ मया रामेण चाप्युत ॥ २-१४-३५ (११९०८)
ग्हत्वा कंसं तथैवादौ जरासन्धस्य बिभ्यतः।
मया रामेण चान्यत्र ज्ञातयः परिपालितः'॥ २-१४-३६ (११९०९)
भये तु समतिक्रान्ते जरासन्धे समुद्यते।
मन्त्रोऽयं मन्त्रितो राजन्कुलैरष्टादशावरैः ॥ २-१४-३७ (११९१०)
अनारमन्तो निघ्नन्तो महास्त्रैः शत्रुघातिभिः।
न हन्यामो वयं तस्य त्रिभिर्वर्षशतैर्बलम् ॥ २-१४-३८ (११९११)
तस्य ह्यमरसङ्काशौ बलेन बलिनां वरौ।
नामभ्यां हंसडिबिकावशस्त्रनिधनावुभौ ॥ २-१४-३९ (११९१२)
तावुभौ सहितौ वीरौ जरासन्धश्च वीर्यवान्।
त्रयस्त्रयाणां लोकानां पर्याप्ता इति मे मतिः ॥ २-१४-४० (११९१३)
न हि केवलमस्माकं यावन्तोऽन्ये च पार्थिवाः।
तथैव तेषामासीच्च बुद्धिर्बुद्धिमतां वर ॥ २-१४-४१ (११९१४)
ग्अष्टादश मया तस्य सङ्ग्रामा रोमहर्षणाः।
दत्ता न च हतो राजञ्जरासन्धो महाबलः'॥ २-१४-४२ (११९१५)
अथ हंस इति ख्यातः कश्चिदासीन्महान्नृपः।
रामेण स हतस्तत्र सङ्ग्रामेऽष्टादशावरे ॥ २-१४-४३ (११९१६)
हतो हंस इति प्रोक्तस्य केनापि भारत।
तच्छ्रुत्वा डिबिको राजन्यमुनाम्भस्यमज्जत ॥ २-१४-४४ (११९१७)
विना हसेन लोकेऽस्मिन्नाहं जीवितुमुत्सहे।
इत्येतां मतिमास्थाय डिबिको निधनं गतः ॥ २-१४-४५ (११९१८)
तथा तु डिबिकं श्रुत्वा हंसः परुपुरञ्जयः।
प्रपेदे यमुनामेव सोपि तस्यां न्यमज्जत ॥ २-१४-४६ (११९१९)
तौ स राजा जराजन्धः श्रुत्वा च निधनं गतौ।
पुरं शून्येन मनसा प्रययौ भरतर्षभ ॥ २-१४-४७ (११९२०)
ततो वयमित्रघ्न तस्मिन्प्रतिगते नृपे।
पुनरान्दिनः सर्वे मधुरायां वसामहे ॥ २-१४-४८ (११९२१)
यदा त्वभ्येत्य पितरं सा वै राजीवलोचना।
कंसभार्या जरासन्धं दुहिता मागधं नृपम्।

चोदयत्येव राजेन्द्र पतिव्यसनदुःखिता ॥ २-१४-४९ (११९२२)
पतिघ्नं मे जहीत्येवं पुनः पुनररिन्दम।
ततो वयं महाराज तं मन्त्रं पूर्वमन्त्रितम् ॥ २-१४-५० (११९२३)
संस्मरन्तो विमनसो व्यपयाता नराधिप।
पृथक्त्वेन महाराज सङ्क्षिप्य महतीं श्रियम् ॥ २-१४-५१ (११९२४)
पलायामो भयात्तस्य ससुतज्ञातिबान्धवाः।
इति सञ्चिन्त्य सर्वे स्म प्रतीचीं दिशमाश्रिताः ॥ २-१४-५२ (११९२५)
कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम्।
ततो निवेशं तस्यां च कृतवन्तो वयं नृप ॥ २-१४-५३ (११९२६)
तथैव दुर्गसंस्कारं देवैरपि दुरासदम्।
स्त्रियोऽपि यस्यां युध्येयुः किमु वृष्णिमहारथाः ॥ २-१४-५४ (११९२७)
तस्यां वयममित्रघ्न निवसामोऽकुतोभयाः।
आलोच्य गिरिमुख्यं तं मागधं तीर्णमेव च ॥ २-१४-५५ (११९२८)
माधवाः कुरुशार्दूल परां मुदमवाप्नुवन्।
एवं वयं जरासन्धादभितः कृतकिल्बिषाः ॥ २-१४-५६ (११९२९)
सामर्थ्यवन्तः सम्बन्धाद्गोमन्तं समुपाश्रिताः।
त्रियोजनायतं सद्म त्रिस्कन्धं योजनावधि ॥ २-१४-५७ (११९३०)
योजनान्ते शतद्वारं वीरविक्रमतोरणम्।
अष्टादशावरैर्नद्धं क्षत्रियैर्युद्धदुर्मदैः ॥ २-१४-५८ (११९३१)
अष्टादश सहस्राणि भ्रातृणां सन्ति नः कले।
आहुकस्य शतं पुत्रा एकैकस्त्रिदशावरः ॥ २-१४-५९ (११९३२)
चारुदेष्णः सह भ्रात्रा चक्रदेवोऽथ सात्यकिः।
अहं च रोहिणेयश्च साम्बः प्रद्युम्न एव च ॥ २-१४-६० (११९३३)
एवमेते रथाः सप्त राजन्नन्यान्निबोध मे।
कृतवर्मा ह्यनाधृष्टिः समीकः समितिंजयः ॥ २-१४-६१ (११९३४)
कङ्कः शङ्कुश्च कुन्तिश्च सप्तैते वै महारथाः।
ग्प्रद्युम्नश्चानिरुद्धश्च भानुरक्रूरसारणौ ॥ २-१४-६२ (११९३५)
निशठश्च गदश्चैव सप्त चैते महारथाः।
विकमो झिल्लिबभ्रू च उद्धवोऽथ विदूरथः ॥ २-१४-६३ (११९३६)
वसुदेवोग्रसेनौ च सप्तैते मन्त्रिपुङ्गवाः।
प्रसेनजिच्च यमलो राजराजगुणान्वितः ॥ २-१४-६४ (११९३७)
स्यमन्तको मणिर्यस्य रुक्मं निस्रुवते बहु।
पुत्रौ चान्धकभोजस्य वृद्धो राजा च ते दश ॥ २-१४-६५ (११९३८)
वज्रसंहनना वीरी वीर्यवन्तो महाबलाः।
स्मरन्तो मध्यमं देशं वृष्णिवीरा गतज्वराः ॥ २-१४-६६ (११९३९)
पाण्डवैश्चापि सततं नाथवन्तो वयं नृप।

सर्वसम्पद्गुणैः सिद्धे तस्मिन्नेवं व्यवस्थिते ॥ २-१४-६७ (११९४०)
क्षत्रे सम्राजमात्मानं कर्तुमर्हसि भारत।
दुर्योधनं शान्तनवं द्रोणं द्रौणायनिं कृपम् ॥ २-१४-६८ (११९४१)
कर्णं च शिशुपालं च रुक्मिणं च धनुर्धरम्।
एकलव्यं द्रुमं श्वेतं शैब्यं शकुनिमेव च ॥ २-१४-६९ (११९४२)
एतानजित्वा सङ्ग्रामे कथं शक्नोषि तं क्रतुम्।
तथैते गौरवेणैव न योत्स्यन्ति नराधिपाः ॥ २-१४-७० (११९४३)
एकस्तत्र बलोन्मत्तः कर्णो वैकर्तनो वृषा।
योत्स्यते स परामर्षी दिव्यास्त्रबलगर्वितः'॥ २-१४-७१ (११९४४)
न तु शक्यं जरासन्धे जीवमाने महाबल
राजसूयस्त्वयाऽवाप्तुमेषा राजन्मतिर्मम ॥ २-१४-७२ (११९४५)
तेन रुद्धा हि राजानः सर्वे जित्वा गिरिव्रजे।
कन्दरे पर्वतेन्द्रस्य सिंहेनेव महाद्विपाः ॥ २-१४-७३ (११९४६)
स हि राजा जरासन्धो यियक्षुर्वसुधाधिपैः।
ग्अभिषिक्तः स राजन्यैः सहस्रैरुत चाष्टभिः'।
महादेवं महात्मानमुमापतिमरिन्दम ॥ २-१४-७४ (११९४७)
आराध्य तपसोग्रेण निर्जितास्तेन पार्थिवाः।
प्रतिज्ञायाश्च पारं स गतः पार्थिवसत्तम ॥ २-१४-७५ (११९४८)
स हि निर्जित्य निर्जित्य पार्थिवान्पृतनागतान्।
पुरमानीय बद्ध्वा च चकार पुरुषव्रजम् ॥ २-१४-७६ (११९४९)
वयं चैव महाराज जरासन्धभयात्तदा।
मधुरा सम्परित्यज्य गता द्वारवतीं पुरीम् ॥ २-१४-७७ (११९५०)
यदि त्वेनं महाराज यज्ञं प्राप्तुमभीप्ससि।
यतस्व तेषां मोक्षाय जरासन्धवधाय च ॥ २-१४-७८ (११९५१)
समारम्भो न शक्योऽयमन्यथा कुरुनन्दन।
राजसूयस्य कार्त्स्न्येन कर्तुं मतिमतां वर ॥ २-१४-७९ (११९५२)
इत्येषा मे मती राजन्यथा वा मन्यसेऽनघ।
एवं गते ममाचक्ष्व स्वयं निश्चित्य हेतुभिः ॥ ॥ २-१४-८० (११९५३)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि चतुर्दशोऽध्यायः ॥ १४.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१४-४ भुवि ये श्रेणिबद्धा राजानः येचान्ये क्षत्रियाः तान् इक्ष्वाकुवंशस्य प्रकृ ति प्रजां परिचक्षते ॥
२-१४-५६ माधवाः मधुवश्याः ॥

सभापर्व - अध्याय ०१५
॥ श्रीः ॥
२.१५. अध्यायः १५

Mahabharata - Sabha Parva - Chapter Topics
राजसूयविषये श्रीकृष्णयुधिष्ठिरभीमानां संवादः ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

युधिष्ठिर उवाच।

उक्तं त्वया बुद्धिमता यन्नान्यो वक्तुमर्हति।
संशयानां हि निर्मोक्ता त्वन्नान्यो विद्यते भुवि ॥ २-१५-१ (११९५४)
गृहे गृहे हि राजानः स्वस्य स्वस्य प्रियङ्कराः।
न च साम्राज्यमाप्तास्ते सम्राटशब्दो हि कृच्छ्रभाक्। २-१५-२ (११९५५)
कथं परानुभावज्ञः स्वं प्रशंसितुमर्हति।
परेण समवेतस्तु यः प्रशस्यः स पूज्यते ॥ २-१५-३ (११९५६)
विशाला बहुला भूमिर्बहुरत्नसमाचिता।
दूरं गत्वा विजानाति श्रेयो वृष्णिकुलोद्वह ॥ २-१५-४ (११९५७)
शममेव परं मन्ये शमात्क्षेमं भवेन्मम।
आरम्भे पारमेष्ठ्यं तु न प्राप्यमिति मे मतिः ॥ २-१५-५ (११९५८)
एवमेते हि जानन्ति कुले जाता मनस्विनः।
कश्चित्कदाचिदेतेषां भवेच्छ्रेष्ठो जनार्दन। २-१५-६ (११९५९)
वयं यैव महाभाग जरासन्धभयात्तदा।
शङ्किताः स्म महाभाग द्वौरात्म्यात्तस्य चानघ ॥ २-१५-७ (११९६०)
अहं हि तव दुर्धर्ष भुजवीर्याश्रयः प्रभो।
नात्मानं बलिनं मन्ये त्वयि तस्माद्विशङ्किते ॥ २-१५-८ (११९६१)
त्वत्सकाशाच्च रामाच्च भीमसेनाच्च माधव।
अर्जुनाद्वा महाबाहो हन्तुं शक्यो नवेति वै।
एवं जानन्हि वार्ष्णेय विमृशामि पुनः पुनः ॥ २-१५-९ (११९६२)
त्वं मे प्रमाणभूतोऽसि सर्वकार्येषु केशव।
तच्छ्रुत्वा चाब्रवीद्भीमो वाक्यं वाक्यविशारदः ॥ २-१५-१० (११९६३)
भीम उवाच ॥ २-१५-११क्ष् (१४०३)
अनारम्भपरो राजा वल्मीक इव सीदति।
दुर्बलश्चानुपायेन बलिनं योऽधितिष्ठति ॥ २-१५-११ (११९६४)

अतन्द्रितश्च प्रायेण दुर्बलो बलिनं रिपुम्।
जयेत्सम्यक्प्रयोगेण नीत्याऽर्थानात्मनो हितान् ॥ २-१५-१२ (११९६५)
कृष्णे नयो मयि बलं जयः पार्थे धनञ्जये।
मागधं साधयिष्याम इष्टिं त्रय इवाग्रयः ॥ २-१५-१३ (११९६६)
ग्त्वद्बुद्धिबलमाश्रित्य सर्वं प्राप्स्यति धर्मराद।
जयोऽस्माकं हि गोविन्द येषां नाथो भवान्सदा'॥ २-१५-१४ (११९६७)
कृष्ण उवाच। २-१५-१५क्ष् (१४०४)
अर्थानारभते बालो नानुबन्धमवेक्षते।
तस्मादरिं न मृष्यन्ति बालमर्थपरायणम् ॥ २-१५-१५ (११९६८)
जित्वा जय्यान्यौवनाश्विः पालनाच्च भगीरथः।
कार्तवीर्यस्तपोवीर्याद्बलात्तु भरतो विभुः ॥ २-१५-१६ (११९६९)
ऋद्ध्या मरुत्तस्तान्पञ्च सम्राजस्त्वनुशुश्रुम।
ग्सर्वान्वंश्याननुमृशन्नैते सन्ति युगे युगे'॥ २-१५-१७ (११९७०)
साम्राज्यमिच्छतस्ते तु सर्वाकारं युधिष्ठिर।
निग्राह्यलक्षणं प्राप्तिर्धर्मार्थनयलक्षणैः ॥ २-१५-१८ (११९७१)
बार्हद्रथो जरासन्धस्तद्विद्धि भरतर्षभ।
न चैनं प्रत्यत्युद्ध्यन्त कुलान्येकशतं नृपाः ॥ २-१५-१९ (११९७२)
तस्मादिह बलादेव साम्राज्यं कुरुते हि सः ॥ २-१५-२० (११९७३)
रत्नभाजो हि राजानो जरासन्धमुपासते।
न च तुष्यति तेनापि बाल्यादनयमास्थितः ॥ २-१५-२१ (११९७४)
मूर्धाभिषिक्तं नृपतिं प्रधानपुरुषो बलात्।
आदत्ते न च नो दृष्टोऽभागः पुरुषतः क्वचित् ॥ २-१५-२२ (११९७५)
एवं सर्वान्वशे चक्रे जरासन्धः शतावरान्।
तं दुर्बलतरो राजा कथं पार्थ उपैष्यति ॥ २-१५-२३ (११९७६)
ग्तण्डुलप्रस्थके राजा कपर्दिनमुपासते'।
प्रोक्षितानां प्रमृष्टानां राज्ञां पशुपतेर्गृहे।
पशूनामिव प्रमृष्टानां राज्ञां पशुपतेर्गृहे। २-१५-२४ (११९७७)
क्षत्रियः शस्त्रमरणो यदा भवति सत्कृतः।
ततः स्म मागधं सङ्ख्ये प्रतिबाधेम यद्वयम् ॥ २-१५-२५ (११९७८)
षडशीतिः समानीताः शेषा राजंश्चतुर्दश।
जरासन्धेन राजानस्ततः क्रूरं प्रवर्त्स्यते ॥ २-१५-२६ (११९७९)
प्राप्नुयात्स यशो दीप्तं तत्र यो विघ्नमाचरेत्।
जयेद्यश्च जरासन्धं स सम्राण्णियतं भवेत् ॥ ॥ २-१५-२७ (११९८०)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि पञ्चदशोऽध्यायः ॥ १५.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१५-१८ युधिष्ठिर धर्मार्थनयलक्षणैः सहिता प्राप्तिः पालनं निग्राह्यलक्षणं साम्रा ज्यं च तेऽस्ति ॥
२-१५-१९ बार्हद्रथं जरासन्धं तं विद्धि इति क । घ पाठः ॥
२-१५-२२ बलात्प्रधानपुरुषः जरासन्धः पुरुषतः पुरुषेषु अभागः अस्वीकृतः ॥

सभापर्व - अध्याय ०१६
॥ श्रीः ॥
२.१६. अध्यायः १६

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिरर्जुनयोर्भाषणम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

युधिष्ठिर उवाच ॥

सम्राड्गुणमभीप्सन्वै युष्मान्स्वार्थपरायणः।
कथं प्रहिणुयां कृष्ण सोऽहं केवलसाहसात् ॥ २-१६-१ (११९८१)
भीमार्जुनावुभौ नेत्रे मनो मन्ये जनार्दनम्।
मनश्चक्षुर्विहीनस्य कीदृशं जीवितं भवेत् ॥ २-१६-२ (११९८२)
जरासन्धबलं प्राप्य दुष्पारं भीमविक्रमम्।
यमोपि न विजेताऽऽजौ तत्र वः किं विचेष्टितम् ॥ २-१६-३ (११९८३)
अस्मिंस्त्वर्थान्तरे युक्तमनर्थः प्रतिपद्यते।
तस्मान्न प्रतिपत्तिस्तु कार्या युक्ता मता मम ॥ २-१६-४ (११९८४)
यथाऽहं विमृशाम्येकस्तत्तावच्छ्रूयतां मम।
संन्यासं रोचये साधु कार्यस्यास्य जनार्दन।
प्रतिहन्ति मनो मेऽद्य राजसूयो दुराहरः ॥ २-१६-५ (११९८५)
वैशम्पायन उवाच ॥ २-१६-६क्ष् (१४०५)
पार्थः प्राप्य धनुः श्रेष्ठमक्षय्यौ च महेषुधी।
रथं ध्वजं हयांश्चैव युधिष्ठिरमभाषत ॥ २-१६-६ (११९८६)
अर्जुन उवाच। २-१६-७क्ष् (१४०६)
धनुः शस्त्रं शरा वीर्यं पक्षो भूमिर्यशो बलम्।
प्राप्तमेतन्मय राजन्दुष्प्रापं यदभीप्सितम्। २-१६-७ (११९८७)
कुले जन्म प्रशंसन्ति वैद्याः साधु सुनिष्ठिताः।

बलेन सदृशं नास्ति वीर्यं तु मम रोचते। २-१६-८ (११९८८)
कृतवीर्यकुले जातो निर्वीर्यः किं करिष्यति।
निर्वीर्ये तु कुले जातो वीर्यवांस्तु विशिष्यते ॥ २-१६-९ (११९८९)
क्षत्रियः सर्वशो राजन्यस्य वृत्तिर्द्विषज्जये।
सर्वैर्गुणैर्विहीनोऽपि वीर्यवान्हि तरेन्द्रिपून् ॥ २-१६-१० (११९९०)
सर्वैरपि गुणैर्युक्तो निर्वीर्यः किं करिष्यति।
जयस्य हेतुः सिद्धिर्हि कर्म दैवं च संश्रितम् ॥ २-१६-११ (११९९१)
संयुक्तो हि बलैः कश्चित्प्रमादान्नोपयुज्यते ॥ २-१६-१२ (११९९२)
तेन द्वारेण शत्रुभ्यः क्षीयते सबलो रिपुः ॥ २-१६-१३ (११९९३)
दैन्यं यथा बलवति तथा मोहो बलान्विते।
तावुभौ नाशकौ हेतू राज्ञा त्याज्यौ जयार्थिना ॥ २-१६-१४ (११९९४)
जरासन्धिविनाशं च राज्ञां च परिरक्षणम्।
यदि कुर्याम् यज्ञार्थं किं ततः परमं भवेत् ॥ २-१६-१५ (११९९५)
अनारम्भे हि नियतो भवेदगुणनिश्चयः।
गुणान्निः संशयाद्राजन्नैर्गुण्यं मन्यसे कथम् ॥ २-१६-१६ (११९९६)
काषायं सुलभं पश्चान्मुनीनां शममिच्छताम्।
साम्राज्यं तु भवेच्छक्यं वयं योत्स्यामहे परान् ॥ ॥ २-१६-१७ (११९९७)

इति श्रीमन्महाभारते सभापर्वणि षोडशोऽध्यायः ॥ १६.।

सभापर्व - अध्याय ०१७
॥ श्रीः ॥
२.१७. अध्यायः १७

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिरेण जरासन्धप्रभावप्रश्ने श्रीकृष्णेन तदुपोद्घाततया बृहद्रथराजोपा ख्यानकथनारम्भः ॥१.।अपुत्रस्य बृह

Mahabharata - Sabha Parva - Chapter Text

वासुदेव उवाच ॥

जातस्य भारते वंशे तथा कुन्त्याः सुतस्य च।
या वै युक्ता मतिः सेयमर्जुनेन प्रदर्शिता ॥ २-१७-१ (११९९८)
न स्म मृत्युं वयं विद्म रात्रौ वा यदि वा दिवा।

न चापि कञ्चिदमरमयुद्धेनानुशुश्रुम ॥ २-१७-२ (११९९९)
एतावदेव पुरुषैः कार्यं हृदयतोषणम्।
नयेन विधिदृष्टेन यदुपक्रमते परान् ॥ २-१७-३ (१२०००)
सुनयस्यानपायस्य संयोगे परमः क्रमः।
सङ्गत्या जायतेऽसाम्यं साम्यं च न भवेद्द्वयोः ॥ २-१७-४ (१२००१)
अनयस्यानुपायस्य संयुगे परमः क्षयटः।
संशयो जायते साम्याज्जयश्च न भवेद्द्वयोः ॥ २-१७-५ (१२००२)
ते वयं नयमास्थाय शत्रुदेशसमीपगाः।
कथमन्तं न गच्छेम वृक्षस्येव नदीरयाः ॥
पररन्ध्रे पराक्रान्ताः स्वरन्ध्रावरणे स्थिताः ॥ २-१७-६ (१२००३)
व्यूढानीकैरतिबलैर्न युद्ध्येदरिभिः सह।
इति बुद्धिमतां नीतिस्तन्ममापीह रोचते ॥ २-१७-७ (१२००४)
अनवद्या ह्यसम्बुद्धाः प्रविष्टाः शत्रुसद्म तत्।
शत्रुदेशमुपाक्रम्य तं कामं प्राप्नुयामहे ॥ २-१७-८ (१२००५)
एको ह्येव श्रियं नित्यं बिभर्ति पुरुषर्षभः।
अन्तरात्मेव भूतानां तत्क्षयं नैव लक्षये ॥ २-१७-९ (१२००६)
अथवैनं निहत्याजौ शेषेणापि समाहताः।
प्राप्नुयाम ततः स्वर्गं ज्ञातित्राणपरायणाः ॥ २-१७-१० (१२००७)
युधिष्ठिर उवाच ॥ २-१७-११क्ष् (१४०७)
कृष्ण कोऽयं जरासन्धः किंवीर्यः किम्पराक्रमः।
यस्त्वां स्पृष्ट्वाऽग्निसदृशं न दग्धः शलभो यथा ॥ २-१७-११ (१२००८)
कृष्ण उवाच ॥ २-१७-१२क्ष् (१४०८)
शृणु राजञ्जरासन्धो यद्वीर्यो यत्पराक्रमः।
यथा चोपेक्षितोऽस्माभिर्बहुशः कृतविप्रियः ॥ २-१७-१२ (१२००९)
अक्षौहिणीनां तिसृणां पतिः समरदर्पितः।
राजा बृहद्रथो नाम मगधाधिपतिर्बली ॥ २-१७-१३ (१२०१०)
रूपवान्वीर्यसम्पन्नः श्रीमानतुलविक्रमः।
नित्यं दीक्षाङ्किततनुः शतक्रतुरिवापरः ॥ २-१७-१४ (१२०११)
तेजसा सूर्यसङ्काशः क्षमया पृथिवीसमः।
यश्चान्तकसमः क्रोधे श्रिया वैश्रवणोपमः ॥ २-१७-१५ (१२०१२)
ग्स्वराज्यं कारयामास मगधेषु गिरिव्रजे'।
तस्याभिजनसंयुक्तैर्गुणैर्भरतसत्तम।
व्याप्तेयं पृथिवी सर्वा सूर्यस्येव गभस्तिभिः ॥ २-१७-१६ (१२०१३)
स काशिराजस्य सुते यमजे भरतर्षभः।
उपयेमे महावीर्यो रूपद्रविणसंयुते। २-१७-१७च्तयोश्चकार समयं मिथः स पुरुषर्षभः ॥ २-१७-१७ (१२०१४)
नातिवर्तिष्य इत्येवं पत्नीभ्यां सन्निधौ तदा।

स ताभ्यां शुशुभे राजा पत्नीभ्यां वसुधाधिपः ॥ २-१७-१८ (१२०१५)
प्रियाम्भामनुरूपाभ्यां करेणुभ्यामिव द्विपः।
तयोर्मध्यगतश्चापि रराज वसुधाधिपः ॥ २-१७-१९ (१२०१६)
गङ्गायमुनयोर्मध्ये मूर्तिमानिव सागरः।
विषयेषु निमग्नस्य तस्य यौवनमत्यगात् ॥ २-१७-२० (१२०१७)
न च वंशकरः पुत्रस्तस्याजायत कश्चन।
मङ्गलैर्बभिर्होमैः पुत्रकामाभिरिष्टिभिः ॥ २-१७-२१ (१२०१८)
नाससाद नृपश्रेष्ठः पुत्रं कुलविवर्धनम्।
स भार्याभ्यां च सहितो निर्वेदमगमद्भृशम् ॥ २-१७-२२ (१२०१९)
‘राज्यं चापि परित्यज्य तपोवनमथाश्रयत्।’
वार्यमाणः प्रकृतिभिर्नृपभक्त्या विशाम्पते’॥ २-१७-२३ (१२०२०)
अथ काक्षीवतः पुत्रं गौतमस्य महात्मनः ॥
शुश्राव तपसि श्रेष्ठमुदारं चण्डकौशिकम् ॥ २-१७-२४ (१२०२१)
यदृच्छयाऽऽगतं तं तु वृक्षमूलमुपाश्रितम्।
पत्नीभ्यां सहितो राजा सर्वयत्नैरतोषयत् ॥ २-१७-२५ (१२०२२)
‘बृहद्रथं च स ऋषिर्यथावच्चाभ्यनन्दत।’
उपविष्टः स तेनाथ अनुज्ञातो महात्मना ॥ २-१७-२६ (१२०२३)
तमपृच्छत्तदा विप्रः किमागमनमित्यथ।
विप्रैरनुगतस्यैव पत्नीभ्यां सहितस्य च ॥ २-१७-२७ (१२०२४)
स उवाच मुनिं राजा भगवन्नास्ति मे सुतः।
अपुत्रस्य तु राज्येन वृद्धत्वे किं प्रयोजनम् ॥ २-१७-२८ (१२०२५)
सोऽहं तपश्चरिष्यामि पत्नीभ्यां सहितो वने।
नाप्रजस्य मुने किर्तिः स्वधा चैवाक्षया भवेत्।
एवमुक्तः स राज्ञा तु मुनिः कारुण्यमागतः ॥ २-१७-२९ (१२०२६)
तमब्रवीत्सत्यधृतिः सत्यवागृषिसत्तमः।
परितुष्टोऽस्मि राजेन्द्र वरं वरय सुव्रत ॥ २-१७-३० (१२०२७)
ततः सभार्यः प्रणतस्तमुवाच बृहद्रथः।
पुत्रदर्शननैराश्याद्बाष्पसन्दिग्धया गिरा ॥ २-१७-३१ (१२०२८)
राजोवाच ॥ २-१७-३२क्ष् (१४०९)
भगवन् राज्यमुत्सृज्य प्रस्थितस्य तपोवनम्।
किं वरेणाल्पभाग्यस्य किं राज्येनाप्रजस्य मे ॥ २-१७-३२ (१२०२९)
कृष्ण उवाच। २-१७-३३क्ष् (१४१०)
एतच्छ्रुत्वा मुनिर्ध्यानमगमन्क्षुभितेन्द्रियः।
तस्यैव चाम्रवृक्षस्य छायायां समुपाविशत ॥ २-१७-३३ (१२०३०)
तस्योपविष्टस्य मुनेरुत्सङ्गे निपपात ह।
अवानमशुकादष्टमेकमाम्रफलं किल ॥ २-१७-३४ (१२०३१)

तत्प्रगृह्य मुनिश्रेष्ठो हृदयेनाभिमन्त्र्य च।
राज्ञे ददावप्रतिमं पुत्रसम्प्राप्तिकारणम् ॥ २-१७-३५ (१२०३२)
उवाच च महाप्राज्ञस्तं राजानं महामुनिः।
गच्छ राजन्कृतार्थोऽसि निवर्तस्व नराधिप ॥ २-१७-३६ (१२०३३)
ग्एष ते तनयो राजन्मा तपेह तपोवने।
प्रजाः पालय धर्मेण एव धर्मो महीक्षिताम् ॥ २-१७-३७ (१२०३४)
यजस्व विविधैर्यज्ञैरिन्द्रं तर्पय चेन्दुना।
पुत्रं राज्ये प्रतिष्ठाप्य तत आश्रममाव्रज ॥ २-१७-३८ (१२०३५)
अष्टौ वरान्प्रयच्छामि तव पुत्रस्य पार्थिव।
ब्रह्मण्यत्वमजेयत्वं युद्धेषु च तथा मतिः ॥ २-१७-३९ (१२०३६)
प्रियातिथेयतां चैव दीनानामन्ववेक्षणम्।
तथा बलं च सुभहल्लोके कीर्तिं च शाश्वतीम् ॥ २-१७-४० (१२०३७)
अनुरागं प्रजानां चेत्येवमष्टौ वरान्नृप।
गच्छ त्वं कृतकृत्योऽसि निवर्तस्व जनाधिप'॥ २-१७-४१ (१२०३८)
अनुज्ञातः स ऋषिणा पत्नीभ्यां सहितो नृपः।
पौरैरनुगतश्चापि विवेश स्वपुरं ततः ॥ २-१७-४२ (१२०३९)
यथासमयमाज्ञाय तदा स नृपसत्तमः।
द्वाभ्यामेकं फलं प्रादात्पत्नीभ्यां भरतर्षभ ॥ २-१७-४३ (१२०४०)
मुनेश्च बहुमानेन कालस्य च विपर्ययात्।
ते तदाम्रं द्विधा कृत्वा भक्षयामासतुः शुभे। २-१७-४४ (१२०४१)
तयोः समभवद्गर्भः फलप्राशनसम्भवः।
ते च दृष्ट्वा स नृपतिः परां मुदमवाप ह ॥ २-१७-४५ (१२०४२)
अथ काले महाप्राज्ञ यथासमयमागते।
प्रजायेतामुभे राजञ्शरीरशकले तदा ॥ २-१७-४६ (१२०४३)
एकाक्षिबाहुचरणे अर्धोदरमुखस्फिचे।
दृष्ट्वा शरीरशकले प्रवेपतुरुभे भृशम् ॥ २-१७-४७ (१२०४४)
उद्विग्ने सह संमन्त्र्य ते भगिन्यौ तदाऽबले।
सजीवे प्राणिशकले तत्यजाते सुदुःखिते ॥ २-१७-४८ (१२०४५)
तयोर्धात्र्यौ सुसंवीते कृत्वा ते गर्भसम्प्लवे।
निर्गम्यान्तः पुरद्वारात्समुत्सृज्याभिजग्मतुः ॥ २-१७-४९ (१२०४६)
ग्दुकूलाभ्यां सुसञ्छन्ने पाण्डराभ्यामुभे तदा।
अज्ञाते कस्यचित्ते तु जहतुस्ते चतुष्पथे ॥ २-१७-५० (१२०४७)
ततो विविशतुर्धात्र्यौ पुनरन्तः पुरं तदा।
कथयामासतुरुभे देवीभ्यां तु पृथक्पृथक्'॥ २-१७-५१ (१२०४८)
ते चतुष्पथनिक्षिप्ते जरा नामाथ राक्षसी।
जग्राह मनुजव्याघ्र मांसशोणितभोजना ॥ २-१७-५२ (१२०४९)

कर्तुकामा सुखवहे शकले सा तु राक्षसी।
संयोजयामास तदा विधानबलचोदिता ॥ २-१७-५३ (१२०५०)
ते समानीतमात्रे तु शकले पुरुषर्षभ।
एकमूर्तिधरो वीरः कुमारः समपद्यत ॥ २-१७-५४ (१२०५१)
ततः सा राक्षसी राजन्विस्मयोत्फुल्ललोचना।
न शशाक समुद्वोढुं वज्रसारमयं शिशुम् ॥ २-१७-५५ (१२०५२)
बालस्ताम्रतलं मुष्टिं कृत्वा चास्ये निधाय सः।
प्राक्रोशदतिसंरब्धः सतोय इव तोयदः ॥ २-१७-५६ (१२०५३)
तेन शब्देन सम्भ्रान्तः सहसाऽन्तः पुरे जनः।
निर्जगाम नरव्याघ्र राज्ञा सह परन्तप ॥ २-१७-५७ (१२०५४)
ते चाबले परिम्लाने पयः पूर्णपयोधरे।
निराशे पुत्रलाभाय सहसैवाभ्यगच्छताम् ॥ २-१७-५८ (१२०५५)
ते च दृष्ट्वा तथाभूते राजानं चेष्टसंततिम्।
तं च बालं सुबलिनं चिन्तयामास राक्षसी ॥ २-१७-५९ (१२०५६)
नार्हामि विषये राज्ञो वसन्ती पुत्रगृद्धिनः।
बालं पुत्रमिमं हन्तुं धार्मिकस्य महात्मनः ॥ २-१७-६० (१२०५७)
सा तं बालमुपादाय मेघलेखेव भास्करम्।
कृत्वा च मानुषं रूपमुवाच वसुधाधिपम् ॥ २-१७-६१ (१२०५८)
बृहद्रथ सुतस्तेऽयं मया दत्तः प्रगृह्यताम्।
तव पत्नीद्वये जातो द्विजातिवरशासनात्।
धात्रीजनपरित्यक्तो मयाऽयं परिरक्षितः ॥ २-१७-६२ (१२०५९)
कृष्ण उवाच। २-१७-६३क्ष् (१४११)
ततस्ते भरतश्रेष्ठ काशिराजसुते शुभे।
तं बालमभिपद्याशु प्रस्रवैरभ्यषिञ्जताम् ॥ २-१७-६३ (१२०६०)
ततः स राजा संहृष्टः सर्वं तदुपलभ्य च।
अपृच्छद्धेमगर्भाभां राक्षसीं तामराक्षसीम् ॥ २-१७-६४ (१२०६१)
कात्वं कमलगर्भाभे मम पुत्रप्रदायिनी।
कामं मा ब्रूहि कल्याणि देवता प्रतिभासि मे ॥ ॥ २-१७-६५ (१२०६२)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि सप्तदशोऽध्यायः ॥ १७.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१७-४ क्रमः उपक्रमः ॥
२-१७-९ तत्क्षये बलक्षयः इति पाठः ॥
२-१७-३४ अवानमशुष्कं सरसमिति यावत् ।अमारुतमनाविद्धं इति घ पाठः ॥

२-१७-४६ प्रजायेतां सुषुवतुः ॥
२-१७-४७ स्फिक् कट्या अधोभागः ॥
२-१७-५३ सुखवहे एकीकृतयोर्वहनं हि सुखेन भवतीति प्रसिद्धम् ॥
२-१७-५४ समानीतमात्रे संयोजितमात्रे ॥
२-१७-६४ अराक्षसी वेषतः ॥

सभापर्व - अध्याय ०१८
॥ श्रीः ॥
२.१८. अध्यायः १८

Mahabharata - Sabha Parva - Chapter Topics
राजानम्प्रति स्वस्वरूपमभिधाय जराया अन्तर्धानम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

राक्षस्युवाच ॥

जरा नामास्मि भद्रं ते राक्षसी कामरूपिणी।
तव वेश्मनि राजेन्द्र पूजिता न्यवसं सुखम् ॥ २-१८-१ (१२०६३)
गृहे गृहे मनुष्याणां नित्यं तिष्ठामि राक्षसी।
गृहदेवीति नाम्ना वै पुरा सृष्टा स्वयंम्भुवा ॥ २-१८-२ (१२०६४)
दानवानां विनाशाय स्थापिता दिव्यरूपिणी।
यो मां भक्त्या लिखेत्कुड्ये सपुत्रां यौवनान्विताम् ॥ २-१८-३ (१२०६५)
गृहे तस्य भवेद्वृद्धिरन्यथा क्षयमाप्नुयात्।
त्वद्गृहे तिष्ठमानाऽहं पूजिताऽहं सदा विभो ॥ २-१८-४ (१२०६६)
लिखिता चैव कुड्येषु पुत्रैर्बहुभिरावृता।
गन्धपुष्पैस्तथा धूपैर्भक्ष्यभोज्यैः सुपूजिता ॥ २-१८-५ (१२०६७)
साऽहं प्रत्युपकारार्थं चिन्तयन्त्यनिशं नृप।
तवेमे पुत्रशकले दृष्टवत्यस्मि धार्मिका। २-१८-६ (१२०६८)
संश्लिषिते मया दैवात्कुमारः समपद्यत।
तव भाग्यान्महाराज हेतुमात्रमहं त्विह ॥ २-१८-७ (१२०६९)
मेरुं वा खादितुं शक्ता किं पुनस्तव बालकम्।
गृहसम्पूजनात्तुष्ट्या मया प्रत्यर्पितस्तव ॥ २-१८-८ (१२०७०)
मम नाम्ना च लोकेऽस्मिन्ख्यात एव भविष्यति। २-१८-९ (१२०७१)

कृष्ण उवाच।
एवमुक्त्वा तु सा राजंस्तत्रैवान्तरधीयत।
स सङ्गृह्य कुमारं तं प्रविवेश गृहं नृपः ॥ २-१८-९क्ष् (१४१२)
तस्य बालस्य यत्कृत्यं तच्चकार नृपस्तदा।
आज्ञापयच्च राक्षस्या मगधेषु महोत्सवम् ॥ २-१८-१० (१२०७२)
तस्य नामाकरोच्चैव पितामहसमः पिता।
जरया सन्धितो यस्माज्जरासन्धो भवत्वयम् ॥ २-१८-११ (१२०७३)
सोऽवर्धत महातेजा मागधाधिपतेः सुतः।
प्रमाणबलसम्पन्नो हुताहुतिरिवानलः ॥ २-१८-१२ (१२०७४)
ग्एवं स ववृधे राजन्कुमारः पुष्करेक्षणः।
कालेन महता चापि यौवनस्थो बभूव ह'॥
मातापित्रोर्नन्दकरः शुक्लपक्षे यथा शशी ॥ ॥ २-१८-१३ (१२०७५)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि अष्टादशोऽध्यायः ॥१८.।

सभापर्व - अध्याय ०१९
॥ श्रीः ॥
२.१९. अध्यायः १९

Mahabharata - Sabha Parva - Chapter Topics
पुनर्यदृच्छागतेन चण्डकौशिकेन जरासन्धपराक्रमादौ कथिते जरासन्धं राज्येऽभ इषिच्य तपोवनगतस्य सभार्यस

Mahabharata - Sabha Parva - Chapter Text

कृष्ण उवाच ॥

कस्यचित्त्वथ कालस्य पुनरेव महातपाः।
मगधेषुपजक्राम भगवांश्चण्डकौशिकः ॥ २-१९-१ (१२०७६)
तस्याऽऽगमनसंहृष्टः सामात्यः सपुरः सरः।
सभार्यः सह पुत्रेण निर्जगाम बृहद्रथः ॥ २-१९-२ (१२०७७)
पाद्यार्घ्याचमनीयैस्तमर्चयामास भारत।
स नृपो राज्यसहितं पुत्रं तस्मै न्यवेदयत् ॥ २-१९-३ (१२०७८)
प्रतिगृह्य च तां पूजां पार्थिवाद्भगवानृषिः।
उवाच मागधं राजन्प्रहृष्टेनान्तरात्मना ॥ २-१९-४ (१२०७९)

सर्वमेतन्मया ज्ञातं राजन्दिव्येन चक्षुषा।
पुत्रस्तु शृणु राजेन्द्र यादृशोऽयं भविष्यति ॥ २-१९-५ (१२०८०)
अस्य रूपं च सत्वं च बलमूर्जितमेव च।
एष श्रिया समुदितः पुत्रस्तव न संशयः ॥ २-१९-६ (१२०८१)
प्रापयिष्यति तत्सर्वं विक्रमेण समन्वितः।
अस्य वीर्यवतो वीर्यं नानुयास्यन्ति पार्थिवाः ॥ २-१९-७ (१२०८२)
पततो वैनतेयस्य गतिमन्ये यथा खगाः।
विनाशमुपयास्यन्ति ये चास्य परिपन्थिनः ॥ २-१९-८ (१२०८३)
देवैरपि विसृष्टानि शस्त्राण्यस्य महीपते।
न रुजं जनयिष्यन्ति गिरेरिव नदीरयाः ॥ २-१९-९ (१२०८४)
सर्वमूर्धाभिषिक्तानामेव मूर्ध्नि ज्वलिष्यति।
प्रभाहरोऽयं सर्वेषां ज्योतिषामिव भास्करः ॥ २-१९-१० (१२०८५)
एनमासाद्य राजानः समृद्धबलवाहनाः।
विनाशमुपयास्यन्ति शलभा इव पावकम् ॥ २-१९-११ (१२०८६)
एष श्रियः समुदिताः सर्वराज्ञां ग्रहीष्यति।
वर्षास्विवोदीर्णजला नदीर्नदनदीपतिः ॥ २-१९-१२ (१२०८७)
एष धारयित सम्यक्चातुर्वर्ण्यं महाबलः।
शुभां शुभवतीं स्फीतां सर्वसस्यधरां धराम् ॥ २-१९-१३ (१२०८८)
अस्याज्ञावशगाः सर्वे भविष्यन्ति नराधिपाः।
सर्वभूतात्मभूतस्य वायोरिव शरीरिणः ॥ २-१९-१४ (१२०८९)
एष रुद्रं महादेवं त्रिपुरान्तकरं हरम्।
सर्वलोकेष्वतिबलः साक्षाद्द्रक्ष्यति मागधः ॥ २-१९-१५ (१२०९०)
एवं ब्रुवन्नेव मुनिः स्वकार्यमिव चिन्तयन्।
विसर्जयामास नृपं बृहद्रथमथारिहन् ॥ २-१९-१६ (१२०९१)
प्रविश्य नगरीं चापि ज्ञातिसम्बन्धिभिर्वृतः।
अभिषिच्य जरासन्धं मगधाधिपतिस्तदा ॥ २-१९-१७ (१२०९२)
बृहद्रथो नरपतिः परां निर्वृतिमाययौ।
अभिषिक्ते जरासन्धे तदा राजा बृहद्रथः।
पत्नीद्वयेनानुगतस्तपोवनचरोऽभवत् ॥ २-१९-१८ (१२०९३)
ततो वनस्थे पितरि मातृभ्यां सह भारत।
जरासन्धः स्ववीर्येण पार्थिवानकरोद्वशे ॥ २-१९-१९ (१२०९४)
अथ दीर्घस्य कालस्य तपोवनचरो नृपः।
सभार्यः स्वर्गमगमत्तपस्तप्त्वा बृहद्रथः ॥ २-१९-२० (१२०९५)
जरासन्धोऽपि नृपतिर्यथोक्तं कौशिकेन तत्।
वरप्रदानमखिलं प्राप्य राज्यमपालयत् ॥ २-१९-२१ (१२०९६)
हते चैव मया कंसे सहंसडिभिके तदा।

जरासन्धस्य दुहिता रोदते पार्श्वतः पितुः।
जातो वै वैरनिर्बन्धो मयासीत्तत्र भारत ॥ २-१९-२२ (१२०९७)
भ्रामयित्वा शतगुणमेकोनं येन भारत।
गदा क्षिप्ता बलवता मागधेन गिरिव्रजात् ॥ २-१९-२३ (१२०९८)
तिष्ठतो मथुरायां वै कुत्स्नस्याद्भुतकर्मणः।
एकोनयोजनशते सा पपात गदा शुभा ॥ २-१९-२४ (१२०९९)
दृष्ट्वा पौरैस्तदा सम्यग्गदा चैव निवेदिता।
गदावसानं तत्ख्यातं मथुरायाः समीपतः ॥ २-१९-२५ (१२१००)
तस्यास्तां हंसडिभिकावशस्त्रनिधनावुभौ।
मन्त्रे मतिमतां श्रेष्ठौ नीतिशास्त्रे विशारदौ ॥ २-१९-२६ (१२१०१)
यौ तौ मया ते कथितौ पूर्वमेव महाबलौ।
त्रयस्त्रयाणां लोकानां पर्याप्ता इति मे मतिः ॥ २-१९-२७ (१२१०२)
एवमेष तदा वीर बलिभिः कुकुरान्धकैः।
वृष्णिभिश्च महाराज नीतिहेतोरुपेक्षितः ॥ ॥ २-१९-२८ (१२१०३)

इति श्रीमन्महाभारते सभापर्वणि मन्त्रपर्वणि एकोनविंशोऽध्यायः ॥ १९.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१९-१६ आह्निकाय महातपाः इति घ ।पाठः ॥

सभापर्व - अध्याय ०२०
॥ श्रीः ॥
२.२०. अध्यायः २०

Mahabharata - Sabha Parva - Chapter Topics
कृष्णयुधिष्ठिरसंवादानन्तरं भीमार्जुनाभ्यांसह कृष्णस्य मागधपुरप्रस्थानम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वासुदेव उवाच ॥

पतितौ हंसडिभिकौ कंसश्च सगणो हतः।
जरासन्धस्य निधने कालोऽयं समुपागतः ॥ २-२०-१ (१२१०४)
न शक्योऽसौ रणे जेतुं सर्वैरपि सुरासुरैः।

प्राणयुद्धेन जेतव्यः स इत्युपलभामहे ॥ २-२०-२ (१२१०५)
मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः।
मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः ॥ २-२०-३ (१२१०६)
त्रिभिरासादितोऽस्माभिर्विजने स नराधिपः।
न सन्देहो यथा युद्धमेकेनाप्युपयास्यति ॥ २-२०-४ (१२१०७)
अवमानाच्च लोभाच्च बाहुवीर्याच्च दर्पितः।
भीमसेनेन युद्धाय ध्रुवमप्युपयास्यति ॥ २-२०-५ (१२१०८)
अलं तस्य महाबाहुर्भीमसेनो महाबलः।
लोकस्य समुदीर्णस्य निधनायान्तको यथा ॥ २-२०-६ (१२१०९)
यदि भीमबलं वेत्सि यदि ते प्रत्ययो मयि।
भीमसेनार्जुनौ शीघ्रं न्यासभूतौ प्रयच्छ मे ॥ २-२०-७ (१२११०)
वैशम्पायन उवाच ॥ २-२०-८क्ष् (१४१३)
एवमुक्तो भगवता प्रत्युवाच युधिष्ठिरः।
भीमार्जुनौ समालोक्य सम्प्रहृष्टमुखौ स्थितौ ॥ २-२०-८ (१२१११)
युधिष्ठर उवाच। २-२०-९क्ष् (१४१४)
अच्युताच्युत मामैवं व्याहरामित्रकर्शन।
पाण्डवानां भवान्नाथो भवन्तं चाश्रिता वयम् ॥ २-२०-९ (१२११२)
यथा वदसि गोविन्द सर्वं तदुपपद्यते।
नहि त्वमग्रतस्तेषां येषां लक्ष्मीः पराङ्मुखी ॥ २-२०-१० (१२११३)
ग्येषामभिमुखी लक्ष्मीस्तेषां कृष्ण त्वमग्रतः'।
निहतश्च जरासन्धो मोक्षिताश्च महीक्षितः। २-२--११च् राजसूयश्च मे लब्धो निदेशे त्व तिष्ठतः ॥ २-२०-११ (१२११४)
क्षिप्रमेव यथा त्वेतत्कार्यं समुपपद्यते।
अप्रमत्तो जगन्नाथ तथा कुरु समुपपद्यते। २-२०-१२ (१२११५)
त्रिभिर्भवद्भिर्हि विना नाहं जीवितुमुत्सहे।
धर्मकामार्थरहितो रोगार्त इव दुःखितः ॥ २-२०-१३ (१२११६)
न शौरिणा विना पार्थो न शौरिः पाण्डवं विना।
नाजेयोस्त्यनयोऽर्लोकि कृष्णयोरिति मे मतिः ॥ २-२०-१४ (१२११७)
अयं च बलिनां श्रेष्ठः श्रीमानपि वृकोदरः।
युवाभ्यां सहितो वीर किं न कुर्यान्महायशाः ॥ २-२०-१५ (१२११८)
सुप्रणीतो बलौघो हि कुरुते कार्यमुत्तमम्।
अन्धं बलं जडं प्राहुः प्रणेतव्यं विचक्षणैः ॥ २-२०-१६ (१२११९)
यतो हि निम्नं भवति नयन्ति हि ततो जलम्।
यतश्छिद्रं ततश्चापि नयन्ते धीवरा जलम् ॥ २-२०-१७ (१२१२०)
तस्मान्नयविधानज्ञं पुरुषं लोकविश्रुतम्।
वयमाश्रित्य गोविन्दं यतामः कार्यसिद्धये ॥ २-२०-१८ (१२१२१)

एवं प्रज्ञानयबलं क्रियोपायसमन्वितम्।
पुरस्कुर्वीत कार्येषु कृष्णकार्यार्थसिद्धये ॥ २-२०-१९ (१२१२२)
एवमेव यदुश्रेष्ठ यावत्कार्यार्थिसिद्धये।
अर्जुनः कृष्णमन्वेतु भीमोऽन्वेतु धनञ्जयम्।
नयो जयो बलं चैव विक्रमे सिद्धिमेष्यति ॥ २-२०-२० (१२१२३)
वैशम्पायन उवाच। २-२०-२१क्ष् (१४१५)
एवमुक्तास्ततः सर्वे भ्रातरो विपुलौजसः।
वार्ष्णेयः पाण्डवेयौ च प्रतस्थुर्मागधं प्रति ॥ २-२०-२१ (१२१२४)
वर्चस्विनां ब्राह्मणानां स्नातकानां परिच्छदैः।
आच्छाद्य सुहृदां वाक्यैर्मनोज्ञैरभिनन्दिताः ॥ २-२०-२२ (१२१२५)
ग्माधवः पाण्डवेयौ च प्रतस्थुर्व्रतधारिणः'।
अमर्षादभितप्तानां ज्ञात्यर्थं मुख्यतेजसाम्।
रविसोमाग्निवपुषां दीप्तमासीत्तदा वपुः ॥ २-२०-२३ (१२१२६)
इतं मेने जरासन्धं दृष्ट्वा भीमपुरोगमौ।
एककार्यसमुद्यन्तौ कृष्णौ युद्धेऽपराजितौ ॥ २-२०-२४ (१२१२७)
ईशौ हितौ महात्मानौ सर्वकार्यप्रवर्तिनौ।
धर्मकामार्थलोकानां कार्याणां च प्रवर्तकौ ॥ २-२०-२५ (१२१२८)
कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजाङ्गलम्।
रम्यं पद्मसरो गत्वा कालकूडमतीत्य च ॥ २-२०-२६ (१२१२९)
गण्डकीं च महाशोणं सदानीरां तथैव च।
एकपर्वतके नद्यः क्रमेणैत्याव्रजन्त ते ॥ २-२०-२७ (१२१३०)
उत्तीर्य सरयूं रम्यां दृष्ट्वा पूर्वांश्च कोसलान्।
अतीत्य जग्मुर्मिथिलां मालां चर्मण्वतीं नदीम् ॥ २-२०-२८ (१२१३१)
अतीत्य गङ्गां शोणं च त्रयस्ते प्राङ्मुखास्तदा।
कुशचीरच्छदा जग्मुर्मागधं क्षेत्रमच्युताः ॥ २-२०-२९ (१२१३२)
ते शश्वद्गोधनाकीर्णमम्बुमन्तं शुभद्रुमम्।
गोरथं गिरिमासाद्य ददृशुर्मागधं पुरम् ॥ ॥ २-२०-३० (१२१३३)

इति श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणि विंशोऽध्यायः ॥ २०.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-२०-३ जयोऽर्जुनः ॥

सभापर्व - अध्याय ०२१

॥ श्रीः ॥

२.२१. अध्यायः २१

Mahabharata - Sabha Parva - Chapter Topics

जरासन्धसमीपं गतानां श्रीकृष्णभीमार्जुनानां जरासन्धेन सह विवादः ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वासुदेव उवाच ॥

एष पार्थ महान्भाति पशुमान्नित्यमम्बुमान्।
निरामयः सुवेश्माढ्यो निवेशो मागधः शुभः ॥ २-२१-१ (१२१३४)
वैहारो विपुलः शैलो वाराहो वृषभस्तथा।
तथा ऋषिगिरिस्तात शुभाश्चैत्यकपञ्चमाः ॥ २-२१-२ (१२१३५)
एते पञ्चमहाशृङ्गाः पर्वताः शीतलद्रुमाः।
रक्षन्तीवाभिसंहत्य संहताङ्गा गिरिव्रजम् ॥ २-२१-३ (१२१३६)
पुष्पवेष्टितशाखाग्रैर्गन्धवद्भिर्मनोहरैः।
निगूढा इव लोध्राणां वनैः कामिजनप्रियैः ॥ २-२१-४ (१२१३७)
ग्यत्र दीर्घतमा नाम ऋषिः परमन्त्रितः'।
शूद्रायां गौतमो यत्र महात्मा संशितव्रतः।
औशीनर्यामजनयत्काक्षीवाद्यान्सुतान्मुनिः ॥ २-२१-५ (१२१३८)
गौतमः प्रणयात्तस्माद्यथाऽसौ तत्र सद्मनि।
भजते मागधं वंशं स नृपाणामनुग्रहः। २-२१-६ (१२१३९)
अङ्गवङ्गादयश्चैव राजानः सुमहाबलाः।
गौतमक्षयमभ्येत्य रमन्ते स्म पुरार्जुन ॥ २-२१-७ (१२१४०)
वनराजीस्तु पश्येमाः पिप्लानां मनोरमाः।
लोघ्राणां च शुभाः पार्थ गौतमौकः समीपजाः ॥ २-२१-८ (१२१४१)
अर्बुदः शक्रवापी च पन्नगौ शत्रुतापनौ।
स्वस्तिकस्यालयश्चात्र मणिनागस्य चोत्तमः ॥ २-२१-९ (१२१४२)
अपारिहार्या मेघानां मागधा मनुना कृताः।
कौशिको मणिमांश्चैव चक्राते चाप्यनुग्रहम् ॥ २-२१-१० (१२१४३)
ग्पाण्डरे विपुले चैव तथा वाराहकेऽपि च।
चैत्यके चज गिरिश्रेष्ठे मादङ्गे च शिलोच्चये ॥ २-२१-११ (१२१४४)
एतेषु पर्वतेन्द्रेषु सर्वसिद्धसमालयाः।
यतीनामाश्रमाश्चैव मुनीनां च महात्मनाम् ॥ २-२१-१२ (१२१४५)
वृषभस्य तमालस्य महावीर्यस्य वै तथा।

गन्धर्वरक्षसां चैव नागानां च तथाऽऽलयाः ॥ २-२१-१३ (१२१४६)
कक्षीवतस्तपोवीर्यात्तपोदा इति विश्रुताः।
पुण्यतीर्थाश्च ते सर्वे सिद्धानां चैव कीर्तिताः।
मणेश्च दर्शनादेव भद्रं शिवमवाप्नुयात्'॥ २-२१-१४ (१२१४७)
एवं प्राप्य पुरं रम्यं दुराधर्षं समन्ततः ॥
अर्थसिद्धिं त्वनुपमां जरासन्धोऽभिमन्यते ॥ २-२१-१५ (१२१४८)
वयमासादने तस्य दर्पमद्य हरेम हि। २-२१-१६ (१२१४९)
वैशम्पायन उवाच।
एवमुक्त्वा ततः सर्वे भ्रातरो विपुलौजसः ॥ २-२१-१६क्ष् (१४१६)
वार्ष्णेयः पाण्डवौ चैव प्रतस्थुर्मागधं पुरम्।
हृष्टपुष्टजनोपेतं चातुर्वर्ण्यसमाकुलम् ॥ २-२१-१७ (१२१५०)
स्फीतोत्सवमनाधृष्यमासेदुश्च गिरिव्रजतम्।
ततो द्वारमनासाद्य पुरस्य गिरिमुच्छ्रितम् ॥ २-२१-१८ (१२१५१)
बार्हद्रथैः पूज्यमानं तथा नगरवासिभिः।
मागधानां तु रुचिरं चैत्यकान्तरमाद्रवन् ॥ २-२१-१९ (१२१५२)
यत्र मांसादमृषभमाससाद बृहद्रथः।
तं हत्वा मासतालाभिस्तिस्रो भेरीकारयत् ॥ २-२१-२० (१२१५३)
स्वपुरे स्थापयामास तेन चानह्य चर्मणा।
यत्र ताः प्राणदन्भेर्यो दिव्यपुष्पावचूर्णिताः ॥ २-२१-२१ (१२१५४)
भङ्क्त्वा भेरीत्रयं तेऽपि चैत्यप्राकारमाद्रवन्।
द्वारतोऽभिमुखाः सर्वे ययुर्नानायुधास्तधा ॥ २-२१-२२ (१२१५५)
मागधानां सुरुचिरं चैत्यकं तं समाद्रवन्।
शिरसीव समाघ्नन्तो जरासन्धं जिघांस्वः ॥ २-२१-२३ (१२१५६)
स्थिरं सुविपुलं शृङ्गं सुमहत्तत्पुरातनम्।
अर्चितं गन्धमाल्यैश्च सततं सुप्रतिष्ठितम् ॥ २-२१-२४ (१२१५७)
विपुलैर्बाहुभिर्वीरस्तेऽभिहत्याभ्यपातयन्।
ततस्ते मागधं हृष्टाः पुरं प्रविविशुस्तदा ॥ २-२१-२५ (१२१५८)
एतस्मिन्नेव काले तु ब्राह्मणा वेदपारगाः।
दृष्ट्वा तु दुर्निमित्तानि जरासन्धमदर्शयन् ॥ २-२१-२६ (१२१५९)
पर्युग्न्यकुर्वंश्च नृपं द्विरदस्थं पुरोहिताः।
ततस्तच्छान्तये राजा जरासन्धः प्रतापवान्।
दीक्षितो नियमस्थोऽसावुपवासपरोऽभवत् ॥ २-२१-२७ (१२१६०)
स्नातकव्रतिनस्ते तु बाहुशस्त्रा निरायुधाः।
युयुत्सवः प्रविविशुर्जरासन्धेन भारत ॥ २-२१-२८ (१२१६१)
भक्ष्यमाल्यापणानां च ददृशुः श्रियमुत्तमाम्।
स्फीतां सर्वगुणोपेतां सर्वकामसमृद्धिनाम् ॥ २-२१-२९ (१२१६२)

तां तु दृष्ट्वा समृद्धिं ते वीथ्यां तस्यां नरोत्तमाः।
राजमार्गेण गच्छन्तः कृष्णभीमधनञ्जयाः।
बलाद्गृहीत्वा माल्यानि मालाकारान्महाबलाः ॥ २-२१-३० (१२१६३)
ग्कर्पूरशृङ्गं कोष्टं च सफलं चान्तरापणे।
वैश्याद्बलाद्गृहीत्वा ते विहृत्य च महारथाः'॥ २-२१-३१ (१२१६४)
विरागवसनाः सर्वे स्रग्विणो मृष्टकुण्डलाः।
निवेशनमथाजग्मुर्जरासन्धस्य धीमतः ॥ २-२१-३२ (१२१६५)
गोवासमिव वीक्षन्तः सिंहा हैमवता यथा।
शालस्तम्भनिभास्तेषां चन्दनागुरुरूषिताः ॥ २-२१-३३ (१२१६६)
अशोभन्त महाराज बाहवो युद्धशालिनाम्।
तान्दृष्ट्वा द्विरदप्रख्याञ्शालस्कन्दानिवोद्गतान् ॥ २-२१-३४ (१२१६७)
व्यूढोरस्कान्मागधानां विस्मयः समपद्यत।
ग्अद्वारेणाभ्यवस्कन्द्य विविशुर्मागधालयम्'॥ २-२१-३५ (१२१६८)
ते त्वतीत्य जनाकीर्णाः कक्षास्तिस्रो नरर्षभाः।
अहङ्कारेण राजानमुपतस्थुर्गतव्यथाः ॥ २-२१-३६ (१२१६९)
ग्भो शब्देनैव राजानमुचुस्ते तु महारथाः'।
तान्पाद्यमधुपर्कार्हान्गवार्हान्सत्कृतिं गतान्।
प्रत्युत्थाय जरासन्ध उपतस्थे यथाविधि ॥ २-२१-३७ (१२१७०)
उवाच चैतान्राजाऽसौ स्वागतं वोस्त्विति प्रभुः।
मौनमासीत्तदा पार्थभीमयोर्जनमेजय ॥ २-२१-३८ (१२१७१)
तेषां मध्ये महाबुद्धिः कृष्णो वचनमब्रवीत्।
वक्तुं नायाति राजेन्द्र एतयोर्नियमस्थयोः ॥ २-२१-३९ (१२१७२)
अर्वाङ्निशीथात्परतस्त्वाया सार्धं वदिष्यतः।
यज्ञागारे स्थापयित्वा राजा राजगृहं वदिष्यतः। २-२१-४० (१२१७३)
ततोऽर्धरात्रे सम्प्राप्ते यातो यत्र स्थिता द्विजाः।
तस्य ह्येतद्व्रतं राजन्बभूव भुवि विश्रुतम् ॥ २-२१-४१ (१२१७४)
स्नातकान्ब्राह्मणान्प्राप्ताञ्श्रुत्वा स समितिञ्जयः।
अप्यर्धरात्रे नृपतिः प्रत्युद्गच्छति भारत ॥ २-२१-४२ (१२१७५)
तांस्त्वपूर्वेण वेषेण दृष्ट्वा स नृपसत्तमः।
उपतस्थे जरान्धो विस्मितश्चाभवत्तदा ॥ २-२१-४३ (१२१७६)
ते तु दृष्ट्वैव राजानं जरासन्धं नरर्षभाः।
इदमूचुरमित्रघ्नाः सर्वे भरतसत्तम ॥ २-२१-४४ (१२१७७)
स्वस्त्यस्तु कुशलं राजन्निति तत्र व्यवस्थिताः।
तं नृपं नृपशार्दूल प्रेक्षमाणाः परस्परम् ॥ २-२१-४५ (१२१७८)
तानब्रवीञ्जरासन्धस्तथा पाण्डवयादवान्।
आस्यतामिति राजेन्द्र ब्राह्मणच्छद्मसंवृतान् ॥ २-२१-४६ (१२१७९)

अथोपविविशुः सर्वे त्रयस्ते पुरुषर्षभाः।
सम्प्रदीप्तास्त्रयो लक्ष्म्या महाध्वर इवाग्नयः ॥ २-२१-४७ (१२१८०)
तानुवाच जरासन्धः सत्यसन्धो नराधिपः।
विगर्हमाणः कौरव्य वेषग्रहणवैकृतान् ॥
न स्नातकव्रता विप्रा वहिर्माल्यानुलेपनाः ॥ २-२१-४८ (१२१८१)
भवन्तीति नृलोकेऽस्मिन्विदितं मम सर्वशः।
के यूयं पुष्पवन्तश्च भुजैर्ज्याकृतलक्षणैः ॥ २-२१-४९ (१२१८२)
बिभ्रतः क्षात्रमोजश्च ब्राह्मण्यं प्रतिजानथ।
एवं विरागवसना बहिर्माल्यानुलेपनाः ॥ २-२१-५० (१२१८३)
ग क्षत्रिया एव लोकेऽस्मिन्विदिता मम सर्वशः'॥
सत्यं वदत के यूयं सत्यं राजसु शोभते ॥ २-२१-५१ (१२१८४)
चैत्यकस्य गिरेः शृङ्गं भित्त्वा किमिह सद्मनि।
अद्वारेण प्रविष्टाः स्थ निर्भया राजकिल्विषात् ॥ २-२१-५२ (१२१८५)
वदध्वं वाचि वीर्यं च ब्राह्मणस्य विशेषतः।
कर्म चैतद्विलिङ्गस्थं किं वोऽद्य प्रसमीक्षितम् ॥ २-२१-५३ (१२१८६)
एवं च मामुपास्थाय कस्माच्च विधिनार्हणाम्।
प्रणीतां नानुगृह्णीत कार्यं किं वाऽस्मदागमे ॥ २-२१-५४ (१२१८७)
वैशम्पायन उवाच। २-२१-५५क्ष् (१४१७)
एवमुक्ते ततः कृष्णः प्रत्युवाच महामनाः।
स्निग्धगमभीरया वाचा वाक्यं वाक्यविशारदः ॥ २-२१-५५ (१२१८८)
कृष्ण उवाच। २-२१-५६क्ष् (१४१८)
स्नातकान्ब्राह्मणान्राजन्विद्ध्यस्मांस्त्वं नराधिप।
स्नातकव्रतिनो राजन्ब्राह्मणाः क्षत्रिया विशः ॥ २-२१-५६ (१२१८९)
विशेषनियमाश्चैषामविशेषाश्च सन्त्युत।
विशेषवांश्च सततं क्षत्रियः श्रियमृच्छति ॥ २-२१-५७ (१२१९०)
पुष्पवत्सु ध्रुवा श्रीश्च पुष्पवन्तस्ततो वयम्।
क्षत्रियो बाहुवीर्यस्तु न तथा वाक्यवीर्यवान् ॥
अम्प्रगल्भं वचस्तस्य तस्माद्बार्हद्रथेरितम् ॥ २-२१-५८ (१२१९१)
स्ववीर्यं क्षत्रियाणां तु बाह्वोर्धाता न्यवेशयत्।
तद्दिदृक्षसि चेद्राजन्द्रष्टास्यद्य न संशयटः ॥ २-२१-५९ (१२१९२)
अद्वारेण रिम्पोर्गेहं द्वारेण सुहृदो गृहान्।
प्रविशन्ति नरा धीरा द्वाराण्येतानि धर्मतः ॥ २-२१-६० (१२१९३)
कार्यवन्तो गृहानेत्य शत्रुतो नार्हणां वयम्।
प्रतिगृह्णीम् तद्विद्धि एतन्नः शाश्वतं व्रतम् ॥ ॥ २-२१-६१ (१२१९४)

इति श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणि एकविंशोऽध्यायः ॥ २१.।

सभापर्व - अध्याय ०२२
॥ श्रीः ॥
२.२२. अध्यायः २२

Mahabharata - Sabha Parva - Chapter Topics
कृष्णजरासन्धयोर्विवादानन्तरं जरासन्धस्य युद्धोद्यमः ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

जरासन्ध उवाच।

न स्मरामि कदा वैरं कृतं युष्माभिरित्युत।
चिन्तयंश्च न पश्यामि भवतां प्रति वैकृतम् ॥ २-२२-१ (१२१९५)
वैकृते वा सति कथं मन्यध्वं मामनागसम्।
अरिं वै ब्रूत हे विप्राः सतां समय एष हि ॥ २-२२-२ (१२१९६)
अर्थधर्मोपघाताद्धि मनः समुपतप्यते।
योऽनागसि प्रसजति क्षत्रियो हि न संशयटः ॥ २-२२-३ (१२१९७)
अतोऽन्यथा चरँल्लोके धर्मज्ञः सन्महारथः।
वृजिनां गतिमाप्नोति श्रेयसोऽप्युपहन्ति च ॥ २-२२-४ (१२१९८)
त्रैलोक्ये क्षत्रधर्मो हि श्रेयान्वै साधुचारिणाम्।
नान्यं धर्मं प्रशंसन्ति ये च धर्मविदो जनाः ॥ २-२२-५ (१२१९९)
तस्य मेऽद्य स्थितस्येह स्वधर्मे नियतात्मनः।
अनागसं प्रजानां च प्रमादादिव जल्पथ ॥ २-२२-६ (१२२००)
कृष्ण उवाच। २-२२-७क्ष् (१४१९)
कुलकार्यं महाबाहो कश्चिदेकः कुलोद्वहः।
वहते यस्तन्नियोगाद्वयमभ्युद्यतास्त्वयि ॥ २-२२-७ (१२२०१)
त्वया चोपहृता राजन्क्षत्रिया लोकवासिनः।
तदागः क्रूरमुत्पाद्य मन्यसे किमनागसम् ॥ २-२२-८ (१२२०२)
राजा राज्ञः कथं साधून्हिंस्यान्नृपतिसत्तम।
तद्राज्ञः सन्निगृह्य त्वं रुद्रायोपजिहीर्षसि ॥ २-२२-९ (१२२०३)
अस्मांस्तदेनोपगच्छेत्कृतं बार्हद्रथ त्वया।
वयं हिं शक्ता धर्मस्य रक्षणे धर्मचारिणः ॥ २-२२-१० (१२२०४)
ग्तस्मादद्योपगच्छामस्तव बार्हद्रथान्तिकम्'।

मनुष्याणां समालम्भो न च दृष्टः कदाचन।
स कथं मानुषैर्देवं यष्टुमिच्छसि शङ्करम् ॥ २-२२-११ (१२२०५)
सवर्णो हि सवर्णानां पशुसञ्ज्ञां करिष्यसि।
कोऽन्यं एवं यथा हि त्वं जरासन्ध वृथामतिः ॥ २-२२-१२ (१२२०६)
यस्यां यस्यामवस्थायां यद्यत्कर्म करोति यः।
तस्यां तस्यामवस्थायां तत्फलं समवाप्नुयात् ॥ २-२२-१३ (१२२०७)
ते त्वां ज्ञातिक्षयकरं यममार्तानुसारिणः।
ज्ञातिवृद्धिनिमित्तार्थं विनिहन्तुमिहागताः ॥ २-२२-१४ (१२२०८)
नास्ति लोके पुमानन्यः क्षत्रियोष्विति चैव तत्।
मन्यसे स च ते राजन्सुमहान्बुद्धिविप्लवः ॥ २-२२-१५ (१२२०९)
को हि जानन्नभिजनमात्मवान्क्षत्रियो नृप।
नाविशेत्स्वर्गमतुलं रणानन्तरमव्ययम् ॥ २-२२-१६ (१२२१०)
स्वर्गं ह्येव समास्थाय रणयज्ञेषु दीक्षिताः।
जयन्ति क्षत्रिया लोकांस्तद्विद्धि मनुजर्षभ ॥ २-२२-१७ (१२२११)
स्वर्गयोनिर्महद्ब्रह्म स्वर्गयोनिर्महद्यशः।
स्वर्गं योनिस्तपो युद्धे मृत्युः सोऽव्यभिचारवान् ॥ २-२२-१८ (१२२१२)
एष ह्यैन्द्रो वैजयन्तो गुणैर्नित्यं समाहितः।
येनासुरान्पराजित्य जगत्पाति शतक्रतुः ॥ २-२२-१९ (१२२१३)
स्वर्गमार्गाय कस्य स्याद्विग्रहो वै यथा तव।
मागधैर्विपुलैः सैन्यैर्बाहुल्यबलदर्पितः ॥ २-२२-२० (१२२१४)
माऽवमंस्थाः परान्राजन्नास्ति वीर्यं नरे नरे।
समं चेजस्त्वया चैव विशिष्टं वा नरेश्वर ॥ २-२२-२१ (१२२१५)
यावदेतदसम्बुद्धं तावदेव भवेत्तव।
विषह्यमेतदस्माकमतो राजन्ब्रवीमि ते ॥ २-२२-२२ (१२२१६)
जहि त्वं सदृशेष्वेव मानं दर्पं च मागध।
मा गमः ससुतामात्यः सबलश्च यमक्षयम् ॥ २-२२-२३ (१२२१७)
दम्भोद्भवः कार्तवीर्य उत्तरश्च बृहद्रथः।
श्रेयसो ह्यवमत्येह विनेशुः सबला नृपाः ॥ २-२२-२४ (१२२१८)
युयुक्षमाणास्त्वत्तो हि न वयं ब्राह्मणा ध्रुवम्।
शौरिरस्मि हृषीकेशो नृवीरौ पाण्डवाविमौ।
अनयोर्मातुलेयं च कृष्णं मां विद्धि ते रिपुम् ॥ २-२२-२५ (१२२१९)
त्वामाह्वयामहे राजन्स्थिरो युध्वस्व मागध।
मुच्छ वा नृपतीन्सर्वान् गच्छ वा त्वं यमक्षयम् ॥ २-२२-२६ (१२२२०)
ग वैशम्पायन उवाच ॥ २-२२-२७क्ष् (१४२०)
एतच्छ्रुत्वा जरासन्धः क्रुद्धो वचनमब्रवीत् ॥ २-२२-२७ (१२२२१)
नाहं कंसः प्रलम्बो वा न बाणो न च मुष्टिकः।

नरको नेन्द्रतपनो न केशी न च पूतना ॥ २-२२-२८ (१२२२२)
न कालयवनो वाऽपि ये त्वया निहता युधि।
त्वं तु गोपकुलोत्पन्नो जातिं वै पौर्विकीं स्मर ॥ २-२२-२९ (१२२२३)
योऽस्मद्भयादतिक्रम्य सागरानूपमाश्रितः।
जन्मभूमिं परित्यज्य मधुरां प्राकृतो यथा ॥ २-२२-३० (१२२२४)
सोऽधुना कत्थसे शौरे शरदीव यथा घनः।
अद्यानृण्यं करिष्यामि भोजराजस्य धीमतः ॥ २-२२-३१ (१२२२५)
जामातुरौग्रसेनस्य त्वां निहत्याद्य माधव।
चिरकाङ्क्षितो मे सङ्ग्रामस्त्वां हन्तुं समुद्द्गुणम् ॥ २-२२-३२ (१२२२६)
दिष्ट्या मे सफलो यत्नः कृतो देवैः सवासवैः।
क्लीबाविमौ च गोविन्द भीमसेनार्जुनावुभौ ॥ २-२२-३३ (१२२२७)
हिंस्यासि युधि विक्रम्य सिंहः क्षुद्रमृगाविव। २-२२-३४ (१२२२८)
वैशम्पायन उवाच ॥
तस्य रोषाभिभूतस्य जरासन्धस्य गर्जतः ॥ २-२२-३४क्ष् (१४२१)
सर्वभूतानि वित्रेमुषे तत्रासन्समागताः। २-२२-३५ (१२२२९)
श्रीभगवानुवाच ॥
किं गर्जसि जरासन्ध कर्मणा तत्समाचर ॥ २-२२-३५क्ष् (१४२२)
मम निर्देशकर्तृभ्यां पाण्डवाभ्यां नृपाधम।
समात्यं ससुतं चाद्य घातयिष्याम्यहं रणे।
न कथञ्चन जीवन्वै प्रवेक्ष्यसि पुरोत्तमम्'॥ २-२२-३६ (१२२३०)
जरासन्ध उवाच। २-२२-३७क्ष् (१४२३)
नाजितान्वै नरपतीनहमादद्मि काश्चन।
अजितः पर्यवस्थाता कोऽत्र यो न मया जितः ॥ २-२२-३७ (१२२३१)
क्षत्रियस्यैतदेवाहुर्धर्म्यं कृष्णोपजीवनम्।
विक्रम्य वशमानीय कामतो यत्समाचरेत् ॥ २-२२-३८ (१२२३२)
देवातार्थमुपाहृत्य राज्ञः कृष्ण कथं भयात्।
अहमद्य विमुच्येयं क्षात्रं व्रतमनुस्मरन् ॥ २-२२-३९ (१२२३३)
सैन्यं सैन्येन व्यूढेन एक एकेन वा पुनः।
द्वाभ्यां त्रिभिर्वा योत्स्येऽहं युगत्पृथगेव वा ॥ २-२२-४० (१२२३४)
वैशम्पाय उवाच। २-२२-४१क्ष् (१४२४)
एवमुक्त्वा जरासन्धः सहदेवाभिषेचनम्।
अज्ञापयत्तदा राजा ययुत्सुर्भीमकर्मभिः ॥ २-२२-४१ (१२२३५)
स तु सेनापतिं राजा सस्मार भरतर्षभ।
कौशिकं चित्रसेनं च तस्मिन्युद्ध उपस्थिते ॥ २-२२-४२ (१२२३६)
ययोस्ते नामनी राजन्हंसेति डिबिकेति च।
पूर्वं सङ्कथिते पुम्भिर्नृलोके लोकसत्कृते ॥ २-२२-४३ (१२२३७)

तं तु राजन्विभुः शौरी राजानं बलिनां वरम्।
स्मृत्वा पुरुषशार्दूलः शार्दूलसमविक्रमम् ॥ २-२२-४४ (१२२३८)
सत्यसन्धो जरासन्धं भुवि भीमपराक्रमम्।
भागमन्यस्य निर्दिष्टमवध्यं मधुभिर्मृधे: ॥ २-२२-४५ (१२२३९)
नात्मनाऽऽत्मवतां मुख्य इयेष मधुसूदनः।
ब्राह्मीमाज्ञां पुरस्कृत्य हन्तुं हलधरानुजः ॥ ॥ २-२२-४६ (१२२४०)

इति श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणि द्वाविंशोऽध्यायः ॥ २.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-२२-४५ मधुभिर्यादवैः ।ष्टं वध्य मत्वा तदाच्युतः इति पाठः ॥

सभापर्व - अध्याय ०२३
॥ श्रीः ॥
२.२३. अध्यायः २३

Mahabharata - Sabha Parva - Chapter Topics
कृष्णजरासन्धयोर्द्वेषकारणकथनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

जनमेजय उवाच।

किमर्थं वैरिणावास्तामुभौ तौ कृष्णमागधौ।
कथं च निर्जितः सङ्ख्ये जरासन्धेन माधवः ॥ २-२३-१ (१२२४१)
कश्च कंसो मागधस्य यस्य हेतोः स वैरवान्।
एतदाचक्ष्व मे सर्वं वैशम्पायन तत्वतः ॥ २-२३-२ (१२२४२)
वैशम्पायन उवाच ॥ २-२३-३क्ष् (१४२५)
यादवानामन्ववाये वसुदेवो महामतिः।
उदपद्यत वार्ष्णेयो ह्युग्रसेनस्य मन्त्रभृत् ॥ २-२३-३ (१२२४३)
उग्रसेनस्य कंसस्तु बभूव बलवान्सुतः।
ज्येष्ठो बहूनां कौरव्य सर्वशस्त्रविशारदः ॥ २-२३-४ (१२२४४)
जरासन्धस्य दुहिता तस्य भार्याऽतिविश्रुता।
राज्यशुक्लेन दत्ता सा जरासन्धेन धीमता ॥ २-२३-५ (१२२४५)

तदर्थमुग्रसेनस्य मधुरायां सुतस्तदा।
अभिषिक्तस्तदाऽमात्यैः स वै तीव्रपराक्रमः ॥ २-२३-६ (१२२४६)
ऐश्वर्यबलमत्तस्तु स तदा बलमोहितः।
निगृह्य पितरं भुङ्क्ते तद्राज्यं मन्त्रिभिः सह ॥ २-२३-७ (१२२४७)
वसुदेवस्य तत्कृत्यं न शृणोति स मन्दधीः।
त तेन सह तद्राज्यं धर्मतः पर्यपालयत् ॥ २-२३-८ (१२२४८)
प्रीतिमान्स तु दैत्येन्द्रो वसुदेवस्य देवकीम्।
उवाह भार्या स तदा दुहिता देवकस्य या ॥ २-२३-९ (१२२४९)
तस्यामुद्वाह्यमानायां रथेन जनमेजय।
उपारुरोह वार्ष्णेयं कंसो भूमिपतिस्तदा ॥ २-२३-१० (१२२५०)
ततोऽन्तरिक्षे वागासीद्देवदूतस्य कस्यचित्।
वसुदेवश्च शुश्राव तां वाचं पार्थिवश्च सः ॥ २-२३-११ (१२२५१)
यामेतां वहमानोऽद्य कंसोद्वहसि देवकीम्।
अस्या यश्चाष्टमो गर्भः स ते मृत्युर्भविष्यति ॥ २-२३-१२ (१२२५२)
सोऽवतीर्य ततो राजा खड्गमुद्धृत्य निर्मलम्।
इयेष तस्या मूर्धानं छेत्तुं परमदुर्मतिः ॥ २-२३-१३ (१२२५३)
सान्त्वयन्स तदा कंसं हसन्क्रोधवशानुगम्।
राजन्ननुनयामास वसुदेवो महामतिः ॥ २-२३-१४ (१२२५४)
अहिंस्यां प्रमदामाहुः सर्वधर्मेषु पार्थिव।
अकस्मादबलां नारीं हन्तासीमामनागसीम् ॥ २-२३-१५ (१२२५५)
यच्च तेऽत्र भयं राजञ्शक्यते बाधितुं त्वया।
इयं शक्या पालयितुं समयं चैव रक्षितुम् ॥ २-२३-१६ (१२२५६)
अस्यास्त्वमष्टमं गर्भं जातमात्रं महीपते।
विध्वंसय तदा प्राप्तमेवं परिहृतं भवेत् ॥ २-२३-१७ (१२२५७)
एवं स राजा कथितो वसुदेवेन भारत।
तस्य तद्वचनं चक्रे शूरसेनपतिस्तदा ॥ २-२३-१८ (१२२५८)
ततस्तस्यां सम्बभूवुः कुमाराः सूर्यवर्चसः।
जाताञ्जातांस्तु तान्सर्वाञ्जघान मधुरेश्वरः ॥ २-२३-१९ (१२२५९)
अथ तस्यां समभवद्बलदेवस्तु सत्तमः।
याम्यता मायया तं तु यमो राजा विशाम्पते ॥ २-२३-२० (१२२६०)
देवक्या गर्भमतुलं रोहिण्या जठरेऽक्षिपत्।
आकृष्य कर्षणात्सम्यक्सङ्कर्षणं इति स्मृतः ॥ २-२३-२१ (१२२६१)
बलश्रेष्ठतया तस्य बलदेव इति स्मृतः।
पुनस्तस्यां समभवदष्टमो मधुमूदनः ॥ २-२३-२२ (१२२६२)
तस्य गर्भस्य रक्षां तु स चक्रेऽभ्यधिकं नृपः।
ततः काले रक्षणार्थं वसुदेवस्य तत्वतः ॥ २-२३-२३ (१२२६३)

उग्रः प्रयुक्तः कंसेन सचिवः क्रूरकर्मकृत् ॥ २-२३-२४ (१२२६४)
जातमात्रं वासुदेवमथाकृष्य पिता ततः।
उपजह्रे परिक्रीतां सुतां गोपस्य कस्यचित् ॥ २-२३-२५ (१२२६५)
अमृष्यमाणस्तं शब्दं देवदूतस्य पार्थिवः।
वासुदेवं महात्मानमर्पयामास गोकुले ॥ २-२३-२६ (१२२६६)
वासुदेवोपि गोपेषु ववृधेऽब्जमिवाम्भसि।
अज्ञायमानः कंसेन गूढोऽग्निरिव दारुषु ॥ २-२३-२७ (१२२६७)
विप्रचक्रे तदा सर्वान्बल्लवान्मधुरेश्वरः।
वर्धमानो महाबाहुस्तेजोबलसमन्वितः ॥ २-२३-२८ (१२२६८)
ततस्ते क्लिश्यमानास्तु पुण्डरीकाक्षमच्युतम्।
भयेन कामादपरे गणशः पर्यवारयन् ॥ २-२३-२९ (१२२६९)
स तु लब्ध्वा बलं राजन्नुग्रसेनस्य संमतः।
वसुदेवात्मजः सर्वैर्भ्रातृभिः सहितं पुनः ॥ २-२३-३० (१२२७०)
निर्जित्य युधि भोजेन्द्रं हत्वा कंसं महाबलः।
अभ्यषिञ्चत्ततो राज्य उग्रसेनं विशाम्पते ॥ २-२३-३१ (१२२७१)
ततः श्रुत्वा जरासन्धो माधवेन हतं युधि।
शूरसेनाधिपं चक्रे कंसपुत्रं तदा नृप ॥ २-२३-३२ (१२२७२)
ससैन्यं महदुत्थाप्य वासुदेवं तदा नृप।
अभ्यषिञ्चत्सुतं तत्र सुताया जनमेजय ॥ २-२३-३३ (१२२७३)
उग्रसेनं च वृष्णींश्च महाबलसमन्वितः।
स तत्र विप्रकुरुते जरासन्धः प्रतापवान् ॥ २-२३-३४ (१२२७४)
एतद्वैरं कौरवेय जरासन्धस्य माधवे।
आशासितार्थे राजेन्द्र संरुरोध विनिर्जितान् ॥ २-२३-३५ (१२२७५)
पार्थिवैस्तैर्नृपतिभिर्यक्ष्यमाणः समृद्धिमान्।
देवश्रेष्ठं महादेवं कृत्तिवासं त्रियम्बकम् ॥ २-२३-३६ (१२२७६)
एतत्सर्वं यथावृत्तं कथितं भरतर्षभ।
यथा तु स हतो राजा भीमसेनेन तच्छृणु ॥ ॥ २-२३-३७ (१२२७७)

इति श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणि त्रयोविंशोऽध्यायः ॥ २३.।

सभापर्व - अध्याय ०२४
॥ श्रीः ॥
२.२४. अध्यायः २४

Mahabharata - Sabha Parva - Chapter Topics

भीमजरासन्धयोः स्वस्त्ययनपूर्वकं युद्धारम्भः ॥१.।श्रीकृष्णप्रोत्साहितस्य भीमस्य जरासन्धवधोद्यमः ॥२.।

Mahabharata - Sabha Parva - Chapter Text

ततस्तं निश्चितात्मानं युद्धाय यदुनन्दनः।
उवाच वाग्मी राजानं जरासन्धमधोक्षजः ॥ २-२४-१ (१२२७८)
त्रयाणां केन ते राजन्योद्धुमुत्सहते मनः।
अस्मदन्यतमेनेह सज्जीभवतु को युधि ॥ २-२४-२ (१२२७९)
एवमुक्तः स नृपतिर्युद्धं वव्रे महाद्युतिः।
जरासन्धस्ततो राजा भीमसेनेन मागधः ॥ २-२४-३ (१२२८०)
ग्धारयन्तं गदां दिव्यां बलं श्रुत्वा च निर्वृतः।
अर्जुन वासुदेवं च वजर्यित्वा स मागधः ॥ २-२४-४ (१२२८१)
मत्वा देवं गोप इति बालोऽर्जुन इति स्म ह'।
आदाय रोजनां माल्यं मङ्गल्यान्यपराणि च ॥ २-२४-५ (१२२८२)
धारयन्नगदान्मुख्यान्निर्वृतीर्वेदनानि च।
उपतस्थे जरासन्धं युयुत्सुं वै पुरोहितः ॥ २-२४-६ (१२२८३)
कृतस्वस्त्ययनो राजा ब्राह्मणेन यशस्विना।
समनह्यज्जरासन्धः क्षात्रं धर्ममनुस्मरन् ॥ २-२४-७ (१२२८४)
अवमुच्य किरीटं स केशान्समनुमृज्य च।
उदतिष्ठज्जरासन्धो वेलातिग इवार्णवः ॥ २-२४-८ (१२२८५)
उवाच मतिमान्राजा भीमं भीमपराक्रमः।
भीम योत्स्ये त्वया सार्धं श्रेयसा निर्जितं वरम् ॥ २-२४-९ (१२२८६)
एवमुक्त्वा जरासन्धो भीमसेनमरिन्दमः।
प्रत्युद्ययौ महातेजाः शक्रं बल इवासुरः ॥ २-२४-१० (१२२८७)
ततः संमन्त्र्य कृष्णेन कृतस्वस्त्ययनो बली।
भीमसेनो जरासन्धमाससाद युयुत्सया ॥ २-२४-११ (१२२८८)
ततस्तौ नरशार्दूलौ बाहुशस्त्रौ समीयतुः।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ॥ २-२४-१२ (१२२८९)
करग्रहणपूर्वं तु कृत्वा पादाभिवन्दनम्।
कक्षैः कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः ॥ २-२४-१३ (१२२९०)
स्कन्धे दोर्भ्यां समाहत्य निहत्य च मुहुर्मुहुः।
अङ्गमङ्गैः समाश्लिष्य पुनरास्फालनं च चक्रतुः। २-२४-१४ (१२२९१)
चित्रहस्तादिकं कृत्वा सस्फुलिङ्गेन चाशनिम् ॥
गलगण्डाभिघातेन सस्फुलिङ्गेन चाशनिम् ॥ २-२४-१५ (१२२९२)
बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ।

उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥ २-२४-१६ (१२२९३)
करसम्पीडनं कृत्वा गर्जन्तौ वारणाविव।
नर्दन्तौ मेघसङ्काशौ बाहुप्रहरणावुभौ ॥ २-२४-१७ (१२२९४)
तलेनाहन्यमानौ तु अन्योन्यं कृतवीक्षणौ।
सिंहाविव सुसंङ्क्रुद्धावाकृष्याकृष्य युध्यताम् ॥ २-२४-१८ (१२२९५)
अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि।
आवृत्य बाहुभिश्चापि उदरं च प्रचक्रतुः ॥ २-२४-१९ (१२२९६)
उभौ कट्यां सुपार्श्वे तु तक्षवन्तौ च शिक्षितौ।
अधो हस्तं स्वकण्ठे तूदरस्योरसि चाक्षिपत् ॥ २-२४-२० (१२२९७)
सर्वातिक्रान्तमर्यादं पृष्ठभङ्गं च चक्रतुः।
सम्पूर्णमूर्च्छां बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः ॥ २-२४-२१ (१२२९८)
तृणपीडं यथाकामं पूर्णयोगं समुष्टिकम्।
एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम् ॥ २-२४-२२ (१२२९९)
तयोर्युद्धं ततो द्रष्टुं समेताः पुरवासिनाः।
ब्राह्मणा वणिजश्चैव क्षत्रियाश्च सहस्रशः ॥ २-२४-२३ (१२३००)
शूद्राश्च नरशार्दूल स्त्रियो वृद्धाश्च सर्वशः।
निरन्तरमभूत्तत्र जनौघैरभिसंवृतम् ॥ २-२४-२४ (१२३०१)
तयोरथ भुजाघातान्निग्रहप्रग्रहात्तथा।
आसीत्सुभीमसम्पातो वज्रपर्वतयोरिव ॥ २-२४-२५ (१२३०२)
उभौ परमसंहृष्टौ बलेन बलिनां वरौ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ॥ २-२४-२६ (१२३०३)
ग शिरोभिरिव तौ मेषौ वृक्षैरिव निशाचरौ।
पदैरिव शुभावश्वौ तुण्डाभ्यां तित्तिरी इव'॥ २-२४-२७ (१२३०४)
तद्भीममुत्सार्य जनं युद्धमासीदुपप्लवे।
बलिनोः संयुगे राजन्वृत्रवासवयोरिव ॥ २-२४-२८ (१२३०५)
प्रकर्षणाकर्षणाभ्यामनुकर्षविकर्षणैः।
आचकर्षतुरन्योन्यं जानुभिश्चावजघ्नतुः ॥ २-२४-२९ (१२३०६)
ततः शब्देन महता भर्त्सयन्तौ परस्परम्।
पाषाणसङ्घातनिभैः प्रहारैरभिजघ्नतुः ॥ २-२४-३० (१२३०७)
गततो भीमं जरासन्धो जघानोरसि मुष्टिना।
भीमोषि तं जरासन्धं वक्षस्यभिजघान ह'॥ २-२४-३१ (१२३०८)
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ।
बाहुभिः समसज्जोतामायसैः परिघैरिव ॥ २-२४-३२ (१२३०९)
कार्तिकस्य तु मासस्य प्रवृत्तं प्रथमेऽहनि।
तदा तद्युद्धमभवद्दिनानि दश पञ्च च।
अनाहारं दिवारात्रमविश्रान्तमवर्तत ॥ २-२४-३३ (१२३१०)

तद्वृत्तं तु त्रयोदश्यां समवेतं महात्मनोः।
चतुर्दश्यां निशायां तु निवृत्तो मागधः क्लमात् ॥ २-२४-३४ (१२३११)
तं राजानं तथा क्लान्तं दृष्ट्वा राजञ्जनार्दनः।
उवाच भीमकर्माणं भीमं सम्बोधयन्निव ॥ २-२४-३५ (१२३१२)
क्लान्तः शत्रुर्हि कौन्तेय शक्यः पीडयितुं रणे।
पीड्यमानो हि कार्त्स्न्येन जह्याज्जीवितमात्मनः ॥ २-२४-३६ (१२३१३)
तस्मात्तेऽद्यैव कौन्तेय पीडनीयो जनाधिपः।
सममेतेन युध्यस्व बाहुभ्यां भरतर्षभ ॥ २-२४-३७ (१२३१४)
वैशम्पायन उवाच। २-२४-३८क्ष् (१४२६)
एवमुक्तःस कृष्णेन पाण्डवः परवीरहा।
जरासन्दस्य तद्रन्ध्रं ज्ञात्वा चक्रे मतिं वधे ॥ २-२४-३८ (१२३१५)
ततस्तमजितं जेतुं जरासन्दं वृकोदरः।
संरम्भाद्बलिनां श्रेष्ठो जग्राह कुरुनन्दनः ॥ ॥ २-२४-३९ (१२३१६)

इति श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणि चतुर्विंशोऽध्यायः ॥ २४.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-२४-६ निर्वृतीर्वेदनानि च दुःखमूर्छयोः काले सुखसञ्ज्ञाकराणि ॥
२-२४-१३ कक्षैः दोर्मूलैः ॥
२-२४-१६ ग्रथिताङ्गुलिभ्यां हस्ताभ्यां परशिरसः पीडने पूर्णकुम्भः ॥
२-२४-२० तक्षवन्तौ ग्रात्रसङ्कोचवन्तौ ॥

सभापर्व - अध्याय ०२५
॥ श्रीः ॥
२.२५. अध्यायः २५

Mahabharata - Sabha Parva - Chapter Topics
जरासन्धवधः ॥१.।जरासन्धेन बन्धीकृतानां राज्ञां कृष्णेन मोचनम् ।।२.।मोचितै राजभिः कृष्णाय रत्नादिदानम

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

भीमसेनस्ततः कृष्णमुवाच यदुनन्दनम्।

बुद्धिमास्थाय विपुलां जरासन्धवधोप्सया ॥ २-२५-१ (१२३१७)
नायं पापो मया कृष्ण युक्तः स्यादनुरोधितुम्।
प्रायेण यदुशार्दूल बान्धवक्षयकृत्तव ॥ २-२५-२ (१२३१८)
एवमुक्तस्ततः कृष्णः प्रत्युवाच वृकोदरम्।
त्वरयन्पुरुषव्याघ्रो जरासन्धवधेप्सया ॥ २-२५-३ (१२३१९)
यत्ते दैवं परं सत्वं यच्च ते मातरिश्वनः।
बलं भीमं जरासन्धे दर्शयाशु तदद्य वै ॥ २-२५-४ (१२३२०)
ग्तवैष वध्यो दुर्बुद्धिर्जरासन्धो महारथः।
इत्यन्तरिक्षे त्वश्रौषं यदा वायुरवाप्यते ॥ २-२५-५ (१२३२१)
गोमन्ते पर्वतश्रेष्ठे येनैष परिमोक्षितः।
बलदेवबलं प्राप्य कोऽन्यो जीवेत्तु मागधात् ॥ २-२५-६ (१२३२२)
तदस्य मृत्युर्विहितस्त्वदृते न महाबल।
वायुं चिन्त्य महाबाहो जहीमं मगधाधिपम् ॥ २-२५-७ (१२३२३)
वैशम्पायन उवाच। २-२५-८क्ष् (१४२७)
एवमुक्तस्ततो भीमो मनसाऽऽचिन्त्य मारुतम्।
जनार्दनं नमस्कृत्य परिष्वज्य च फल्गुनम्'॥ २-२५-८ (१२३२४)
प्रभञ्जनबलाविष्टो जरासन्धमरिन्दमः।
उत्क्षिप्य भ्रामयामास बलवन्तं महाबलः ॥ २-२५-९ (१२३२५)
भ्रामयित्वा शतगुणं जानुभ्यां भरतर्षभ।
बभञ्ज पृष्टं सङ्क्षिप्य निष्पिष्य विननाद च ॥ २-२५-१० (१२३२६)
करे गृहीत्वा चरणं द्विधा चक्रे महाबलः।
तस्य निष्पिष्यमाणस्य पाण्डवस्य च गर्जतः ॥ २-२५-११ (१२३२७)
अभवत्तुमुलो नादः सर्वप्राणिभयङ्करः।
वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रुवुः ॥ २-२५-१२ (१२३२८)
भीमसेनस्य नादेन जरासन्धस्य चैव ह।
किं नु स्याद्धिमवान्भिन्नः किंनुस्विद्दीर्यते मही ॥ २-२५-१३ (१२३२९)
इति वै मागधा जज्ञुर्भीमसेनस्य निखनात्।
ग्ततस्तु भगवान्कृष्णो जरासन्धजिघांसया ॥ २-२५-१४ (१२३३०)
भीमसेनं समालोक्य नलं जग्राह पाणिना।
द्विधा चिच्छेद वै तत्तु जरासन्धवधं प्रति ॥ २-२५-१५ (१२३३१)
ततस्त्वाज्ञाय तस्यैव पादमुत्क्षिप्य मारुतिः।
द्विधा बभञ्ज तद्गात्रं प्राक्षिपद्विननाद च ॥ २-२५-१६ (१२३३२)
पुनः सन्धाय तु तदा जरान्धः प्रतापवान्।
भीमेन च समागम्य बाहुयुद्धं चकार ह ॥ २-२५-१७ (१२३३३)
तयोः समभवद्युद्धं तुमुलं रोमहर्षणम्।
सर्वलोकक्षयकरं सर्वभूतभयावहम् ॥ २-२५-१८ (१२३३४)

पुनः कृष्णस्तमिरिणं द्विधा विच्छिद्य माधवः।
व्यत्यस्य प्राक्षिपत्तत्तु जरासन्धवधेप्सया ॥ २-२५-१९ (१२३३५)
भीमसेनस्तदा ज्ञात्वा निर्बिभेद च मागधम्।
द्विधा व्यत्यस्य पादेन प्राक्षिपच्च ननाद ह ॥ २-२५-२० (१२३३६)
शुष्कमांसास्थिमेदस्त्वग्भिन्नमस्तिष्कपिण्डकटः।
शवभूतस्तदा राजन्पिण्डीकृत इवाबबौ'॥ २-२५-२१ (१२३३७)
ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपम्।
रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिन्दमाः ॥ २-२५-२२ (१२३३८)
जरासन्धरथं कृष्णो योजयित्वा पताकिनम्।
आरोप्य भ्रातरौ चैव मोक्षयामास बान्धवान् ॥ २-२५-२३ (१२३३९)
ते वै रत्नभुजं कृष्णं रत्नार्हं पृथिवीश्वराः।
राजानं चक्ररासाद्य मोक्षिता महतो भयात् ॥ २-२५-२४ (१२३४०)
अक्षतः शस्त्रसम्पन्नो जितारिः सह राजभिः।
रथमास्थाय तं दिव्यं निर्जगाम गिरिव्रजात् ॥ २-२५-२५ (१२३४१)
यः स सोदर्यवान्नाम द्वियोधी कृष्णसारथिः।
अभ्यासघाती सन्दृश्यो दुर्जयः सर्वराजभिः ॥ २-२५-२६ (१२३४२)
भीमार्जुनाभ्यां योधाभ्यामास्थितः कृष्णसारथिः।
शुशुभे रथवर्योऽसौ दुर्जयः सर्वधन्विभिः ॥ २-२५-२७ (१२३४३)
शक्रविष्णू हि सङ्ग्रामे चेरतुस्तारकामये।
रथेन तेन वै कृष्ण उपारुह्य ययौ तदा ॥ २-२५-२८ (१२३४४)
गएवमेतौ महाबाहू तदा दुष्करकारिणौ।
कृष्णप्रणीतौ लोकेऽस्मिन्नथे को द्रष्टुमर्हति ॥ २-२५-२९ (१२३४५)
इत्यवोचन्व्रजन्तं तं जरासन्धपुरालयाः।
वासुदेवं नरश्रेष्ठं युक्तं वातजवैर्हयैः'॥ २-२५-३० (१२३४६)
तप्तचामीकराभेण किङ्किणीजालमालिना।
मेघनिर्घोषनादेन जैत्रेणामित्रघातिना ॥ २-२५-३१ (१२३४७)
येन शक्रो दानवानां जघान नवतीर्नव।
तं प्राप्य समहृष्यन्त रथं ते पुरुषर्षभाः ॥ २-२५-३२ (१२३४८)
ततः कृष्णं महाबाहुं भ्रातृभ्यां सहितं तदा।
रथस्थं मागधा दृष्ट्वा समपद्यन्त विस्मिताः ॥ २-२५-३३ (१२३४९)
हयैर्दिव्यैः समायुक्तो रथो वायुसमो जवे।
अधिष्ठितः स शुशुभे कृष्णेनातीव भारत ॥ २-२५-३४ (१२३५०)
असङ्गो देवविहितस्तस्मिन्रथवरे ध्वजः।
योजनाद्ददृशे श्रीमानिन्द्रायुधसमप्रभः ॥ २-२५-३५ (१२३५१)
चिन्तयामास कृष्णोऽथ गरुत्मन्तं स चाभ्ययात्।
क्षणे तस्मिन्स तेनासीच्चैत्यवृक्ष इवोत्थितः ॥ २-२५-३६ (१२३५२)

व्यादितास्यैर्महानादैः सह भूतैर्ध्वजालयैः।
तस्मिन्रथवरे तस्थौ गुरुत्मान्पन्नगाशनः ॥ २-२५-३७ (१२३५३)
दुर्निरीक्ष्यो हि भूतानां तेजसाऽऽभ्याधिकं बभौ।
आदित्य इव मध्याह्ने सहस्रकिरणावृतः ॥ २-२५-३८ (१२३५४)
न सज्जति वृक्षेषु शस्त्रैश्चापि न रिष्यते।
दिव्यो ध्वजवरो राजन्दृश्यते चेह मानुषैः ॥ २-२५-३९ (१२३५५)
तमास्थाय रथं दिव्यं पर्जन्यसमनिः स्वनम्।
निर्ययौ पुरुषव्याघ्रः पाण्डवाभ्यां सहाच्युतः ॥ २-२५-४० (१२३५६)
यं लेभे वासवाद्राजा वसुस्तस्माद्बृहद्रथः।
बृहद्रथात्क्रमेणैव प्राप्तो बार्हद्रथो रथम् ॥ २-२५-४१ (१२३५७)
स निर्याय महाबाहुः पुण्डरीकेक्षणस्ततः।
गिरिव्रजाद्बहिस्तस्थौ समदेशे महायशाः ॥ २-२५-४२ (१२३५८)
तत्रैनं नागराः सर्वे सत्कारेणाभ्ययुस्तदा।
ब्राह्मणप्रमुखा राजन्विधिदृष्टेन कर्मणा ॥ २-२५-४३ (१२३५९)
बन्धनाद्विप्रमुक्ताश्च राजानो मधुसूदनम्।
पूजयामासुरूचुश्च स्तुतिपूर्वमिदं वचः ॥ २-२५-४४ (१२३६०)
नैतच्चित्रं महाबाहो त्वयि देवकिनन्दने।
भीमार्जुनबलोपेते धर्मस्य प्रतिपालनम् ॥ २-२५-४५ (१२३६१)
जरासन्धह्रदे घोरे दुःखपङ्के निमज्जताम्।
राज्ञां समभ्युद्धरमं यदिदं कृतमद्य वै ॥ २-२५-४६ (१२३६२)
विष्णो समवसन्नानां गिरिदुर्गे सुदारुणे।
दिष्ट्या मोक्षाद्यशो दीप्तमाप्तं ते यदुनन्दन ॥ २-२५-४७ (१२३६३)
किं कर्मः पुरुषव्याघ्र शाधि नः प्रणतिस्थितान्।
कृतमित्येव तद्विद्धि नृपैर्ययद्यपि दुष्करम् ॥ २-२५-४८ (१२३६४)
वैशम्पायन उवाच ॥ २-२५-४९क्ष् (१४२८)
तानुवाच हृष्पीकेशः समाश्वास्य महामनाः।
यिधिष्ठिरो राजसूयं क्रतुमाहर्तुमिच्छति ॥ २-२५-४९ (१२३६५)
तस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः।
सर्वैर्भवद्भिर्विज्ञाय साहाय्यं क्रियतामिति ॥ २-२५-५० (१२३६६)
ततः सुप्रीतमनसस्ते नृपा नृपसत्तम।
तथेत्येवाब्रुवन्सर्वे प्रतिगृह्यास्य तां गिरम् ॥ २-२५-५१ (१२३६७)
रत्नभाजं च दाशार्हं चक्रुस्ते पृथिवीश्वराः।
कृच्छ्राञ्जग्राह गोविन्दस्तेषां तदनुकम्पया ॥ २-२५-५२ (१२३६८)
जरासन्धात्मजश्चैव सहदेवो महामनाः।
निर्ययौ सजनामात्यः पुरस्कृत्य पुरोहितम् ॥ २-२५-५३ (१२३६९)
स नीचैः प्रणतो भूत्वा बहुरत्नपुरोगमः।

सहदेवो नृणां देवं वासुदेवमुपस्थितः ॥ २-२५-५४ (१२३७०)
भयार्ताय ततस्तस्मै कृष्णो दत्त्वाऽभयं तदा।
आददेऽस्य महार्हाणि रत्नानि पुरुषोत्तमः ॥ २-२५-५५ (१२३७१)
ग्सददेव उवाच। २-२५-५६क्ष् (१४२९)
यत्कृतं पुरुषव्याघ्र मम पित्रा जनार्दन।
तत्ते हृदि महाबाहो न कार्यं पुरुषोत्तम ॥ २-२५-५६ (१२३७२)
त्वां प्रपन्नोऽस्मि गोविन्द प्रासदं कुरु मे प्रभो।
पितुरिच्छामि संस्कारं कर्तुं देवकिनन्दन ॥ २-२५-५७ (१२३७३)
त्वत्तोऽभ्यनुज्ञां सम्प्राप्य भीमसेनात्तथार्जुनात्।
निर्भयो विचरिष्यामि यथाकामं यथासुखम् ॥ २-२५-५८ (१२३७४)
वैशम्पायन उवाच। २-२५-५९क्ष् (१४३०)
एवं विज्ञाप्यमानस्य सहदेवस्य मारिष।
प्रहृष्टो देवकीपुत्रः पाण्डवै च महारथौ ॥ २-२५-५९ (१२३७५)
क्रियतां संस्क्रिया राजन्पितुस्त इति चाब्रुवन्।
तच्छ्रुत्वा वासुदेवस्य पार्थयोश्च स मागधः ॥ २-२५-६० (१२३७६)
प्रविश्य नगरं तूर्णं सह मन्त्रिभिरप्युत।
चितां चन्दनकाष्ठैश्च कालेयसरलैस्तथा ॥ २-२५-६१ (१२३७७)
कालागरुसुनगन्धैश्च तैलैश्च विविधैरपि।
घृतधाराशतैश्चैव सुमनोभिश्च भारत ॥ २-२५-६२ (१२३७८)
समन्तादेव कीर्यन्तोऽदहन्त मगधाधिपम्।
उदकं तस्य चक्रेऽथ सहदेवः सहानुजः ॥ २-२५-६३ (१२३७९)
कृत्वा पितुः स्वर्गगतिं निर्ययौ यत्र केशवः।
पाण्डवौ च महाभागौ भीमसेनार्जुनावुभौ ॥ २-२५-६४ (१२३८०)
स प्रह्वः प्राञ्जलिर्भूत्वा व्यज्ञापयत माधवम्। २-२५-६५ (१२३८१)
सहदेव उवाच।
इमे रत्नानि भूरिणी गोजाविमहिषादयः ॥ २-२५-६५क्ष् (१४३१)
हस्तिनोऽश्वाश्च गोविन्द वासांसि विविधानि च।
दीयतां धर्मराजाय यथा वा मन्यते भवान् ॥ २-२५-६६ (१२३८२)
वैशम्पायन उवाच। २-२५-६७क्ष् (१४३२)
भयार्ताय ततस्तस्मै कृत्वा कृष्णोऽभयं तदा।
अभ्यषिञ्चत राजानं सहदेवं जनार्दनः ॥ २-२५-६७ (१२३८३)
मागधानां महीपालं जरासन्धात्मजं तदा।
आददे च महार्हाणि रत्नानि पुरुषोत्तमः ॥ २-२५-६८ (१२३८४)
गत्वैकत्वं स कृष्णेन पार्थाभ्यां चापि सत्कृतः।
विवेश मतिमान्राजा पुनर्बार्हद्रथं पुरम् ॥ २-२५-६९ (१२३८५)
पार्थाभायं सहितः कृष्णः सर्वैश्च वसुधाधिपैः।

यथावयः समागम्य विससर्ज नराधिपान् ॥ २-२५-७० (१२३८६)
विसृज्य सर्वान्नृपतीन्राजसूये महात्मभिः।
आगन्तव्यं भवद्भिश्च धर्मराजप्रियेप्सुभिः। २-२५-७१ (१२३८७)
एवमुक्ता माधवेन सर्वे ते वसुधाधिपाः।
एवमस्त्विति चाप्युक्त्वा समेताः परया मुदा ॥ २-२५-७२ (१२३८८)
भीमार्जुनहृषीकेशैः प्रहृष्टाः प्रययुस्तदा।
रत्नान्यादाय भूरीणी ज्वलन्तो रिपुसूदनाः'॥ २-२५-७३ (१२३८९)
कृष्णस्तु सह पार्थाभ्यां श्रिया परमया युतः।
रत्नान्यादाय भूरिणी प्रययौ पुरुषर्षभः ॥ २-२५-७४ (१२३९०)
इन्द्रप्रस्थमुपागम्य पाण्डवाभ्यां सहाच्युतः।
समेत्य धर्मराजानं प्रीयमाणोऽभ्यभाषत ॥ २-२५-७५ (१२३९१)
दिष्ट्या भीमेन बलवाञ्जरासन्धो निपातितः।
राजानो मोक्षितास्चेमे बन्धनान्नृपसत्तम ॥ २-२५-७६ (१२३९२)
दिष्ट्या कुशलिनौ चेमौ भीमसेनधनञ्जयौ।
पुनः स्वनगरं प्राप्तावक्षताविति भारत ॥ २-२५-७७ (१२३९३)
ततो युधिष्ठिरः कृष्णं पूजयित्वा यथार्हतः।
भीमसेनार्जुनौ चैव प्रहृष्टः परिषस्वजे ॥ २-२५-७८ (१२३९४)
ततः क्षीणे जरासन्धे भ्रातृभ्यां विहितं जयम्।
अजातशत्रुरासाद्य मुमुदे भ्रातृभिः सह ॥ २-२५-७९ (१२३९५)
ग्हृष्टश्च धर्मराड्वाक्यं जनार्दनमभाषत।
त्वां प्राप्य पुरुषव्याघ्र भीमसेनेन पातितः ॥ २-२५-८० (१२३९६)
मागधोऽसौ बलोन्मत्तो जरासन्धः प्रतापवान्।
राजसूयं क्रतुश्रेष्ठं प्राप्स्यामि विगतज्वरः ॥ २-२५-८१ (१२३९७)
त्वद्बुद्धिबलमाश्रित्य यागार्होऽस्मि जनार्दन।
पीतं पृथिव्याः क्रुद्धेन यशस्ते पुरुषोत्तम ॥ २-२५-८२ (१२३९८)
जरासन्धवधेनैव प्राप्तास्ते विपुलाः श्रियः ॥ २-२५-८३ (१२३९९)
वैशम्पायन उवाच।
एवं सम्भाष्य कौन्तेयः प्रादाद्रथवरं प्रभोः ॥ २-२५-८३क्ष् (१४३३)
प्रतिगृह्य तु गोविन्दो जरासन्धस्य तं रथम् ॥ २-२५-८४ (१२४००)
प्रहृष्टस्तस्य मुमुदे फल्गुनेन जनार्दनः।
प्रीतिमानभवद्राजन्धर्मराजपुरस्कृतः'॥ २-२५-८५ (१२४०१)
यथावयः समागम्य भ्रातृभिः सह पाण्डवः।
सत्कृत्य पूजयित्वा च विससर्ज नराधिपान् ॥ २-२५-८६ (१२४०२)
युधिष्ठिराभ्यनुज्ञातास्ते नृपा हृष्टमानसाः।
जग्मुः स्वदेशांस्त्वरिता यानैरुच्चावचैस्ततः ॥ २-२५-८७ (१२४०३)
एवं पुरुषशार्दूलो महाबुद्धिर्जनार्दनः।

पाण्डवैर्घातयामास जरासन्धमरिं तदा ॥ २-२५-८८ (१२४०४)
घातयित्वा जरासन्धं बुद्धिपूर्वमरिन्दमः।
धर्मराजमनुज्ञाप्य पृथां कृष्णां च भारत ॥ २-२५-८९ (१२४०५)
सुभद्रां भीमसेनं च फाल्गुनं यमजौ तथा।
धौम्यमामन्त्रयित्वा च प्रययौ स्वां पुरीं प्रति ॥ २-२५-९० (१२४०६)
ग्पाण्डवैरनुधावद्भिर्युधिष्ठिरपुरोगमैः।
हर्षेण महता युक्तः प्राप्य चानुत्तमं यशः।
जगाम हृष्टः कृष्णस्तु पुनर्द्वारवतीं पुरीम्'॥ २-२५-९१ (१२४०७)
तेनैव रथमुख्येन मनसस्तुल्यगामिना।
धर्मराजविसृष्टेन दिव्येनानादयन्दिशः ॥ २-२५-९२ (१२४०८)
ततो युधिष्ठिरमुखाः पाण्डवा भरतर्षभ।
प्रदक्षिणमकुर्वन्त कृष्णमक्लिष्टकारिणम् ॥ २-२५-९३ (१२४०९)
ततो गते भगवति कृष्णे देवकिनन्दने।
जयं लब्ध्वा सुविपुलं राज्ञां दत्त्वाऽभयं तदा ॥ २-२५-९४ (१२४१०)
संवर्धितं यशो भूयः कर्मणा तेन भारत।
द्रौपद्याः पाण्डवा राजन्परां प्रीतिमवर्धयन् ॥ २-२५-९५ (१२४११)
तस्मिन्काले तु यद्युक्तं धर्मकामार्थसंहितम्।
तद्राजा धर्मतश्चक्रे प्रजापालनकीर्तनम् ॥ ॥ २-२५-९६ (१२४१२)

इति श्रीमन्महाभारते सभापर्वणि जरासन्धवधपर्वणि पञ्चविंशोऽध्यायः ॥ २५.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-२५-५ अवाप्यते प्राप्तः ॥
२-२५-८ एवमुक्तस्तदा भीभो जरासन्धमिति झ ।पाठः ॥
२-२५-१५ नलं इरिणनामकं तृणविशेषम् ॥
२-२५-२२ कुलद्वारि गृहद्वारि ॥
२-२५-३५ असङ्गो रथस्पर्शहीनः ॥

सभापर्व - अध्याय ०२६
॥ श्रीः ॥
२.२६. अध्यायः २६

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिराज्ञया दिग्विजयार्थं निर्गतानामर्जुनादीनां सङ्क्षेपेण दिग्विजयक थनम् ॥

वैशम्पायन उवाच।

ग्ऋषेस्तद्वचनं स्मृत्वा निशश्वास युधिष्ठिरः।
धर्म धर्मभृतां श्रेष्ठः कर्तुमिच्छन्परन्तपः। २-२६-१ (१२४१३)
तस्येङ्गितज्ञो बीभत्सुः सर्वशस्त्रभृतां वरः।
संविवर्तयिषुः कामं पावकात्पाकशासनिः'॥ २-२६-२ (१२४१४)
प्राप्तं प्राप्य धनुः श्रेष्ठमक्षय्यौ च महेषुधी।
रथं ध्वजं सभां चैव युधिष्ठिरमभाषत ॥ २-२६-३ (१२४१५)
अर्जुन उवाच। २-२६-४क्ष् (१४३४)
धनुरस्त्रं शरा वीर्यं पक्षो भूमिर्यशो बलम्।
प्राप्तमेतन्मया राजन्दुष्प्रापं यदभीप्सितम् ॥ २-२६-४ (१२४१६)
तस्य कृत्यमहं मन्ये कोशस्य परिवर्धनम्।
करमाहारयिष्यामि राज्ञः सर्वान्नृपोत्तम ॥ २-२६-५ (१२४१७)
विजयाय प्रयास्यामि दिशं धनदपालिताम्।
तिथावथ मुहूर्ते च नक्षत्रे चाभिपूजिते ॥ २-२६-६ (१२४१८)
वैशम्पायन उवाच। २-२६-७क्ष् (१४३५)
धनञ्जयवचः श्रुत्वा धर्मराजो युधिष्ठिरः
स्निग्धगम्भीरनादिन्यां तं गिरा प्रत्यभाषत ॥ २-२६-७ (१२४१९)
स्वस्ति वाच्यार्हतो विप्रान्प्रयाहि भरतर्षभ।
दुर्हृदामप्रहर्षाय सुहृदां नन्दनाय च ॥ २-२६-८ (१२४२०)
विजयस्ते ध्रुवं पार्थ प्रियं काममवाप्स्यसि।
इत्युक्तः प्रययौ पार्थः सैन्येन महता वृतः ॥ २-२६-९ (१२४२१)
अग्निदत्तेन दिव्येन रथेनाद्भुतकर्मणा।
तथैव भीमसेनोऽपि यमौ च पुरुषर्षभौ ॥ २-२६-१० (१२४२२)
ससैन्याः प्रययुः सर्वे धर्मराजेन पूजिताः।
दिशं धनपतेरिष्टामजयत्पाकशासनिः ॥ २-२६-११ (१२४२३)
भीमसेनस्तथा प्राचीं सहदेवस्तु दक्षिणाम्।
प्रतीचीं नकुलो राजन्दिशं व्यजयतास्त्रवित् ॥ २-२६-१२ (१२४२४)
खाण्डवप्रस्थमध्यस्थो धर्मराजो युधिष्ठिरः।
आसीत्परमया लक्ष्म्या सुहृद्गणवृतः प्रभुः ॥ ॥ २-२६-१३ (१२४२५)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि षड्विंशोऽध्यायः ॥ २६.।

२-२६-१३ खाण्डवप्रस्थं खाण्डवदाहेन ख्यापितस्थानम् ॥
१३.।

सभापर्व - अध्याय ०२७
॥ श्रीः ॥
२.२७. अध्यायः २७

Mahabharata - Sabha Parva - Chapter Topics
अर्जुनदिग्वजये भगदत्तादिजयः ॥१.।

Mahabharata - Sabha Parva - Chapter Text

जनमेजय उवाच ॥

दिशामभिजयं ब्रह्मन्विस्तरेणानुकीर्तय।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ २-२७-१ (१२४२६)
वैशम्पायन उवाच। २-२७-२क्ष् (१४३६)
धनञ्जयस्य वक्ष्यामि विजयं पूर्वमेव ते।
यौगपद्येन पार्थैर्हि निर्जितेयं वसुन्धरा ॥ २-२७-२ (१२४२७)
ग्अवाप्य राजा राज्यार्धं कुन्तीपुत्रो युधिष्ठिरः।
महत्त्वे राजशब्दस्य मनश्चक्रे महामनाः ॥ २-२७-३ (१२४२८)
तदा क्षात्रं विदित्वाऽस्य पृथिवीविजयं प्रति।
अमर्षात्पार्थिवेन्द्राणां तं समेयाय वारयत् ॥ २-२७-४ (१२४२९)
तत्समेत्य भुवः क्षात्रं रथनागाश्वपत्तिमत्।
अभ्ययात्पार्थिवं जिष्णुं मोघं कर्तुं जनाधिप ॥ २-२७-५ (१२४३०)
तत्पार्थः पार्थिवं क्षात्रं युयुत्सुं परमाहवे।
प्रत्युद्ययौ महाबाहुस्तरसा पाकशासनिः ॥ २-२७-६ (१२४३१)
तद्व्यग्रं पार्थिवं क्षात्रं पार्थेनाक्लिष्टकर्मणा।
वायुनेव घनानीकं तूलीभूतं ययौ दिशः ॥ २-२७-७ (१२४३२)
तज्जित्वा पार्थिवं क्षात्रं समरे परवीरहा।
ययौ तदा वशे कर्तुमुदीचीं पाण्डुनन्दनः'॥ २-२७-८ (१२४३३)
पूर्वं कुलिङ्गविषये वशे चक्रे महीपतिम्।
धनञ्जयो महाबाहुर्नातितीव्रेण कर्मणा ॥ २-२७-९ (१२४३४)

ग्तेनैव सहितः प्रायाज्जिष्णुः साल्वपुरं प्रति।
स साल्वपुरमासाद्य साल्वराजं धनञ्जयटः ॥ २-२७-१० (१२४३५)
विक्रमेणोग्रधन्वानं वशे चक्रे महामनाः।
तं पार्थः सहसा जित्वा द्युमत्सेनं महीश्वरम् ॥ २-२७-११ (१२४३६)
कृत्वा स सैनिकं प्रायात्कटदेशमरिन्दमः।
तत्र पार्थो रणे जिष्णुः सुनाभं वसुधाधिपम् ॥ २-२७-१२ (१२४३७)
विक्रमेण वशे कृत्वा कृतवाननुसैनिकम्।
एतेन सहितो राजन्सव्यसाची परन्तपः'॥ २-२७-१३ (१२४३८)
विजिग्ये शाकलद्वीपे प्रतिविन्ध्यं च पार्थिवम्।
शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः ॥ २-२७-१४ (१२४३९)
अर्जुनस्य च सैन्यस्थैर्विग्रहस्तुमुलोऽभवत्।
तान्सर्वानजयत्पार्तो धर्मराजप्रियेप्सया ॥ २-२७-१५ (१२४४०)
तैरेव सहितः सर्वैः प्रग्ज्योतिषमुपाद्रवत् ॥ २-२७-१६ (१२४४१)
तत्र राजा महानासीद्भगदत्तो विशाम्पते।
तेनासीत्सुमहद्युद्धं पाण्डवस्य महात्मनः ॥ २-२७-१७ (१२४४२)
स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत्।
अन्यैश्च बहुभिर्योधैः सागरानुपवासिभिः ॥ २-२७-१८ (१२४४३)
ततः स दिवसानष्टौ योधयित्वा धनञ्जयम्।
प्रहसन्नब्रवीद्राजा सङ्ग्रामविगतक्रमम् ॥ २-२७-१९ (१२४४४)
उपपन्नं महाबाहो त्वयि कौरवनन्दन।
पाकशासनदायादे वीर्यमाहवशोभिनि ॥ २-२७-२० (१२४४५)
अहं सखा महेन्द्रस्य शक्रादनवरो रणे।
न शक्ष्यामि च ते तात स्थातुं प्रमुखतो युधि ॥ २-२७-२१ (१२४४६)
त्वमीप्सितं पाण्डवेयं ब्रूहि किं करवाणि ते।
यद्वक्ष्यसि महाबाहो तत्करिष्यामि पुत्रक ॥ २-२७-२२ (१२४४७)
अर्जुन उवाच ॥ २-२७-२३क्ष् (१४३७)
कुरूणामृषभो राजा धर्मपुत्रो युधिष्ठिरः।
धर्मज्ञः सत्यसन्धश्च यज्वा विपुलदक्षिणः ॥ २-२७-२३ (१२४४८)
तस्य पार्थिवतामीप्से करस्तस्मै प्रदीयताम्।
भवान्पितृसखश्चैव प्रीयमाणो मयापि च।
ततो नाज्ञापयामि त्वां प्रीतिपूर्वं प्रदीयताम् ॥ २-२७-२४ (१२४४९)
भगदत्त उवाच। २-२७-२५क्ष् (१४३८)
कुन्तीमातर्यथा मे त्वं तथा राजा युधिष्ठिरः।
सर्वमेतत्करिष्यामि किं चान्यत्करवाणि ते ॥ ॥ २-२७-२५ (१२४५०)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि सप्तविंशोऽध्यायः ॥ २७.।

सभापर्व - अध्याय ०२८
॥ श्रीः ॥
२.२८. अध्यायः २८

Mahabharata - Sabha Parva - Chapter Topics
अर्जुनेन उत्तरदिग्विजये नानादेशजयः ॥१.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

एवमुक्तः प्रत्युवाच भगदत्तं धनञ्जयः।
अनेनैव कृतं सर्वं भविष्यत्यनुजानता ॥ २-२८-१ (१२४५१)
तं विजित्य महाबाहुः कुन्तीपुत्रो धनञ्जयः।
प्रययावुत्तरां तस्माद्दिशं धनदपालिताम् ॥ २-२८-२ (१२४५२)
अन्तर्गिरिं च कौन्तेयस्तथैव च बहिर्गिरिम्।
तथैवोपगिरं चैव विजिग्ये पुरुषर्षभः ॥ २-२८-३ (१२४५३)
विजित्य पर्वतान्सर्वान्ये च तत्र नराधिपाः।
तान्वशे स्थापयित्वा स धनान्यादाय सर्वशः ॥ २-२८-४ (१२४५४)
तैरेव सहितः सर्वैरनुरज्य च तान्नृपान्।
उलूकवासिनं राजन्बृहन्तमुपजग्मिवान् ॥ २-२८-५ (१२४५५)
मृदङ्गवरनादेन रथनेमिस्वनेन च।
हस्तिनां च निनादेन कम्पयन्वसुधामिमाम् ॥ २-२८-६ (१२४५६)
ततो बृहन्तस्त्वरितो बलेन चतुरङ्गिणा।
निष्क्रम्य नगरात्तस्माद्योधयामास फाल्गुनम् ॥ २-२८-७ (१२४५७)
सुमहान्सन्निपातोऽभूद्धनञ्जयबृहन्तयोः।
न शशाक बृहन्तस्तु सोढुं पाण्डवविक्रमम् ॥ २-२८-८ (१२४५८)
सोऽविषह्यतमं मत्वा कौन्तेयं पर्वतेश्वरः।
उपावर्तत दुर्धर्षो रत्नान्यादाय सर्वशः ॥ २-२८-९ (१२४५९)
स तद्राज्यमवस्थाप्य उलूकसहितो ययौ।
सेनाबिन्दुमथो राजन्राज्यादाशु समाक्षिपत् ॥ २-२८-१० (१२४६०)
मोदापुरं वामवेदं सुदामानं सुसङ्कुलम्।
उलूकानुत्तरांश्चैव तांश्च राज्ञः समानयत् ॥ २-२८-११ (१२४६१)

तत्रस्थः पुरुषैरेव धर्मराजस्य शासनात्।
किरीटी जितवान्राजन्देशान्पञ्चगणांस्ततः ॥ २-२८-१२ (१२४६२)
स देवप्रस्थमासाद्य सेनाबिन्दोः पुरं प्रति।
बलेन चतुरङ्गेण निवेशमकरोत्प्रभुः ॥ २-२८-१३ (१२४६३)
स तैः परिवृतः सर्वैर्विष्वगश्वं नराधिपम् ॥
अभ्यगच्छन्महातेजाः पौरवं पुरुषर्षभ ॥ २-२८-१४ (१२४६४)
विजित्य चाहवे शूरान्पार्वतीयान्महारथान्।
जिगाय सेनया राजन्पुरं पौरवरक्षितम् ॥ २-२८-१५ (१२४६५)
पौरवं युधि निर्जित्य दस्यून्पर्वतवासिनः।
गणानुत्सवसङ्केतानजयत्सप्त पाण्डवः ॥ २-२८-१६ (१२४६६)
ततः काश्मीरकान्वीरान्क्षत्रियान्क्षत्रियर्षभः।
व्यजयल्लोहितं चैव मण्डलैर्दशभिः सह ॥ २-२८-१७ (१२४६७)
ततस्त्रिगर्ताः कौन्तेयं दार्वाः कोकनदास्तथा।
क्षत्रिया बहवो राजन्नुपावर्तन्त सर्वशः ॥ २-२८-१८ (१२४६८)
अभिसारीं ततो रम्यां विजिग्ये कुरुनन्दनः।
उरगावासिनं रम्यं रोचमानं रणेऽजयत् ॥ २-२८-१९ (१२४६९)
ततः सिंहपुरं रम्यं चित्रायुधसुरक्षितम्।
प्राधमद्बलमास्थाय पाकशासनिराहवे ॥ २-२८-२० (१२४७०)
ततः सुह्मांश्च चोलांश्च किरीटी पाण्डवर्षभः।
सहितः सर्वसैन्येन प्रामथत्कुरुनन्दनः ॥ २-२८-२१ (१२४७१)
ततः परमविक्रान्तो बाह्लीकान्पाकशासनिः।
महता परिमर्देन वशे चक्रे दुरासदान् ॥ २-२८-२२ (१२४७२)
गृहीत्वा तु बलं सारं फल्गुनः पाण्डुनन्दनः।
दरदान्सहकाम्भोजैरजयत्पाकशासनिः ॥ २-२८-२३ (१२४७३)
प्रागुत्तरं दिशं ये च वसन्त्याश्रित्य दस्यवः।
निवसन्ति वने ये च तान्सर्वानजयत्प्रभुः ॥ २-२८-२४ (१२४७४)
लोहान्परमकाम्भोजानृषिकानुत्तरानपि।
सहितांस्तान्महाराज व्यजयत्पाकशासनिः ॥ २-२८-२५ (१२४७५)
ऋषिकेष्वपि सङ्ग्रामे बभूवातिभयङ्करः।
तारकामयसङ्काशः परस्त्वृषिकपार्थयोः ॥ २-२८-२६ (१२४७६)
स विजित्य ततो राजन्नृषिकान्रणमूर्धनि।
शुकोदरसमांस्तत्र हयानष्टौ समानयत् ॥ २-२८-२७ (१२४७७)
मयूरसदृशानन्यानुत्तरानपरानपि।
जवनानाशुगांश्चैव करार्थं समुपानयत् ॥ २-२८-२८ (१२४७८)
स विनिर्जित्य सङ्ग्रामे हिमवन्तं सनिष्कुटम्।
श्वेतपर्वतमासाद्य न्यविशत्पुरुषर्षभः ॥ ॥ २-२८-२९ (१२४७९)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि अष्टाविंशोध्यायः ॥ २८.।

सभापर्व - अध्याय ०२९
॥ श्रीः ॥
२.२९. अध्यायः २९

Mahabharata - Sabha Parva - Chapter Topics
अर्जुनेन उत्तरदिग्विजये किम्पुरुषादिखण्डजयः ॥ १.। अर्जुनस्य खाण्डवप्रस्थं प्रति प्रत्यागमनम् ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन इवाच ॥

स श्वेतपर्वतं वीरः समतिक्रम्य वीर्यवान्।
देशं किम्पुरुषावासं द्रुमपुत्रेण रक्षितम् ॥ २-२९-१ (१२४८०)
महता सन्निपातेन क्षत्रियान्तकरेण ह।
अजयत्पाण्डवश्रेष्ठः करे चैनं न्यवेशयत् ॥ २-२९-२ (१२४८१)
तं जित्वा हाटकं नाम देशं गुह्यकरक्षितम्।
पाकशासनिरव्यग्रः सहसैन्यः समासदत् ॥ २-२९-३ (१२४८२)
तांस्तु सान्त्वेन निर्जित्य मानसं सर उत्तमम्।
ऋषिकुल्यास्तथा सर्वा ददर्श कुरुनन्दनः ॥ २-२९-४ (१२४८३)
सरो मानसमासाद्य हाटकानभितः प्रभुः।
गन्धर्वरक्षितं देशमजयत्पाण्डवस्ततः ॥ २-२९-५ (१२४८४)
तत्र तित्तिरिकल्माषान्मण्डूकाख्यान्हयोत्तमान्।
लेभे स करसमत्यन्तं गन्धर्वनगरात्तदा ॥ २-२९-६ (१२४८५)
ग्हेमकूटमथासाद्य न्यवसत्फल्गुनस्तदा।
तं हेमकूटं राजेन्द्र समतिक्रम्य पाण्डवः ॥ २-२९-७ (१२४८६)
हरिवर्षं विवेशाथ सैन्येन महता वृतः।
तत्र पार्थो ददर्शाथ बहूनिह मनोरमान् ॥ २-२९-८ (१२४८७)
नगरान्सवनांश्चैव नदीश्च विमलोदकाः।
पुरुषान्देवकल्पांश्च नारीश्च प्रियदर्शनाः ॥ २-२९-९ (१२४८८)
तान्सर्वास्तत्र दृष्ट्वाऽथ मुदा युक्तो धनञ्जयटः।
वशे चक्रे स रत्नानि लेभे च सुबहूनि च ॥ २-२९-१० (१२४८९)

ततो निषधमासाद्य गिरिस्थानजयत्प्रभुः।
अथ राजन्नतिक्रम्य निषधं शैलमायतम् ॥ २-२९-११ (१२४९०)
विवेश मध्यमं वर्षं पार्थो दिव्यमिलावृतम्।
तत्र दिव्योपमान्दिव्यान्पुरुषान्देवदर्शनान् ॥ २-२९-१२ (१२४९१)
अदृष्टपूर्वान्सुभगान्स ददर्श धनञ्जयः।
सदनानि च शुभ्राणि नारीश्चाप्सरसंनिभाः ॥ २-२९-१३ (१२४९२)
दृष्ट्वा तानजयद्रम्यान्स तैश्च ददृशे तदा।
जित्वा च तान्महाभागान्करे च विनिवेश्य च ॥ २-२९-१४ (१२४९३)
रत्नान्यादाय दिव्यानि भूषणान्यासनैः सह।
उदीचीमथ राजेन्द्र ययौ पार्थो मुदाऽन्वितः ॥ २-२९-१५ (१२४९४)
स ददर्श ततो मेरुं शिखरीणां प्रभुं महत्।
तं काञ्चनमयं दिव्यं चतुर्वर्णं दुरासदम् ॥ २-२९-१६ (१२४९५)
उन्नतं शतसाहस्रं योजनानां तु सुस्थितम्।
ज्वलन्तमचलं मेरुं तेजोराशिमनुत्तमम् ॥ २-२९-१७ (१२४९६)
आक्षिपन्तं प्रभां भानोः स्वशृङ्गैः काञ्चनोज्ज्वलैः।
काञ्चनाभरणं दिव्यदेवगन्धर्वसेवितम् ॥ २-२९-१८ (१२४९७)
अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः।
व्यालैराचरितं घोरैर्दिव्यौषधिविदीपितम् ॥ २-२९-१९ (१२४९८)
स्वर्गमावृत्य तिष्ठन्तमुच्छ्रायेण महागिरिम्।
अगम्यं मनसाप्यन्यैर्नदीवृक्षसमन्वितम् ॥ २-२९-२० (१२४९९)
नानाविहगसङ्घैश्च नादितं सुमनोहरैः।
तं दृष्टा फल्गुनो मेरुं प्रीतिमानभवत्तदा ॥ २-२९-२१ (१२५००)
मेरोरिलावृतं दिव्यं सर्वतः परिमण्डितम्।
मेरोस्तु दक्षिणे पार्श्वे जम्बूर्नाम वनस्पतिः ॥ २-२९-२२ (१२५०१)
नित्यपुष्पफलोपेवः सिद्धचारणसेवितः।
आस्वर्गमुच्छ्रिता राजंस्तस्य शाखा वनस्पतेः ॥ २-२९-२३ (१२५०२)
यस्य नाम्ना त्विदं द्वीपं जन्बूद्वीपमिति स्मृतम्।
तां च जम्बूं ददर्शाथ सव्यसाची परन्तपः ॥ २-२९-२४ (१२५०३)
तौ दृष्ट्वाऽप्रतिमौ लोके जम्बूं मेरुं च संस्थितौ।
प्रतीमानभवद्राजन्सर्वतः स विलोकयन् ॥ २-२९-२५ (१२५०४)
तत्र लेभे ततो जिष्णुः सिद्धैर्दिव्यैश्च चारणैः।
रत्नानि बहुसाहस्रं दत्तान्याभरणानि च ॥ २-२९-२६ (१२५०५)
वासांसि च महार्हाणि तत्र लब्ध्वाऽर्जुनस्तदा।
आमन्त्रयित्वा तान्सर्वान्यज्ञमुद्दिश्य वै गुरोः ॥ २-२९-२७ (१२५०६)
अथादाय बहून्रत्नान्गमनाययोपचक्रमे।
मेरुं प्रदक्षिणीकृत्य प्रवतप्रवरं प्रभुः ॥ २-२९-२८ (१२५०७)

ययौ जम्बूनदीतीरे नदीं श्रेष्ठां विलोकयन्।
स तां मनोरमां दिव्यां जम्बूस्वादुरसावहाम् ॥ २-२९-२९ (१२५०८)
हैमपक्षिगणैर्जुष्टां सौवर्णजलजाकुलाम्।
हैमपङ्कां हैमजलां सौवर्णोज्ज्वलवालुकाम् ॥ २-२९-३० (१२५०९)
क्वचित्सुपिष्पितैः पूर्णां सौवर्णकुसुमोत्पलैः।
क्वचित्तीररुहैः कीर्णां हैमपुष्पैः सुपुष्पितैः ॥ २-२९-३१ (१२५१०)
तीर्थैश्च रुक्मसोपानैः सर्वतः समलङ्कृताम्।
विमलैर्मणिजालैश्च नृत्तगीतरवैर्युताम् ॥ २-२९-३२ (१२५११)
दीप्तैर्हैमवितानैश्च समन्ताच्छोभितां शुभाम्।
तथाविधां नदीं दृष्ट्वा पार्थस्तां प्रशशंस ह ॥ २-२९-३३ (१२५१२)
अदृष्टपूर्वां राजेन्द्र दृष्ट्वा हर्षमवाप च।
दर्शनीयां नदीतीरे पुरुषान्सुमनोहरान् ॥ २-२९-३४ (१२५१३)
तान्नदीसलिलाहारान्सदारानमरोपमान्।
नित्यं सुखमुदा युक्तान्सर्वालङ्कारशोभितान् ॥ २-२९-३५ (१२५१४)
तेभ्यो बहूनि रत्नानि तदा लेभे धनञ्जयः।
दिव्यजम्बूफलं हैमं भूषणानि च पेशलम् ॥ २-२९-३६ (१२५१५)
लब्ध्वा तान्दुर्लभान्पार्थः प्रतीचीं प्रययौ दिशम्।
नागानां रक्षितं देशमजयच्च पुनस्ततः ॥ २-२९-३७ (१२५१६)
ततो गत्वा महाराज वारुणीं पाकशासनिः।
गन्धमादनमासाद्य ततस्तानजयत्प्रभुः ॥ २-२९-३८ (१२५१७)
तं गन्धमादनं राजन्नतिक्रम्य ततोऽर्जुनः।
केतुमालं ददर्शाथ वर्षं रत्नसमन्वितम् ॥ २-२९-३९ (१२५१८)
सेवितं देवकल्पैश्च नारीभिः प्रियदर्शनैः।
तं जित्वा चार्जुनो राजन्करे च विनिवेश्य च ॥ २-२९-४० (१२५१९)
आहृत्य तत्र रत्नानि दुर्लभानि तथार्जुनः।
पुनश्च परिवृत्याथ माध्यं देशमिलावृतम् ॥ २-२९-४१ (१२५२०)
गत्वा प्राचीं दिशं राजन्सव्यसाची धनञ्जयः।
मेरुमन्दरयोर्मध्ये शैलोदामभितो नदीम् ॥ २-२९-४२ (१२५२१)
ये ते कीचकवेणूनां छायां रम्यामुपासते।
कषान्झषांश्च नद्यौ तान्प्रघसान्दीप्तवेणिपान् ॥ २-२९-४३ (१२५२२)
पशुपांश्च कुलिन्दांश्च तङ्कणान्परतङ्कणान्।
एतान्समस्ताञ्जित्वा च करे च विनिवेश्य च ॥ २-२९-४४ (१२५२३)
रत्नान्यादाय सर्वेभ्यो माल्यवन्तं ततो ययौ।
तं माल्यवन्तं शैलेन्द्रं समतिक्रम्य पाण्डवः ॥ २-२९-४५ (१२५२४)
भद्राश्वं प्रविवेशाथ वर्षं स्वर्गोपमं शुचिम्।
तत्र देवोपमान्दिव्यान्पुरुषाञ्शुभसंयुतान् ॥ २-२९-४६ (१२५२५)

जित्वा तान्स्ववशे कृत्वा करे च विनिवेश्य च।
आहृत्य सर्वतो रत्नान्यसङ्ख्यानि ततस्ततः ॥ २-२९-४७ (१२५२६)
नीलं नाम गिरिं गत्वा तत्रस्थानजयत्प्रभुः।
ततो जिष्णुरतिक्रम्य पर्वतं नीलमायतम् ॥ २-२९-४८ (१२५२७)
विवेश रम्यकं वर्षं सङ्कीर्णं मिथुनैः शुभैः।
तं देशमथ जित्वा स करे च विनिवेश्य च ॥ २-२९-४९ (१२५२८)
अजयच्चापि बीभत्सुर्देशं गुह्यकरक्षितम्।
तत्र लेभे च राजेन्द्र सौवर्णान्मृगपक्षिणः ॥ २-२९-५० (१२५२९)
अगृह्णाद्यज्ञभूत्यर्थं रमणीयान्मनोहरान्।
अन्यांश्च लब्ध्वा रत्नानि पाण्डवोऽथ महाबलः ॥ २-२९-५१ (१२५३०)
गन्धर्वरक्षितं देशमजयत्सगणं तदा।
तत्र रत्नानि दिव्यानि लब्ध्वा राजन्नथार्जुनः ॥ २-२९-५२ (१२५३१)
वर्षं हिरण्वतं नाम विवेशाथ महीपते।
स तु देशेषु रम्येषु गन्तुं तत्रोपचक्रमे ॥ २-२९-५३ (१२५३२)
मध्ये प्रासादवृन्देषु नक्षत्राणां शशी यथा।
महापथेषु राजेन्द्र सर्वतो यान्तमर्जुनम् ॥ २-२९-५४ (१२५३३)
प्रासादवरशृङ्गस्थाः परया वीर्यशोभया।
ददृशुस्तं स्त्रियः सर्वाः पार्थमात्मयशस्करम् ॥ २-२९-५५ (१२५३४)
तं कलापधरं शूरं सरथं सधनुः करम्।
सवर्मं सकिरीटं वै संनद्धं सपरिच्छदम् ॥ २-२९-५६ (१२५३५)
सुकुमारं महासत्वं तेजोराशिमनुत्तमम्।
शक्रोपमममित्रघ्नं परवारणवारणम् ॥ २-२९-५७ (१२५३६)
पश्यन्तः स्त्रीगणास्तत्र शक्तिपाणिं स्म मेनिरे।
अयं स पुरुषव्याघ्रो रणेऽद्भुतपराक्रमः ॥ २-२९-५८ (१२५३७)
अस्य बाहुबलं प्राप्य न भवन्त्यसुहृद्गणाः।
इति वाचो ब्रुवन्त्यस्ताः स्त्रियः प्रेम्णा धनञ्जयम् ॥ २-२९-५९ (१२५३८)
तुष्टुवुः पुष्पवृष्टिं च ससृजुस्तस्य मूर्धनि।
दृष्ट्वा ते तु मुदा युक्ताः कौतूहलसमन्विताः ॥ २-२९-६० (१२५३९)
रत्नैर्विभूषणैश्चैव अभ्यवर्षंश्च पाण्डवम्।
अथ जित्वा समस्तांस्तान्करे च विनिवेश्य च ॥ २-२९-६१ (१२५४०)
मणिहेमप्रबालानि शस्त्राण्याभरणानि च।
एतानि लब्ध्वा पार्थोऽथ शृङ्गवन्तं गिरिं ययौ ॥ २-२९-६२ (१२५४१)
शृङ्गवन्तं च कौरव्यः समतिक्रम्य फल्गुनः।
उत्तरं हरिवर्षं तु स समासाद्य पाण्डवः ॥ २-२९-६३ (१२५४२)
विद्याधरगणांश्चैव यक्षेन्द्रांश्च विनिर्जयन्।
तत्र लेभे महात्मा वै वासो दिव्यमनुत्तमम् ॥ २-२९-६४ (१२५४३)

किन्नरद्रुमपत्रांश्च तत्र कृष्णाजिनान्बहून्।
याज्ञीयांस्तांस्तदा दिव्यांस्तत्र लेभे धनञ्जय'॥ २-२९-६५ (१२५४४)
उत्तरं हरिवर्षं तु स समासाद्य पाण्डवः।
इयेष जेतुं तं देशं पाकशासनन्दनः ॥ २-२९-६६ (१२५४५)
तत एनं महावीर्यं महाकाया महाबलाः।
द्वारपालाः समासाद्य हृष्टा वचनमब्रुवन् ॥ २-२९-६७ (१२५४६)
पार्थ नेदं त्वया शक्यं पुरं जेतुं कथञ्जन।
उपावर्तस्व कल्याण पर्याप्तमिदमच्युत ॥ २-२९-६८ (१२५४७)
इदं पुरं यः प्रविशेद्ध्रुवं न स भवेन्नरः।
प्रीयामहे त्वया वीर पर्याप्तो विजयस्तवै ॥ २-२९-६९ (१२५४८)
न चात्र किञ्चिज्जेतव्यमर्जुनात्र प्रदृश्यते।
उत्तराः कुरुवो ह्येते नात्र युद्धं प्रवर्तते ॥ २-२९-७० (१२५४९)
प्रविष्टोऽपि हि कौन्तेय नेह द्रक्ष्यसि किञ्चन।
न हि मानुषदेहेन शक्यमत्राभिवीक्षितुम् ॥ २-२९-७१ (१२५५०)
अथेह पुरुषव्याघ्र किञ्चिदन्यच्चिकीर्षसि।
तत्प्रब्रूहि करिष्यामो वचनात्तव भारत ॥ २-२९-७२ (१२५५१)
ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव।
पार्थिवत्वं चिकीर्षामि धर्मराजस्य धीमतः ॥ २-२९-७३ (१२५५२)
न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मानुषैः।
युधिष्ठिराय यत्किञ्चित्करपण्यं प्रदीयताम् ॥ २-२९-७४ (१२५५३)
Ꞌनो चेत्कृष्णेन सहितो योधयिष्यामि सायकैः'।
ततो दिव्यानि वस्त्राणि दिव्यान्याभरणानि च।
क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करम् ॥ २-२९-७५ (१२५५४)
एवं स पुरुषव्याघ्रो विजित्य दिशमुत्तराम्।
सङ्ग्रामान्सुबहून्कृत्वा क्षत्रियैर्दस्युभिस्तथा ॥ २-२९-७६ (१२५५५)
स विनिर्जित्य राज्ञस्तान्करे च विनिवेश्य तु।
धनान्यादाय सर्वेभ्यो रत्नानि विविधानि च ॥ २-२९-७७ (१२५५६)
हयांस्तित्तिरिकल्माषाञ्शुकपत्रनिभानपि।
मयूरसदृशान्यान्सर्वाननिलरंहसः ॥ २-२९-७८ (१२५५७)
वृतः सुमहता राजन्बलेन चतुरङ्गिणा।
आजगाम पुनर्वीरः शक्रप्रस्थं पुरोत्तमम् ॥ २-२९-७९ (१२५५८)
धर्मराजाय तत्पार्थो धनं सर्वं सवाहनम्।
न्यवेदयदनुज्ञातस्तेन राज्ञा गृहान्ययौ ॥ ॥ २-२९-८० (१२५५९)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९.।

सभापर्व - अध्याय ०३०
॥ श्रीः ॥
२.३०. अध्यायः ३०

Mahabharata - Sabha Parva - Chapter Topics
भीमेन प्राचीदिग्विजये पाञ्चालदेशगमनम् ॥

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

एतस्मिन्नेव काले तु भीमसेनोऽपि वीर्यवान्।
धर्मराजमनुज्ञाप्य ययौ प्राचीं दिशं प्रति ॥ ५ २-३०-१ (१२५६०)
महता बलचक्रेण परराष्ट्रावमर्दिना।
हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान्। २-३०-२ (१२५६१)
वृतो भरतशार्दूलो द्विषच्छोकविवर्धनः।
स गत्वा नरशार्दूलः पञ्चालानां पुरं महत् ॥ २-३०-३ (१२५६२)
पञ्चालान्विविधोपायैः सान्त्वयामास पाण्डवः।
गकिञ्चित्करं समादाय विदेहानां पुरं ययौ'॥
ततः स गण्डकाञ्शूरो विदेहान्भरतर्षभः ॥ २-३०-४ (१२५६३)
विजित्याल्पेन कालेन दशार्णानजयत्प्रभुः।
तत्र दाशार्णको राजा सुधर्मा रोमहर्षणम्।
कृतवान्भीमसेनेम महद्युद्धं निरायुधम्। २-३०-५ (१२५६४)
भीमसेनस्तु तद्दृष्ट्वा तस्य कर्म महात्मनः।
अधिसेनापतिं चक्रे सुधर्माणं महाबलम् ॥ २-३०-६ (१२५६५)
ततः प्राचीं दिशं भीमो ययौ भीमपराक्रमः।
सैन्येन महता राजन्कम्पयन्निव मेदिनीम् ॥ २-३०-७ (१२५६६)
सोऽश्वमेधेश्वरं राजन्रोचमानं सहानुगम्।
जिगाय समरे वीरो बलेन बलिनां वरः ॥ २-३०-८ (१२५६७)
स तं निर्जित्य कौन्तेयो नातितीव्रेण कर्मणा।
पूर्वदेशं महावीर्यं विजिग्ये कुरुनन्दनः ॥ २-३०-९ (१२५६८)
ततो दक्षिणमागम्य पुलिन्दनगरं महत्।
सुकुमारं वशे चक्रे सुमित्रं च नराधिपम् ॥ २-३०-१० (१२५६९)
ततस्तु धर्मराजस्य शासनाद्भरतर्षभः।

शिशुपालं महावीर्यमभ्यगाज्जनमेजय ॥ २-३०-११ (१२५७०)
चेदिराजोऽपि तच्छ्रुत्वा पाण्डवस्य चिकीर्षितम्।
उपनिष्क्रम्य नगरात्प्रत्यगृह्णात्परन्तप ॥ २-३०-१२ (१२५७१)
तौ समेत्य महाराज कुरुचेदिवृषौ तदा।
उभयोरात्मकुलयोः कौशलं पर्यपृच्छताम् ॥ २-३०-१३ (१२५७२)
ततो निवेद्य तद्राष्ट्रं चेदिराजो विशाम्पते।
उवाच भीमं प्रहसन्किमिदं कुरुषेऽनघ। २-३०-१४ (१२५७३)
तस्य भीमस्तदाचख्यौ धर्मराजचिकीर्षितम्।
स च तं प्रतिगृह्यैव तथा चक्रे नराधिपः ॥ २-३०-१५ (१२५७४)
ततो भीमस्तत्र राजन्निषित्वा त्रिदशाः क्षपाः।
सत्कृतः शिशुपालेन ययौ सबलवाहनः ॥ ॥ २-३०-१६ (१२५७५)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि त्रिंशोऽध्यायः ॥ ३०.।

सभापर्व - अध्याय ०३१
॥ श्रीः ॥
२.३१. अध्यायः ३१

Mahabharata - Sabha Parva - Chapter Topics
प्राचीं दिशं निर्जित्य भीमस्य प्रतिनिवर्तनम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

ततः कुमारविषये श्रेणिमन्तमथाजयत्।
कोसलाधिपतिं चैव बृहद्बलमरिन्दमः ॥ २-३१-१ (१२५७६)
अयोध्यायां तु धर्मज्ञं दीर्घयज्ञं महाबलम्।
अजयत्पाण्डवश्रेष्ठो नातितीव्रेण कर्मणा ॥ २-३१-२ (१२५७७)
ततो गोपालकक्षं च सोत्तरानपि कोसलान्।
मल्लानामधिपं चैव पार्थिवं चाजयत्प्रभुः ॥ २-३१-३ (१२५७८)
ततो हिमवतः पार्श्वं समभ्येत्य जलोद्भवम्।
सर्वमल्पेन कालेन देशं चक्रे वशं बली ॥ २-३१-४ (१२५७९)
एवं बहुविधान्देशान्विजिग्ये भरतर्षभः।

भल्लाटमभितो जिग्ये शुक्तिमन्तं च पर्वतम् ॥ २-३१-५ (१२५८०)
पाण्डवः सुमहावीर्यो बलेन बलिनां वरः।
स काशिराजं समरे सुबाहुमनिवर्तिनम् ॥ २-३१-६ (१२५८१)
वशे चक्रे महाबाहुर्भीमो भीमपराक्रमः।
ततः सुपार्श्वमभितस्तथा राजपतिं क्रथम् ॥ २-३१-७ (१२५८२)
युध्यमानं बालत्सङ्ख्ये विजिग्ये पाण्डवर्षभः।
ततो मत्स्यान्महातेजा मलदांश्च महाबलान् ॥ २-३१-८ (१२५८३)
अनघानभयांश्चैव पशुभूमिं च सर्वशः।
निवृत्य च महाबाहुर्मदधारं महीधरम् ॥ २-३१-९ (१२५८४)
सोमधेयांश्च निर्जित्य प्रत्ययावुत्तरामुखः।
वत्सभूमिं च कौन्तेयो विजिग्ये बलवान्बलात् ॥ २-३१-१० (१२५८५)
भर्गाणामधिपं चैव निषादाधिपतिं तथा।
विजिग्ये भूमिपालांश्च ममिमत्प्रमुखान्बहून् ॥ २-३१-११ (१२५८६)
ततो दक्षिणमल्लांश्च भोगवन्तं च पर्वतम्।
तरसैवाजयद्भीमो नातितीव्रेण कर्मणा ॥ २-३१-१२ (१२५८७)
शर्मकान्वर्मकांश्चैव व्यजयत्सान्त्वपूर्वकम्।
वैदेहकं च राजानं जनकं जगतीपतिम् ॥ २-३१-१३ (१२५८८)
विजिग्ये पुरुषव्याघ्रो नातितीव्रेण कर्मणा।
शकांश्च बर्बराश्चैव अजयच्छद्मपूर्वकम् ॥ २-३१-१४ (१२५८९)
वैदेहस्थस्तु कौन्तेय इन्द्रपर्वतमन्तिकात्।
किरातानामधिपतीनजयत्सप्त पाण्डवः ॥ २-३१-१५ (१२५९०)
ततः सुह्यान्प्रसुह्यांश्च सपक्षानतिवीर्यवान्।
विजित्य युधि कौन्तेयो मागधानभ्यधाद्बली ॥ २-३१-१६ (१२५९१)
दण्डं च दण्डधारं च विजित्य पृथिवीपतीन्।
तैरेव सहितैः सर्वैर्गिरिव्रजमुपाद्रवत् ॥ २-३१-१७ (१२५९२)
जारासन्धिं सान्त्वयित्वा करे च विनिवेश्य ह।
तैरेव सहितैः सर्वैः कर्णमभ्यद्रवद्बली ॥ २-३१-१८ (१२५९३)
स कम्पयन्निव महीं बलेन चतुरङ्गिणा।
युयुधे पाण्डवश्रेष्ठः कर्णेनामित्रघातिना ॥ २-३१-१९ (१२५९४)
स कर्णं युधि निर्जित्य वशे कृत्वा च भारत।
ततो विजिग्ये बलवान्राज्ञः पर्वतवासिनः ॥ २-३१-२० (१२५९५)
अथ मोदागिरौ चैव राजानं बलवत्तरम्।
पाण्डवो बाहुवीर्येण निजघान महामृधे ॥ २-३१-२१ (१२५९६)
ततः पुण्ड्राधिपं वीरं वासुदेवं समाययौ।
ग्इदानीं वृष्णिवीरेण न योत्स्यामीति पौण्ड्रकः ॥ २-३१-२२ (१२५९७)
कृष्णस्य भुजसंत्रासात्करमाशु ददौ नृपः'।

कौशिकीकच्छनिलयं राजानं च महौजसम् ॥ २-३१-२३ (१२५९८)
उभौ बलभृतौ वीरावुभौ तीव्रपराक्रमौ।
निर्जित्याजौ महाराज वङ्गराजमुपाद्रवत् ॥ २-३१-२४ (१२५९९)
समुद्रसेन निर्जित्य चन्द्रसेनं च पार्थिवम्।
ताम्रलिप्तं च राजानं कर्वटाधिपतिं तथा ॥ २-३१-२५ (१२६००)
सुह्मानामधिपं चैव ये च सागरवासिनः।
सर्वान्म्लेच्छगणांश्चैव विजिग्ये भरतर्षभः ॥ २-३१-२६ (१२६०१)
एवं बहुविधान्देशान्विजित्य पवनात्मजः।
वसु तेभ्य उपादाय लौहित्यमगद्बली ॥ २-३१-२७ (१२६०२)
स सर्वान्म्लेच्छनृपतीन्सागरानूपवासिनः।
करमाहारयामास रत्नानि विविधानि च ॥ २-३१-२८ (१२६०३)
चन्दनागुरुवस्त्राणि मणिमौक्तिककम्बलम्।
काञ्चनं रजतं चैव विद्रुमं च महाधनम् ॥ २-३१-२९ (१२६०४)
ते कोटीशतसङ्ख्येन कौन्तेयं महता तदा।
अभ्यवर्षन्महात्मानं धनवर्षेण पाण्डवम् ॥ २-३१-३० (१२६०५)
इन्द्रप्रस्थमुपागम्य भीमो भीमपराक्रमः।
निवेदयामास तदा धर्मराजाय तद्धनम् ॥ ॥ २-३१-३१ (१२६०६)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि एकत्रिंशोऽध्यायः ॥ ३२.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-३१-१६ सुह्मा राढाः मागधानभ्यधाद्बली करं प्रयच्छतेत्युक्तवान् ।पूर्वमेव पराकान् तत्वात् ॥

सभापर्व - अध्याय ०३२
॥ श्रीः ॥
२.३२. अध्यायः ३२

Mahabharata - Sabha Parva - Chapter Topics
दक्षिणदिग्विजये शूरसेनादीञ्जितवतः सहदेवस्य माहिष्मत्यां नीलेन सह युद्धम् ॥१.।नोलस्य अग्निसाहाय्यकर

Mahabharata - Sabha Parva - Chapter Text

वैशम्पाय उवाच ॥

तथैव सहदेवोऽपि धर्मराजेन पूजितः।
महत्या सेनया राजन्प्रययौ दक्षिणां दिशम् ॥ २-३२-१ (१२६०७)
स शूरसेनान्कात्स्न्र्येन पूर्वमेवाजयत्प्रभुः।
मत्स्यराजं च कौरव्यो वशे चक्रे बलाद्बली ॥ २-३२-२ (१२६०८)
अधिराजाधिपं चैव दन्तवक्रं महाबलम्।
जिगाय करदं चैव कृत्वा राज्ये न्यवेशयत् ॥ २-३२-३ (१२६०९)
सुकुमारं वशे चक्रे सुमित्रं च नराधिपम्।
तथैवापरमत्स्यांश्च व्यजयत्स पटच्चरान् ॥ २-३२-४ (१२६१०)
निषादभूमिं गोशृङ्गं पर्वतप्रवरं तथा।
तरसैवाजयद्धीमाञ्श्रेणिमन्तं च पार्थिवम् ॥ २-३२-५ (१२६११)
नरराष्ट्रं च निर्जित्य कुन्तिभोजमुपाद्रवत्।
प्रीतिपूर्वं च तस्यासौ प्रतिजग्राह शासनम् ॥ २-३२-६ (१२६१२)
ततश्चर्मण्वतीकूले जम्भकस्यात्मजं नृपम्।
ददर्श वासुदेवेन शेषितं पूर्ववैरिणा ॥ २-३२-७ (१२६१३)
चक्रे तेन स सङ्ग्रामं सहदेवेन भारत।
स तमाजौ विनिर्जित्य दक्षिणाभिमुखो ययौ ॥ २-३२-८ (१२६१४)
सेकानपरसेकांश्च रत्नानि विविधानि च ॥
ततस्तेनैव सहितो नर्मदामभितो ययौ। २-३२-१०अग्भगदत्तं महाबाहुं क्षत्रियं नरकात्मजम्।
अर्जुनाय करं दत्तं श्रुत्वा तत्र न्यवर्तत'॥ २-३२-९ (१२६१५)
विन्दानुविन्दावावन्त्यौ सैन्येन महतावृतौ।
जिगाय समरे वीरावाश्विनेयः प्रतापवान् ॥ २-३२-११ (१२६१६)
ततो रत्नान्युपादाय पुरं भोजकटं ययौ।
तत्र युद्धमभूद्राजन्दिवसद्वयमच्युत ॥ २-३२-१२ (१२६१७)
स विजित्य दुराधर्षं भीष्मकं माद्रिनन्दनः।
कोसलाधिपतिं चैव तथा वेणातटाधिपम् ॥ २-३२-१३ (१२६१८)
कान्तारकांश्च समर तथा प्राकोटकान्नृपान्।
नाटकेयांश्च समरे तथा हेरम्बकान्युधि ॥ २-३२-१४ (१२६१९)
मारुधं च विनिर्जित्य रम्यग्राममथो बलात्।
नाचीनानर्बुकांश्चैव राजानश्च महाबलः ॥ २-३२-१५ (१२६२०)
तांस्तानाटविकान्सर्वानजयत्पाण्डुनन्दनः।
नाताधिपं च नृपतिं वशे चक्रे महाबलः ॥ २-३२-१६ (१२६२१)
पुलिन्दांश्च रणे जित्वा ययौ दक्षिणतः पुरः।
युयुधे पाण्ड्यराजेन दिवसं नकुलानुजः ॥ २-३२-१७ (१२६२२)
तं जित्वा स महाबाहुः प्रययौ दक्षिणापथम्।
गुहामासादयामास किष्किन्धां लोकविश्रुताम् ॥ २-३२-१८ (१२६२३)
ग्पुरा वानरराजेन वालिना चाभिरक्षिताम्।

ततः कोसलराजस्य रामस्यैवानुगेन च।
सुग्रीवेणाभिगुप्तां तां प्रविष्टस्तमथाह्वयत्'॥ २-३२-१९ (१२६२४)
तत्र वानरराजाभ्यां मैन्देन द्विविदेन च।
युयुधे दिवसान्सप्त न च तौ विकृतिं गतौ ॥ २-३२-२० (१२६२५)
ततस्तुष्टौ महात्मानौ सहदेवाय वानरौ।
ऊचतुश्चैव संहृष्टौ प्रीतिपूर्वमिदं वचः ॥ २-३२-२१ (१२६२६)
गच्छ पाण्डवशार्दूल रत्नान्यादाय सर्वशः।
अविघ्नमस्त कार्याय धर्मराजाय धीमते ॥ २-३२-२२ (१२६२७)
ततो रत्नान्युपादाय पुरीं माहिष्मतीं ययौ ॥
तत्र नीलेन राज्ञा स चक्रे युद्धं नरर्षभः ॥ २-३२-२३ (१२६२८)
पाण्डवः परवीरघ्नः सहदेवः प्रतापवान् ॥
ततोऽस्य सुमहद्युद्धमासीद्भीरुभयङ्करम् ॥ २-३२-२४ (१२६२९)
सैन्यक्षयकरं चैव प्राणानां संशयावहम्।
चक्रे तस्य हि साहाय्यं भगवान्हव्यवाहनः ॥ २-३२-२५ (१२६३०)
ततो रथा हया नागाः पुरुषाः कवचानि च।
प्रतीप्तानि व्यदृश्यन्त सहदेवबले तदा ॥ २-३२-२६ (१२६३१)
ततः सुसंभ्रान्तमना बभूव कुरुनन्दनः।
नोत्तरं प्रतिवक्तुं च शक्तोऽभूज्जनमेजय ॥ २-३२-२७ (१२६३२)
जनमेजय उवाच। २-३२-२८क्ष् (१४३९)
किमर्थं भगवान्वह्निः प्रत्यमित्रोऽभवद्युधि।
सहदेवस्य यज्ञार्थं घटमानस्य वै द्विज ॥ २-३२-२८ (१२६३३)
वैशम्पायन उवाच। २-३२-२९क्ष् (१४४०)
तत्र माहिष्मतीवासी भगवान्हव्यवाहनः।
श्रूयते हि गृहीतो वै पुरस्तात्पारदारिकः ॥ २-३२-२९ (१२६३४)
नीलस्य राज्ञो दुहिता बभूवतातीव शोभना।
साऽग्निहोत्रमुपातिष्ठद्बोधनाय पितुः सदा ॥ २-३२-३० (१२६३५)
व्यजनैर्धूयमानोऽपि तावत्प्रज्वलते न सः ॥
यावच्चारुपुटौष्ठेन वायुना न विधूयते ॥ २-३२-३१ (१२६३६)
ततः स भगवानग्निश्चकमे तां सुदर्शनाम्।
नीलस्य राज्ञः सर्वेषामुपनीतश्च सोऽभवत् ॥ २-३२-३२ (१२६३७)
ततो ब्रह्मणरूपेण रममाणो यदृच्छया ॥
चकमे तां वरारोहां कन्यामुत्पललोचनाम् ॥
तं तु राजा यथाशास्त्रमशासद्धार्मिकस्तदा ॥ २-३२-३३ (१२६३८)
प्रजज्वाल ततः कोपाद्भगवान्हव्यवाहनः।
तं दृष्ट्वा विस्मितो राजा जगाम शिरसाऽवनिम् ॥ २-३२-३४ (१२६३९)
ततः कालेन तां कन्यां तथैव हि तदा नृपः।

प्रददौ विप्ररूपाय वह्नये शिरसा नतः ॥ २-३२-३५ (१२६४०)
प्रतिगृह्य च तां सुभ्रुं नीलराज्ञः सुतां तदा।
चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः ॥ २-३२-३६ (१२६४१)
वरेण च्छन्दयामास तं नृपं स्विष्टकृत्तमः।
अभयं च स जग्राह स्वसैन्ये वै महीपतिः ॥ २-३२-३७ (१२६४२)
ततः प्रभृति ये केचिदज्ञानात्तां पुरीं नृपाः।
जिगीषन्ति बलाद्राजंस्ते दह्यन्ते स्म वह्निना ॥ २-३२-३८ (१२६४३)
तस्यां पुर्यां तदा चैव माहिष्मत्यां कुरूद्वह।
बभूवुरनतिग्राह्य योषितश्छन्दतः किल ॥ २-३२-३९ (१२६४४)
एवमग्निर्वरं प्रादात्स्त्रीणामप्रतिवारणे।
स्वैरिण्यस्तत्र च राजानस्तत्पुरं भरतर्षभ। २-३२-४० (१२६४५)
वर्जयन्ति च राजानस्तत्पुरं भरतर्षभ।
भयादग्नेर्महाराज तदाप्रभृति सर्वदा ॥ २-३२-४१ (१२६४६)
सहदेवस्तु धर्मात्मा सैन्यं दृष्ट्वा भयार्दितम्।
परीतमग्निना राजन्नाकम्पत यथाऽचलः।
उपस्पृश्य शुचिर्भूत्वा सोऽब्रवीत्पावकं ततः ॥ २-३२-४२ (१२६४७)
सहदेव उवाच। २-३२-४३क्ष् (१४४१)
त्वदर्थोऽयं समारम्भः कृष्णवर्त्मन्नमोस्तु ते।
मुखं त्वमसि देवानां यज्ञस्त्वमसि पावक ॥ २-३२-४३ (१२६४८)
पावनात्पावकश्चासि वहनाद्धव्यवाहनः।
वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ॥ २-३२-४४ (१२६४९)
चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो।
स्वर्गद्वारस्पृशश्चासि हुताशो ज्वलनः शिखी ॥ २-३२-४५ (१२६५०)
वैश्वानरस्त्वं पिङ्गेशः प्लवङ्गो भूरितेजसः।
कुमारसूस्त्वं भगवान्रुद्रगर्भो हिरण्यकृत् ॥ २-३२-४६ (१२६५१)
अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे।
पृथिवी बलमादध्याच्छिवं चापो दिशन्तु मे ॥ २-३२-४७ (१२६५२)
अपां गर्भ महासत्व जातवेदः सुरेश्वर।
देवानां मुखमग्ने त्वं सत्येन विपुनीहि माम् ॥ २-३२-४८ (१२६५३)
ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि।
नित्यं सुहुत यज्ञेषु सत्येन विपुनीहि माम् ॥ २-३२-४९ (१२६५४)
धूमकेतुः शिखी च त्वं पापहाऽनिसम्भवः।
सर्वप्राणिषु नित्यस्थः सत्येन विपुनीहि माम् ॥ २-३२-५० (१२६५५)
एवं स्तुतोऽसि भगवन्प्रीतेन शिचिना मया।
तुष्टिं पुष्टिं श्रुतं चैव प्रीति चाग्ने प्रयच्छ मे ॥ २-३२-५१ (१२६५६)
वैशम्पायन उवाच। २-३२-५२क्ष् (१४४२)

इत्येवं मन्त्रमाग्नेयं पठन्यो जुहुयाद्विभुम्।
ऋद्धिमान्सततं दान्तः सर्वपापैः प्रमुच्यते ॥ २-३२-५२ (१२६५७)
सहदेव उवाच। २-३२-५३क्ष् (१४४३)
यज्ञविघ्नमिमं कर्तुं नार्हस्त्वं यज्ञवाहन।
एवमुक्त्वा तु माद्रेयः कुशैरास्तीर्य मेदिनीम् ॥ २-३२-५३ (१२६५८)
विधिवत्पुरुषव्याघ्रः पावकं प्रत्युपाविशत्।
प्रमुखे तस्य सैन्यस्य भीतोद्विग्नस्य भारत ॥ २-३२-५४ (१२६५९)
न चैनमत्यगाद्वह्निरुवाच महोदधिः।
तमुपेत्य शनैर्वह्निरुवाच कुरुनन्दनम् ॥ २-३२-५५ (१२६६०)
सहदेवं नृणां देवं सान्त्वपूर्वमिदं वचः।
उत्तिष्ठोत्तिष्ठ कौरव्य जिज्ञासेयं कृता मया ॥ २-३२-५६ (१२६६१)
वेद्मि सर्वमभिप्रायं तव धर्मसुतस्य च।
मया तु रक्षितव्या पूरियं भरतसत्तम ॥ २-३२-५७ (१२६६२)
यावद्राज्ञो हि नीलस्य कुले वंशधरा इति।
ईप्सितं तु करिष्यामि मनसस्तव पाण्डव ॥ २-३२-५८ (१२६६३)
तत उत्थाय हृष्टात्मा प्राञ्जलिः शिरसा नतः।
पूजयामास माद्रेयटः पावकं भरतर्षभ ॥ २-३२-५९ (१२६६४)
पावके विनिवृत्ते तु नीलो राजाऽभ्यगात्तदा।
पावकस्याज्ञया चैनमर्चयामास पार्थिवः ॥ २-३२-६० (१२६६५)
सत्कारेण नरव्याघ्रं सहदेवं युधां पतिम्।
प्रतिगृह्य च तां पूजां करे च विनिवेश्य च ॥ २-३२-६१ (१२६६६)
माद्रीसुतस्ततः प्रायाद्विजयी दक्षिणां दिशम्।
त्रैपुरं स वशे कृत्वा राजानममितौजसम् ॥ २-३२-६२ (१२६६७)
निजग्राह महाबाहुस्तरसा पौरवेश्वरम्।
आकृतिं कौशिकाचार्यं यत्ने महता ततः ॥ २-३२-६३ (१२६६८)
वशे चक्रे महाबाहुः सुराष्ट्राधिपतिं तदा।
सुराष्ट्रविषयस्थश्च प्रेषयामास रुक्मिणे ॥ २-३२-६४ (१२६६९)
राज्ञे भोजकटस्थाय महामात्राय धीमते।
भीष्मकायस धर्मात्मा साक्षादिन्द्रसखाय वै ॥ २-३२-६५ (१२६७०)
च चास्य प्रतिजग्राह ससुतः शासनं तदा।
प्रीतिपूर्वं महाराज वासुदेवमवेक्ष्य च ॥ २-३२-६६ (१२६७१)
ततः स रत्नान्यादाय पुनः प्रायाद्युधां पतिः।
ततः शूर्पारकं चैव तालाकटमथापि च ॥ २-३२-६७ (१२६७२)
वशे चक्रे महातेजा दण्डकांश्च महाबलः।
सागरद्वीपवासांश्च नृपतीन्म्लेच्छयोनिजान् ॥ २-३२-६८ (१२६७३)
निषादान्पुरुषादांश्च कर्णप्रावरणानपि।

ये च कालमुखा नाम नरराक्षसयोनयः ॥ २-३२-६९ (१२६७४)
कृत्स्नं कोलगिरिं चैव सुरभीपट्टनं तथा।
द्वीपं ताम्राह्वयं चैव पर्वतं रामकं तथा ॥ २-३२-७० (१२६७५)
तिमिङ्गिलं च स नृपं वशे कृत्वा महामतिः।
एकपादांश्च पुरुषान्केरलान्वनवासिनः ॥ २-३२-७१ (१२६७६)
नगरीं सञ्जयन्तीं च पाषण्डं करहाटकम्।
दूतैरेव वशे चक्रे करं चैनानदापयत् ॥ २-३२-७२ (१२६७७)
पाण्ड्यांश्च द्रविडांश्चैव सहितांश्चोड्रकेरलैः।
अन्ध्रांस्तावनांश्चैव कलिङ्गानुष्ट्रकर्णिकान् ॥ २-३२-७३ (१२६७८)
आटवीं च पुरीं रम्यां यवनानां पुरं तथा।
दूतैरेव वशे चक्रे करं चैनानदापयत् ॥ २-३२-७४ (१२६७९)
ग्तात्रपर्णी ततो गत्वा कन्यातीर्थमतीत्य च।
दक्षिणां च दिशं सर्वा विजित्य कुरुनन्दनः ॥ २-३२-७५ (१२६८०)
उत्तरं तीरमासाद्य सागरस्योर्मिमालिनः।
चिन्तयामास कौन्तेयो भ्रातुः पुत्रं घटोत्कचम् ॥ २-३२-७६ (१२६८१)
ततश्चिन्तितमात्रस्तु राक्षसः प्रत्यदृश्यत।
तं मेरुशिखराकारमागतं पाण्डुनन्दनः ॥ २-३२-७७ (१२६८२)
भृगुकच्छात्ततो धीमान्साम्नैवामित्रकर्शनः।
आगम्यतामिति प्राह धर्मराजस्य शसनाः ॥ २-३२-७८ (१२६८३)
स राक्षसपरीवारस्तं प्रणम्याशु संस्थितः।
घटोत्कचं महात्मानं राक्षसं घोरदर्शनम् ॥ २-३२-७९ (१२६८४)
तत्रस्थः प्रेषयामास पौलस्त्याय महात्मने'।
बिभीषणाय धर्मात्मा प्रीतिपूर्वमरिन्दमः ॥ २-३२-८० (१२६८५)
स चास्य प्रतिजग्राह शासनं प्रीतिपूर्वकम्।
तच्च कृष्णकृतं धीमानभ्यमन्यत स प्रभुः ॥ २-३२-८१ (१२६८६)
ततः सम्प्रेषयामास रत्नानि विविधानि च।
चन्दनागुरुकाष्ठानि दिव्यान्याभरणानि च ॥ २-३२-८२ (१२६८७)
वासांसि च महार्हाणि मणींश्चैव महाधनान् ॥ ॥ २-३२-८२क्ष् (१४४४)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२.।

सभापर्व - अध्याय ०३३
॥ श्रीः ॥
२.३३. अध्यायः ३३

Mahabharata - Sabha Parva - Chapter Topics

जनमेजयप्रश्नानुरोधेन सहदेवस्य द्राविडपाण्ड्यदेशगमनकथनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

ग्जनमेजय उवाच ॥

इच्छाम्यागमनं श्रोतुं हैडिम्बस्य द्विजोत्तम।
लङ्कायां च गतिं ब्रह्मन्पौलस्त्यस्य च दर्शनम् ॥ २-३३-१ (१२६८८)
कावेरीदर्शनं चैव आनुपूर्व्या वदस्व मे। २-३३-२ (१२६८९)
वैशम्पायन उवाच।
शृणु राजन्यथा वृत्तं सहेदवस्य साहसम् ॥ २-३३-२क्ष् (१४४५)
कालनद्वीपगांश्चैव तरसाऽजित्य चाहवे।
दक्षिणां च दिशं जित्वा चोलस्य विषयं ययौ ॥ २-३३-३ (१२६९०)
ददर्श पुण्यतोयां वै कावेरीं सरितां वराम्।
नाजापक्षिगणैर्जुष्टां तापसैरुपशोभिताम् ॥ २-३३-४ (१२६९१)

कदम्बैः सप्तपर्णैश्च कश्मर्यामलकैर्वृताम् ॥ २-३३-५ (१२६९२)
न्यग्रोधैश्च महाशाखैः प्लक्षैरौदुम्बरैरपि।
शमीपलाशवृक्षैश्च अश्वत्थैः खदिरैर्वृताम् ॥ २-३३-६ (१२६९३)
बदरीभिश्च सञ्छन्नामश्वकर्णैश्च शोभिताम्।
बूतैः पुण्ड्रकपत्रैश्च कदलीवनसंवृताम् ॥ २-३३-७ (१२६९४)
चक्रवाकगणैः कीर्णं प्लवैश्च जलवायसैः।
समुद्रकाकैः क्रौञ्चैश्च नादितां जलकुक्कुटैः ॥ २-३३-८ (१२६९५)
एवं खगैश्च बहुभिः सङ्घुष्टां जलवासिभिः।
आश्रमैर्बहुभिः सक्तां चैत्यवृक्षैश्च शोभिताम् ॥ २-३३-९ (१२६९६)
शोभितां ब्राह्मणैः शुभ्रैर्वेदवेदाङ्गपारगैः।
क्वचित्तीररुहैर्वृक्षैर्मालाभिरिव शोभिताम् ॥ २-३३-१० (१२६९७)
क्वचित्सुपुष्पितैर्वृक्षैः क्वचित्सौगन्धिकोत्पलैः।
कह्लारकुमुदोत्फुल्लैः कमलैरुपशोभिताम् ॥ २-३३-११ (१२६९८)
कावेरीं तादृशीं दृष्ट्वा प्रीतिमान्पाण्डवस्तदा।
अस्मद्राष्ट्रे यथा गङ्गा कावेरी च तथा शुभा ॥ २-३३-१२ (१२६९९)
सहदेवस्तु तां तीर्त्वा नदीमनुचरैः सह।
दक्षिणं तीरभासाद्य गमनायोपचक्रमे ॥ २-३३-१३ (१२७००)
आगतं पाण्डवं तत्र श्रुत्वा विषयवासिनः।

दर्शनार्थं ययुस्ते तु कौतूहलसमन्विताः ॥ २-३३-१४ (१२७०१)
द्रमिडाः पुरुषा राजन्स्त्रियचश्च प्रियदर्शनाः।
गत्वा पाण्डुसुतं तत्र ददृशुस्ते मुदाऽन्विताः ॥ २-३३-१५ (१२७०२)
सुकुमारं विशालाक्षं व्रजन्तं त्रिदशोपमम्।
दर्शनीयतमं लोके नेत्रैरनिमिषैरिव ॥ २-३३-१६ (१२७०३)
आश्चर्यभूतं ददृशुर्द्रमिडास्ते समागताः।
महासेनोपमं दृष्ट्वा पूजां चक्रुश्च तस्य वै ॥ २-३३-१७ (१२७०४)
रत्नैश्च विविधैरिष्टैर्भोगैरन्यैश्च संमतैः।
गतिमङ्गलयुक्ताभिः स्तुवन्तो नकुलानुजम् ॥ २-३३-१८ (१२७०५)
सहदेवस्तु तान्दृष्ट्वा द्रमिलानागतान्मुदा।
विसृज्य तान्महाबाहुः प्रस्थितो दक्षिणां दिशम् ॥ २-३३-१९ (१२७०६)
दूतेन तरसा चोलं विजित्य द्रमिडेश्वरम्।
ततो रत्नान्युपादाय पाण्डस्य विषयं ययौ ॥ २-३३-२० (१२७०७)
दर्शने सहदेवस्य न च तृप्ता नराः परे।
गच्छन्तमनुगच्छन्तः प्राप्ताः कौतूहलान्विताः ॥ २-३३-२१ (१२७०८)
ततो माद्रीसुतो राजन्मृगसङ्घान्विलोकयन्।
गजान्वनचरानन्यान्व्याघ्रान्कृष्णमृगान्बहून् ॥ २-३३-२२ (१२७०९)
शुकान्मयूरान्दृष्ट्वा तु गृध्रानारण्यकुक्कुटान्।
ततो देशं समासाद्य श्वशुरस्य महीपतेः ॥ २-३३-२३ (१२७१०)
प्रेषयामास माद्रेयो दूतान्पाण्ड्याय वै तदा।
प्रतिजग्राह तस्याज्ञां सम्प्रीत्या मलयध्वजः ॥ २-३३-२४ (१२७११)
भार्या रूपवती जिष्णोः पाण्ड्यस्य तनया शुभा।
चित्राङ्गदेति विख्याता द्रमिडी योषितां वरा ॥ २-३३-२५ (१२७१२)
आगतं सहदेवं तु सा श्रुत्वाऽन्तः पुरे पितुः।
प्रेषयामास सम्प्रीत्या पूजारत्नं च वै बहु ॥ २-३३-२६ (१२७१३)
पाण्ड्योऽपि बहुरत्नानि दूतैः सह मुमोच ह।
मणिमुक्ताप्रवालानि सहदेवाय कीर्तिमान् ॥ २-३३-२७ (१२७१४)
तां दृष्ट्वाऽप्रतिमां पूजां पाण्डवोऽपि मुदा नृप।
भ्रातुः पुत्रे बहून्रत्नान्दत्वा वै बभ्रूवाहने ॥ २-३३-२८ (१२७१५)
पाण्ड्यं द्रमिडराजानं श्वशुरं मलयध्वजम्।
स दूतैस्तं वशे कृत्वा मणलूरेश्वरं तदा ॥ २-३३-२९ (१२७१६)
ततो रत्नान्युपादाय द्रमिडैरावृतो ययौ।
अगस्त्यस्यालयं दिव्यं देवलोकसमं गिरिम् ॥ २-३३-३० (१२७१७)
स तं प्रदक्षिमं कृत्वा मलयं भरतर्षभ।
लङ्घयित्वा तु माद्रेयस्ताम्रपर्णीं नदीं शुभाम् ॥ २-३३-३१ (१२७१८)
प्रसन्नसलिलां दिव्यां सुशीतां च मनोहराम्।

समुद्रतीरमासाद्य न्यविशत्पाण्डुनन्दनः ॥ ॥ २-३३-३२ (१२७१९)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३.।

सभापर्व - अध्याय ०३४
॥ श्रीः ॥
२.३४. अध्यायः ३४

Mahabharata - Sabha Parva - Chapter Topics
स्मृतिमात्रागतघटोत्कचलङ्काप्रेषणवृत्तान्तस्य विस्तरेण कथनम् ॥१.।कृष्णगौरवेण विभीषणेन करदानम् ॥२.।वि

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

सहदेवस्ततो राजा मन्त्रिभिः सह भारत।
सम्प्रधार्य महाबाहुः सचिवैर्बुद्धिमत्तरैः ॥ २-३४-१ (१२७२०)
स विचार्य तदा राजन्सहदेवस्त्वरान्वितः।
चिन्तयामास राजेन्द्र भ्रातुः पुत्रं घटोत्कचम् ॥ २-३४-२ (१२७२१)
ततश्चिन्तितमात्रे तु राक्षसः प्रत्यदृश्यत।
अतिदीर्घो महाबाहु सर्वाभरणभूषितः ॥ २-३४-३ (१२७२२)
नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः।
विचित्रहारकेयूरः किङ्किणीमणिभूषितः ॥ २-३४-४ (१२७२३)
हेममाली महादंष्ट्रः किरीटी कुक्षिबन्धनः।
ताम्रकेशो हरिश्मश्रुर्भीमाङ्गः कटकाङ्गदः ॥ २-३४-५ (१२७२४)
रक्तचन्दनदिग्धाङ्गः सूक्ष्माम्बरधरो बली।
बलेन स ययौ तत्र चालयन्निव मेदिनीम् ॥ २-३४-६ (१२७२५)
ततो दृष्ट्वा जना राजन्नायान्तं पर्वतोपमम्।
भयाद्धि दुद्रुवुः सर्वे सिंहात्क्षुद्रमृगा यथा ॥ २-३४-७ (१२७२६)
आससाद च माद्रेयं पुलस्त्यं रावणो यथा।
अभिवाद्य ततो राजन्सहदेवं घटोत्कचः ॥ २-३४-८ (१२७२७)
प्रह्वः कृताञ्जलिस्तस्थौ किं कार्यमिति चाब्रवीत्।
तं परिष्वज्य बाहुभ्यां मूर्ध्न्युपाघ्राय पाण्डवः ॥ २-३४-९ (१२७२८)
तं मेरुशिखराकारमागतं पाण्डुनन्दनः।

पूजयित्वा सहामात्यः प्रीतो वाक्यमुवाच ह ॥ २-३४-१० (१२७२९)
गच्छ लङ्कां पुरीं वत्स करार्थं मम शासनात्। ॥
तत्र दृष्ट्वा महात्मानं राक्षसेन्द्रं बिभीषणम् ॥ २-३४-११ (१२७३०)
रत्नानि राजसूयार्थं विविधानि बहूनि च।
उपादाय च सर्वाणि प्रत्यागच्छ महाबल ॥ २-३४-१२ (१२७३१)
वैशम्पायन उवाच। २-३४-१३क्ष् (१४४६)
पाण्डवेनैवमुक्तस्तु मुदा युक्तो घटोत्कचः।
तथेत्युक्त्वा महाराज प्रतस्थे दक्षिणां दिशम् ॥ २-३४-१३ (१२७३२)
प्रययौ दक्षिणं कृत्वा सहदेवं घटोत्कचः।
लङ्कामभिमुको राजन्समुद्रं स व्यलोकयत् ॥ २-३४-१४ (१२७३३)
कूर्मग्राहझषाकीर्णं मीननक्रैस्तथाऽऽकुलम्।
शुक्तिव्रातसमाकीर्णं शङ्खानां निचयाकुलम् ॥ २-३४-१५ (१२७३४)
स दृष्ट्वा रामसेतुं च चिन्तयन्रामविक्रमम् ॥
गत्वा पारं समुद्रस्य दक्षिणं स घटोत्कचः ॥ २-३४-१६ (१२७३५)
ददर्श लङ्कां राजेन्द्र नाकपृष्ठोपमां शुभाम्।
प्राकारेणावृतां रम्यां शुभद्वारैश्च शोभिताम् ॥ २-३४-१७ (१२७३६)
प्रासादैर्बहुसाहस्रैः श्वेतरक्तैश्च सङ्कुलाम्।
दिव्यदुन्दुभिनिर्ह्रादामुद्यानवनशोभिताम् ॥ २-३४-१८ (१२७३७)
सर्वकालफलैर्वृक्षैः पुष्पितैरुपशोभिताम्।
पुष्पगन्धैश्च सङ्कीर्णां रमणीयमहारथाम् ॥ २-३४-१९ (१२७३८)
नानारत्नैश्च सम्पूर्णामिन्द्रस्येवामरावतीम्।
विवेश स पुरीं लङ्कां राक्षसैश्च निषेविताम् ॥ २-३४-२० (१२७३९)
ददर्श स पुरीं लङ्कां राक्षसैश्च निषेविताम् ॥
नानावेषधरान्दक्षान्नारीश्च प्रियदर्शनाः ॥ २-३४-२१ (१२७४०)
दिव्यमाल्याम्बरधरा दिव्यभूषणभूषिताः।
मदरक्तान्तनयनाः पीनश्रोणिपयोधराः ॥ २-३४-२२ (१२७४१)
भैमसेनिं ततो दृष्ट्वा हृष्टास्ते विस्मयं गताः।
आससाद गृहं राज्ञ इन्द्रस्य सदनोपमम् ॥ २-३४-२३ (१२७४२)
स द्वारपालमासाद्य वाक्यमेतदुवाच ह। २-३४-२४ (१२७४३)
घटोत्कच उवाच ॥
कुरूणामृष्टबो राजा पाण्डुर्नाम महाबलः ॥ २-३४-२४क्ष् (१४४७)
कनीयांस्तस्य दायादः सहदेव इति श्रुतः।
तेनाहं प्रेषितो दूतः करार्थं कौरवस्य च ॥ २-३४-२५ (१२७४४)
द्रष्टुमिच्छामि राजेनद्रं त्वं क्षिप्रं मां निवेदय। २-३४-२६ (१२७४५)
वैशम्पायन उवाच ॥
तस्य तद्वचनं श्रुत्वा द्वारपालो महीपते ॥ २-३४-२६क्ष् (१४४८)

तथेत्युक्त्वा विवेशाथ भवनं स निवेदकः।
प्राञ्जलिः स्रवमाचष्ट स्रवां दूतगिरं तदा ॥ २-३४-२७ (१२७४६)
द्वारपालवचः श्रुत्वा राक्षसेन्द्रो विभीषणः।
उवाच वाक्यं धर्मात्मा समीपं मे प्रवेश्यताम् ॥ २-३४-२८ (१२७४७)
एवमुक्तस्तु राज्ञा स धर्मज्ञेन महात्मना।
अथनिष्कम्य सम्भ्रान्तो द्वास्थोहैडिम्बमब्रवीत् ॥ २-३४-२९ (१२७४८)
एहि दूत नृपं द्रष्टुं क्षिप्रं प्रविश च स्वयम्।
द्वारपालवचः श्रुत्वा प्रविवेश घटोत्कचः ॥ २-३४-३० (१२७४९)
स प्रविश्य ददर्शाथ राक्षसेन्द्रस्य मन्दिरम्।
ततः कैलाससङ्काशं तत्पकाञ्चनतोरणम् ॥ २-३४-३१ (१२७५०)
प्राकारेण परिक्षिप्तं गोपुरैश्चापि शोभितम्।
हर्म्यप्रासादसम्बाधं नानारत्नोपशोभितम् ॥ २-३४-३२ (१२७५१)
काञ्चनैस्तापनीयैश्च स्फाटिकै राजतैरपि।
वज्रवैडूर्यजुष्टैश्च स्तम्भैश्च सुमनोहरैः ॥ २-३४-३३ (१२७५२)
नानाध्वजपताकाभिर्युक्तं मणिविचित्रितम्।
चित्रमाल्यावृतं रम्यं तप्तकाञ्चनवेदिकम् ॥ २-३४-३४ (१२७५३)
स दृष्ट्वा तत्र सर्वं च भैमसेनिर्मनोहरम्।
प्रविशन्नेव हैडिम्बः शुश्राव मधुरस्वरम् ॥ २-३४-३५ (१२७५४)
तन्त्रीगीतसमाकीर्णं समतालमिताक्षरम्।
दिव्यदुन्दुभिनिर्ह्रादं वादित्रसततं शुभम् ॥ २-३४-३६ (१२७५५)
स श्रुत्वा मधुरं शब्दं प्रीतिमानभवत्तदा।
ततो विगाह्य हैडिम्बो बहुकक्ष्यां मनोरमाम् ॥ २-३४-३७ (१२७५६)
स ददर्श महात्मानं द्वास्थेन सह भारत।
तं विभीषणमासीनं काञ्चने परमासने ॥ २-३४-३८ (१२७५७)
दिवि भास्करसङ्काशं मुक्तामणिविभूषितम्।
दिव्याभरणचित्राङ्गं दिव्यरूपधरं विभुम् ॥ २-३४-३९ (१२७५८)
दिव्यमाल्याम्बरधरं दिव्यगन्धोक्षितं शुभम्।
विभ्राजमानं वपुषा सूर्यवैश्वानरप्रभम् ॥ २-३४-४० (१२७५९)
उपोपविष्टं सचिवैर्देवैरिव शतक्रतुम्।
यक्षैर्महात्मभिर्दिव्यनारीभिर्हृद्यकान्तिभिः ॥ २-३४-४१ (१२७६०)
गीतैर्मङ्गलयुक्तैश्च पूज्यमानं यथा दिवि।
चामरे व्यजने चाग्र्ये हेमदण्डे महाधने ॥ २-३४-४२ (१२७६१)
गृहीते वरनारीभ्यां धूयमाने च मूर्धनि।
अर्चिष्मन्तं श्रिया जुष्टं कुबेरवरुणोपमम् ॥ २-३४-४३ (१२७६२)
धर्मे चैव स्थितं नित्यमद्भुतं राक्षसेस्वरम्।
राममिक्ष्वाकुनाथं वै स्मरन्तं मनसा सदा ॥ २-३४-४४ (१२७६३)

दृष्ट्वा घटोत्कचो राजन्ववन्दे तं कृताञ्जलिः।
प्रह्वस्तस्थौ महावीर्यः शक्रं चित्ररथो यथा ॥ २-३४-४५ (१२७६४)
तं दूतमागतं दृष्ट्वा राक्षसेन्द्रो विभीषणः।
पूजयित्वा यथान्यायं सान्त्वपूर्वं वचोऽब्रवीत् ॥ २-३४-४६ (१२७६५)
विभीषण उवाच ॥ २-३४-४७क्ष् (१४४९)
कस्य वंशे स सञ्जातः करमिच्छन्महीपतिः।
तस्यानुजान्समस्तांश्च पुरं देशं च तस्य वै ॥ २-३४-४७ (१२७६६)
त्वां च कार्यं च तत्सर्वं श्रोतुमिच्छामि तत्वतः।
विस्तरेण मम ब्रूहि सर्वानेतान्पृथक्पृथक् ॥ २-३४-४८ (१२७६७)
वैशम्पायन उवाच। २-३४-४९क्ष् (१४५०)
एवमुक्तस्तु हैडिम्बः पौलस्त्येन महात्मना।
कृताञ्जलिरुवाचाथ समर्थमिदमुत्तरम् ॥ २-३४-४९ (१२७६८)
घटोत्कच उवाच। २-३४-५०क्ष् (१४५१)
सोमवंशोद्भवो राजा पाण्डुर्नाम महाबलः।
पाण्डोश्च पुत्राः पञ्चासञ्छक्रतुल्यपराक्रमाः ॥ २-३४-५० (१२७६९)
तेषां ज्येष्ठस्तु नाम्ना वै युधिष्ठिर इति श्रुतः।
अजातशत्रुर्धर्मात्मा धर्मो विग्रहवानिव ॥ २-३४-५१ (१२७७०)
ततो युधिष्ठिरो राजा प्राप्य राज्यमकारयत्।
गङ्गाया दक्षिणे तीरे नगरे नागसाह्वये ॥ २-३४-५२ (१२७७१)
तद्दत्वा धृतराष्ट्राय शक्रप्रस्थं ययौ ततः।
भ्रातृभिः सह राजेन्द्र शक्रप्रस्थेऽन्वमोदत ॥ २-३४-५३ (१२७७२)
गङ्गायमुनयोर्मध्ये ते उभे नगरोत्तमे।
नित्यं धर्मे स्थितो राजा शक्रप्रस्थे प्रशास्ति नः ॥ २-३४-५४ (१२७७३)
तस्यानुजो महाबाहुर्भीमसेन इति श्रुतः।
महातेजा महाकीर्तिः शक्रतुल्यपराक्रमः ॥ २-३४-५५ (१२७७४)
दशनागसहस्राणां बले तुल्यः स पाण्डवः।
तस्यानुजोऽर्जुनो नाम महाबलपराक्रमः ॥ २-३४-५६ (१२७७५)
सुकुमारो महासत्वो लोके वीर्येण विश्रुतः।
कार्तवीर्यसमो वीर्ये सागरप्रतिमो बले ॥ २-३४-५७ (१२७७६)
जामदग्न्यसमश्चास्त्रे सङ्ख्ये रामसमोऽर्जुनः।
रूपे शक्रसमः पार्थस्तेजसा भास्करोपमः ॥ २-३४-५८ (१२७७७)
देवदानवगन्धर्वैः पिशाचोरगराक्षसैः।
मानुषैश्च समस्तैस्तु अजेयः फल्गुनो रणे ॥ २-३४-५९ (१२७७८)
तेन तत्खण्डवं दावं तर्पितं जातवेदसे।
विजित्य तरसा शक्रं युधि देवगणैः सह ॥ २-३४-६० (१२७७९)
लब्धान्यस्त्राणि दिव्यानि तर्पयित्वा हुताशनम्।

तेन लब्धा महाराज दुर्लभा दैवतैरपि ॥ २-३४-६१ (१२७८०)
वासुदेवस्य भगिनी सुभद्रा नाम विश्रुता।
अर्जुनस्यानुजो राजन्नकुलश्चेति विश्रुतः ॥ २-३४-६२ (१२७८१)
दर्शनीयतमो लोके मूर्तिमानिव मन्मथः।
तस्यानुजो महातेजाः सहदेव इति श्रुतः ॥ २-३४-६३ (१२७८२)
तेनाहं प्रेषितो राजन्कुमारेण समो रणे।
अहं घटोत्कचो नाम भीमसेनसुतो बली ॥ २-३४-६४ (१२७८३)
मम माता महाभागा हिडिम्बा नाम राक्षसी।
पार्थानामुपकारार्थं चरामि पृथिवीमिमाम् ॥ २-३४-६५ (१२७८४)
आसीत्पृथिव्याः सर्वस्या महीपालो युधिष्ठिरः।
राजसूयं क्रतुश्रेष्ठमाहर्तुमुपचक्रमे ॥ २-३४-६६ (१२७८५)
सन्दिदेश च स भ्रातृन्करार्थं सर्वतोदिशम्।
वृष्णिवीरेण सहितः सन्दिदेशानुजान्नृपः ॥ २-३४-६७ (१२७८६)
उदीचीमर्जुनस्तूर्णं गत्वा मेरोरथोत्तमः।
गत्वा शतसहस्राणि योजनानि महाबलः ॥ २-३४-६८ (१२७८७)
जित्वा सर्वान्नृपान्युद्धे हत्वा च तरसा वशी।
स्वर्गद्वारमुपागम्य रत्नान्यादाय वै भृशम् ॥ २-३४-६९ (१२७८८)
अश्वांश्च विविधान्दिव्यान्सर्वानादाय फल्गुनः।
धनं बहुविधं राजन्धर्मपुत्राय वै ददौ ॥ २-३४-७० (१२७८९)
भीमसेनो हि राजेन्द्र जित्वा प्राचीं दिशं बलात्।
वशे कृत्वा महीपालान्पाण्डवाय धनं ददौ ॥ २-३४-७१ (१२७९०)
दिशं प्रतीचीं नकुलः करार्थं प्रययौ तथा।
सहदेवो दिशं याम्यां जित्वा सर्वान्महीक्षितः ॥ २-३४-७२ (१२७९१)
मां सन्दिदेश राजेन्द्र करार्थमिह सत्कृतः।
पार्थानां चरितं तुभ्यं सङ्क्षेपात्समुदाहृतम् ॥ २-३४-७३ (१२७९२)
तमवेक्ष्य महाराज धर्मराजं युधिष्ठिरम्।
पावनं राजसूयं च भगवन्तं हरिं प्रभुम्।
एतानवेक्ष्य धर्मज्ञ करं दातुमिहार्हसि ॥ २-३४-७४ (१२७९३)
वैशम्पायन उवाच ॥ २-३४-७५क्ष् (१४५२)
तेन तद्भाषितं श्रुत्वा राक्षसेन्द्रो बिभीषणः।
शासनं प्रतिजग्राह धर्मात्मा राक्षसैः सह ॥ २-३४-७५ (१२७९४)
तच्च कृष्णकृतं धीमानित्यमन्यत स प्रभुः।
ततो ददौ विचित्राणि कम्बलानि कुथानि च ॥ २-३४-७६ (१२७९५)
दान्तकाञ्चनपर्यङ्कान्मणिहेमविचित्रितान्।
भूषणानि महार्हाणि प्रवालानि मणींश्च सः ॥ २-३४-७७ (१२७९६)
काञ्चनानि च भाण्डनि कलशानि घटानि च।

कटाहानि विचित्रानि द्रोण्यश्चैव सहस्रशः ॥ २-३४-७८ (१२७९७)
राजतानि च भाण्डानि रत्नगर्भांश्च कुण्डलान्।
हेमपुष्पानि चान्यानि रुक्ममुख्यानि चापरान्। २-३४-७९ (१२७९८)
शङ्खांश्च चन्द्रसङ्काशांश्चित्रावर्तविचित्रितान्।
यज्ञस्य तोरणे युक्तान्ददौ तालांश्चतुर्दश ॥ २-३४-८० (१२७९९)
रुक्मपङ्कजपुष्पाणि शिबिका मणिभूषिताः।
मुकुटानि महार्हाणि रत्नगर्भांश्च कङ्कणान् ॥ २-३४-८१ (१२८००)
चन्दनानि च मुख्यानि वासांसि विविधानि च।
स ददौ सहदेवाय तदा राजा विभीषणाः ॥ २-३४-८२ (१२८०१)
तानि सर्वाणि रत्नानि आजह्रुस्ते निशाचराः।
अष्टाशीतिसहस्राणि समदा रक्तलोचनाः ॥ २-३४-८३ (१२८०२)
रत्नान्यादाय सर्वाणि प्रतस्थे स घटोत्कचः।
विभीषणं च राजानमभिवाद्य कृताञ्जलिः ॥ २-३४-८४ (१२८०३)
प्रदक्षिणं परीत्यैव निर्जगाम घटोत्कचः।
ततो रत्नान्युपादाय हैडिम्बो राक्षसैः सह ॥ २-३४-८५ (१२८०४)
जगाम तूर्णं लङ्कायाः सहदेवपदं प्रति।
आसेदुः पाण्डवं सर्वे लङ्घयित्वा महोदधिम् ॥ २-३४-८६ (१२८०५)
सहदेवो ददर्शाथ रत्नाहारान्निशाचरान्।
आगतान्भीमसङ्काशान्हैडिम्बं च तथा नृप ॥ २-३४-८७ (१२८०६)
द्रमिला नैरृतान्दृष्ट्वा दुद्रुवुस्ते भयार्दिताः।
भैमसेनिस्ततो गत्वा मार्देयं प्राञ्जलिः स्थितः ॥ २-३४-८८ (१२८०७)
प्रीतिमानभवद्दृष्ट्वा रत्नौघं तं च पाण्डवः।
तं परिष्वज्य पाणिभ्यां दृष्ट्वा तान्प्रीतिमानभूत् ॥ २-३४-८९ (१२८०८)
विसृज्य द्रविडान्सर्वान्गमनायोपचक्रमे।
न्यवर्तम ततो धीमान्सहदेवो नराधिपः ॥ २-३४-९० (१२८०९)
एवं विजित्य तरसा सान्त्वेन विजयेन च।
करदान्पार्थिवान्कृत्वा प्रत्यागच्छदरिन्दमः ॥ २-३४-९१ (१२८१०)
रत्नसालमुपादाय ययौ सहनिशाचरः।
इन्द्रप्रस्थं विवेशाथ कम्पयन्निव मेदिनीम् ॥ २-३४-९२ (१२८११)
दृष्ट्वा युधिष्ठिरं राजन्सहदेवः कृताञ्जलिः।
प्रह्वोऽभिवाद्य तस्थौ स पूजितश्चापि तेन वै ॥ २-३४-९३ (१२८१२)
लङ्काप्राप्तान्धनौघांश्च दृष्ट्वा तान्दुर्लभान्बहून्।
प्रीतिमानभवद्राजा विस्मयं परमं ययौ ॥ २-३४-९४ (१२८१३)
धर्मराजाय तत्सर्वं निवेद्य भरतर्षभ।
कोटीसहस्रमधिकं हिरण्यस्य महात्मने ॥ २-३४-९५ (१२८१४)
विविधानि च रत्नानि गोजाविमहिषांस्तथा।

कृतकर्मा सुखं राजन्नुवास जनमेजय ॥ ॥ २-३४-१६ (१२८१५)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि चतुस्त्रिंसोऽध्यायः ॥ ३४.। ॥

सभापर्व - अध्याय ०३५
॥ श्रीः ॥
२.३५. अध्यायः ३५

Mahabharata - Sabha Parva - Chapter Topics
नकुलस्य पश्चिमदिग्विजयः ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

नकुलस्य तु वक्ष्यामि कर्माणि विजयं तथा।
वासुदेवजितामाशां यथाऽसावजयत्प्रभुः ॥ २-३५-१ (१२८१६)
निर्याय खाण्डवप्रस्थात्प्रतीचीमभितो दिशम्।
उद्दिश्य मतिमान्प्रायान्महत्या सेनया सह ॥ २-३५-२ (१२८१७)
सिंहनादेन महता योधानां गर्जितेन च।
रथनेमिनिनादैश्च कम्पयन्वसुधामिमाम् ॥ २-३५-३ (१२८१८)
ततो बहु धनं रम्यं गावाढ्यं धनधान्यवत्।
कार्तिकेयस्य दयितं रोहीतकुपाद्रवत् ॥ २-३५-४ (१२८१९)
तत्र युद्धं महच्चासीच्छूरैर्मत्तमयूरकैः।
मरुभूमिं स कार्त्स्न्येन तथैव बहुधान्यकम् ॥ २-३५-५ (१२८२०)
शैरीषकं महेत्थं च वशे चक्रे महाद्युतिः।
आक्रोशं चैव राजर्षि तेन युद्धमभून्महत् ॥ २-३५-६ (१२८२१)
तान्दशार्णान्स जित्वा च प्रतस्थे पाण्डुनन्दनः।
शिबींस्त्रिगर्तानम्बष्ठान्मालवान्पञ्च कर्पटान् ॥ २-३५-७ (१२८२२)
तथा मध्यमकेयांश्च वाटधानान्द्विजानथ।
पुनश्च परिवृत्याथ पुष्करारण्यवासिनः ॥ २-३५-८ (१२८२३)
गणानुत्सवसङ्केतान्व्यजयत्पुरुषर्षभः।
सिन्धुकूलाश्रिता ये च ग्रामणीया महाबलाः ॥ २-३५-९ (१२८२४)
शूद्राभीरगणाश्चैव ये चाश्रित्य सरस्वतीम्।

वर्तयन्ति च ये मत्स्यैर्ये च पर्वतवासिनः ॥ २-३५-१० (१२८२५)
कत्स्नं पञ्चनन्दं चैव तथैवामरपर्वतम्।
उत्तरज्योतिषं चैव तथा दिव्यकटं पुरम् ॥ २-३५-११ (१२८२६)
द्वारपालं च तरसा वशे चक्रे महाद्युतिः।
रामठान्हारहूणांश्च प्रतीच्याश्चैव ये नृपाः ॥ २-३५-१२ (१२८२७)
तान्सर्वान्स वशे चक्रे शासनादेव पाण्डवः।
तत्रस्थः प्रेषयामास वासुदेवाय भारत ॥ २-३५-१३ (१२८२८)
स चास्य गतभी राजन्प्रतिजग्राह शासनम्।
ततः शाकलमभ्येत्य मद्राणां पुटभेदनम् ॥ २-३५-१४ (१२८२९)
मातुलं प्रीतिपूर्वेण शल्यं चक्रे वशे बली।
स तेन सत्कृतो राज्ञा सत्कारार्हो विशाम्पते ॥ २-३५-१५ (१२८३०)
रत्नानि भूरीण्यादाय सम्प्रतस्थे युधां पतिः।
ततः सागरकुक्षिस्थान्म्लेच्छान्परमदारुणान् ॥ २-३५-१६ (१२८३१)
पह्लवान्वर्बरांश्चैव किरातान्यवनाञ्शकान्।
ततो रत्नान्युपादाय वशे कृत्वा च पार्थिवान्।
न्यवर्तत कुरुश्रेष्ठो नकुलश्चित्रमार्गवित् ॥ २-३५-१७ (१२८३२)
करमाणां सहस्राणि कोशं तस्य महात्मनः।
ऊहर्दश महाराज कृच्छ्रादिव महाधनम् ॥ २-३५-१८ (१२८३३)
इन्द्रप्रस्थगतं वीरमभ्येत्य स युधिष्ठिरम्।
ततो माद्रीसुतः श्रीमान्धनं तस्मै न्यवेदयत् ॥ २-३५-१९ (१२८३४)
एवं विजित्य नकुलो दिशं वरुणपालिताम्।
प्रतीचीं वासुदेवेन निर्जितां भरतर्षभ ॥ ॥ २-३५-२० (१२८३५)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५.।

सभापर्व - अध्याय ०३६
॥ श्रीः ॥
२.३६. अध्यायः ३६

Mahabharata - Sabha Parva - Chapter Topics

द्वारकातः आगतस्य श्रीकृष्णस्याज्ञया यज्ञसामग्रीसम्पादनोपक्रमः ॥१.।द्वैपायनेन ऋत्विगानयनम् ॥२.।ब्राह्मण

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

रक्षणाद्धर्मराजस्य सत्यस्य परिपालनात्।
शत्रूणां क्षपणाच्चैव स्वकर्मनिरताः प्रजाः ॥ २-३६-१ (१२८३६)
बलीनां सम्यगादानाद्धर्मतश्चानुशासनात्।
निकामवर्षी पर्जन्यः स्फीतो जनपदोऽभवत् ॥ २-३६-२ (१२८३७)
सर्वारम्भाः सुप्रवृत्ता गोरक्षा कर्षणं वणिक्।
विशेषात्सर्वमेवैतत्सञ्जज्ञे राजकर्मणः ॥ २-३६-३ (१२८३८)
दस्युभ्यो वञ्चकेभ्यो वा राजन्प्रति परस्परम्।
राजवल्लभतश्चैव नाश्रूयन्त मृषागिरः ॥ २-३६-४ (१२८३९)
अवर्षं चातिवर्षं च व्याधिपावकमूर्छनम्।
सर्वमेतत्तदा नासीद्धर्मनित्ये युधिष्ठिरे ॥ २-३६-५ (१२८४०)
प्रियं कर्तुमुपस्थातुं बलिकर्म स्वभावजम्।
अभिहर्तुं नृपा जग्मुर्नान्यैः कार्यैः कथञ्चनः ॥ २-३६-६ (१२८४१)
धर्मैर्धनागमैस्तस्य ववधे निचयो महान्।
कर्तुं यस्य न शक्येन क्षयो वर्षशतैरपि ॥ २-३६-७ (१२८४२)
स्वकोष्ठस्य परीमाणं कोशस्य च महीपतिः।
विज्ञाय राजा कौन्तेयो यज्ञायैव मनो दधे ॥ २-३६-८ (१२८४३)
सुहृदश्चैव ये सर्वे पृथक्च सहचाब्रुवन्।
यज्ञकालस्तव विभो क्रियतामत्र साम्प्रतम् ॥ २-३६-९ (१२८४४)
अथैवं ब्रुवतामेव तेषामभ्याययौ हरिः।
ऋषिः पुराणो वेदात्मा दृश्यश्चैव विजानताम् ॥ २-३६-१० (१२८४५)
जगतस्तस्थुषां श्रेष्ठः प्रभवश्चाप्ययश्च ह।
भूतभव्यभवन्नाथः केशवः केशिसूदनः ॥ २-३६-११ (१२८४६)
प्राकारः सर्ववृष्णीनामापत्स्वभयदोऽरिहा।
बलाधिकारे निक्षिप्य सम्यगानकदुन्दुभिम् ॥ २-३६-१२ (१२८४७)
उच्चावचमुपादाय धर्मराजाय माधवः।
धनौघं पुरुषव्याघ्रो बलेन महता वृतः ॥ २-३६-१३ (१२८४८)
तं धनौघमपर्यन्तं रत्नसागरमक्षयम्।
नादयन्रथघोषेण प्रविवेश पुरोत्तमम् ॥ २-३६-१४ (१२८४९)
पूर्णमापूरयंस्तेषां द्विषच्छोकावहोऽभवत्।
असूर्यमिव सूर्येण निवातमिव वायुना।
कृष्णेन समुपेतेन जहृषे भारतं पुरम् ॥ २-३६-१५ (१२८५०)
तं मुदाऽभिसमागम्य सत्कृत्य च यथाविधि।
स पृष्ट्वा कुशलं चैव सुखासीनं युधिष्ठिरः ॥ २-३६-१६ (१२८५१)
धौम्यद्वैपायनमुखैर्ऋत्विग्भिः पुरुषर्षभः।

भीमार्जुनयमैश्चैव सहितः कृष्णमब्रवीत् ॥ २-३६-१७ (१२८५२)
युधिष्ठिर उवाच ॥ २-३६-१८क्ष् (१४५३)
त्वत्कृते पृथिवी सर्वा मद्वशे कृष्ण वर्तते।
धनं च बहु वार्ष्णेय त्वत्प्रसादादुपार्जितम् ॥ २-३६-१८ (१२८५३)
सोऽहमिच्छामि तत्सर्वं विधिवद्देवकीसुत।
उपयोक्तुं द्विजाग्र्येभ्यो हव्यवाहे च माधव ॥ २-३६-१९ (१२८५४)
तदहं यष्टुमिच्छामि दाशार्ह सहितस्त्वया।
अनुजैश्च महाबाहो तन्माऽनुज्ञातुमर्हसि ॥ २-३६-२० (१२८५५)
तद्दीक्षापय गोविन्द त्वमात्मानं महाभुज।
त्वयीष्टवति दाशार्ह विपाप्मा भविता ह्यहम् ॥ २-३६-२१ (१२८५६)
मां वाप्यभ्यनुजानीह सहैभिरनुजैर्विभो।
अनुज्ञातस्त्वया कृष्ण प्राप्नुयां क्रतुमुत्तमम् ॥ २-३६-२२ (१२८५७)
वैशम्पायन उवाच। २-३६-२३क्ष् (१४५४)
तं कृष्णःस प्रत्युवाचेदं बहूक्त्वा गुणविस्तरम्।
त्वमेव राजशार्दूल रम्राडर्हो महाक्रतुम्।
सम्प्राप्नुहि त्वया प्राप्ते कृतकृत्यास्ततो वयम् ॥ २-३६-२३ (१२८५८)
यदस्वाभीप्सितं यज्ञं मयि श्रेयस्यवस्थिते।
नियुङ्क्ष्व त्वं च मां कृत्ये सर्वं कर्तास्मि ते वचः ॥ २-३६-२४ (१२८५९)
युधिष्ठिर उवाच। २-३६-२५क्ष् (१४५५)
सफलः कृष्ण सङ्कल्पः सिद्धिश्च नियता मम।
यस्यमे त्वं हृषीकेश यथेप्सितमुपस्थितः ॥ २-३६-२५ (१२८६०)
वैशम्पायन उवाच। २-३६-२६क्ष् (१४५६)
अनुज्ञातस्तु कृष्णेन पाण्डवो भ्रातृभिः सह।
ईजितुं राजसूयेन साधनान्युपचक्रमे ॥ २-३६-२६ (१२८६१)
ततस्त्वाज्ञापयामास पाण्डवोऽरिनिबर्हणः।
सहदेवं युधां श्रेष्ठं मन्त्रिणश्चैव सर्वशः ॥ २-३६-२७ (१२८६२)
अस्मिन्क्रतौ यथोक्तानि यज्ञाङ्गानि द्विजातिभिः।
यथोपकरणं सर्वं मङ्गलानि च सर्वशः ॥ २-३६-२८ (१२८६३)
अधियज्ञांश्च सम्भारान्दौम्योक्तान्क्षिप्रमेव हि।
समानयन्तु पुरुषा यथायोगं यथाक्रमम् ॥ २-३६-२९ (१२८६४)
इन्द्रसेनो विशोकश्च पूरश्चार्जुनसारथिः।
अन्नाद्याहरणे युक्ताः सन्तु मत्प्रियकाम्यया ॥ २-३६-३० (१२८६५)
सर्वकामाश्च कार्यन्तां रसगन्धसमन्विताः।
मनोरथप्रीतिकरा द्विजानां कुरुसत्तम ॥ २-३६-३१ (१२८६६)
वैशम्पायन उवाच ॥ २-३६-३२क्ष् (१४५७)
तद्वाक्यसमकालं च कृतं सर्वं न्यवेदयत्।

सहदेवो युधां श्रेष्ठो धर्मराजो युधिष्ठिरे ॥ २-३६-३२ (१२८६७)
ततो द्वैपायनो राजन्नृत्विजः समुपानयत्।
वेदानिव महाभागान्साक्षान्मूर्तिमतो द्विजान् ॥ २-३६-३३ (१२८६८)
स्वयं ब्रह्मत्वमकरोत्तस्य सत्यवतीसुतः।
धनञ्जयानामृषभः सुसामा सामगोऽभवत् ॥ २-३६-३४ (१२८६९)
याज्ञवल्क्यो बभूवाथ ब्रह्मिष्ठोऽध्वर्युसत्तमः।
पैलो होता वसोः पुत्रो धौम्येन सहितोऽभवत् ॥ २-३६-३५ (१२८७०)
एतेषां पुत्रवर्गाश्च शिष्याश्च भरतर्षभ।
बभूवुर्होत्रगाः सर्वे वेदवेदाङ्गपारगाः ॥ २-३६-३६ (१२८७१)
ते वाचयित्वा पुण्याहमूहयित्वा च तं विधिम्।
शास्त्रोक्तं पूजयामासुस्तद्देवयजनं महत् ॥ २-३६-३७ (१२८७२)
तत्र चक्रुरनुज्ञाताः शरणान्युत शिल्पिनः।
गन्धवन्ति विशालानि वेश्मानीव दिवौकसाम् ॥ २-३६-३८ (१२८७३)
तत आज्ञापयामास स राजा राजसत्तमः।
सहदेवं तदा सद्यो मन्त्रिणं पुरुषर्षभः ॥ २-३६-३९ (१२८७४)
आमन्त्रणार्थं दूतांस्त्वं प्रेषयस्वाशुगान्द्रुतम्।
उपश्रुत्य वचो राज्ञः स दूतान्प्राहिणोत्तदा ॥ २-३६-४० (१२८७५)
आमन्त्रयध्वं राष्ट्रेषु ब्राह्मणान्भूमिपानथ।
विनाश्च मान्याञ्शूद्रांश्च सर्वानानयतेति च ॥ २-३६-४१ (१२८७६)
वैशम्पायन उवाच ॥ २-३६-४२क्ष् (१४५८)
ते सर्वान्पृथिवीपालान्पाण्डवेयस्य शासनात्।
आमन्त्रयाम्बभूवुस्ते प्रेषयामास चापरान् ॥ २-३६-४२ (१२८७७)
दूताश्च वाहनैर्जग्मू राष्ट्राणि सुबहून्यपि।
ततो युधिष्ठिरो राजा प्रेषयामास पाण्डवम् ॥ २-३६-४३ (१२८७८)
नकुलं हास्तिनपुरं भीष्माय भरतर्षभ।
द्रोणाय धृतराष्ट्राय विदुराय कृपाय च।
भ्रातृणां चैव सर्वेणां येऽनुरक्ता युधिष्ठिरे ॥ २-३६-४४ (१२८७९)
ततस्ते तु यथाकालं कुन्तीपुत्रं युधिष्ठिरम्।
दीक्षयाञ्चक्रिरे विप्रा राजसूयाय भारत ॥ २-३६-४५ (१२८८०)
` ज्येष्ठामूले अमावास्यां मृगाजिनसमावृतः।
रौरवाजिनसंवीतो नवनीताक्तदेहवान्'॥ २-३६-४६ (१२८८१)
दीक्षितः स तु धर्मात्मा धर्मराजो युधिष्ठिरः।
जगाम यज्ञायतनं वृतो विप्रैः सहस्रशः ॥ २-३६-४७ (१२८८२)
भातृभिर्ज्ञातिभिश्चैव सुहृद्भिः सचिवैः सह।
क्षत्रियैश्च मनुष्येन्द्रैर्नानादेशसमागतैः ॥ २-३६-४८ (१२८८३)
अमात्यैश्च नरश्रेष्ठो धर्मो विग्रहवानिव।

आजग्मुर्ब्राह्मणास्तत्र विषयेभ्यस्ततस्ततः ॥ २-३६-४९ (१२८८४)
सर्वविद्यासु निष्णाता वेदवेदाङ्गपारगाः।
तेषामावसथांश्चक्रुर्धर्मराजस्य शासनात् ॥ २-३६-५० (१२८८५)
बह्वन्नाच्छादनैर्युक्तान्सगणानां पृथक् पृथक्।
सर्वर्तुगुणसम्पन्नाञ्शिल्पिनोऽथ सहस्रशः ॥ २-३६-५१ (१२८८६)
तेषु ते न्यवसन्राजन्ब्राह्मणा नृपसत्कृताः।
कथयन्तः कथा बह्वीः पश्यन्तो नटनर्तकान् ॥ २-३६-५२ (१२८८७)
भुञ्जतां चैव विप्राणां वदतां च महास्वनः।
अनिशं श्रूयते तत्र मुदितानां महात्मनाम् ॥ २-३६-५३ (१२८८८)
दीयतां दीयतामेषां भुज्यतां भुज्यतामिति।
एवम्प्रकाराः सञ्जल्पाः श्रूयन्तेस्मात्र नित्यशः ॥ २-३६-५४ (१२८८९)
गवां शतसहस्राणि शयनानां च भारत।
रुक्मस्य योषितां चैव धर्मराजः पृथक् ददौ ॥ २-३६-५५ (१२८९०)
प्रावर्ततैव यज्ञः स पाण्डवस्य महात्मनः।
पृथिव्यामेकवीरस्य शक्रस्येव त्रिविष्टपे ॥ ॥ २-३६-५६ (१२८९१)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-३६-५ मूर्छनं प्रदीपनम् ॥
२-३६-७ निचयो भाण्डागारम् ॥
२-३६-३४ धनञ्जयानां धनञ्जयगोत्राणां मध्ये श्रेष्ठः सुसामानाम आङ्गिरसः ॥

सभापर्व - अध्याय ०३७
॥ श्रीः ॥
२.३७. अध्यायः ३७

Mahabharata - Sabha Parva - Chapter Topics
आमन्त्रितानां सर्वेषां आगमनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

तत आमन्त्रिता राजन्राजानः सत्कृतास्तदा।
पुरेभ्यः प्रययुस्तेभ्यो विमानेभ्य इवामराः ॥ २-३७-१ (१२८९२)
ते वै दिग्भ्यः समापेतुः पार्थिवास्तत्र भारत।
समादाय महार्हाणि रत्नानि विविधानि च ॥ २-३७-२ (१२८९३)
तच्छ्रुत्वा धर्मराजस्य यज्ञे यज्ञविदस्तदा।
राजानः शतशस्तुष्टैर्मनोभिर्मनुर्षभ ॥ २-३७-३ (१२८९४)
बहु वित्तं समादाय विविधं पार्थिवा ययुः।
द्रष्टुकामाः सभां चैव धर्मराजं च पाण्डवम् ॥ २-३७-४ (१२८९५)
स गत्वा हास्तिनपुरं नकुलः समितिञ्जयः।
भीष्ममामन्त्रयाञ्चक्रे धृतराष्ट्रं च पाण्डवः ॥ २-३७-५ (१२८९६)
प्रयतः प्राञ्जलिर्भूत्वा भारतानानयत्तदा।
धृतराष्ट्रं च भीष्मं च विदुरं च महामतिम् ॥ २-३७-६ (१२८९७)
दुर्योधनमुखांश्चैव भ्रातॄन्सर्वानथानयत् ॥ २-३७-७ (१२८९८)
सत्कृत्यामन्त्रिताः सर्वे ह्याचार्यप्रमुखास्ततः।
प्रययुः प्रीतमनसो यज्ञं ब्रह्मपुरस्सराः ॥ २-३७-८ (१२८९९)
धृतराष्ट्रश्च भीष्मश्च विदुरस्च महामतिः।
दुर्योधनपुरोगाश्च भ्रातरः सर्व एव ते।
गान्धारराजः सुबलः शकुनिश्च महाबलः ॥ २-३७-९ (१२९००)
अचलो वृषकश्चैव कर्णश्च रथिनां वरः।
तथा शल्यश्च बलवान्बाह्लिकश्च महाबलः ॥ २-३७-१० (१२९०१)
सोमदत्तोऽथ कौरव्यो भूरिर्भूरिश्रवाः शलः।
अश्वत्थामा कृपो द्रोणः सैन्धवश्च जयद्रथः ॥ २-३७-११ (१२९०२)
यज्ञसेनः सपुत्रश्च साल्वश्च वसुधाधिपः।
प्राग्ज्योतिषश्च नृपतिर्भगदत्तो महारथः ॥ २-३७-१२ (१२९०३)
स तु सर्वैः सह म्लेच्छैः सागरानूपवासिभिः।
पार्वतीयाश्च राजानो राजा चैव बृहद्बलः ॥ २-३७-१३ (१२९०४)
पौण्ड्रको वासुदेवश्च वङ्गः कालिङ्गकस्तथा।
आकर्षाः कुन्तलाश्चैव गालवाश्चान्ध्रकास्तथा ॥ २-३७-१४ (१२९०५)
द्राविडाः सिंहलाश्चैव राजा काश्मीरकस्तथा।
कुन्तिभोजो महातेजाः पार्थिवो गौरवाहनः ॥ २-३७-१५ (१२९०६)
बाह्लिकाश्चापरे शूरा राजानः सर्व एव ते।
विराटः सह पुत्राभ्यां मावेल्लश्च महाबलः ॥ २-३७-१६ (१२९०७)
राजानो राजपुत्राश्च नानाजनपदेश्वराः।
शिशुपालो महावीर्यः सह पुत्रेण भारत ॥ २-३७-१७ (१२९०८)
आगच्छत्पाण्डवेयस्य यज्ञं समरदुर्मदः।
रामश्चैवानिरुद्धश्च कङ्कश्च सहसारणः ॥ २-३७-१८ (१२९०९)

गदप्रद्युम्नसाम्बाश्च चारुदेष्णश्च वीर्यवान्।
उल्मुको निशठश्चैव वीरश्चाङ्गावहस्तथा ॥ २-३७-१९ (१२९१०)
वृष्णयो निखिलाश्चान्ये समाजग्मुर्महारथाः।
एते चान्ये च बहवो राजानो मध्यदेशजाः ॥ २-३७-२० (१२९११)
आजग्मुः पाण्डुपुत्रस्य राजसूयं महाक्रतुम्।
ददुस्तेषामावसथान्धर्मराजस्य शासनात् ॥ २-३७-२१ (१२९१२)
बहुभक्ष्यान्वितान्राजन्दीर्घिकावृक्षशोभितान्।
तथा धर्मात्मजः पूजां चक्रे तेषां महात्मनाम् ॥ २-३७-२२ (१२९१३)
सत्कृताश्च यथोद्दिष्टाञ्जग्मुरावसथान्नृपाः।
कैलासशिखरप्रख्यान्मनोज्ञान्द्रव्यभूषितान् ॥ २-३७-२३ (१२९१४)
सर्वतः संवृतानुच्चैः प्राकारैः सुकृतैः सितैः।
सुवर्णजालसंवीतान्मणिकुट्टिमभूषितान् ॥ २-३७-२४ (१२९१५)
सुखारोहणसोपानान्महासनपरिच्छदान्।
स्नग्दामसमवच्छन्नानुत्तमागुरुगन्धिनः ॥ २-३७-२५ (१२९१६)
हंसेन्दुवर्णसदृशानायोजनसुदर्शनान्।
असम्बाधान्समद्वारान्युतानुच्चावचैर्गुणैः ॥ २-३७-२६ (१२९१७)
बहुधातुनिबद्धाङ्गान्हिमवच्छिखरानिव।
विश्रान्तास्ते ततोऽपश्यन्भूमिपा भूरिदक्षिणम् ॥ २-३७-२७ (१२९१८)
वृतं सदस्यैर्बहुभिर्धर्मराजं युधिष्ठिरम्।
तत्सदः पार्थिवैः कीर्णं ब्राह्मणैश्च महर्षिभिः।
भ्राजते स्म तदा राजन्नाकपृष्ठं यथाऽमरैः ॥ ॥ २-३७-२८ (१२९१९)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-३७-८ ब्रह्मपुरस्सराः ब्राह्मणपुरस्सराः ॥

सभापर्व - अध्याय ०३८
॥ श्रीः ॥
२.३८. अध्यायः ३८

Mahabharata - Sabha Parva - Chapter Topics
आगतान्भीष्मादीन्समान्य तत्तदधिकारेषु तेषांतेषां नियमनम् ॥ १.। राजसूययागः ॥ २.।

वैशम्पायन उवाच ॥

पितामहं गुरुं चैव प्रत्युद्गम्य युधिष्ठिरः।
अभिवाद्य ततो राजन्निदं वचनमब्रवीत् ॥ २-३८-१ (१२९२०)
भीष्मं द्रोणं कृपं द्रौणिं दुर्योधनविविंशती।
अस्मिन्यज्ञे भवन्तो मामनुगृह्णन्तु सर्वशः ॥ २-३८-२ (१२९२१)
इदं वः सुमहच्चैव यदिहास्ति धनं मम।
प्रणयन्तु भवन्तो मां यथेष्टमभिमन्त्रितः ॥ २-३८-३ (१२९२२)
एवमुक्त्वा स तान्सर्वान्दीक्षितः पाण्डवाग्रजः।
युयोज स यथायोगमधिकारेष्वनन्तरम् ॥ २-३८-४ (१२९२३)
ग्पङ्क्त्यारोपणकार्ये च उच्छिष्टापनये पुनः।
भोजनावेक्षणे चैव युयुत्सुं समयोजयत्'॥ २-३८-५ (१२९२४)
भक्ष्यभोज्याधिकारेषु दुःशासनमयोजयत्।
परिग्रहे ब्राह्मणानामश्वत्थामानमुक्तवान्। २-३८-६ (१२९२५)
राज्ञां तु प्रतिपूजार्थं सञ्जयं न्ययोजयत्।
कृताकृतपरिज्ञाने भीष्मद्रोणौ महामती ॥ २-३८-७ (१२९२६)
हिरण्यस्य सुवर्णस्य रत्नानां चान्ववेक्षणे।
दक्षिणानां च वै दाने कृपं राजा न्ययोजयत् ॥ २-३८-८ (१२९२७)
तथाऽऽन्यान्पुरुषव्याघ्रांस्तस्मिंस्तस्मिन्न्ययोजयत्।
बाह्लिको धृतराष्ट्रश्च सोमदत्तो जयद्रथः।
नकुलेन समानीताः स्वामिवत्तत्र रेमिरे ॥ २-३८-९ (१२९२८)
क्षत्ता व्ययकरस्त्वासीद्विदुरः सर्वधर्मवित्।
दुर्योधनस्त्वर्हणानि प्रतिजग्राह सर्वशः ॥ २-३८-१० (१२९२९)
ग्कुन्ती साध्वी च गान्धारी स्त्रीणां कुर्वन्ति चार्चनम् ॥
अन्याः सर्वाः स्नुषास्तासां सन्देशं यान्तु माचिरम्।
तिष्ठेत्कृष्णान्तिके सोयमर्जुनः कार्यसिद्धये'॥ २-३८-११ (१२९३०)
चरणक्षालने कृष्णो ब्राह्मणानां स्वयं ह्यभूत्।
सर्वलोकसमावृत्तः पिप्रीषुः फलमुत्तमम् ॥ २-३८-१२ (१२९३१)
द्रष्टुकामः सभां चैव धर्मराजं यधिष्ठिरम्।
न कश्चिदाहरत्तत्र सहस्रावरमर्हणम् ॥ २-३८-१३ (१२९३२)
रत्नैश्च बहुभिस्तत्र धर्मराजमवर्धयत्।
कथं तु मम कौरव्यो रत्नदानैः समाप्नुयात् ॥ २-३८-१४ (१२९३३)
यज्ञमित्येव राजानः स्पर्धमाना ददुर्धनम्।
भवनैः सविमानाग्रैः सोदर्कैर्बलसंवृतैः ॥ २-३८-१५ (१२९३४)

लोकराजविमानैश्च ब्राह्मणावसथैः सह।
कृतैरावसथैर्दिव्यैर्विमानप्रतिमैस्तथा ॥ २-३८-१६ (१२९३५)
विचित्रै रत्ववद्भिश्च ऋद्ध्या परमया युतैः।
राजभिश्च समावृत्तैरतीव श्रीसमृद्धिभिः।
अशोभत सदो राजन्कौन्तेयस्य महात्मनः ॥ २-३८-१७ (१२९३६)
ऋद्ध्या तु वरुणं देवं स्पर्धमानो युधिष्ठिरः।
षडग्निनाथ यज्ञेन सोऽयजद्दक्षिणावता ॥ २-३८-१८ (१२९३७)
सर्वाञ्जनान्सर्वकामैः समृद्धैः समतर्पयत्।
अन्नवान्बहुभक्ष्यश्च भुक्तवज्जनसंवृतः।
रत्नोपहारसम्पन्नो बभूव स समागमः ॥ २-३८-१९ (१२९३८)
इडाज्यहोमाहुतिभिर्मन्त्रशिक्षाविशारदैः।
तस्मिन्हि ततृपुर्देवास्तते यज्ञे महर्षिभिः ॥ २-३८-२० (१२९३९)
यथा देवास्तथा विप्रा दक्षिणान्नमहाधनैः।
ततृपुः सर्ववर्णाश्च तस्मिन्यज्ञे मुदाऽन्विताः ॥ ॥ २-३८-२१ (१२९४०)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ ॥ समाप्तं च राजसूयपर्व॥

सभापर्व - अध्याय ०३९
॥ श्रीः ॥
२.३९. अध्यायः ३९

Mahabharata - Sabha Parva - Chapter Topics
अभिषेचनदिने ब्राह्मणादीनामन्तर्वेदिप्रवेशः ॥१.।भूभारक्षपणे नारदचिन्तनम् ॥२.।पूर्वं सङ्क्षिप्योक्तायाः कृष्ण

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततोऽभिषेचनीयेऽह्नि ब्राह्मणा राजभिः सह।
अन्तर्वेदीं प्रविविशुः सत्काराहा महर्षयः ॥ २-३९-१ (१२९४१)
नारदप्रमुखास्तस्यामन्तर्वेद्यां महात्मनः।
समासीनाः शुशुभिरे सहराजर्षिभिस्तदा ॥ २-३९-२ (१२९४२)
समेता ब्रह्मभवने देवा देवर्षयस्तथा।
कर्मान्तरमुपासन्तो जजल्पुरमितौजसः ॥ २-३९-३ (१२९४३)

एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा।
इत्यूचुर्बहवस्तत्र वितण्डां वै परस्परम् ॥ २-३९-४ (१२९४४)
कृशानर्थांस्ततः केचिदकृशांस्तत्र कुर्वते।
अकृशांश्च कृशांश्चक्रुर्हेतुभिः शास्त्रनिश्चयैः ॥ २-३९-५ (१२९४५)
तत्र मेधाविनः केचिदर्थमन्यैरुदीरितम्।
विचिक्षिपुर्यथा श्येना नभोगतमिवामिषम् ॥ २-३९-६ (१२९४६)
केचिद्धर्मार्थकुशलाः केचित्तत्र महाव्रताः।
रेमिरे कथयन्तश्च सर्वभाष्यविदां वराः ॥ २-३९-७ (१२९४७)
सा वेदिर्वेदसम्पन्नैर्देवद्विजमहर्षिभिः।
आबभासे समाकीर्णा नक्षत्रैर्द्यौरिवायता ॥ २-३९-८ (१२९४८)
न तस्यां सन्निधौ शूद्रः कश्चिदासीन्न चाव्रती।
अन्तर्वेद्यां तदा राजन्युधिष्ठिरनिवेशने ॥ २-३९-९ (१२९४९)
तां तु लक्ष्मीवतो लक्ष्मीं तदा यज्ञविधानजाम्।
तुतोष नारदः पश्यन्धर्मराजस्य धीमतः ॥ २-३९-१० (१२९५०)
अथ चिन्तां समापेदे स मुनिर्मनुजाधिप।
नारदस्तु तदा पश्यन्सर्वक्षत्रसमागमम् ॥ २-३९-११ (१२९५१)
सस्मार च पुरावृत्तां कथां तां पुरुषर्षभ।
अंशावतरणे याऽसौ ब्रह्मणो भवनेऽभवत् ॥ २-३९-१२ (१२९५२)
देवानां सङ्गमं तं तु विज्ञाय कुरुनन्दन।
नारदः पुण्डरीकाक्षं सस्मार मनसा हरिम् ॥ २-३९-१३ (१२९५३)
साक्षात्स विबुधारिघ्नः क्षत्रे नारायणो विभुः।
प्रतिज्ञां पालयंश्चेमां जातः परपुरञ्जयः ॥ २-३९-१४ (१२९५४)
सन्दिदेश पुरा योऽसौ विबुधान्भूतकृत्स्वयम्।
अन्योन्यमभिनिघ्नन्तः पुनर्लोकानवाप्स्यथ ॥ २-३९-१५ (१२९५५)
इति नारायणः शम्भुर्भगवान्भूतभावनः।
आदिश्य विबुधान्सर्वानजायत यदुक्षये ॥ २-३९-१६ (१२९५६)
क्षितावन्धकवृष्णीनां वंशे वंशभृतां वरः।
परया शुशुभे लक्ष्म्या नक्षत्राणामिवोडुराट् ॥ २-३९-१७ (१२९५७)
यस्य बाहुबलं सेन्द्राः सुराः सर्व उपासते।
सोयं मानुषवन्नाम हरिरास्तेऽरिमर्दनः ॥ २-३९-१८ (१२९५८)
अहो बत महद्भूतं स्वयम्भूर्यदिदं स्वयम्।
आदास्यति पुनः क्षत्रमेवं बलसमन्वितम् ॥ २-३९-१९ (१२९५९)
इत्येतां नारदश्चिन्तां चिन्तयामास सर्ववित्।
हरिं नारायणं ज्ञात्वा यज्ञैरीज्यं तमीश्वरम् ॥ २-३९-२० (१२९६०)
तस्मिन्धर्मविदां श्रेष्ठो धर्मराजस्य धीमतः।
महाध्वरे महाबुद्धिस्तस्थौ स बहुमानतः ॥ २-३९-२१ (१२९६१)

ग्ततः समुदिता मुख्यैर्गुणैर्गुणवतां वराः।
बहवो भावितात्मानः पृथक्पृथगरिन्दमाः ॥ २-३९-२२ (१२९६२)
आत्मकृत्यमिति ज्ञात्वा पाञ्चालास्तत्र सर्वशः।
समीयुर्वृष्णयश्चैव तदाऽनीकाग्रहारिणः ॥ २-३९-२३ (१२९६३)
सदाराः सजनामात्या वहन्तो रत्नसञ्चयान्।
विकृष्टत्वाच्च देशस्य गुरुभारतया च ते ॥ २-३९-२४ (१२९६४)
ययुः प्रमुदिताः पश्चाद्भगवन्तं समन्वयुः।
बलशेषं समुदितं परिगृह्य समन्ततः ॥ २-३९-२५ (१२९६५)
अजश्चक्रायुधः शौरिरमित्रगणमर्दनः।
बलाधिकारे निक्षिप्य संमान्यानकदुन्दुभिम् ॥ २-३९-२६ (१२९६६)
सम्प्रायाद्यादवश्रेष्ठो जयमाने युधिष्ठिरे।
उच्चावचमुपादाय धर्मराजाय माधवः ॥ २-३९-२७ (१२९६७)
धनौघं पुरतः कृत्वा खाण्डवप्रस्थमाययौ।
तत्र यज्ञगतान्पश्यंश्चैद्यवर्गसमागतान् ॥ २-३९-२८ (१२९६८)
भूमिपालगणान्सर्वान्सप्रभानिव तोयदान्।
मेघकायान्निवसतो यूथपानिव यूथपः ॥ २-३९-२९ (१२९६९)
बलिनः सिंहसङ्काशान्महीमावृत्य तिष्ठतः।
ततो जनौघसम्बाधं राजसागरमव्ययम् ॥ २-३९-३० (१२९७०)
नादयन्रथघोषेण ह्युपायान्मधुसूदनः।
असूर्यमिव सूर्येण निवातमिव वायुना ॥ २-३९-३१ (१२९७१)
कृष्णेन समुपेतेन जहर्षे भारतं पुरम्।
ब्राह्मणक्षत्रियाणां तु पूजार्थं ह्यर्थधर्मवित् ॥ २-३९-३२ (१२९७२)
सहदेवो विशेषज्ञो माद्रीपुत्रः कृतोऽभवत्।
भगवन्तं तु भूतानां भास्वन्तमिव तेजसा ॥ २-३९-३३ (१२९७३)
विशन्तं यज्ञभूमिं तां सितस्यावरजं प्रभुम्।
तेजोराशिमृषिं विप्रमदृश्यं वै विजानताम् ॥ २-३९-३४ (१२९७४)
वयोधिकानां वृद्धानां मार्गमात्मनि तिष्ठताम्।
जगतस्तस्थुषश्चैव प्रभवाप्ययमच्युतम् ॥ २-३९-३५ (१२९७५)
अनन्तमन्तं शत्रूणाममित्रगणमर्दनम्।
प्रभवं सर्वभूतानामापत्स्वभयमच्युतम् ॥ २-३९-३६ (१२९७६)
भविष्यं भावनं भूतं द्वारवत्यामरिन्दमम्।
स दृष्ट्वा कृष्णमायान्तं प्रतिपूज्यामितौजसम् ॥ २-३९-३७ (१२९७७)
यथार्हं केशवे वृत्तिं प्रत्यपद्यत पाण्डवः।
ज्यैष्ठ्यकानिष्ठ्यसंयोगं सम्प्रधार्य गुणागुणैः ॥ २-३९-३८ (१२९७८)
आरिराधयिषुर्धर्मः पूजयित्वा द्विजोत्तमान्।
महदादित्यसङ्काशमासनं च जगत्पतेः।

ददौ नासादितं कैश्चित्तस्मिन्नुपविवेश सः'॥ २-३९-३९ (१२९७९)
ततो भीष्मोऽब्रवीद्राजन्धर्मराजं युधिष्ठिरम्।
क्रियतामर्हणं राज्ञां यथार्हमिति भारत ॥ २-३९-४० (१२९८०)
आचार्यमृत्विजं चैव संयुजं च युधिष्ठिर।
स्नातकं च प्रियं प्राहुः षडर्घार्हान्नृपं तथा ॥ २-३९-४१ (१२९८१)
एतानर्घ्यानभिगतानाहुः संवत्सरोषितान्।
त इमे कालपूगस्य महतोऽस्मानुपागताः ॥ २-३९-४२ (१२९८२)
एषामेकैकशो राजन्नर्घ आनीयतामिति।
अथ तैषां वरिष्ठाय समर्थायोपनीयताम् ॥ २-३९-४३ (१२९८३)
युधिष्ठिर उवाच ॥ २-३९-४४क्ष् (१४५९)
कस्मै भवान्मन्यतेऽर्घमेकस्मै कुरुनन्दन।
उपनीयमानं युक्तं च तन्मे ब्रूहि पितामह ॥ २-३९-४४ (१२९८४)
वैशम्पायन उवाच ॥ २-३९-४५क्ष् (१४६०)
ततो भीष्मः शान्तनवो बुद्ध्या निश्चित्य वीर्यवान्।
वार्ष्णेयं मन्यते कृष्णमर्हणीयतमं भुवि ॥ २-३९-४५ (१२९८५)
भीष्ण उवाच ॥ २-३९-४६क्ष् (१४६१)
एष ह्येषां समस्तानां तेजोबलपराक्रमैः।
मध्ये तपन्निवाभाति ज्योतिषामिव भास्करः ॥ २-३९-४६ (१२९८६)
असूर्यमिव सूर्येण निर्वातमिव वायुना।
भासितं ह्लादितं चैव कृष्णेनेदं सदो हि नः ॥ २-३९-४७ (१२९८७)
तस्मै भीष्माभ्यनुज्ञातः सहदेवः प्रतापवान्।
उपजह्रेऽथ विधिवद्वार्ष्णेयायार्घ्यमुत्तमम् ॥ २-३९-४८ (१२९८८)
ग्गामर्घ्यं मधुपर्कं च ह्यानीयोपाहरत्तदा।
एतस्मिन्नन्तरे राजन्निदमासीत्तदाऽद्भुतम् ॥ २-३९-४९ (१२९८९)
तां दृष्ट्वा क्षत्रियाः सर्वे पूजां कृष्णस्य भूयसीम्।
सम्प्रेक्ष्यान्योन्यमासीना हृदयैस्तामधारयन्'॥ २-३९-५० (१२९९०)
प्रतिजग्राह तां कृष्णः शास्त्रदृष्टेन कर्मणा।
शिशुपालस्तु तां पूजां वासुदेवे न चक्षमे ॥ २-३९-५१ (१२९९१)
उपालभ्य स भीष्मं च धर्मराजं च संसदि।
अवाक्षिपद्वासुदेवं चेदिराजो महाबलः ॥ २-३९-५२ (१२९९२)
ग्तेषामाकारभावज्ञः सहदेवो न चक्षमे।
मानिनां बलिनां राज्ञां पुरः सन्दर्शिते पदे ॥ २-३९-५३ (१२९९३)
पुष्पवृष्टिर्महत्यासीत्सहदेवस्य मूर्धनि।
जन्मप्रभृति वृष्णीना सुनीथः शत्रुरब्रवीत् ॥ २-३९-५४ (१२९९४)
प्रष्टा वियोनिजो राजा प्रतिवक्ता नदीसुतः।
प्रतिग्रहीता गोपालः प्रदाता च वियोनिजः ॥ २-३९-५५ (१२९९५)

सदस्या मूकवत्सर्वे आसतेऽत्र किमुच्यते।
इत्युक्त्वा स विहस्याशु पाण्डुं पुनरब्रवीत् ॥ २-३९-५६ (१२९९६)
अतिपश्यसि वा सर्वान्न वा पश्यसि पाण्डव।
तिष्ठत्स्वन्येषु पूज्येषु गोपमर्चितवानसि ॥ २-३९-५७ (१२९९७)
एते चैवोभये तात कार्यस्य तु विनाशके।
अतिदृष्टिरदृष्टिर्वा तयोः किं त्वं समास्थितः'॥ ॥ २-३९-५८ (१२९९८)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि एकोनचत्वारिंशोऽध्यायः ॥३९.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-३९-४१ संयुजं सम्बन्धिनं श्वशुरादिम् ।प्रियं मित्रम् ॥
२-३९-५२ अवाक्षिपद्दूषितवान् ॥

सभापर्व - अध्याय ०४०
॥ श्रीः ॥
२.४०. अध्यायः ४०

Mahabharata - Sabha Parva - Chapter Topics
शिशुपालेन अनेकधा कृष्णोपालम्भनपूर्वकं सभातो निर्गमनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

शिशुपाल उवाच।

नायमर्हति वार्ष्णेयस्तिष्ठत्स्विह महात्मसु।
महीपतिषु कौरव्य राजवत्पार्थिवार्हणम् ॥ २-४०-१ (१२९९९)
नायं युक्तः समाचारः पाण्डवेषु महात्मसु।
यत्कामाद्देवकीपुत्रं पाण्डवार्चितवानसि ॥ २-४०-२ (१३०००)
बाला यूयं न जानीध्वं धर्मः सूक्ष्मो हि पाण्डवाः।
अयं तत्राभ्यतिक्रान्तो ह्यापगेयोऽल्पदर्शनः ॥ २-४०-३ (१३००१)
त्वादृशो धर्मयुक्तो हि कुर्वाणः प्रियकाम्यया।
भवत्यभ्यधिकं भीष्मो लोकेष्ववमतः सताम् ॥ २-४०-४ (१३००२)
कथं ह्यराजा दाशार्हो मध्ये सर्वमहीक्षिताम्।
अर्हणामर्हति तथा यथा युष्माभिरर्चितः ॥ २-४०-५ (१३००३)

अथवा मन्यसे कृष्णं स्थविरं कुरुपुङ्गवः।
वसुदेवे स्थिते वृद्धे कथमर्हति तत्सुतः ॥ २-४०-६ (१३००४)
अथवा वासुदेवोऽपि प्रियकामोऽनुवृत्तवान्।
द्रुपदे तिष्ठति कथं माधवोऽर्हति पूजनम् ॥ २-४०-७ (१३००५)
आचार्यं मन्यसे कृष्णमथवा कुरुनन्दन।
द्रोणे तिष्ठति वार्ष्णेयं कस्मादर्चितवानसि ॥ २-४०-८ (१३००६)
ऋत्विजं मन्यसे कृष्णमथवा कुरुनन्दन।
द्वैपायने स्थिते वृद्धे कथं कृष्णोऽर्चितस्त्वया ॥ २-४०-९ (१३००७)
भीष्मे शान्तनवे राजन्स्थिते पुरुषसत्तमे।
स्वच्छन्दमृत्युके राजन्कथं कृष्णोऽर्चितस्त्वया ॥ २-४०-१० (१३००८)
अश्वत्थाम्नि स्थिते वीरे सर्वशास्त्रविशारदे।
कथं कृष्णस्त्वया राजन्नर्चितः कुरुनन्दन ॥ २-४०-११ (१३००९)
दुर्योधने च राजेन्द्रे स्थिते पुरुषसत्तमे।
कृपे च भारताचार्ये कथं कृष्णस्त्वयाऽर्चितः ॥ २-४०-१२ (१३०१०)
द्रुमं कम्पुरुषाचार्यमतिक्रम्य तथाऽर्चितः।
भीष्मके चैव दुर्धर्षे पाण्डुवत्कृतलक्षणे ॥ २-४०-१३ (१३०११)
नृपे च रुक्मिणि श्रेष्ठे एकलव्ये तथैव च।
शल्ये मद्राधिपे चैव कथं कृष्णस्त्वयार्चितः ॥ २-४०-१४ (१३०१२)
अयं च सर्वराज्ञां वै बलश्लाघी महाबलः।
जामदग्न्यस्य दयितः शिष्यो विप्रस्य भारत ॥ २-४०-१५ (१३०१३)
येनात्मबलमाश्रित्य राजानो युधि निर्जिताः।
तं च कर्णमतिक्रम्य कथं कृष्णस्त्वयार्चितः ॥ २-४०-१६ (१३०१४)
नैवर्त्विङ्नैव चाचार्यो न राजा मधुसूदनः।
अर्चितश्च कुरुश्रेष्ठ किमन्यत्प्रियकाम्यया ॥ २-४०-१७ (१३०१५)
अथवाऽभ्यर्चनीयोऽयं युष्माकं मधुसूदनः।
किं राजभिरिहानीतैरवमानाय भारत ॥ २-४०-१८ (१३०१६)
वयं तु न भयादस्य कौन्तेयस्य महात्मनः।
प्रयच्छामः करान्सर्वे न लोभान्न च सान्त्वनात् ॥ २-४०-१९ (१३०१७)
अस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः।
करानस्मै प्रयच्छामः सोऽयमस्मान्न मन्यते ॥ २-४०-२० (१३०१८)
किमन्यदवमनानाद्धि यदेनं राजसंसदि।
अप्राप्तलक्षणं कृष्णमर्घ्येणार्चितवानसि ॥ २-४०-२१ (१३०१९)
अकस्माद्धर्मपुत्रस्य धर्मात्मेति यशो गतम्।
को हि धर्मच्युते पूजामेवं युक्तां नियोजयेत् ॥ २-४०-२२ (१३०२०)
योयं वृष्णिकुले जातो राजानं हतवान्पुरा।
जरासन्धं महात्मानमन्यायेन दुरात्मवान् ॥ २-४०-२३ (१३०२१)

अद्य धर्मात्मता चैव व्यपकृष्टा युधिष्ठिरात्।
दर्शितं कृपणत्वं च कृष्णेऽर्घ्यस्य निवेदनात् ॥ २-४०-२४ (१३०२२)
यदि भीताश्च कौन्तेयाः कृपणाश्च तपस्विनः।
ननु त्वयाऽपि बोद्धव्यं यां पूजां माधवार्हसि ॥ २-४०-२५ (१३०२३)
अथवा कृपणैरेतामुपनीतां जनार्दन।
पूजामनर्हः कस्मात्त्वमभ्यनुज्ञातवानसि ॥ २-४०-२६ (१३०२४)
अयुक्तामात्मनः पूजां त्वं पुनर्बहुमन्यसे।
हविषः प्राप्य निष्यन्दं प्राशिता श्वेव निर्जने ॥ २-४०-२७ (१३०२५)
न त्वं पार्थिवेन्द्राणामपमानः प्रयुज्यते।
त्वामेव कुरवो व्यक्तं प्रलम्भन्ते जनार्दन ॥ २-४०-२८ (१३०२६)
क्लीबे दारक्रिया यादृगन्धे वा रूपदर्शनम्।
अराज्ञो राजवत्पूजा तथा ते मधुसूदन ॥ २-४०-२९ (१३०२७)
दृष्टो युधिष्ठिरो राजा दृष्टो भीष्मश्च यादृशः।
वासुदेवोऽप्ययं दृष्टः सर्वमेतद्यथातथम् ॥ २-४०-३० (१३०२८)
इत्युक्त्वा शिशुपालस्तानुत्थाय परमासनात्।
निर्ययौ सदसस्तस्मात्सहितो राजभिस्तदा ॥ ॥ २-४०-३१ (१३०२९)

इति श्रीमन्महाभारते सभापर्वणि दिग्विजयपर्वणि चत्वारिंशोऽध्यायः ॥ ४०.।

सभापर्व - अध्याय ०४१
॥ श्रीः ॥
२.४१. अध्यायः ४१

Mahabharata - Sabha Parva - Chapter Topics
शिशुपालं सान्त्वयन्तं युधिष्ठिरं निवार्य भीष्णेण श्रीकृष्णमाहात्म्यकथनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

ततो युधिष्ठिरो राजा शिशुपालमुपाद्रवत्।
उवाच चैनं मधुरं सान्त्वपूर्वमिदं वचः ॥ २-४१-१ (१३०३०)
नेदं युक्तं महीपाल यादृशं वै त्वमुक्तवान्।
अधर्मश्च परो राजन्पारुष्यं च निरर्थकम् ॥ २-४१-२ (१३०३१)

न हि धर्मं परं जातु नावबुध्येत पार्थिवः।
भीष्मः शान्तनवस्त्वेनं मावमंस्थास्त्वमन्यथा ॥ २-४१-३ (१३०३२)
पश्य चैतान्महीपालांस्त्वत्तो वृद्धतरान्बहून्।
मृष्यन्ते चार्हणां कृष्णे तद्वत्वं क्षन्तुमर्हसि ॥ २-४१-४ (१३०३३)
वेद तत्त्वेन कृष्णं हि भीष्मश्चेदिपते भृशम्।
न ह्येनं त्वं तथा यथैनं वेद कौरवः ॥ २-४१-५ (१३०३४)
भीष्म उवाच। २-४१-६क्ष् (१४६२)
नास्मै देयो ह्यनुनयो नायमर्हति सान्त्वनम्।
लोकवृद्धतमे कृष्णे योऽर्हणां नाभिमन्यते ॥ २-४१-६ (१३०३५)
क्षत्रियः क्षत्रियं जित्वा रणे रणकृतां वरः।
यो मुञ्चति वशे कृत्वा गुरुर्भवति तस्य सः ॥ २-४१-७ (१३०३६)
अस्यां हि समितौ राज्ञामेकमप्यजितं युधि।
न पश्यामि महीपालं सात्वतीपुत्रतेजसा ॥ २-४१-८ (१३०३७)
न हि केवलमस्माकमयमर्च्यतमोऽच्युतः।
त्रयाणामपि लोकानामर्चनीयो महाभुजः ॥ २-४१-९ (१३०३८)
कृष्णेन हि जिता युद्धे बहवः क्षत्रियर्षभाः।
जगत्सर्वं च वार्ष्णेये निखिलेन प्रतिष्ठितम् ॥ २-४१-१० (१३०३९)
तस्मात्सत्स्वपि वृद्धेषु कृष्णमर्चाम नेतरान्।
एवं वक्तुं न चार्हस्त्वं मा तेऽभूद्बुद्धिरीदृशी ॥ २-४१-११ (१३०४०)
ज्ञानवृद्धा मया राजन्बहवः पर्युपासिताः।
ग्यस्य राजन्प्रभावज्ञाः पुरा सर्वे च रक्षिताः'।
तेषां कथयतां शौरेरहं गुणवतो गुणान् ॥ २-४१-१२ (१३०४१)
समागतानामश्रौषं बहून्बहुमतान्सताम्।
कर्माण्यपि च यान्यस्य जन्मप्रभृति धीमतः ॥ २-४१-१३ (१३०४२)
बहुशः कथ्यमानानि नरैर्भूयः श्रुतानि मे।
न केवलं वयं कामाच्चेदिगज जनार्दनम् ॥ २-४१-१४ (१३०४३)
न सम्बन्धं पुरस्कृत्य कृतार्थं वा कथञ्चन।
अर्चामहेऽर्चितं सद्भिर्भुवि भूतसुखावहम् ॥ २-४१-१५ (१३०४४)
यशः शौर्यं जयं चास्य विज्ञायार्चां प्रयुञ्ज्महे
न च कश्चिदिहास्माभिः सुबालोप्यपरीक्षितः ॥ २-४१-१६ (१३०४५)
गुणैर्वृद्धानतिक्रम्य हरिरर्च्यतमो मतः।
ज्ञानवृद्धो द्विजातीनां क्षत्रियाणां बलाधिकः ॥ २-४१-१७ (१३०४६)
वैश्यानां धान्यधनवाञ्शूद्राणामेव जन्मतः।
पूज्यतायां च गोविन्दे हेतू द्वावपि संस्थितौ ॥ २-४१-१८ (१३०४७)
वेदवेदाङ्गविज्ञानं बलं चाभ्यधिकं तथा।
नृणां लोके हि कोऽन्योस्ति विशिष्टः केशवादृते ॥ २-४१-१९ (१३०४८)

दानं दाक्ष्यं श्रुतं शौर्यं ह्रीः कीर्तिर्बुद्धिरुत्तमा।
संनतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताऽच्युते ॥ २-४१-२० (१३०४९)
तमिमं लोकसम्पन्नमाचार्यं पितरं गुरुम्।
अर्घ्यमर्चितमर्चामः सर्वे सङ्क्षन्तुमर्हथ ॥ २-४१-२१ (१३०५०)
ऋत्विग्गुरुर्विवाह्यश्च स्नातको नृपतिः प्रियः।
सर्वमेतद्धृषीकेशस्तस्मादभ्यर्चितोऽच्युतः ॥ २-४१-२२ (१३०५१)
कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः।
कृष्णस्य हि कृते विश्वमिदं भूतं चराचरम् ॥ २-४१-२३ (१३०५२)
एष प्रकृतिरव्यक्ता कर्ता चैव सनातनः।
परश्च सर्वभूतेभ्यस्तस्मात्पूज्यतमोऽच्युतः ॥ २-४१-२४ (१३०५३)
बुद्धिर्मनो महद्वायुस्तेजोऽभः खं मही च या।
चतुर्विधं च यद्भूतं सर्वं कृष्णे प्रतिष्ठितम् ॥ २-४१-२५ (१३०५४)
आदित्यश्चन्द्रमाश्चैव नक्षत्राणि ग्रहाश्च ये।
दिशश्च विदिशश्चैव सर्वं कृष्णे प्रतिष्ठितम् ॥ २-४१-२६ (१३०५५)
ग एष रुद्रश्च सर्वात्मा ब्रह्मा चैव सनातनः।
अक्षरं क्षररूपेण मानुषत्वमुपागतः'॥ २-४१-२७ (१३०५६)
अग्निहोत्रमुखा वेदा गायत्री च्छन्दसां मुखम्।
राजा मुखं मनुष्याणां नदीनां सागरो मुखम् ॥ २-४१-२८ (१३०५७)
नक्षत्राणां मुखं चन्द्र आदित्यस्तेजसां मुखम्।
पर्वतानां मुखं मेरुर्गरुडः पततां मुखम् ॥ २-४१-२९ (१३०५८)
ऊर्ध्वं तिर्यगधश्चैव यावती जगतो गतिः।
सदेवकेषु लोकेषु भगवान्केशवो मुखम् ॥ २-४१-३० (१३०५९)
अयं तु पुरुषो बालः शिशुपालो न बुध्यते।
सर्वत्र सर्वदा कृष्णं तस्मादेवं प्रभाषते ॥ २-४१-३१ (१३०६०)
यो हि धर्मं विचिनुयादुत्कृष्टं मतिमान्नरः।
स वै पश्येद्यथा धर्मं न तथा चेदिराडयम् ॥ २-४१-३२ (१३०६१)
सवृद्धबालेष्वथवा पार्थिवेषु महात्मसु।
को नार्हं मन्यते कृष्णं को वाप्येनं न पूजयेत् ॥ २-४१-३३ (१३०६२)
अथैनां दुष्कृतां पूजां शिशुपालो व्यवस्यति।
दुष्कृतायां यथान्यायं तथाऽयं कर्तुमर्हति ॥ ॥ २-४१-३४ (१३०६३)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-४१-२५ चतुर्विधं जरायुजादि भौतिकम् ॥

सभापर्व - अध्याय ०४२
॥ श्रीः ॥
२.४२. अध्यायः ४२

Mahabharata - Sabha Parva - Chapter Topics
श्रीकृष्णस्याग्रपूजामसहमानानां शिरसि पदमाहितमिति सहदेववचनश्रवणेन शिशुपाल स्य कोपोदयः ॥१.।

Mahabharata - Sabha Parva - Chapter Text

ग्वैशम्पायन उवाच ॥

गाङ्गेयेनैवमुक्तस्तु शिशुपालश्चुकोप तम्।
क्रुद्धं सुनीथं दृष्ट्वाऽथ सहदेवोऽब्रवीत्तदा ॥ २-४२-१ (१३०६४)
मतिपूर्वमिदं सर्वं चेदिराज मया कृतम्।
तन्मे निगदतस्तत्त्वं कारणादत्र मे शृणु ॥ २-४२-२ (१३०६५)
स पार्थिवानां सर्वेषां गुरुः कृष्णोऽपरो न हि।
तस्मादभ्यर्चितोऽस्माभिः सर्वे संमन्तुमर्हथ ॥ २-४२-३ (१३०६६)
यो वा सहते कश्चिद्राज्ञां सबलवाहनः।
क्षिप्रं युद्धाय निर्यातु तस्य मूर्ध्न्याहितं पदम् ॥ २-४२-४ (१३०६७)
एवमुक्तो मया हेतुरुत्तरं प्रब्रवीतु मे। २-४२-५ (१३०६८)
वैशम्पायन उवाच ॥
ततो न व्याजहारैषां कश्चिद्बुद्धिमतां सताम् ॥ २-४२-५क्ष् (१४६३)
मानिनां बलिनां राज्ञां मध्ये सन्दर्शिते पदे।
एवमुक्ते सुनीथस्य सहदेवेन केशवे ॥ २-४२-६ (१३०६९)
स्वभावरक्ते नयने कोपाद्रक्ततरे कृते।
तस्य कोपं समुद्भूतं ज्ञात्वा भीष्मः प्रतापवान् ॥ २-४२-७ (१३०७०)
आचचक्षे पुनस्तस्मै कृष्णस्यैवोत्तरान्गुणान्।
स सुनीथं समामन्त्र्य तांश्च सर्वान्महीक्षितः ॥ २-४२-८ (१३०७१)
उवाच वदतां श्रेष्ठं इदं मतिमतां वरः।
सहदेवेन राजानो यदुक्तं केशवं प्रति।
तत्तथेति विजानीध्वं भूयश्चात्र विबोधत ॥ ॥ २-४२-९ (१३०७२)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

सभापर्व - अध्याय ०४३
॥ श्रीः ॥
२.४३. अध्यायः ४३

Mahabharata - Sabha Parva - Chapter Topics
श्रीकृष्णमहिम्नो विस्तरेण कथनाय भीष्मम्प्रति युधिष्ठिरप्रार्थना ॥१.।भीष्णेण विष्णोर्जगत्सृष्टिकथाकथनम् ॥२.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच।

ततो भीष्मस्य तच्छ्रुत्वा वचः काले युधिष्ठिरः।
ज्ञापनार्थाय सर्वेषां भीष्मं पुनरथाब्रवीत् ॥ २-४३-१ (१३०७३)
विस्तरेणास्य देवस्य कर्माणीच्छामि सर्वशः।
श्रोतुं भगवतस्तानि प्रब्रवीहि पितामह ॥ २-४३-२ (१३०७४)
कर्मणामानुपूर्वा च प्रादुर्भावाश्च ये विभोः।
यथा च प्रकृतिः कृष्णे तन्मे ब्रूहि पितामह ॥ २-४३-३ (१३०७५)
एवमुक्तस्तदा भीष्मः प्रोवाच भरतर्षभ।
युधिष्ठिरममित्रघ्नं तस्मिन्त्राजसमागमे ॥ २-४३-४ (१३०७६)
समक्षं वासुदेवस्य देवस्येव शतक्रतोः।
कर्माण्यसुकराण्यन्यैराचचक्षे जनाधिप ॥ २-४३-५ (१३०७७)
शृण्वतां पार्थिवानां च धर्मराजस्य चान्तिके।
इदं मतिमतां श्रेष्ठः कृष्णं प्रति विशाम्पते ॥ २-४३-६ (१३०७८)
नाम्नैवामन्त्र्य राजेन्द्र चेदिराजमरिन्दमम्।
भीमकर्मा ततो भीष्णो भूयः स इतमब्रवीत् ॥ २-४३-७ (१३०७९)
कुरूणामपि राजानं युधिष्ठिरमभाषत। २-४३-८ (१३०८०)
भीष्ण उवाच।
वर्तमानामतीतां च शृणु राजन्युधिष्ठिर ॥ २-४३-८क्ष् (१४६४)
ईश्वरस्योत्तमस्यैनां कर्मणां गहनां गतिम्।
अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान्प्रभुः ॥ २-४३-९ (१३०८१)
पुरा नारायणो देवः स्वयम्भूः प्रपितामहः।
सहस्रशीर्षः पुरुषो ध्रवोऽनन्तः सनातनः ॥ २-४३-१० (१३०८२)
सहस्रास्यः सहस्राक्षः सहस्रचरणो विभुः।
सहस्रवाहुः सर्वज्ञो देवो नामसहस्रवान् ॥ २-४३-११ (१३०८३)

सहस्रमुकुटो देवो विश्वरूपो महाद्युतिः।
अनेकवर्णो देवादिरव्यक्ताद्वै परे स्थितः ॥ २-४३-१२ (१३०८४)
असृजत्सलिलं पूर्वं स च नारायणः प्रभुः।
ततस्तु भगवांस्तोये ब्रह्माणमसृजत्स्वयम् ॥ २-४३-१३ (१३०८५)
ब्रह्मा चतुर्मुखो लोकान्सर्वांस्तानसृजत्स्वयम्।
आदिकाले पुरा ह्येवं सर्वलोकस्य चोद्भवः।
पुरा यः प्रलये प्राप्ते नष्टे स्थावरजङ्गमे ॥ २-४३-१४ (१३०८६)
ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे।
आभूतसम्प्लवे प्राप्ते प्रलीने प्रकृतौ महान् ॥ २-४३-१५ (१३०८७)
एकस्मिष्ठति सर्वात्मा स तु नारायणः प्रभुः।
नारायणस्य चाङ्गानि सर्वदैवानि भारत ॥ २-४३-१६ (१३०८८)
शिरस्तस्य दिवं राजन्नाभिः खं चरणौ मही।
अश्विनौ कर्णयोर्देवौ चक्षुषी शशिभास्करौ ॥ २-४३-१७ (१३०८९)
इन्द्रवैश्वानरौ देवौ मुखं तस्य महात्मनः।
अन्यानि सर्वदैवानि सर्वाङ्गानि महात्मनः ॥ २-४३-१८ (१३०९०)
सर्वं चापि हरौ संस्थं सूत्रे मणिगणा इव।
आभूतसम्प्लवान्तेऽथ दृष्ट्वा सर्वं तमोन्वितम् ॥ २-४३-१९ (१३०९१)
नारायणो महायोगी सर्वज्ञः परमात्मवान्।
ब्रह्मभूतस्तदात्मानं ब्रह्मणमसृजत्स्वयम् ॥ २-४३-२० (१३०९२)
सोऽध्यक्षः सर्वभूतानां प्रभूतप्रभवोऽच्युतः।
सनत्कुमारं रुद्रं च सप्तर्षींश्च तपोधनात् ॥ २-४३-२१ (१३०९३)
सर्वमेवासृजद्ब्रह्मा तथा लोकांस्तथा प्रजाः।
ते च तद्वसृजंस्तत्र प्राप्तकाले युधिष्ठिर ॥ २-४३-२२ (१३०९४)
तेभ्योऽभवन्महात्मभ्यो बहुधा ब्रह्म शाश्वतम्।
कल्पानां बहुकोट्यश्चसमतीतास्तु भारत ॥ २-४३-२३ (१३०९५)
आभूतसम्प्लवाश्चैव बहुधाऽद्धाऽपचक्रमुः।
मन्वन्तरयुगा राजन्सङ्कल्पो भूतसम्प्लवाः ॥ २-४३-२४ (१३०९६)
चक्रवत्परिवर्तन्ते सर्वं विषमुखं जगत्।
सृष्ट्वा चतुर्मुखं देवं देवो नारायणः प्रभुः ॥ २-४३-२५ (१३०९७)
स लोकानां हितार्थाय क्षीरोदे वसति प्रभुः।
ब्रह्मा च सर्वलोकानां लोकस्य च पितामहः ॥ २-४३-२६ (१३०९८)
ततो नारायणो देवः सर्वस्य प्रपितामहः। ॥ २-४३-२७ (१३०९९)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-४३-२५ विषमुखं जलादिकम् ॥

सभापर्व - अध्याय ०४४
॥ श्रीः ॥
२.४४. अध्यायः ४४

Mahabharata - Sabha Parva - Chapter Topics
मधुकैटभवधकथनम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच।

अव्यक्तो व्यक्तलिङ्गस्थो य एव भगवान्प्रभुः।
नरनारायणो भूत्वा हरिरासीद्युधिष्ठिर ॥ २-४४-१ (१३१००)
ब्रह्मा च शक्रः सूर्यश्च धर्मश्चैव सनातनः।
बहुशः सर्वभूतात्मा प्रादुर्भवति कार्यतः।
प्रादुर्भावांस्तु वक्ष्यामि दिव्यान्देवगणैर्युतान्। २-४४-२ (१३१०१)
सुप्त्वा युगसहस्रं स प्रादुर्भवति कार्यवान्।
अनेकबहुसाहस्रैर्देवदेवो जगत्पतिः ॥ २-४४-३ (१३१०२)
ब्रह्माणं कपिलं चैव परमेष्ठिं तथैव च।
देवान्सप्तर्षिभिश्चैव शङ्करं च महायशाः ॥ २-४४-४ (१३१०३)
सनत्कुमारं भगवान्मनुं चैव प्रजापतिम्।
पुरा चक्रे च देवादिः प्रदीप्ताग्निसमप्रभः ॥ २-४४-५ (१३१०४)
येन चार्णवमध्यस्थौ नष्टेस्थावरजङ्गमे।
नष्टदेवासुरवरे प्रनष्टोरगराक्षसे ॥ २-४४-६ (१३१०५)
योद्धुकामौ सुदुर्धर्षौ भ्रातरौ मधुकैठभौ।
हतौ भगवता तेन ततो दत्त्वा वरं परम् ॥ २-४४-७ (१३१०६)
भूमिं बद्ध्वा कृतौ पूर्वाविजेयौ द्वौ महाऽसुरौ।
तौ कर्णमलसंभूतौ विष्णोस्तस्य महात्मनः ॥ २-४४-८ (१३१०७)
महार्णवे प्रस्वपतः शैलराजसमौ स्थितौ।
तौ विवेश स्वयं वायुर्ब्रह्मणा साधु चोदितः ॥ २-४४-९ (१३१०८)
तौ दिवं छादयित्वा तु ववृधाते महाऽसुरौ।
वायुप्रमाणौ तौ दृष्ट्वा ब्रह्मा पर्यमृशच्छनैः ॥ २-४४-१० (१३१०९)

एकं मृदुतरं वेत्ति कठिनं वेत्ति चापरम्।
नामनी तु तयोश्चके सविता सलिलोद्भवः ॥ २-४४-११ (१३११०)
मृदुस्त्वयं मधुर्नाम कठिनः कैठभः स्वयम्।
तौ दैत्यौ कृतनामानौ चेरतुर्बलगर्वितौ ॥ २-४४-१२ (१३१११)
तौ पुराऽथ दिवं सर्वां प्राप्तौ राजन्महासुरौ।
प्रच्छाद्याथ दिवं सर्वां चेरतुर्मधुकैठभौ ॥ २-४४-१३ (१३११२)
सर्वमेकार्णवं लोकं योद्धुकामौ सुनिर्भयौ।
तौ गतावसुरौ दृष्ट्वा ब्रह्मा लोकपितामहः ॥ २-४४-१४ (१३११३)
एकार्णवाम्बुनिचये तत्रैवान्तरधीयत।
स पद्मात्पद्मनाभस्य नाभिदेशात्समुत्थितात् ॥ २-४४-१५ (१३११४)
आससाद स्वयं जन्म तत्पङ्कजमपङ्कजम्।
पूजयामास वसतिं ब्रह्मा लोकपितामहः ॥ २-४४-१६ (१३११५)
तावुभौ जलगर्भस्थौ नारायणचतुर्मुखौ।
बहून्वर्षायुतानप्सु शयानौ न च कम्पितौ ॥ २-४४-१७ (१३११६)
अथ दीर्घस्य कालस्य तावुभौ मधुकैठभौ।
आजग्मतुस्तौ तं देशं यत्र ब्रह्मा व्यवस्थितः ॥ २-४४-१८ (१३११७)
तौ दृष्ट्वा लोकनाथस्तु रोषात्संरक्तलोचनः।
उत्पपाताथ शयनात्पद्मनाभो महाद्युतिः ॥ २-४४-१९ (१३११८)
तद्युद्धमभवद्घोरं तयोस्तस्य च भारत।
एकार्णवे तदा घोरे त्रैलोक्ये जलतां गते ॥ २-४४-२० (१३११९)
तदभूत्तुमुलं युद्धं वर्षसङ्ख्यासहस्रशः।
न च तावसुरौ युद्धे तदा श्रममवापतुः ॥ २-४४-२१ (१३१२०)
अथ दीर्घस्य कालस्य तौ दैत्यौ युद्धदुर्मदौ।
ऊचतुः प्रीतमनसौ देवं नारायणं प्रभुम् ॥ २-४४-२२ (१३१२१)
प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः।
आवां जहि न यत्रोर्वा सलिलेन परिप्लुता ॥ २-४४-२३ (१३१२२)
हतौ च तव पुत्रत्वं प्राप्नुयाव सुरोत्तम।
यो ह्यावां युधि निर्जेता तस्यावां विहितौ सुतौ ॥ २-४४-२४ (१३१२३)
तयोस्तु वचनं श्रुत्वा तदा नारायणः प्रभुः।
तौ प्रहस्य मृधे दैत्यौ दोर्भ्यां च समपीडयम् ॥ २-४४-२५ (१३१२४)
ऊरुभ्यां निधनं चक्रे तावुभौ मधुकैठबौ।
तौ हतौ चाप्लुतौ तोये वपुर्भ्यामेकतां गतौ ॥ २-४४-२६ (१३१२५)
मेदो मुमुचतुर्दैत्यौ मज्जमानौ जलोर्मिभिः।
मेदसा तज्जलं व्याप्तं ताभ्यामन्तर्दधे तदा ॥ २-४४-२७ (१३१२६)
नारायणश्च भगवानसृजद्विविधाः प्रजाः।
दैत्ययोर्मेदसा छन्ना सर्वा राजन्वसुन्धरा ॥ २-४४-२८ (१३१२७)

तदाप्रभृति कौन्तेय मेदिनीति स्मृता मही।
प्रभावात्पद्मनाभस्य शाश्वती च कृता नृणाम् ॥ ॥ २-४४-२९ (१३१२८)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४.।

सभापर्व - अध्याय ०४५
॥ श्रीः ॥
२.४५. अध्यायः ४५

Mahabharata - Sabha Parva - Chapter Topics
वराहावतारकथनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

प्रादुर्भावसहस्राणि समतीतान्यनेकशः।
यथाशक्ति तु वक्ष्यामि शृणु तान्कुरुनन्दन ॥ २-४५-१ (१३१२९)
पुरा कमलनाभस्य स्वपतः सागराम्भसि।
पुष्करे यत्र सम्भूता देवा ऋषिगणैः सह ॥ २-४५-२ (१३१३०)
एष पौष्करिको नाम प्रादुर्भावः प्रकीर्तितः।
पुराणैः कथ्यते यत्र वेदश्रुतिसमाहितः ॥ २-४५-३ (१३१३१)
वाराहस्तु श्रुतिसुखः प्रादुर्भावो महात्मनः।
यत्र विष्णुः सुरश्रेष्ठो वाराहं रूपमास्थितः ॥ २-४५-४ (१३१३२)
उज्जहार महीं तोयात्सशैलवनकाननाम्।
वेदपादो यूपदंष्ट्रः क्रतुर्दन्तश्चितीमुखः ॥ २-४५-५ (१३१३३)
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः।
अहोरात्रेक्षणो दिव्यो वेदाङ्गः श्रुतिभूषणः ॥ २-४५-६ (१३१३४)
आज्यनासः स्रुवं तुण्डं सामघोषस्वनो महान्।
धर्मसत्यमयः श्रीमान्कर्मविक्रमसत्कृतः ॥ २-४५-७ (१३१३५)
प्रायश्चित्तमुखो धीरः पशुजानुर्महावृषः।
औद्गात्रहोमलिङ्गोऽसौ पशुबीजमहौषधिः ॥ २-४५-८ (१३१३६)
बाह्यन्तरात्मा मन्त्रास्थिविकृतः सौम्यदर्शनः।
वेदिस्कन्धो हविर्गन्धो हव्यकव्याभिवेगवान् ॥ २-४५-९ (१३१३७)

प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरूर्जितः।
दक्षिणाहृदयो योगी महाशास्त्रमयो महान् ॥ २-४५-१० (१३१३८)
उपाकर्मोष्ठरुचकः प्रावर्ग्यावर्तभूषणः।
शालापत्नीसहायो वै मणिशृङ्गसमुच्छ्रितः ॥ २-४५-११ (१३१३९)
एवं यज्ञवराहो वै भूत्वा विष्णुः सनातनः।
महीं सागरपर्यन्तां सशैलवनकाननाम् ॥ २-४५-१२ (१३१४०)
एकार्णवजले भ्रष्टामेकार्णवगतः प्रभुः।
मज्जन्तीं सलिले तस्मिन्स्वदेवीं पृथिवीं तदा ॥ २-४५-१३ (१३१४१)
उज्जहार विषाणेन मार्गण्डेयस्य पश्यतः।
शृङ्गेण यः समुद्धृत्य लोकानां हितकाम्यया ॥ २-४५-१४ (१३१४२)
सहस्रशीर्षो देवेशो निर्ममे जगतीं प्रभुः।
एवं यज्ञवराहेण भूतभव्यभात्मना ॥ २-४५-१५ (१३१४३)
उद्धृता पृथिवी देवी पूज्या वै सागराम्बरा।
निहता दानवाः सर्वे देवदेवेन विष्णुना ॥ २-४५-१६ (१३१४४)
वाराहः कथितो ह्येष नारसिंहमतो शृणु।
यत्र भूत्वा मृगेन्द्रेण हिरण्यकशिपुर्हतः ॥ ॥ २-४५-१७ (१३१४५)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

सभापर्व - अध्याय ०४६
॥ श्रीः ॥
२.४६. अध्यायः ४६

Mahabharata - Sabha Parva - Chapter Topics
हिरण्यकशिपुना समुद्रे तपश्चरणम् ॥१.।तपः प्रसन्नेन ब्रह्मणा तस्मै वरदानम् ॥२.।तस्य वरप्राप्त्या भीतानां देवा

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच।

दैत्येन्द्रो बलवान्राजन्सुरारिर्बलगर्वितः।
हिरण्यकशिपुर्नाम आसीत्त्रैलोक्यकण्टकः ॥ २-४६-१ (१३१४६)
दैत्यानामादिपुरुषो वीर्येणाप्रतिमो बली।
प्रविश्य जलधं राजंश्चकार तप उत्तमम् ॥ २-४६-२ (१३१४७)

दशवर्षसहस्राणि शतानि दश पञ्च च।
व्रतोपवासतस्तस्थौ स्थाणुमौनव्रतो दृढः ॥ २-४६-३ (१३१४८)
ततः शमदमाभ्यां च ब्रह्मचर्येण चानघ।
ब्रह्मा प्रीतमनास्तस्य तपसा नियमेन च ॥ २-४६-४ (१३१४९)
ततः स्वयम्भूर्भगवान्स्वयमागम्य भूपते।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ॥ २-४६-५ (१३१५०)
आदित्यैर्वसुभिः साध्यैर्मरुद्भिर्दैवतैस्तथा।
रुद्रैर्विश्वसहायैश्च यक्षराक्षसकिन्नरैः ॥ २-४६-६ (१३१५१)
दिशाभिर्विदिशाभिश्च नदीभिः सागरैः सह।
नक्षत्रैश्च मुहूर्तैश्च खेचरैश्चापरैर्ग्रहैः ॥ २-४६-७ (१३१५२)
देवर्षिभिस्तपोयुक्तैः सिद्धैः सप्तर्षिभिस्तदा।
राजर्षिभिः पुण्यतमैर्गन्धर्वैरप्सरोगणैः ॥ २-४६-८ (१३१५३)
चराचरगुरुः श्रीमान्वृतः सर्वसुरैस्तथा।
ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यमागम्य चाब्रवीत् ॥ २-४६-९ (१३१५४)
प्रीतोऽस्मि तव भक्तस्य तपसाऽनेन सुव्रत।
वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ॥ २-४६-१० (१३१५५)
हिरण्यकशिपुरुवाच। २-४६-११क्ष् (१४६५)
न देवा न च गन्धर्वा न यक्षोरगराक्षसाः।
न मानुषाः पिशाचाश्च हन्युर्मां देवसत्तम ॥ २-४६-११ (१३१५६)
ऋषयो वा न मां शापैः क्रुद्धा लोकपितामह।
शपेयुस्तपसा युक्ता वर एष वृतो मया ॥ २-४६-१२ (१३१५७)
न शस्त्रेण नचास्त्रेण गिरिणा पादपेन च।
न शुष्केण न चार्देण स्यान्न वाऽन्येन मे वधः ॥ २-४६-१३ (१३१५८)
नाकाशे नाथ भूमौ वा रात्रौ वा दिवसेपि वा।
नान्तर्वा न बहिर्वापि स्याद्वधो मे पितामह ॥ २-४६-१४ (१३१५९)
पशुभिर्वा मृगैर्न स्यात्पक्षिभिर्वा सरीसृपैः।
ददासि चेद्वरानेतन्देवदेव वृणोम्यहम् ॥ २-४६-१५ (१३१६०)
ब्रह्मोवाच। २-४६-१६क्ष् (१४६६)
एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः।
सर्वकामवरांस्तात प्राप्स्यसि त्वमसंशयम् ॥ २-४६-१६ (१३१६१)
एवमुक्त्वा स भगवाञ्जगामाकाशमेव हि।
रराज ब्रह्मलोके हि ब्रह्मर्षिगणसेवितः ॥ २-४६-१७ (१३१६२)
ततो देवाश्च नागाश्च गन्धर्वा मुनयस्तथा।
वरप्रदानं श्रुत्वैव ते ब्रह्माणमुपस्थितः ॥ २-४६-१८ (१३१६३)
देवा ऊचुः। २-४६-१९क्ष् (१४६७)
वरेणाने भगवन्बाधिष्यति स नोऽसुरः।

तत्प्रसीदस्व भगवन्वधोपायोऽस्य चिन्त्यताम् ॥ २-४६-१९ (१३१६४)
भीष्म उवाच ॥ २-४६-२०क्ष् (१४६८)
ततो लोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः।
प्रोवाच भगवान्वाक्यं सर्वदेवगणांस्तदा ॥ २-४६-२० (१३१६५)
अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम्।
तपसोऽन्तेऽस्य भगवान्वधं कृष्णः करिष्यति ॥ २-४६-२१ (१३१६६)
एतच्छ्रुत्वा सुराः सर्वे ब्रह्मणा तस्य वै वधम्।
स्वानि स्थानानि दिव्यानि जग्मुस्ते वै मुदान्विताः ॥ २-४६-२२ (१३१६७)
लब्धमात्रे वरे चापि सर्वास्ता बाधते प्रजाः।
हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ॥ २-४६-२३ (१३१६८)
राज्यं चकार दैत्येन्द्रो दैत्यसङ्घैः समावृतः।
सप्तद्वीपान्वशेचके लोकालोकान्तरं बलात् ॥ २-४६-२४ (१३१६९)
दिव्यभोगान्समस्तान्वै लोके सर्वानवाप सः।
देवांस्त्रिभुवनस्थांस्तु पराजित्य महासुरः ॥ २-४६-२५ (१३१७०)
त्रैलोक्यं वशमानीय स्वर्गे वसति दानवः।
यदा वरमदोन्मत्तो न्यवसद्दानवो दिवि ॥ २-४६-२६ (१३१७१)
अथ लोकान्सगस्तांश्च विजित्य स महाबलः।
भवेयमहमेवेन्द्रः सोमोऽग्निर्मारुतो रविः ॥ २-४६-२७ (१३१७२)
सलिलं चान्तरिक्षं च नक्षत्राणि दिशो दश।
अहं क्रोधश्च कामश्च वरुणो वसवोऽर्यमा ॥ २-४६-२८ (१३१७३)
धनदश्च धनाध्यक्षो यक्षकिम्पुरुषाधिपः।
एते भवेयमित्युक्त्वा स्वयं भूत्वा बलात्स च ॥ २-४६-२९ (१३१७४)
एषां गृहीत्वा स्थानानि तेषां कार्याण्यवाप सः।
इज्यश्चासीन्मखवरैर्देवकिन्नरसत्तमैः ॥ २-४६-३० (१३१७५)
नरकस्थान्समानीय स्वर्गस्थांश्च चकार सः।
एवमादीनि कर्माणि कृत्वा दैत्यपतिर्बली ॥ २-४६-३१ (१३१७६)
आश्रमेषु महाभागान्मुनीन्वै शंसितव्रतान्।
सत्यधर्मपरान्दान्तान्पुरा धर्षितवांस्तु सः ॥ २-४६-३२ (१३१७७)
याज्ञीयान्कृतबान्दैत्यन्याजकांश्चैव देवताः।
यत्रयत्र सुरा जग्मुस्तत्रतत्र व्रजत्युत ॥ २-४६-३३ (१३१७८)
स्थानानि देवतानां तु हृत्वा राज्यमकारयत्।
पञ्चकोट्यश्च वर्षाणि अयुतान्येकषष्टि च ॥ २-४६-३४ (१३१७९)
षष्टिश्चैव सहस्राणां जग्मुस्तस्य दुरात्मनः।
एतद्वर्षं स दैत्येन्द्रो भोगैश्वर्यमवाप सः ॥ २-४६-३५ (१३१८०)
तेनातिबाध्यमानास्ते दैत्येन्द्रेण बलीयसा।
ब्रह्मलोकं सुरा जग्मुः शर्वशक्रपुरोगमाः ॥ २-४६-३६ (१३१८१)

पितामहं समासाद्य खिन्नाः प्राञ्जलयोऽब्रुवन् ॥ २-४६-३७ (१३१८२)
देवा ऊचुः। २-४६-३८क्ष् (१४६९)
भगवन्भूतभव्येश नस्त्रायस्व इहागतान्।
भयं दितिसुताद्घोराद्भवत्यद्य दिवानिशम् ॥ २-४६-३८ (१३१८३)
भगवन्सर्वदैत्यानां स्वयम्भूरादिकृत्प्रभुः।
स्रष्टा त्वं हव्यकव्यानामव्यक्तः प्रकृतिर्ध्रुवः ॥ २-४६-३९ (१३१८४)
ब्रह्मोवाच। २-४६-४०क्ष् (१४७०)
श्रूयतामापदेवं हि दुर्विज्ञेया मयापि च।
नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः ॥ २-४६-४० (१३१८५)
अव्यक्तः सर्वभूतानामचिन्त्यो विभुरव्ययः।
ममापि स तु युष्माकं व्यसने परमा गतिः ॥ २-४६-४१ (१३१८६)
नारायणः परोऽव्यक्तादहमव्यक्तसम्भवः।
मत्तो जज्ञुः प्रजा लोकाः सर्वे देवासुराश्च ते ॥ २-४६-४२ (१३१८७)
देवा यथाहं युष्माकं तथा नारायणो मम।
पितामहोऽहं सर्वस्य स विष्णुः प्रपितामहः ॥ २-४६-४३ (१३१८८)
निश्चितं विबुधा दैत्यं स विष्णुस्तं हनिष्यति।
तस्य नास्ति न शक्यं च तस्माद्व्रजत माचिरम् ॥ २-४६-४४ (१३१८९)
भीष्म उवाच ॥ २-४६-४५क्ष् (१४७१)
पितामहवचः श्रुत्वा सर्वे ते भरतर्षभ।
विबुधा ब्रह्मणा सार्धं जग्मुः क्षीरोदधिं प्रति ॥ २-४६-४५ (१३१९०)
आदित्या वसवः साध्या विश्वे च मरुतस्तथा।
रुद्रा महर्षयश्चैव अश्विनौ च सुरूपिणौ ॥ २-४६-४६ (१३१९१)
अन्ये च दिव्या ये राजंस्ते सर्वे सगणाः सुराः।
चतुर्मुखं पुरस्कृत्य श्वेतद्वीपमुपागताः ॥ २-४६-४७ (१३१९२)
देवा ऊचुः। २-४६-४८क्ष् (१४७२)
त्रायस्व नोऽद्य देवेश हिरण्यकशिपोर्वधात्।
त्वं हि नः परमो धाता ब्रह्मादीनां सुरोत्तम ॥ २-४६-४८ (१३१९३)
उत्फुल्लाम्बुजपत्राक्ष शत्रुपक्षभयङ्कर।
क्षयाय दितिवंशस्य शरणं त्वं भविष्यसि ॥ २-४६-४९ (१३१९४)
भीष्ण उवाच ॥ २-४६-५०क्ष् (१४७३)
तद्देवानां वचः श्रुत्वा तदा विष्णुः शुचिश्रवाः।
अदृश्यः सर्वभूतात्मा वक्तुमेवोपचक्रमे ॥ २-४६-५० (१३१९५)
विष्णुरुवाच ॥ २-४६-५१क्ष् (१४७४)
भयं त्यजध्वममरा अभयं वो ददाम्यहम्।
तदेव त्रिदिवं देवाः प्रतिपद्यत माचिरम् ॥ २-४६-५१ (१३१९६)
एषोऽहं सगणं दैत्यं वरदानेन दर्पितम्।

अवध्यममरेन्द्राणां दानवेन्द्रं निहन्म्यहम् ॥ २-४६-५३ ब्रह्मोवाच॥ २-४६-५२ (१३१९७)
भहवन्देवदेवेश खिन्ना एते भृशं सुराः।
तस्मात्त्वं जहि दैत्येन्द्रं क्षिप्रं कालोऽस्य माचिरम्।
एष त्वं सगणं दैत्यं वरदानेन दर्पितम् ॥ २-४६-५३ (१३१९८)
विष्णुरुवाच ॥ २-४६-५४क्ष् (१४७५)
क्षिप्रमेव करिष्यामि त्वरया दैत्यनाशनम्।
तस्मात्त्वं विबुधाश्चैव प्रतिपद्यत वै दिवम् ॥ २-४६-५४ (१३१९९)
भीष्म उवाच ॥ २-४६-५५क्ष् (१४७६)
एवमुक्त्वा तु भगवान्विसृज्य त्रिदिवेश्वरान्।
नरस्यार्धतनुर्भूत्वा सिंहस्यार्धतनुः पुनः ॥ २-४६-५५ (१३२००)
नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना।
भीमरूपो महातेजा व्यादितास्य इवान्तकः ॥ २-४६-५६ (१३२०१)
हिरण्यकशिपुं राजञ्जगाम हरिरीश्वरः।
दैत्यास्तमागतं दृष्ट्वा नारसिंहं महाबलम् ॥ २-४६-५७ (१३२०२)
ववर्षुः शस्त्रवर्षैस्ते सुसङ्क्रुद्धास्तदा हरिम्।
तैः सृष्टसर्वशस्त्राणि भक्षयामास वै हरिः ॥ २-४६-५८ (१३२०३)
जघान न रणे दैत्यान्सहस्राणि बहूनि च।
तान्निहत्य च दैतेयान्सर्वान्क्रुद्धान्महाबलान् ॥ २-४६-५९ (१३२०४)
अभ्यधावत्सुसङ्क्रुद्धो दैत्येन्द्रं बलगर्वितम्।
जीमूतघनसङ्काशो जीमूतघननिस्वनः ॥ २-४६-६० (१३२०५)
जीमूत इव दीप्तौजा जीमूत इव वेगवान्।
दैत्यं सोऽतिबलं दृप्तं दृप्तशार्दूलविक्रमम् ॥ २-४६-६१ (१३२०६)
दृप्तैर्दैत्यगणैर्गुप्तं खरैर्नखमुकैरुत।
ततः कृत्वा तु युद्धं वै तेन दैत्येन वै हरिः ॥ २-४६-६२ (१३२०७)
सन्ध्याकाले महातेजा भवनान्ते त्वरान्वितः।
ऊरौ निधाय दैत्येन्द्रं निर्बिभेद नखैस्तदा ॥ २-४६-६३ (१३२०८)
महाबलं महावीर्यं वरदानेन गर्वितम्।
दैत्यश्रेष्ठं सुरश्रेष्ठो जघान तरसा हरिः ॥ २-४६-६४ (१३२०९)
हिरण्यकशिपुं हत्वा सर्वदैत्यांश्च वै तदा।
विबुधानां प्रजानां च हितं कृत्वा महाद्युतिः ॥ २-४६-६५ (१३२१०)
प्रमुमोद हरिर्देवः प्राप्य धर्मं तदा भुवि।
एष ते नारसिंहोऽत्र कथितः पाण्डुनन्दन। २-४६-६६ (१३२११)
शृणु त्वं वामनं नाम प्रादुर्भावं महात्मनः ॥ ॥ २-४६-६७ (१३२१२)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६.।

सभापर्व - अध्याय ०४७
॥ श्रीः ॥
२.४७. अध्यायः ४७

Mahabharata - Sabha Parva - Chapter Topics
बलिनिपीडितैरिन्द्रादिभिः प्रार्थितेन हरिणा अदित्यां वामनत्वेनावतीर्य बलि म्प्रति याचनम् ॥१.।त्रिविक्रमरूपि

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

पुरा त्रेतायुगे राजन्बलिर्वैरोजनोऽभवत्।
दैत्यानां पार्थिवो वीरो बलेनाप्रतिमो बली ॥ २-४७-१ (१३२१३)
तदा बलिर्महाराज दैत्यसङ्घैः समावृतः।
विजेतुं तरसा शक्रमिन्द्रस्थानमवाप सः ॥ २-४७-२ (१३२१४)
तेन वित्रासिता देवा बलिनाऽऽखण्डलादयः।
ब्रह्माणं तु पुरस्कृत्य गत्वा क्षीरोदधिं तदा ॥ २-४७-३ (१३२१५)
तुष्टुवुः सहिताः सर्वे देवं नारायणं प्रभुम्।
स तेषां दर्शनं चक्रे विबुधानां हरिस्तदा ॥ २-४७-४ (१३२१६)
प्रसादजं तस्य विभोरदित्यां जन्म उच्यते।
अदितेरपि पुत्रत्वमेत्य यादवनन्दनः ॥ २-४७-५ (१३२१७)
एष विष्णुरिति ख्यात इन्द्रस्यावरजोऽभवत्।
तस्मिन्नेव च काले तु दैत्येन्द्रो बलवीर्यवान् ॥ २-४७-६ (१३२१८)
अश्वमेधं क्रतुश्रेष्ठमाहर्तुमुपचक्रमे।
वर्तमाने तदा यज्ञे दैत्येन्द्रस्य युधिष्ठिर ॥ २-४७-७ (१३२१९)
स विष्णुर्मानवो भूत्वा प्रच्छन्नो ब्रह्मसंवृतः।
मुण्डो यत्रोपवीती च कृष्णाजिनधरः शिखी ॥ २-४७-८ (१३२२०)
पालाशदण्डं सङ्गृह्य वामनोऽद्भुतदर्शनः।
प्रविश्य स बलेर्यज्ञे वर्तमानो च दक्षिणाम् ॥ २-४७-९ (१३२२१)
देहीत्युवाच दैत्येन्द्रं विक्रमांस्त्रीनिहैव ह।
दीयतां त्रिपदीमात्रमित्ययाचन्महासुरम् ॥ २-४७-१० (१३२२२)
स तथेति प्रतिश्रुत्य प्रददौ विष्णवे तदा।
तेन लब्ध्वा हिरर्भूमिं जृम्भयामास वै भृशम् ॥ २-४७-११ (१३२२३)
स शिशुः सदिवं खं च पृथिवीं वच विशाम्पते।

त्रिभिर्विक्रमणैश्चैव सर्वमाक्रमताभिभूः ॥ २-४७-१२ (१३२२४)
बलेर्बलवतो यज्ञे बलिना विष्णुना पुरा।
विक्रमैस्त्रिभिरक्षोभ्याः क्षोभितास्ते महासुराः ॥ २-४७-१३ (१३२२५)
विप्रचित्तिमुखाः क्रुद्धाः सर्वसङ्घा महासुराः।
नानावक्रा महाकाया नानावेषधरा नृप ॥ २-४७-१४ (१३२२६)
नानाप्रहरणा रौद्रा नानामाल्यानुलेपनाः।
स्वान्यायुधानि सङ्गृह्य प्रदीप्ता इव तेजसा ॥ २-४७-१५ (१३२२७)
क्रममाणं हरिं तत्र उपावर्तन्त भारत।
प्रमथ्य सर्वान्दैतेयान्पादहस्ततलैस्तु तान् ॥ २-४७-१६ (१३२२८)
रूपं कृत्वा महाभीमं जहाराशु स मेदिनीम्।
सम्प्राप्य दिवमाकाशमादित्यसदने स्थितः ॥ २-४७-१७ (१३२२९)
अत्यरोचत भूतात्मा आदित्यस्यैव तेजसा।
प्रकाशयन्दिशः सर्वाः प्रदिशश्च महायशाः ॥ २-४७-१८ (१३२३०)
शुशुभे स महाबाहुः सर्वलोकान्प्रकाशयन्।
तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे ॥ २-४७-१९ (१३२३१)
नभस्तु क्रममाणस्य नाभ्यां किल तदा स्थितौ।
परमाक्रममाणस्य नानुभ्यां तौ व्यवस्थितौ ॥ २-४७-२० (१३२३२)
विष्णोरमितवीर्यस्य वदन्त्येवं द्विजातयः।
अथास्य पादाक्रमणात्पफालाण्डो युधिष्ठिरः ॥ २-४७-२१ (१३२३३)
तच्छिद्रात्स्यन्दिनी तस्य पादभ्रष्टा तु निम्नगा।
ससार सागरं सा तु पावनी सागरंगमा ॥ २-४७-२२ (१३२३४)
जहार मेदिनीं सर्वां हत्वा दानवपुङ्गवान्।
आसुरीं श्रियमाहृत्य त्रींल्लोकान्स जनार्दन ॥ २-४७-२३ (१३२३५)
सपुत्रदारानसुरान्पाताले संन्यवेशयत्।
नमुचिः शम्बरश्चैव प्रह्लादश्च महामनाः ॥ २-४७-२४ (१३२३६)
महाभूतानि भूतात्मा सविशेषानि वै हरिः।
कालं च सकलं राजन्गात्रभूतान्यदर्शयत् ॥ २-४७-२५ (१३२३७)
तस्य गात्रे जगत्सर्वमानीतमधिपश्यति।
न किञ्चिदस्ति लोकेषु यदनाप्तं महात्मना ॥ २-४७-२६ (१३२३८)
तद्धि रूपमुपेन्द्रस्य देवदानवमानवाः।
दृष्टवा संमुमुहुः सर्वे विष्णुतेजोऽभिपीडिताः ॥ २-४७-२७ (१३२३९)
बलिर्बद्धोऽभिमानी च यज्ञवाटे महात्मना।
विरोचनकुलं सर्वं पाताले विनिवेशितम् ॥ २-४७-२८ (१३२४०)
एवंविधानि कर्माणि कृत्वा गरुडावाहनः।
न विस्मयमुपागच्छत्पारमेष्ठ्येन तेजसा ॥ २-४७-२९ (१३२४१)
स सर्वमसुरैश्वर्यं सम्प्रदाय शचीपतेः।

त्रैलोक्यं च ददौ शक्रे विष्णुर्दानवसूदनः ॥ २-४७-३० (१३२४२)
एष ते वामनो नाम प्रादुर्भावो महात्मनः।
वेदविद्भिर्द्विजैरेतच्छ्रूयते वैष्णवं यशः।
मानुषेषु ततो विष्णोः प्रादुर्भावांस्तथा शृणु ॥ ॥ २-४७-३१ (१३२४३)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

सभापर्व - अध्याय ०४८
॥ श्रीः ॥
२.४८. अध्यायः ४८

Mahabharata - Sabha Parva - Chapter Topics
दत्तात्रेयनाम्नाऽवतीर्णस्य हरेः कार्तवीर्यार्जुनस्य वरदानादिकम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

विष्णोः पुनर्महाभागः प्रादुर्भावो महात्मनः।
दत्तात्रेय इति ख्यात ऋषिरासीन्महायशाः ॥ २-४८-१ (१३२४४)
तेन नष्टेषु वेदेषु क्रियासु च मखेषु च।
चातुर्वर्ण्ये च सङ्कीर्णे धर्मे शिथिलतां गते ॥ २-४८-२ (१३२४५)
अभवर्धति चाधर्मे सत्ये नष्टे स्थितेऽनृते।
प्रजासु क्षीयमाणासु धर्मे चामूलतां पते ॥ २-४८-३ (१३२४६)
सयज्ञाः सक्रिया वेदाः प्रत्यानीता हि तेन वै।
चातुर्वर्ण्यमसङ्कीर्णं कृतं तेन महात्मना ॥ २-४८-४ (१३२४७)
स एव वै यदा प्रादाद्धैहयाधिपतेर्वरम्।
तं हैहयानामधिपस्त्वर्जुनोऽभिप्रसादयन् ॥ २-४८-५ (१३२४८)
वनं पर्यचरन्सम्यक्छुश्रूषुरनुसूयकः।
निर्ममो निरहङ्कारो दीर्घकालमतोषयत् ॥ २-४८-६ (१३२४९)
आराध्य दत्तात्रेयं हि अगृङ्णात्स वरानिमान्।
आप्तादाप्ततरान्विप्राद्विद्वान्विद्वन्निषेवितात् ॥ २-४८-७ (१३२५०)
ऋतेऽमरत्वं विप्रेण दत्तात्रेयेण धीमता।
वरैश्चतुर्भिः प्रवृत इमान्वव्रे वरान्नृपः ॥ २-४८-८ (१३२५१)

श्रीमान्मनस्वी बलवान्सत्यवागनसूयकः।
सहस्रबाहुर्भूयासमेषु मे प्रथमो वरः ॥ २-४८-९ (१३२५२)
जरायुजाण्डजं सर्वं सर्वं चैव चराचरम्।
शास्तुमिच्छामि धर्मेण द्वितीयस्त्वेष मे वरः ॥ २-४८-१० (१३२५३)
पितृन्देवानृषीन्विप्रान्यजेयं विपुलैर्मखैः।
अमित्रांश्च शितैर्बाणैस्तृतीयो व्रर एष मे ॥ २-४८-११ (१३२५४)
यस्य नासीन्न भविता न चास्ति सदृशः पुमान्।
इह वा दिवि वा लोके स मे हन्ता भवेदिति ॥ २-४८-१२ (१३२५५)
सोऽर्जुनः कृतवीर्यस्य वरः पुत्रोऽभवद्युधि।
स सहस्रं सहस्राणां माहिष्मत्यामवर्धत ॥ २-४८-१३ (१३२५६)
स भूमिमखिलां जित्वा द्वीपांश्चापि समुद्रिणः।
नभसीवाज्वलत्सूर्यः पुण्यैः कर्मभिर्जुनः ॥ २-४८-१४ (१३२५७)
इन्द्रद्वीपं कशेरुं च कामद्वीपं गभस्तितम्।
गन्धर्ववरुणद्वीपं सौहृष्टममितप्रभः ॥ २-४८-१५ (१३२५८)
पूर्वैरजितपूर्वांश्च द्वीपनजयदर्जुनः।
इदं तु कार्तवीर्यस्य बभूवासदृशं जनैः ॥ २-४८-१६ (१३२५९)
न पूर्वे नापरे तस्य गमिष्यन्ति गतिं नृपाः।
यदर्णवे प्रयातस्य वस्त्रं न परिषिच्यते ॥ २-४८-१७ (१३२६०)
सौवर्णं सर्वमप्यासीद्विमानवरमुत्तमम्।
चतुर्धा व्यभजद्राष्ट्रं तद्विभज्यान्वपालयत् ॥ २-४८-१८ (१३२६१)
एकांशेनाहरत्सेनामेकांशेनावसद्गृहान्।
यस्तु तस्य तृतीयांशो राज्ञोऽभूज्जनसङ्ग्रहे ॥ २-४८-१९ (१३२६२)
आप्तः परमकल्याणस्तेन यज्ञानकल्पयत्।
ये दस्यवो ग्रामचरा अरम्ये च वसन्ति ये ॥ २-४८-२० (१३२६३)
चतुर्थेन तु सोंऽशेन तान्सर्वान्प्रत्यषेधयत्।
द्वाराणि नापिधीयन्ते पुरेषु नगरेषु च ॥ २-४८-२१ (१३२६४)
स एव राष्ट्रपालोऽभूत्स्त्रीपालोऽभवदर्जुनः।
स एवासीदजापालः सः गोपालो विशाम्पते ॥ २-४८-२२ (१३२६५)
शतं वर्षसहस्राणामनुशिष्यार्जुनो महीम्।
दत्तात्रेयप्रसादेन एवं राज्यं चकार सः ॥ २-४८-२३ (१३२६६)
एवं बहूनि कर्माणि चक्रे लोकहिताय सः ॥
दत्तात्रेय इति ख्यातः प्रादुर्भावो ह्ययं हरेः।
कथितो भरतश्रेष्ट शृणु भूयो महात्मनः ॥ ॥ २-४८-२४ (१३२६७)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि अष्टचतत्वारिंशोऽध्यायः ॥ ४८ ॥

सभापर्व - अध्याय ०४९
॥ श्रीः ॥
२.४९. अध्यायः ४९

Mahabharata - Sabha Parva - Chapter Topics
श्रीहरेर्जमदग्निगृहे रामनाम्नाऽवतरणम् ॥१.।परशुरामेण कार्तवीर्यार्जुनहननम् ॥२.॥त्रिस्सप्तकृत्वः क्षत्रियान्नि

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

तथा भृगुकुले जन्म यदर्थं च महात्मनः।
जामदग्न्य इति ख्यातः प्रादुर्भावश्च वैष्णवः ॥ २-४९-१ (१३२६८)
जमदग्निसुतो राजन्रामो नाम स वीर्यवान्।
हेहयान्तकरो राजन्स रामो बलिनां वरः ॥ २-४९-२ (१३२६९)
कार्तावीर्यो महावीर्यो बलेनाप्रतिमस्तदा।
रामेण जामदग्न्येन हतो विषममाचरन् ॥ २-४९-३ (१३२७०)
तं कार्तवीर्यं राजानं हेहयानामरिन्दमम्।
रथस्थं पार्थिवं रामः पातयित्वाऽवधीद्रणे ॥ २-४९-४ (१३२७१)
जम्भस्य यज्ञं हत्वा स ऋत्विजश्चैव संस्तरे।
जम्भस्य मूर्ध्नि भेत्ता च हन्ता च शतदुन्दुभेः ॥ २-४९-५ (१३२७२)
स एष कृष्णो गोविन्दो जातो भृगुषु वीर्यवान्।
सहस्रबाहुमुद्धर्तुं सहस्रजितमाहवे ॥ २-४९-६ (१३२७३)
क्षत्रियाणां चतुष्पष्टिमयुतानि महायशाः।
सरस्वत्यां समेतानि एष वै धनुषाऽजयत् ॥ २-४९-७ (१३२७४)
ब्रह्मद्विषां धे तस्मिन्सहस्राणि चतुर्दश।
पुनर्जघान शूराणामतिक्रूरो रथर्षभः ॥ २-४९-८ (१३२७५)
ततो राज्ञां सहस्रं स भङ्क्ता पूर्वमरिन्दमः।
सहस्रं मुसलेनाहन्सहस्रमुदकृन्तत ॥ २-४९-९ (१३२७६)
चतुर्दशसहस्राणि कृणदूममपाययत्।
शिष्टान्ब्रह्मद्विषो जित्वा ततोऽस्नायत भार्गवः २-४९-१० (१३२७७)
रामरामेत्यभिक्रुष्टो ब्राह्मणैः क्षत्रियार्दितैः।
निघ्नञ्शतसहस्राणि रामः परशुनाभिभूः ॥ २-४९-११ (१३२७८)
न ह्यमृष्यत तां वाचमार्तैर्भृशमुदीरिताम्।

भृगो रामाभिधावेति यदाऽक्रन्दन्द्विजातयः ॥ २-४९-१२ (१३२७९)
काश्मीरान्दरदान्कुन्तीन्क्षुद्रकान्मालवाञ्छवान्।
चेदिकाशिकरूशांश्च ऋषिकान्क्रथकैशिकान् ॥ २-४९-१३ (१३२८०)
अङ्गान्वङ्गान्कलिङ्गांश्च मागधान्काशिकोसलान्।
रात्रायणान्वीतिहोत्रान्किरातान्कार्तिकावतान् ॥ २-४९-१४ (१३२८१)
एतानन्यांश्च राजन्यान्देशेदेशे सहस्रशः।
निकृत्य निशितैर्बाणैः सम्प्रदाय विवस्वते ॥ २-४९-१५ (१३२८२)
कीर्णा क्षत्रियकोटीभिर्मेरुमन्दरभूषणा।
त्रिः सप्तकृत्वः पृथिवी तेन निःक्षत्रिया कृता ॥ २-४९-१६ (१३२८३)
कृत्वा निःक्षत्रियां चैव भार्गवः स महायशाः।
इन्द्रगोपकवर्णस्य जीवञ्जीवनिभस्य च ॥ २-४९-१७ (१३२८४)
पूरयित्वा च सरितः क्षतजस्य सरांसि च।
चकार तर्पणं वीरः पितॄणां तासु तेषु च ॥ २-४९-१८ (१३२८५)
सर्वानष्टादश द्वीपान्वशमानीय भार्गवः।
सोऽश्वमेधसहस्राणि नरमेधशतानि च ॥ २-४९-१९ (१३२८६)
इष्ट्वा सागरपर्यन्तां काश्यपाय महीं ददौ।
तस्याग्रेणानुपर्येति भूमिं कृत्वा विपांसुलाम् ॥ २-४९-२० (१३२८७)
ततः कालकृतां सत्यां भार्गवाय महात्मने।
गाधामप्यत्र गायन्ति ये पुराणविदो जनाः ॥ २-४९-२१ (१३२८८)
वेदिमष्टादशोत्सेधां हिरण्यस्यातिपौरुषीम्।
रामेण जामदग्न्येन प्रतिजग्राह काश्यपः ॥ २-४९-२२ (१३२८९)
एवमिष्ट्वा महाबाहुः क्रतुभिर्भूरिदक्षिणैः।
अन्यद्वर्षशतं रामः सौभे साल्वमयोधयत् ॥ २-४९-२३ (१३२९०)
ततः स भृगुशार्दूलस्तं सौभं योधयन्प्रभुः।
सुबन्धुरं रथं राजन्नास्थाय भरतर्षभ ॥ २-४९-२४ (१३२९१)
नग्निकानां कुमारीणां गायन्तीनामुपाशृणोत्।
रामराम महाबाहो भृगूणां कीर्तिवर्धन ॥ २-४९-२५ (१३२९२)
त्यज शस्त्राणि सर्वाणि न त्वं सौभं वधिष्यसि।
शङ्खचक्रगदापाणिर्देवानामभयङ्करः ॥ २-४९-२६ (१३२९३)
युधि प्रद्युम्नसाम्बाभ्यां कृष्णः सौभं वधिष्यति।
तच्छ्रुत्वा पुरुषव्याघ्रस्तत एव वनं ययौ ॥ २-४९-२७ (१३२९४)
न्यस्य सर्वाणि शस्त्राणि कालकाङ्क्षी महायशाः।
रथं सर्वायुधं चैव शरान्परशुमेव च ॥ २-४९-२८ (१३२९५)
धनूंष्यप्सु प्रतिष्ठाप्य रामस्तेपे परं तपः।
ह्रियं प्रज्ञां श्रियं कीर्तिं लक्ष्मीं चामित्रकर्शनः ॥ २-४९-२९ (१३२९६)
पञ्चाधिष्ठाय धर्मात्मा तं रथं विससर्ज ह।

आदिकाले प्रवृत्तं तु व्यभजत्करमीश्वरः ॥ २-४९-३० (१३२९७)
नाघ्नतं श्रद्धया सौभं न ह्यशक्तो महायशाः।
जामदग्न्य इति ख्यातो यस्त्वयं भगवानुपिः। २-४९-३१ (१३२९८)
सोऽस्य भागस्तपस्तेपे भार्गवो लोकविश्रुतः ॥ ॥ २-४९-३२ (१३२९९)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९.।

सभापर्व - अध्याय ०५०
॥ श्रीः ॥
२.५०. अध्यायः ५०

Mahabharata - Sabha Parva - Chapter Topics
श्रीविष्णोर्दशरथगृहे रामत्वेनावतारः ॥१.।विश्वामित्रेण स्वाश्रमं नीतेन सलक्ष्मणेन रामेण सुबाह्वादिहननम् ॥२.

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

शृणु राजंस्ततो विष्णोः प्रादुर्भावं महात्मनः।
अष्टाविंशे युगे चापि मार्कण्डेयपुरः सरः ॥ २-५०-१ (१३३००)
तिथौ नावमिके जज्ञे तथा दशरथादपि।
कृत्वाऽऽत्मानं महाबाहुश्चतुर्धा विष्णुरव्ययः ॥ २-५०-२ (१३३०१)
लोके राम इति ख्यातस्तेजसा भास्करोपमः।
प्रसादनार्थं लोकस्य विष्णुस्तत्र सनातनः ॥ २-५०-३ (१३३०२)
धर्मार्थमेव कौन्तेय जज्ञे तत्र महायशाः।
तमप्याहुर्मनुष्येन्द्रं सर्वभूतपतेस्तनुम् ॥ २-५०-४ (१३३०३)
यज्ञविघ्नकरस्तत्र विश्वामित्रस्य भारत।
सुबाहुर्निहतस्तेन मारीचस्ताडितो भृशम् ॥ २-५०-५ (१३३०४)
तस्मै दत्तानि चास्त्राणि विश्वमित्रेण धीमता।
वधार्थं सर्वशत्रूणां दुर्वाराणि सुरैरपि ॥ २-५०-६ (१३३०५)
वर्तमाने महायज्ञे जनकस्य महात्मनः।
भग्नं माहेश्वरं चापं क्रीडता लीलया भृशम् ॥ २-५०-७ (१३३०६)
ततस्तु सीतां जग्राह भार्यार्थे जानकीं विभुः।
नगरीं पुनरासाद्य मुमुदे तत्र सीतया ॥ २-५०-८ (१३३०७)

कस्यचित्त्वथ कालस्य पित्रा तत्राभिचोदितः।
कैकेय्याः प्रियमन्विच्छन्वनमभ्यवपद्यत ॥ २-५०-९ (१३३०८)
यः समाः सर्वधर्मज्ञश्चतुर्दश वने वसन।
लक्ष्मणानुचरो रामः सर्वभूतहिते रतः ॥ २-५०-१० (१३३०९)
चतुर्दश वने तीर्त्वा तदा वर्षाणि भारत।
रूपिणी यस्य पार्श्वस्था सीतेत्यभिहिता जनैः ॥ २-५०-११ (१३३१०)
पूर्वोचितत्वात्सा लक्ष्मीर्भर्तारमनुशोचति।
जनस्थाने वसन्कार्यं त्रिदशानां चकार सः ॥ २-५०-१२ (१३३११)
मारीचं दूषणं हुत्वा खरं त्रिशिरसं तथा।
चतुर्दश सहस्राणि रक्षसां घोरकर्मणाम् ॥ २-५०-१३ (१३३१२)
जघान रामो धर्मात्मा प्रजानां हितकाम्यय।
विराधं च कबन्धं च राक्षसौ घोरकर्मिणौ ॥ २-५०-१४ (१३३१३)
जघान च तदा रामो गन्धर्वौ शापविक्षतौ।
स रावणस्य भगिनीनासाच्छेदमकारयत् ॥ २-५०-१५ (१३३१४)
भार्यावियोगं तं प्राप्य मृगयन्व्यचरद्वनम्।
स तस्मादृश्यमूकं तु गत्वा पम्पामतीत्य च ॥ २-५०-१६ (१३३१५)
सुग्रीवं मारुतिं दृष्ट्वा चक्रे मैत्रीं तयोः स वै।
अथ गत्वा स किष्किन्धां सुग्रीवेण तदा सह ॥ २-५०-१७ (१३३१६)
निहत्य वालिनं युद्धे वानरेंद्रं महाबलम्।
अभ्यपिञ्चत्तदा रामः सुग्रीवं वानरेश्वरम् ॥ २-५०-१८ (१३३१७)
ततः स वीर्यवान्राजंस्त्वरया वै समुत्सुकः।
विचित्य वायुपुत्रेण लङ्कादेशं निवेदितः ॥ २-५०-१९ (१३३१८)
सेतुं वद्धुवा समुद्रस्य वानरैः स समुत्सुकः।
सीतायाः पदमन्विच्छन्रामो लङ्कां विवेश वै ॥ २-५०-२० (१३३१९)
देवोरगगणानां हि यक्षराक्षसपक्षिणाम्।
तत्रावद्यं राक्षसेन्द्रं रावणं युधि दुर्जयम् ॥ २-५०-२१ (१३३२०)
युक्तं राक्षसकोटीभिर्भिन्नाञ्जनचयोपमम्।
दुर्निरीक्ष्यं सुरगणैर्वरदानेन दर्पितम् ॥ २-५०-२२ (१३३२१)
जघान सचिवैः सार्धं सान्वयं रावणं रणे ॥ २-५०-२३ (१३३२२)
त्रैलोक्यकण्टकं वीरं महाकायं महाबलम्।
रावमं सगणं हत्वा रामो भूतपतिः पुरा ॥ २-५०-२४ (१३३२३)
लङ्कायां तं महात्मानं राक्षसेन्द्रं विभीषणम्।
अभिषिच्य ततो राम अमरत्वं ददौ तदा ॥ २-५०-२५ (१३३२४)
आरुह्य पुष्पकं रामः सीतामादाय पाण्डव।
सबलं स्वपुरं गत्वा धर्मराज्यमपालयत् ॥ २-५०-२६ (१३३२५)
दानवो लवणो नाम मधोः पुत्रो महाबलः।

शत्रुघ्नेन हतो राजंस्तदा रामस्य शासनात् ॥ २-५०-२७ (१३३२६)
एवं बहूनि कर्माणि कृत्वा लोकहिताय सः।
राजं चकार विधिवद्रामो धर्मभृतां वरः ॥ २-५०-२८ (१३३२७)
शताश्वमेधानाजह्ने ज्योतिरुक्थ्यान्निरर्गलान्।
नाश्रूयन्ताशुभा वाचो नात्ययः प्राणिनां तदा। २-५०-२९ (१३३२८)
न दस्युजं भयं चासीद्रामे राज्यं प्रशसति।
ऋषीणां देवतानां च मनुष्याणां तथैव च ॥ २-५०-३० (१३३२९)
पृथिव्यां धार्मिकाः सर्वे रामे राज्यं प्रशासति।
नाधर्मिष्ठो नरः कश्चिद्बभूव प्राणिनां क्वचित् ॥ २-५०-३१ (१३३३०)
प्राणापानौ समौ ह्यास्तां रामे राज्यं प्रशासति।
गाधामप्यत्र गायन्ति ये पुराणविदो जनाः ॥ २-५०-३२ (१३३३१)
श्यामो युवा लोहिताक्षो मातङ्गानामिवर्षभः।
आजानुबाहुः सुमुखः सिंहस्कन्धो महाबलः ॥ २-५०-३३ (१३३३२)
दशवर्षसहस्राणि दशवर्षशतानि च।
राज्यं भोगं च सम्प्राप्य शशास पृथिवीमिमाम् ॥ २-५०-३४ (१३३३३)
रामो रामो राम इति प्राजानामभवन्कथाः।
रामभूतं जगदिदं रामे राज्यं प्रशासति ॥ २-५०-३५ (१३३३४)
ऋग्यजुः सामहीनाश्च न तदाऽसन्द्विजायः।
उषित्वा दण्डके कार्यं त्रिदशानां चकार सः ॥ २-५०-३६ (१३३३५)
पूर्वापकारिणं तं तु पौलस्त्यं मनुजर्षभम्।
देवगन्धर्वनागानामरिं स निजघानह ॥ २-५०-३७ (१३३३६)
सत्ववान्गुणसम्पन्नो दीप्यमानः स्वतेजसा।
एवमेव महाबाहुरिक्ष्वाकुकुलवर्धनः ॥ २-५०-३८ (१३३३७)
रावणं सगणं हत्वा दिवमाक्रमताभिभूः।
इति दाशरथेः ख्यातः प्रादुर्भावो महात्मनः ॥ २-५०-३९ (१३३३८)
ततः कृष्णो महाबाहुर्भीतानामभयङ्करः।
अष्टाविंशे युगे राजञ्जज्ञे श्रीवत्सलक्षणः ॥ २-५०-४० (१३३३९)
पेशलश्च वदान्यश्चलोके बहुमतो नृषु।
स्मृतिमान्देशकालज्ञः शङ्खचक्रगदासिभृत् ॥ २-५०-४१ (१३३४०)
वासुदेव इति ख्यातो लोकानां हितकृत्सदा।
वृष्णीनां च कुले जातो भूमेः प्रियचिकीर्षया ॥ २-५०-४२ (१३३४१)
शत्रूणां भयकृद्दाता मधुहेति स विश्रुतः।
शकटार्जुनरामाणां कीलस्थानान्यसूदयत् ॥ २-५०-४३ (१३३४२)
कंसादीन्निजघानाजौ दैत्यान्मानुषविग्रहान्।
अयं लोकहितार्थाय प्रादुर्भावो महात्मनः ॥ २-५०-४४ (१३३४३)
कल्की विष्णुयशा नाम भूयश्चोत्पत्स्यते हरिः।

लेर्युगान्ते सम्प्राप्ते धर्मे शिथिलतां गते ॥ २-५०-४५ (१३३४४)
पाषण्डिनां गणानां हि वधार्थं भरतर्षभ।
धर्मस्य च विवृद्ध्यर्थं विप्राणां हितकाम्यया ॥ २-५०-४६ (१३३४५)
एते चान्ये च बहवो विष्णोर्देवगणैर्युताः।
प्रादुर्भावाः पुराणेषु गीयन्ते ब्रह्मवादिभिः ॥ ॥ २-५०-४७ (१३३४६)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि पञ्चाशोऽध्यायः ॥ ५०.।

सभापर्व - अध्याय ०५१
॥ श्रीः ॥
२.५१. अध्यायः ५१

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिरेण भीष्मम्प्रति विस्तरेण कृष्णकथाकथनप्रार्थना ॥१.।देवासुरयुद्धे पराजितानां देवानां स्मरणमात्रसंनिहि

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

एवमुक्ते तु कौन्तेयस्ततः कौरवनन्दनः।
आबभाषे पुनर्भीष्मे धर्मराजो युधिष्ठिरः ॥ २-५१-१ (१३३४७)
भूय एव मनुष्येन्द्र उपेन्द्रस्य यशस्विनः।
जन्म वृष्णिषु विज्ञातुमिच्छामि वदतां वर ॥ २-५१-२ (१३३४८)
यथैव भगवाञ्जातः क्षिताविह जनार्दनः।
माधवेषु महाबुद्धिस्तन्मे ब्रूहि पितामह ॥ २-५१-३ (१३३४९)
वैशम्पायन उवाच। २-५१-४क्ष् (१४७७)
एवमुक्तस्ततो भीष्मः केशवस्य महात्मनः।
माधवेषु तथा जन्म कथयामास वीर्यवान् ॥ २-५१-४ (१३३५०)
हन्त ते कथयिष्यामि युधिष्ठिर यथातथम्।
यतो नारायणस्येह जन्म वृष्णिषु कौरव ॥ २-५१-५ (१३३५१)
पुरा लोके महाराज वर्तमाने कृते युगे।
आसीत्त्रैलोक्यविख्यातः सङ्ग्रामस्तारकामयः ॥ २-५१-६ (१३३५२)
विरोचनो मयस्तारो वराहः श्वेत एव च।
विप्रचित्तिः प्रलम्बश्च वृत्रजम्भबलादयः ॥ २-५१-७ (१३३५३)

नमुचिः कालनेमिश्च प्रह्लाद इति विश्रुतः।
लम्बः किशोरः स्वर्भानुररिष्टो राक्षसेश्वरः ॥ २-५१-८ (१३३५४)
एते चान्ये च बहवो दैत्यसङ्घाः सहस्रशः।
नानाशस्त्रधरा राजन्नानाभूषणवाहनाः ॥ २-५१-९ (१३३५५)
देवतानामभिमुखास्तस्थुर्दैतेयदानवाः।
देवास्तु युध्यमानास्ते दानवानभ्ययू रणे ॥ २-५१-१० (१३३५६)
आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः।
इन्द्रो यमश्च वरुणश्चन्द्रश्चैव धनेश्वरः ॥ २-५१-११ (१३३५७)
अश्विनौ च महावीर्यौ ये चान्ये देवतागणाः।
चक्रुर्युद्धं महाघोरं दानवैश्च यथाक्रमम् ॥ २-५१-१२ (१३३५८)
युध्यमानाः समेयुश्च देवा दैतेयदानवैः।
तद्युद्धमभवद्घोरं देवदानवसङ्कुलम् ॥ २-५१-१३ (१३३५९)
ताभ्यां बलाभ्यां सञ्जज्ञे तुमुलो विग्रहस्तदा।
तीक्ष्णशस्त्रैः किरन्तोऽथ अभ्ययुर्देवदानवाः ॥ २-५१-१४ (१३३६०)
घ्नन्ति देवान्सगन्धर्वान्सयक्षोरगचारणान्।
ते वध्यमाना दैतेयैर्देवसङ्घास्तदा रणे ॥ २-५१-१५ (१३३६१)
त्रातारं मनसा जग्मुर्देवं नारायमं प्रभुम्।
एतस्मिन्नन्तरे तत्र जगाम हरिरीश्वरः ॥ २-५१-१६ (१३३६२)
दीपयञ्ज्योतिषा भूमिं शङ्खचक्रगदाधरः।
तमागतं सुपर्णस्थं विष्णुं लोकनमस्कृतम् ॥ २-५१-१७ (१३३६३)
दृष्ट्वा मुदा युताः सर्वे भयं त्यक्त्वा रमे सुराः।
चक्रुर्युद्धं पुनः सर्वे देवा दैतेयदानवैः ॥ २-५१-१८ (१३३६४)
तद्युद्धमभवद्घोरमचिन्त्यं रोमहर्षणम्।
जघ्नुर्दैत्यान्रणे घोराः सर्वे शक्रपुरोगमाः ॥ २-५१-१९ (१३३६५)
ते बाध्यमाना बिबुधैर्दुद्रुवुदैत्यदानवाः ॥ २-५१-२० (१३३६६)
विद्रुतान्दानवान्दृष्ट्वा तदा भारत संयुगे।
कालनेमिरिति ख्यातो दानवः प्रत्यदृश्यता ॥ २-५१-२१ (१३३६७)
शत्रुप्रहरणे घोरः शतबाहुः शताननः।
शतशीर्षः स्थितः श्रीमाञ्छतशृङ्गं इवाचलः ॥ २-५१-२२ (१३३६८)
भास्कराकारमुकुटः शिञ्जिताभरणाङ्गदः।
धूम्रकेतुर्हरिश्मश्रुर्निर्दष्टोष्टपुटाननः ॥ २-५१-२३ (१३३६९)
त्रैलोक्यान्तरविस्तारं धारयन्विपुलं वपुः।
तर्जयन्वै रणे देवाञ्छादयन्वै दिशो दश ॥ २-५१-२४ (१३३७०)
अभ्यधावत्सुसङ्क्रुद्धो व्यादितास्य इवान्तकः।
तत्र शस्त्रप्रतानैश्च देवान्धर्षितवान्रणे ॥ २-५१-२५ (१३३७१)
अभ्याययुः सुरान्सर्वान्पुनस्ते दैत्यदानवाः।

आपीडयन्त्रणे क्रुद्धास्ततो देवान्युधिष्ठिर ॥ २-५१-२६ (१३३७२)
ते वध्यमाना विबुधाः समरे कालनेमिना।
दैत्यैश्चैव महाराज दुद्रुवुस्ते दिशो दश ॥ २-५१-२७ (१३३७३)
विबुधान्विद्रुतान्दृष्ट्वा कालनेमिर्महा ऽसुरः।
इन्द्रं यमं च वरुणं वायुं च धनदं रविम् ॥ २-५१-२८ (१३३७४)
एतांश्चान्यान्बलाञ्जित्वा तेषां कार्याण्यवाप सः।
तान्सर्वान्सहसा जित्वा कालनेमिर्महासुरः ॥ २-५१-२९ (१३३७५)
ददर्श गगने विष्णुं सुपर्णस्थं महाद्युतिम्।
तं दृष्ट्वा क्रोधताम्राक्षस्तर्जयन्नभ्ययात्तदा ॥ २-५१-३० (१३३७६)
स बाहुशतमुद्यम्य सर्वास्त्रग्रहणं रणे।
रोषाद्भारत दैत्येन्द्रो विष्णोरुरसि पातयत् ॥ २-५१-३१ (१३३७७)
दैत्याश्च दानवाश्चैव सर्वे मयपुरोगमाः।
स्वान्यायुधानि सङ्गृह्य सर्वे विष्णुमुपाद्रवन् ॥ २-५१-३२ (१३३७८)
स ताड्यमानो ऽतिबलैर्दैत्यैः सर्वायुधोद्यतैः।
न चचाल हरिर्युद्धेऽकम्पमान इवाचलः ॥ २-५१-३३ (१३३७९)
पुनरुद्यम्य सङ्क्रुद्धः कालनेमिर्दृढां गदाम्।
जघान गदया राजंस्तं विष्णुं गरुडं च वै ॥ २-५१-३४ (१३३८०)
तं दृष्ट्वा गुरडं श्रान्तं चक्रमुद्यस्य वै हरिः।
शतं शिरांसि बाहूंश्च सोच्छिनत्कालनेमिनः ॥ २-५१-३५ (१३३८१)
जघानान्यांस्च तान्सर्वान्समरे दैत्यदानवान्।
विबुधानामृषीणां च स्वानि स्थानानि वै ददौ ॥ २-५१-३६ (१३३८२)
दत्त्वा सुराणां सुप्रीतो योग्यकर्माणि भारत।
जगाम ब्रह्मणा सार्धं ब्रह्मलोकं तदा हरिः ॥ २-५१-३७ (१३३८३)
ब्रह्मलोकं प्रविश्याश्च प्राप्य नारायणः प्रभुः।
पौराणं ब्रह्मसदनं दिव्यं नारायणाश्रयम् ॥ २-५१-३८ (१३३८४)
स प्रविश्य तदा देवः स्तूयमानो महर्षिभिः।
सहस्रशीर्षा भूत्वा च शयनायोपचक्रमे ॥ २-५१-३९ (१३३८५)
आदिदेवः पुराणात्मा निद्रावशमुपागतः।
शेते सुखं सदा विष्णुर्मोहयञ्जगदव्ययः ॥ २-५१-४० (१३३८६)
जग्मुस्तस्याथ वर्षाणि शयानस्य महात्मनः।
षट्त्रिंशच्छतसाहस्रं मानुषेणेह सङ्ख्यया ॥ २-५१-४१ (१३३८७)
जग्मुः कृतयुगत्रेताद्वापरान्ते बुबोध ह।
ब्रह्मादिभिः स्तूयमानः सुरैश्चापि सहर्षिभिः ॥ २-५१-४२ (१३३८८)
उत्पत्य शयनाद्विष्णुर्ब्रह्मणा विबुधैः सह।
देवानां च हितार्थाय ययौ देवसभां प्रति ॥ २-५१-४३ (१३३८९)
मेरोः शिरसि विन्यस्तां ज्वलन्तीं तां शुभां सभाम्।

विविशुस्ते सुराः सर्वे ब्रह्मणा सह भारत ॥ २-५१-४४ (१३३९०)
जग्मुस्तत्र निषेदुस्ते सा निःशब्दा ह्यभूत्तदा।
तत्र भूमिरुवाचाथ खेदात्करुणभाषिणी ॥ २-५१-४५ (१३३९१)
राज्ञां बलैर्बलवतां खिन्नास्मि भृशपीडिता।
नित्यं भारपरिश्रान्ता दुःखं जीवाम्यहं सुराः ॥ २-५१-४६ (१३३९२)
पुरे पुरे च नृपतिः कोटिसङ्ख्यैर्बलैर्वृतः।
राष्ट्रे राष्ट्रे च शतशो ग्रामाः कुलसहस्रिणः ॥ २-५१-४७ (१३३९३)
भूमिपानां सहस्रैश्च तेषां च बिलनां बलैः।
ग्रामायुतैः पुरै राष्ट्रैरहं निर्विवरीकृता ॥ २-५१-४८ (१३३९४)
तस्माद्धारयितुं शक्त्या न क्षमासि जनानहम्।
दैत्यैश्च बाध्यमानास्ताः प्राज नित्यं दुरात्मभिः ॥ २-५१-४९ (१३३९५)
भीष्ण उवाच। २-५१-५०क्ष् (१४७८)
भूमेस्तु वचनं श्रुत्वा देवो नारायणस्तदा।
व्यादिश्य तान्सुरान्सर्वान्क्षितौ वस्तुं मनो दधे ॥ ॥ २-५१-५० (१३३९६)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-५१-४२ कृतयुगत्रेताद्वापराः अन्त इति छेदः ॥

सभापर्व - अध्याय ०५२
॥ श्रीः ॥
२.५२. अध्यायः ५२

Mahabharata - Sabha Parva - Chapter Topics
विष्णुना देवानां भूमावुत्पत्तये आज्ञापनम् । ।१.।अवतीर्णे कृष्णे स्वर्गादागतानामिन्द्रादीनां श्रीकृष्णं स्तुत्वा पुनः

Mahabharata - Sabha Parva - Chapter Text

भीष्ण उवाच।

यच्चके भगवान्विष्णुर्वसुदेवसुतस्तदा।
तत्तेऽहं सम्प्रवक्ष्यामि शृणु सर्वमशेषतः ॥ २-५२-१ (१३३९७)
वासुदेवस्य महात्म्यं चरितं च महात्मनः।

हितार्थं सुरसर्त्यानां लोकानां च हिताय च ॥ २-५२-२ (१३३९८)
यदा दिवि विभुस्तात न रेमे भगवानसौ।
ततो व्यादिशय भूतानि विभुर्भूमिसुखावहः ॥ २-५२-३ (१३३९९)
निग्रहार्थाय दैत्यानां चोदयामास वै तदा।
मुरुतश्च वसूंश्चैव सूर्याचन्द्रमसावुभौ ॥ २-५२-४ (१३४००)
गन्धर्वाप्सरसश्चैव रुद्रादित्यांस्तथाऽश्विनौ।
जायध्वं मानुषे लोके सर्वलोकमहेश्वराः ॥ २-५२-५ (१३४०१)
जङ्गमानि विशालाक्षो ह्यात्मार्थमसृजत्प्रभुः।
जायन्तामिति गोविन्दस्तिर्यग्योनिगतैः सह ॥ २-५२-६ (१३४०२)
तानि सर्वाणि सर्वज्ञो व्यजायत यदोः कुले।
आत्मानमात्मना तात कृत्वा बहुविधं हरिः।
रत्यर्थमिह गास्तत्र ररक्ष पुरुषोत्तमः। २-५२-७ (१३४०३)
अजातशत्रो जातस्तु यथेष्ट भुवि भूमिप।
कीर्त्यमानं मया तात निबोध भरतर्षभ ॥ २-५२-८ (१३४०४)
सागराः समकम्पन्त मुदा चेलुश्च पर्वताः।
जज्वलुश्चाग्नयः शान्ता जायमाने जनार्दने ॥ २-५२-९ (१३४०५)
शिवाः सम्प्रववुर्वाताः प्रशान्तमभवद्रजः।
ज्योतींषि सम्प्रकाशन्त जायमाने जनार्दने ॥ २-५२-१० (१३४०६)
देवदुन्दुभयश्चापि सस्वनुर्भृशमम्बरे।
अभ्यवर्षंस्तदाऽऽगम्य देवताः पुष्पवृष्टिभिः ॥ २-५२-११ (१३४०७)
गीर्भिर्मङ्गलयुक्ताभिः स्तुवन्वै मधुसदनम्।
उपतस्थुस्तदा प्रीताः प्रादुर्भावे महर्षयः ॥ २-५२-१२ (१३४०८)
ततस्तानभिसम्प्रेक्ष्य नारदप्रमुखानृषीन्।
उपानृत्यन्नुपजगुर्गन्धर्वाप्सरसां गणाः ॥ २-५२-१३ (१३४०९)
उपतस्थे च गोविन्दं सहस्राक्षः शचीपतिः।
अभ्यभाषत तेजस्वी महर्षीन्पूजयंस्तदा ॥ २-५२-१४ (१३४१०)
कृत्वा च देवकार्याणि कृत्वा देवहितानि च।
खं लोकं लोककृद्देवः पुनर्गच्छति तेजसा ॥ २-५२-१५ (१३४११)
इत्युक्त्वा ऋषिभिः सार्धं जगाम त्रिदिवं पुनः।
अभ्यनुज्ञाय तान्सर्वाञ्छादयन्प्रकृतिं पराम् ॥ २-५२-१६ (१३४१२)
नन्दगोपकुले कृष्ण उवास बहुलाः समाः।
ततः कदाचित्सुप्तं तं शकटस्य त्वधः शिशुम् ॥ २-५२-१७ (१३४१३)
यशोदा सम्परित्यज्य जगाम यमुनां नदीम्।
शिशुलीलां ततः कुर्वन्स्वहस्तचरणौ क्षिपन् ॥ २-५२-१८ (१३४१४)
रुरोद मधुरं कृष्णः पादावूर्ध्वं प्रसारयन्।
पादाङ्गुष्ठेन शकटं दारयन्नथ केशवः ॥ २-५२-१९ (१३४१५)

तत्र एकेन पादेन पातयित्वा तथा शिशुः।
न्युब्जं पयोधराकाङ्क्षी ससार च रुरोद च ॥ २-५२-२० (१३४१६)
पाटितं शकटं दृष्ट्वा भिन्नभाण्डपुटीकटम्।
जनास्ते शिशुना तेन विस्मयं परमं ययुः ॥ २-५२-२१ (१३४१७)
प्रत्यक्षं शूरसेनानां दृश्यते महदद्भुतम्।
शयानेन हतः कंसपक्षवांस्तिग्मतेजसा ॥ २-५२-२२ (१३४१८)
पूतना चापि निहता महाकाया महास्तनी।
ततः काले महाराज संसक्तौ रामकेशवौ ॥ २-५२-२३ (१३४१९)
कृष्णः सङ्कर्षणश्चोभौ रिङ्गिणौ च बभूवतुः।
अन्योन्यकिरणाक्रान्तौ चन्द्रसूर्याविवाम्बरे ॥ २-५२-२४ (१३४२०)
विसर्पन्तौ च सर्वत्र महासर्पभुजौ तदा।
रेजतुः पांसुदिग्धाङ्गौ रामकृष्णौ तदा नृप ॥ २-५२-२५ (१३४२१)
क्वचिच्च जानुभिः स्पृष्टौ क्रीडमानौ क्वचिद्वने।
पिबन्तौ दधिकुल्यांश्च मथ्यमाने च भारत ॥ २-५२-२६ (१३४२२)
ततः स बालो गोविन्दो नवनीतं तदा क्षयम्।
ग्रासमानस्तु तत्रायं गोपीभिर्ददृशे तथा ॥ २-५२-२७ (१३४२३)
दाम्नाऽथोलूखले कृष्णो गोपीभिश्च निबन्धितः।
तत्तथा शिशुना तेन कर्षता चार्जुनावृभौ ॥ २-५२-२८ (१३४२४)
समूलविटपौ भग्नौ तदद्भुतमिवाभवत्।
ततस्तौ बाल्यमुत्तीर्णौ कृष्णसङ्कर्षणावुभौ ॥ २-५२-२९ (१३४२५)
तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः।
नीलपीताम्बरधरौ पीतश्वेतानुलेपनौ ॥ २-५२-३० (१३४२६)
बभुवतुर्वत्सपालौ काकपक्षधरावुभौ।
पर्णवाद्यं श्रुतिसुखं वादयन्तौ वराननौ ॥ २-५२-३१ (१३४२७)
शुशुभाते वनगतौ त्रिशीर्षाविव पन्नगौ।
मयूराङ्गजकर्णौ तौ पल्लवापीडधारिणौ ॥ २-५२-३२ (१३४२८)
वनमालापरिक्षिप्तौ सालपोताविवोद्गतौ।
अरविन्दकृतापीडौ रज्जुयज्ञोपवीतिनौ ॥ २-५२-३३ (१३४२९)
सशिक्यतुम्बुरुकरौ गोपवेणुप्रवादकौ।
क्वचिद्वसन्तावन्योन्यं क्रडमानौ क्वचिद्वने ॥ २-५२-३४ (१३४३०)
पर्णशय्यासु तौ सुप्तौ क्वचिन्निद्रान्तरैषिणौ।
तौ वत्सान्पालयन्तौ हि शोभयन्तौ महद्वनम् ॥ २-५२-३५ (१३४३१)
चञ्चूर्यन्तौ रमन्तौ च राजन्नेवं तदा शुभम्।
ततो बृन्दावनं गत्वा वसुदेवसुतावुभौ।
गोकुलं तत्र कौन्येय चारयन्तौ विजह्रतुः ॥ ॥ २-५२-३६ (१३४३२)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२.।

सभापर्व - अध्याय ०५३
॥ श्रीः ॥
२.५३. अध्यायः ५३

Mahabharata - Sabha Parva - Chapter Topics
कृष्णेन बालकैः सह विहृत्य कालियमर्दनम् ॥१.।बलरामेण धेनुकासुरहननम् ॥२.।कृष्णेन गोवर्धनोद्धरणम् ॥३.

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच।

ततः कदचिद्गोविन्दो ज्येष्ठं सङ्कर्षणं विना।
चचार तद्वनं रम्यं सुस्वरूपो वराननः ॥ २-५३-१ (१३४३३)
काकपक्षधरः श्रीमाञ्श्यामः पद्मनिभेक्षणः।
श्रीवत्सेनोरसा युक्तः शशाङ्क इव लक्ष्मणा ॥ २-५३-२ (१३४३४)
रज्जुयज्ञोपवीती स पीताम्बरधरो युवा।
श्वेतचन्द्रनलिप्राङ्गो नीलकुञ्चितमूर्धजः ॥ २-५३-३ (१३४३५)
राजता बर्हिपत्रेण मन्दमारुतकम्पिना।
क्वचिद्गायन्क्वञ्चित्क्रीडन्क्वचिन्नृत्यन्क्वचिद्धसन् ॥ २-५३-४ (१३४३६)
गोपवेणुं सुमधुरं कामं तदपि वादयन्।
प्रह्लादनार्थं च गवां क क्वचिद्वनगतो युवा ॥ २-५३-५ (१३४३७)
गोकुले मेघकाले तु चचार द्युतिमान्प्रभुः।
बहुरम्येषु देशेषु वनस्य वनराजिपु ॥ २-५३-६ (१३४३८)
तासु कृष्णो मुदा युक्तः क्रीडयन्भरतर्षभ।
स कदाचिद्वने तस्मिन्गोभिः सह परिव्रजन् ॥ २-५३-७ (१३४३९)
भाण्डीरं नाम दृष्ट्वाऽथ न्यग्रोधं केशवो महान्।
तच्छायायां मतिं चक्रे निवासाय तदा प्रभुः ॥ २-५३-८ (१३४४०)
स तत्र वयसा तुल्यैर्वत्सपालैस्तदाऽनघ।
रेमे स दिवसं कृष्णः पुरा स्वर्गगतो यथा ॥ २-५३-९ (१३४४१)
तं क्रीडमानं गोपालाः कृष्णं भाण्डीरवासिनः।
रमयन्ति स्म बहवो मान्यैः क्रीडनकैस्तदा ॥ २-५३-१० (१३४४२)
अन्ये स्म परिगायन्ति गोपा मुदितमानसाः।

गोपालकृष्णमेवान्ये गायन्ति स्म वनप्रियाः ॥ २-५३-११ (१३४४३)
तेषां सङ्गायतामेव वादयामास केशवः।
पर्णवाद्यान्तरे वेणुं तुम्बवीणां च तत्र वै ॥ २-५३-१२ (१३४४४)
एवं क्रीडान्तरैः कृष्णो गोपालैर्विजहार सः।
तेन बालेन कौन्तेय कृतं लोकहितं तदा ॥ २-५३-१३ (१३४४५)
पश्यतां सर्वभूतानां वासुदेवेन भारत।
ह्रदे निपातता तत्र क्रीडितं नागमूर्धनि ॥ २-५३-१४ (१३४४६)
शासयित्वा तु कालीयं सर्वलोकस्य पश्यतः।
विजहार ततः कृष्णो बलेदवसहायवान् ॥ २-५३-१५ (१३४४७)
धेनुको दारुणो राजन्दैत्यो रासभविग्रहः।
तदा तालवने राजन्बलदेवेन वै हतः ॥ २-५३-१६ (१३४४८)
ततः कदाचित्कौन्तेय रामकृष्णौ वनं गतौ।
चारयन्तौ प्रवृद्धानि गोधनानि शुभाननौ ॥ २-५३-१७ (१३४४९)
विहरन्तौ मुदा युक्तौ वीक्षमाणौ वनानि वै।
क्ष्वेलयन्तौ प्रगायन्तौ विचिन्वन्तौ च पादपान् ॥ २-५३-१८ (१३४५०)
नामभिर्व्याहरन्तौ च वत्सान्गाश्च परन्तपौ।
चेरतुर्लोकसिद्धाभिः क्रीडाभिरपराजितौ ॥ २-५३-१९ (१३४५१)
तौ देवौ मानुषीं दीक्षां वहन्तौ सुरपूजितौ।
तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनम् ॥ २-५३-२० (१३४५२)
एवं बाल्येऽपि गोपालैः क्रीडाभिश्च विजह्रतुः ॥ २-५३-२१ (१३४५३)
ततः कृष्णो महातेजास्तदा गत्वा तु गोव्रजम्।
गिरियज्ञं तमेवैष प्रवृत्तं गोपदारकैः ॥ २-५३-२२ (१३४५४)
बुभुजे पायसं शौरिरीश्वरः सर्वभूतकृत्।
तं दृष्ट्वा गोपकाः सर्वे कृष्णमेव समर्चयन् ॥ २-५३-२३ (१३४५५)
पूज्यमानस्तदा देवैर्दिव्यं वपुरधारयत्।
धृतो गोवर्धनो नाम सप्ताहं पर्वतो धृतः ॥ २-५३-२४ (१३४५६)
शिशुना वासुदेवेन गवार्थमरिमर्दन।
क्रीडमानस्तदा कृष्णः कृतवान्कर्म दुष्करम् ॥ २-५३-२५ (१३४५७)
तदद्भुतमतीवासीत्सर्वलोकस्य भारत।
देवदेवः क्षितं गत्वा कृष्णं नत्वा मुदान्वितः। २-५३-२६ (१३४५८)
गोविन्द इति तं ह्युक्त्वा ह्यभ्यषिञ्चत्पुरन्दरः।
इत्युक्त्वाश्लिष्य गोविन्दं पुरुहूतोभ्ययाद्दिवम् ॥ २-५३-२७ (१३४५९)
अथारिष्ट इति ख्यातं दैत्यं वृषभविग्रहम्।
जघान तरसा कृष्णः पशूनां हितकाम्यया ॥ २-५३-२८ (१३४६०)
केशिनामा ततो दैत्यो राजंस्तुरगविग्रहः।
तथा वनगतं पार्थ गजायुतबलं हयम् ॥ २-५३-२९ (१३४६१)

करांभोरुहवज्रेण जघान मधुसूदनः।
अथ मल्लं तु चाणूरं निजघान महाऽसुरम् ॥ २-५३-३० (१३४६२)
सुदामानममित्रघ्न सर्वसैन्यपुरस्कृतम्।
बालरूपेण गोविन्दो निजघान च भारत ॥ २-५३-३१ (१३४६३)
बलदेवेन चायत्नात्समाजे मुष्टिको हतः।
ताडितश्च सहामात्यः कंसः कृष्णेन भारत ॥ २-५३-३२ (१३४६४)
हत्वा कंसममित्रघ्नः सर्वेषां पश्यतां तदा।
अभिषिच्योग्रसेनं तं पित्रोः पादमवन्दत। २-५३-३३ (१३४६५)
एवमादीनि कर्माणि कृतवान्वै जनार्दनः ॥ ॥ २-५३-३४ (१३४६६)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि त्रिपञ्चाशोऽध्यायः ॥५३ ॥

सभापर्व - अध्याय ०५४
॥ श्रीः ॥
२.५४. अध्यायः ५४

Mahabharata - Sabha Parva - Chapter Topics
रामकृष्णयोः विद्याभ्यासार्थं सान्दीर्पिन्याचार्यसमीपगमनम् ॥१. ।सान्दीपिनिना गुरुदक्षिणात्वेन मृतपुत्रानयनं च

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

ततस्तौ जग्मतुस्तत्र गुरुं सान्दीपिनिं पुनः।
गुरुशुश्रूषणायुक्तौ धर्मज्ञौ धर्मचारिणौ ॥ २-५४-१ (१३४६७)
व्रतमुग्रं महात्मानौ विचरन्ताववन्तिषु।
अहोरात्रैश्चतुष्पष्ट्या साङ्गान्वेदानवापतुः ॥ २-५४-२ (१३४६८)
लेख्यं च गणितं चोभौ प्राप्नुतां यदुनन्दनौ।
गान्धर्ववेदं वैद्यं च सकलं समावापतुः ॥ २-५४-३ (१३४६९)
हस्तिशिक्षामश्वशिक्षां द्वादशाहेन चाप्नुताम्।
तावुभौ जग्मतुर्वीरौ गुरुं सान्दीपिनिं पुनः ॥ २-५४-४ (१३४७०)
धनुर्वेदचिकीर्षार्थं धर्मज्ञौ धर्मचारिणौ।
ताविष्वासवराचार्यमभिगम्य प्रणम्य च ॥ २-५४-५ (१३४७१)
तेन वै सत्कृतौ राजंश्चरन्तौ ताववन्तिषु।

पञ्चाशद्भिरहोरात्रैर्दशाङ्गं सुप्रतिष्ठितम् ॥ २-५४-६ (१३४७२)
सरहस्यं धनुर्वेदं सकलं ताववापतुः।
दृष्ट्वा कृतार्थो विप्रेन्द्रो गुर्वर्थे तावचोदयत् ॥ २-५४-७ (१३४७३)
अयाचतार्थं गोविन्दं तदा सान्दीपिनिर्विभुम्।
मम पुत्रः समुद्रेऽस्मिंस्तिमिना चापवाहितः ॥ २-५४-८ (१३४७४)
पुत्रमानय भद्रं ते भक्षितं तिमिना मम।
आर्ताय गुरवे तत्र प्रतिशुश्राव दुष्करम् ॥ २-५४-९ (१३४७५)
अशक्यं सर्वभूतेषु कर्तुमन्येन केनचित्।
यश्च सान्दीपिनेः पुत्रं जहार भरतर्षभ ॥ २-५४-१० (१३४७६)
सोऽसुरः समरे ताभ्यां समुद्रे विनिपातितः।
ततः सान्दीपिनेः पुत्रः प्रसादादमितौजसः ॥ २-५४-११ (१३४७७)
दीर्घकालं कृतः प्रेतः पुनरासीच्छरीरवान्।
तदशक्यमचिन्त्यं च दृष्ट्वा सुमहदद्भुतम् ॥ २-५४-१२ (१३४७८)
सर्वेषामेव भूतानां विस्मयः समजायत।
आसनानि च सर्वाणि गवाश्वं च धनादिकम् ॥ २-५४-१३ (१३४७९)
सर्वं तदुपजहाते गुरवे रामकेशवौ।
गदापरिघयुद्धे च सर्वास्त्रेषु च केशवः ॥ २-५४-१४ (१३४८०)
परमां मुख्यतां प्राप्तः सर्वलोकेषु विश्रुतः।
कश्च नारायणादन्यः सर्वरत्नविभूषितम् ॥ २-५४-१५ (१३४८१)
रथमादित्यसङ्काशमातिष्ठेत शचीपतेः।
कस्य चाप्रतिमो यन्ता वज्रपाणेः प्रियः सखा ॥ २-५४-१६ (१३४८२)
मातलिः सङ्गृहीता स्यादन्यत्र पुरुषोत्तमात्।
भोजराजात्मजो वापि कंसस्तात युधिष्ठिर ॥ २-५४-१७ (१३४८३)
अस्त्रजाते बले वीर्ये कार्तवीर्यसमोऽभवत्।
तस्य भोजपतेः पुत्राद्भोजराजन्यवर्धनात् ॥ २-५४-१८ (१३४८४)
उद्विजन्ते स्म राजानः सुपर्णादिव पन्नगाः।
चित्रकार्मुकनिस्त्रिंशविमलप्रासयोधिनः ॥ २-५४-१९ (१३४८५)
शतं शतसहस्राणि पादातास्तस्य भारत।
अष्टौ शतसहस्राणि शूराणामनिवर्तिनाम् ॥ २-५४-२० (१३४८६)
अभवन्भोजराजस्य जाम्बूनदमया ध्वजाः।
रुक्मकाञ्चनकक्ष्यास्तु रथास्तस्य युधिष्ठि ॥ २-५४-२१ (१३४८७)
अभवन्भोजपुत्रस्य द्विपास्तावद्धि तद्बलम्।
चित्रकार्मुकनिस्त्रिंशविमलप्रासयोधिनाम् ॥ २-५४-२२ (१३४८८)
षोडशाश्वसहस्राणि किंशुकाभानि तस्य वै।
अपरस्तु महाव्यूहः किशोरणां युधिष्ठिर ॥ २-५४-२३ (१३४८९)
आरोहवरसम्पन्नो दुर्धर्षः केनचिद्बलात्।

स च षोडशसाहस्रः कंसभ्रातृपुरः सरः ॥ २-५४-२४ (१३४९०)
सुनामा सर्वतस्त्वेनं स कंसं पर्यपालयत्।
सगणो मिश्रको नाम षष्टिमसाहस्र उच्यते ॥ २-५४-२५ (१३४९१)
कंसरोषमहावेगां वैवस्वतवशानुगाम् ॥
मत्तद्विपमहाग्राहां वैवस्वतवशानुगाम् ॥ २-५४-२६ (१३४९२)
शस्त्रजालमहाफेनां सादिवेगमहाजलाम्।
गदापरिघपाठीनां नानाकवचशैवलाम् ॥ २-५४-२७ (१३४९३)
रथनागमहावर्तां नानारुधिरकर्दमाम्।
चित्रकार्मुककल्लोलां रथाश्वकलिलह्रदाम् ॥ २-५४-२८ (१३४९४)
महामृधनदीं घोरां योधावर्तननिस्वनाम्।
कोऽन्यो नारायणादेत्य कंसहन्ता युधिष्ठिर ॥ २-५४-२९ (१३४९५)
एष शक्ररथे तिष्ठंस्तान्यनीकानि भारत।
व्यधमद्भोजपुत्रस्य महाभ्राणीव मारुतः ॥ २-५४-३० (१३४९६)
तं सभास्थं सहामात्यं हत्वा कंसं सहान्वयम्।
आनयामास मानार्हां देवकीं समुद्धृणाम् ॥ २-५४-३१ (१३४९७)
यशोदां रोहिणीं चैव अभिवाद्य पुनः पुनः।
उग्रसेनं च राजानमभिषिच्य जनार्दनः ॥ २-५४-३२ (१३४९८)
अर्चितो यदुमुख्यैश्च भगवान्वासवानुजः।
ततः पार्थिवमायान्तं सहितं सर्वराजभिः।
सरस्वत्यां जरासन्धमजयत्पुरुषोत्तमः ॥ ॥ २-५४-३३ (१३४९९)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि चतुः पञ्चाशोऽध्यायः ॥ ५४.।

सभापर्व - अध्याय ०५५
॥ श्रीः ॥
२.५५. अध्यायः ५५

Mahabharata - Sabha Parva - Chapter Topics
कृष्णस्य मधुरां त्यक्त्वा द्वारकागमनम् ॥१.।नरकासुरप्रतापवर्णनम् ॥२.।इन्द्रेण द्वारकामेत्य कृष्णं प्रति नरकवध

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

शूरसेनपुरं त्यक्त्वा ततो यादवनन्दनः।
द्वारकां भगवान्कृष्णः प्रत्यपद्यत भारत ॥ २-५५-१ (१३५००)
ततो महात्मा यानानि रत्नानि विविधानि च।
यथार्हं पुण्डरीकाक्षो नैर्ऋतात्प्रत्यपद्यत ॥ २-५५-२ (१३५०१)
तत्र विघ्नं चरन्ति स्म दैतेयाः सहदानवैः।
ताञ्जघान महाबाहुर्वरमत्तान्महासुरान् ॥ २-५५-३ (१३५०२)
स विघ्नमकरोत्तत्र नरको नाम नैर्ऋतः।
अदितिं धर्षयामास कुण्डलार्थं युधिष्ठिर ॥ २-५५-४ (१३५०३)
न चासुरगणैः सर्वैः सहितैः कर्म तत्पुरा।
कृतपूर्वं महाघोरं यदकार्षीन्महासुरः ॥ २-५५-५ (१३५०४)
यं मही सुषुवे देवी यस्य प्राग्ज्योतिषं पुरम्।
विषयान्तपालाश्चत्वारो यस्यासन्युद्धदुर्मदाः ॥ २-५५-६ (१३५०५)
आदेवयानमावृत्य पन्थानं पर्यवस्थिताः।
त्रासनाः सुरसङ्घानां विरूपै राक्षसैः सह ॥ २-५५-७ (१३५०६)
हयग्रीवो निकुम्भश्च घोरः पञ्चजनस्तदा।
मुरः पुत्रसहस्रैश्च वरमत्तो महासुरः ॥ २-५५-८ (१३५०७)
तद्वधार्थं महाबाहुरेष चक्रगदासिभृत्।
जातो वृष्णिषु देवक्यां वासुदेवो जनार्दनः ॥ २-५५-९ (१३५०८)
तस्यास्य पुरुषेन्द्रस्यलोकप्रथिततेजसः।
निवासो द्वारकायां तु विदितो वः प्रधानतः ॥ २-५५-१० (१३५०९)
अतीव हि पुरी रम्या द्वारका वासवक्षयात्।
अतिवैराजमप्यद्धा प्रत्यक्षस्ते युधिष्ठिर ॥ २-५५-११ (१३५१०)
तस्मिन्देवपुरप्रख्ये सा सभा वृष्ण्युपाश्रया।
सुधर्मेति च विख्याता योजनायतविस्तृता ॥ २-५५-१२ (१३५११)
तत्र वृष्ण्यन्दकाः सर्वे रामकृष्णपुरोगमाः।
लोकयात्रामिमां कृत्स्नां परिरक्षन्त आसते ॥ २-५५-१३ (१३५१२)
तत्रासीनेषु सर्वेषु कदाचिद्भरतर्षभ।
दिव्यगन्धा ववुर्वाताः कुसुमानां च वृष्टयः ॥ २-५५-१४ (१३५१३)
ततः सूर्यसहस्राभस्तेजोराशिर्महाद्भुतः।
मध्ये तु तेजसस्तस्य पाण्डरं गजमास्थितः। २-५५-१५ (१३५१४)
वृतो देवगणैः सर्वैर्वासवः प्रत्यदृश्यत ॥
रामकृष्णौ च राजा च वृष्ण्यन्धकगणैः सह। २-५५-१६ (१३५१५)
उत्पत्य सहसा देवे नमस्कारमकुर्वत ॥
सोऽवतीर्य गजात्तूर्णं परिष्वज्य जनार्दनम्। २-५५-१७ (१३५१६)
सस्वजे बलदेवं च राजानं च तमाहुकम् ॥
वासुदेवोद्धवौ चैव विकद्रुं च महामतिम्। २-५५-१८ (१३५१७)

प्रद्युम्नसाम्बनिशठानानिरुद्धं च सात्यकिम् ॥
गदं सारणमक्रूरं भानुझल्लिविडूरथान्। २-५५-१९ (१३५१८)
तथैव कृतवर्णाणां चारुदेष्णं महाबलम् ॥
देवकल्पान्महाराज तान्दाशार्हपुरोगमान्। २-५५-२० (१३५१९)
पिरिष्वज्य च दृष्ट्वा च भगवान्भूतभावनः ॥
वृष्ण्यन्धकमहामात्रान्परिष्वज्याथ वासवः। २-५५-२१ (१३५२०)
प्रगृह्य पूजां तैर्दत्तां भगवान्पाकशासनः ॥
सोऽदितेर्वचनात्तात कुण्डलार्थे जनार्दनम्। २-५५-२२ (१३५२१)
उवाच परमप्रीतो जहि भौमं नरेश्व ॥ २-५५-२३ (१३५२२)
भीष्ण उवाच।
निहत्य नरकं भौममाहरिष्यामि कुण्डले। २-५५-२३क्ष् (१४७९)
एवमुक्त्वाऽथ गोविन्दो राममेवाभ्यभाषत ॥
प्रद्युम्नमनिरुद्धं च साम्बं चाप्रतिमं बले। २-५५-२४ (१३५२३)
एतांश्चोच्त्का तथा तत्र वासुदेवो महायशाः ॥
अथारुह्य सुपर्णं वै शङ्खचक्रगदासिभृत्। २-५५-२५ (१३५२४)
ययौ तदा हृषीकेशो देवानां हितकाम्यया ॥
तं प्रयान्तममित्रघ्नं देवाः सहपुरन्दराः। २-५५-२६ (१३५२५)
पृष्ठतोऽनुययुः प्रीत्या स्तुवन्तो विष्णुमच्युतम्।
उग्रान्त्रक्षोगणान्हत्वा नरकस्य महासुरान्। २-५५-२७ (१३५२६)
क्षुरान्तान्मौरवान्पाशान्षट्सहस्रं ददर्श सः ॥
सञ्छिद्य पाशाच्छस्त्रेण मुरं हत्वा सहान्वयम्। २-५५-२८ (१३५२७)
शैलसङ्घानतिक्रम्य निशुम्भं च व्यपोथयत् ॥ २-५५-२९ (१३५२८)
यः सहस्रसहस्त्वेकः सर्वान्देवानपोथयत्।
तं जघान महावीर्यं हयग्रीवं महाबलम् ॥ २-५५-३० (१३५२९)
अपारतेजा दुर्धर्षः सर्वयादवनन्दनः ॥
मध्ये लोहितगङ्गायां भगवान्देवकीसुतः ॥ २-५५-३१ (१३५३०)
औदकायां विरूपाक्षं जघान मधुसूदनः।
ततः प्राग्ज्योतिषं नाम दीप्यमानमिव श्रिया।
पुरमासादयामास तत्र युद्धमवर्तत ॥ २-५५-३२ (१३५३१)
तद्युद्धमभवद्घोरं तेन भौमेन भारत।
कुण्डलार्थे सुरेशस्य नरकेण महात्मना ॥ २-५५-३३ (१३५३२)
मुहूर्तं लालयित्वा तु नरकं मधूसूदनः।
प्रवृत्तचक्रं चक्रेण प्रममाथ बलाद्बली ॥ २-५५-३४ (१३५३३)
चक्रप्रमथितं तस्य पपात सहसा भुवि।
उत्तमाङ्गं हताङ्गस्य वृत्रे वज्रहते यथा ॥ २-५५-३५ (१३५३४)
भूमिस्तु पतितं दृष्ट्वा प्रायच्छत्कुण्डले सुतम्।

प्रदाय च महाबाहुमिदं वचनमब्रवीत् ॥ २-५५-३६ (१३५३५)
सृष्टस्त्वयैव मधुहंस्त्वयैव विनिपातितः।
यथेच्छसि तथा क्रीडा प्रजास्तस्यानुपालय ॥ २-५५-३७ (१३५३६)
श्रीवासुदेव उवाच। २-५५-३८क्ष् (१४८०)
देवानां च मुनीनां च पितॄणां च महात्मनाम्।
उद्वेजनीयो भूतानां ब्रह्मद्विद् पुरुषाधमः ॥ २-५५-३८ (१३५३७)
लोकद्विष्टः सुतस्ते तु देवारिर्लोककण्टकः।
सर्वलोकनमस्कार्यामदितं बाधयद्बली ॥ २-५५-३९ (१३५३८)
कुण्डले हृतवान्दर्पात्ततस्ते निहतः सुतः।
नैव मन्युस्त्वया कार्यो यत्कृतं मयि भामिनि ॥ २-५५-४० (१३५३९)
त्वत्प्रभावाच्च ते पुत्रो लब्धवान्गतिमुत्तमाम्।
तस्माद्गच्छ महाभागे भारावतरणं कृतम् ॥ ॥ २-५५-४१ (१३५४०)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि पञ्चपञ्चाशोऽध्यायः ॥५५ ॥

सभापर्व - अध्याय ०५६
॥ श्रीः ॥
२.५६. अध्यायः ५६

Mahabharata - Sabha Parva - Chapter Topics
कृष्णस्य नरकं निहत्य तदीयधनरत्नादिकं शतोत्तरषोडशसहस्रस्त्रीसहितं मणिपर्व तं च गरुडमारोप्य स्वर्गलोकग

Mahabharata - Sabha Parva - Chapter Text

भीष्ण उवाच ॥

निहत्य नरकं भौमं सत्यभामासहायवान्।
सहितो लोकपालैश्च ददर्श नरकालयम् ॥ २-५६-१ (१३५४१)
अथास्य गृहमासाद्य नारकस्य महात्मनः।
ददर्श धनमक्षय्यं रत्नानि विविधानि च। २-५६-२ (१३५४२)
मणिमुक्ताप्रवालानि वैडूर्यविकृतानि च।
विस्तारात्पांश्चार्कमणीन्विपुलान्स्फाटिकानपि ॥ २-५६-३ (१३५४३)
जाम्बूनदमयान्येव शातकुम्भमयानि च।
प्रदीप्तज्वलनाभानि शीतरश्मिप्रभाणि च ॥ २-५६-४ (१३५४४)

हिरण्यवर्णं रुचिरं श्वेतमभ्यन्तरं गृहम्।
तदक्षय्यं गृहे दृष्टं नरकस्य धनं बहु ॥ २-५६-५ (१३५४५)
न हि राज्ञः कुबेरस्य तावद्धनसमुच्छ्रयः।
दृष्टपूर्वः पुरा साक्षान्महेन्द्रभवनेष्वपि ॥ २-५६-६ (१३५४६)
हते भौमे निशुम्भे च वासवः सगणोऽब्रवीत्।
दाशार्हपतिमासीनमाहृत्य मणिकुण्डले ॥ २-५६-७ (१३५४७)
हेमसूत्रा महाकक्ष्यास्तोमरैर्वीर्यशालिनः।
विमलानि पताकानि वासांसि विविधानि च ॥ २-५६-८ (१३५४८)
भीमरूपाश्च मातङ्गाः प्रवालविकृताः कुथाः।
ते च विंशतिसाहस्रा द्वास्तावत्यः करेणवः ॥ २-५६-९ (१३५४९)
अष्टौ शतसहस्राणि देशजाश्चोत्तमा हयाः।
गोभिश्चाविकृतैर्यावत्कामात्तव जनार्दन ॥ २-५६-१० (१३५५०)
एतत्ते प्रापयिष्याणि वृष्ण्यावासमरिन्दम।
वसु यत्त्रिषु लोकेषु धर्मेणावर्जितं त्वया ॥ २-५६-११ (१३५५१)
भीष्म उवाच। २-५६-१२क्ष् (१४८१)
देवगन्धर्वरत्नानि दैतेयासुरजानि च।
यानि सन्ति हिरण्यानि नरकस्य निवेशने ॥ २-५६-१२ (१३५५२)
एतत्तु गरुडे सर्वं क्षिप्रमारोप्य वासवः।
दार्शार्हपतिना सार्धमुपायान्मणिपर्वतम् ॥ २-५६-१३ (१३५५३)
चित्रग्रथितमेघाभः प्रबभौ मणिपर्वतः।
हेमचित्रवितानैश्च प्रासादैरुपशोभितः ॥ २-५६-१४ (१३५५४)
हर्म्याणि च विशालानि मणिसोपानवन्ति च।
तत्रस्था वरवर्णिन्यो ददृशुर्मधुसूदनम् ॥ २-५६-१५ (१३५५५)
गन्धर्वसुरमुख्यानां प्रिया दुहितरस्तदा।
त्रिविष्टपसमे देशे तिष्ठन्तमपराजितम् ॥ २-५६-१६ (१३५५६)
परिवव्रुर्महाबाहुमेकवेणीधराः स्त्रियः।
पर्वाः काषायवासिन्यः सर्वाश्च नियतेन्द्रियाः ॥ २-५६-१७ (१३५५७)
व्रतसन्तापजः शोके नात्र कश्चिदपीडयत्।
अरजांसि च वासांसि बिभ्रत्यः कौशिकान्यपि ॥ २-५६-१८ (१३५५८)
समेत्य यदुसिंहस्य चक्रुरस्याञ्जलिं स्त्रियः।
ऊचुश्चैनं हृषीकेशं सर्वास्ताः कमलेक्षणाः ॥ २-५६-१९ (१३५५९)
नारदेन समाख्यातमस्माकं पुरुषोत्तम।
आगमिष्यति गोविन्दः सुरकार्यार्थसिद्धये ॥ २-५६-२० (१३५६०)
सोऽसुरं नरकं हत्वा निशुम्भं मुरमेव च।
भौमं च सपरीवारं हयग्रीवं च दानवम् ॥ २-५६-२१ (१३५६१)
तथा पञ्चजनं चैव प्राप्स्यते धनमक्षयम्।

सोऽचिरेणैव कालेन युष्मन्मोक्ता भविष्यति ॥ २-५६-२२ (१३५६२)
एवमुक्त्वागमद्धीरो देवर्षिर्नारदस्तथा।
त्वां चिन्तयानाः सततं तपो घोरमुपास्महे ॥ २-५६-२३ (१३५६३)
कालेऽतीते महाबाहुं कदा द्रक्ष्याम माधवम्।
इत्येवं हृदि सङ्कल्पं कृत्वा पुरुषसत्तम।
तपश्चराम सततं रक्ष्यमाणा हि दानवैः ॥ २-५६-२४ (१३५६४)
ततोऽस्मत्प्रियकामार्थं भगवान्मारुतोऽब्रवीत्।
यथोक्तं नारदेनाथ न चिरात्तद्भविष्यति ॥ २-५६-२५ (१३५६५)
भीष्ण उवाच ॥ २-५६-२६क्ष् (१४८२)
तासां परमनारीणामृषभाक्षं पुरः स्थितम्।
ददृशुर्देवगन्धर्वा गृष्टीनामिव गोपतिम् ॥ २-५६-२६ (१३५६६)
तस्य चन्द्रोपमं वक्त्रमुदीक्ष्य मुदितेन्द्रियाः।
सम्प्रहृष्टा महाबाहुमिदं वचनमब्रुवन्। २-५६-२७ (१३५६७)
सत्यव्रत पुरा वायुरिदमस्मानिहाब्रवीत्।
सर्वभूतहितज्ञश्च महर्षिरपि नारदः ॥ २-५६-२८ (१३५६८)
विष्णुर्नारायणो देवः शङ्खचक्रगदासिभृत्।
स भौमं नरकं हत्वा भर्ता वो भविता ध्रुवम् ॥ २-५६-२९ (१३५६९)
दिष्ट्या तस्यर्षिमुख्यस्य नारदस्य महात्मनः।
वचनादेव सत्यं नो भर्ता भवितुमर्हसि ॥ २-५६-३० (१३५७०)
यत्प्रियं बत पश्याम श्रुतं प्रियमरिन्दम।
दर्शनेन कृतार्थाः स्मो वयमस्य महात्मनः ॥ २-५६-३१ (१३५७१)
उवाच हि यदुश्रेष्ठः सर्वास्ता जातमन्मथाः।
यथा ब्रूत विशालाक्ष्यस्तत्सर्वं वो भविष्यति ॥ २-५६-३२ (१३५७२)
ततस्ता गरुडे सर्वाः सरत्नधनसञ्चयाः।
क्षिप्रमारोपयाञ्चक्रे भगवान्देवकीसुतः ॥ २-५६-३३ (१३५७३)
सपक्षिगणमातङ्गं सव्यालमृगपन्नगम्।
शाखामृगगणैर्जुष्टं सप्रस्तरशिलातलम् ॥ २-५६-३४ (१३५७४)
न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम्।
सप्रपातमहासानुं विचित्रशिखिसङ्कुलम् ॥ २-५६-३५ (१३५७५)
स महेन्द्रानुजः शौरिश्चकार गुरुडोपरि।
पश्यतां सर्वभूतानामुत्पाट्य मणिपर्वतम् ॥ २-५६-३६ (१३५७६)
उपेन्द्रं बलदेवं च वासवं च महाबलम्।
स्वपक्षबलविक्षेपैर्महाद्रिशिखरोपमः ॥ २-५६-३७ (१३५७७)
दिक्षु सर्वासु संरावं स चक्रे गरुडो वहन्।
आरुजन्पर्वताग्राणि पादपांश्च समुत्क्षिपन् ॥ २-५६-३८ (१३५७८)
सञ्जहार महाभ्राणि वैश्वानरपथं गतः।

ग्रहनक्षत्रताराणां सप्तर्षीणां स्वतेजसा ॥ २-५६-३९ (१३५७९)
प्रभाजालमतिक्रम्य चाश्विनोश्च परन्तप।
प्राप्य पुण्यतमं स्थानं देवलोकमरिन्दमः ॥ २-५६-४० (१३५८०)
शक्रसद्म समासाद्य चावरुह्य जनार्दनः।
सोऽभिवाद्यादितेः पादावर्चितः सर्वदैवतैः।
ब्रह्मदक्षपुरोगैश्च प्रजापतिभिरेव च ॥ २-५६-४१ (१३५८१)
अदितेः कुण्डले दिव्ये ददावथ तदा विभुः।
रत्नान च परार्घ्याणि रामेण सह केशवः ॥ २-५६-४२ (१३५८२)
प्रतिगृह्य च तत्सर्वमदितिर्वासवानुजम्।
पूजयामास दाशार्हं रामं च विगतज्वरा ॥ २-५६-४३ (१३५८३)
शची महेन्द्रमहिषी कृष्णस्य महिषीं तदा।
सत्यभामां तु सङ्गृह्य अदित्यै सा न्यवेदयत् ॥ २-५६-४४ (१३५८४)
सा तस्याः सत्यभामायाः कृष्णाप्रियचिकीर्षया।
वरं प्रादाद्देवमाता सत्यायै विगतज्वरा ॥ २-५६-४५ (१३५८५)
जरां न यास्यसि शुभे यावत्कृष्णोऽस्ति भूतले।
सर्वगन्धगुणोपेता भविष्यसि वरानने ॥ २-५६-४६ (१३५८६)
विसृज्य सत्यभामा वै पौलोमीं च सुमध्यमा।
शच्यापि समनुज्ञाता ययौ कृष्णनिवेशनम् ॥ २-५६-४७ (१३५८७)
सम्पूज्यमानस्त्रिदशैर्महर्षिगणसेवितः।
द्वारकां प्रययौ कृष्णो देवलोकादरिन्दमः ॥ २-५६-४८ (१३५८८)
शीघ्रादेत्य महाबाहुर्दीर्घमध्वानमच्युतः।
वर्धमानपुरद्वारमाससाद सुरोत्तमः ॥ ॥ २-५६-४९ (१३५८९)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६.।

सभापर्व - अध्याय ०५७
॥ श्रीः ॥
२.५७. अध्यायः ५७

Mahabharata - Sabha Parva - Chapter Topics
द्वारकावर्णनम् ॥१.।रुक्मिणीसत्यभामादिगृहवर्णनम् ॥२.।कृष्णेन स्वर्गादानीतस्व पारिजातस्य प्रतिष्ठापनमुद्यान

Mahabharata - Sabha Parva - Chapter Text

भीष्ण उवाच ॥

तां पुरीं द्वारकीं दृष्ट्वा विभुर्नारायणो हरिः।
हृष्टः सर्वार्थसम्पन्नः प्रवेष्टुमुपचक्रमे ॥ २-५७-१ (१३५९०)
सोऽपश्यद्वृक्षषण्डांश्च रम्यान्नानाजनान्वहून्।
समन्ततो द्वारवत्यां नानापुष्पफलान्वितान् ॥ २-५७-२ (१३५९१)
अर्कचन्द्रप्रतीकाशैर्मेरुकूटनिभैर्गृहैः।
द्वारकामावृतां रम्यां सुकृतां विश्वकर्मणा ॥ २-५७-३ (१३५९२)
पद्मषण्डाकुलाभिश्च हंससेवितवारिभिः।
गङ्गासिन्धुप्रकाशाभिः परिघाभिरलङ्कृताम् ॥ २-५७-४ (१३५९३)
प्राकारेणार्कवर्णेन पाण्डरेण विराजिताम्।
वियन्मूर्ध्नि निविष्टेन द्यामिवाभ्रपरिच्छदाम् ॥ २-५७-५ (१३५९४)
नन्दनप्रतिमैश्चापि मिश्रकप्रतिमैर्वनैः।
तत्र सा विहिता साक्षान्नगरी विश्वकर्मणा ॥ २-५७-६ (१३५९५)
काञ्चनैर्मणिसोपानैरुपेता जनहर्षिणी।
गीतघोषमहाघोषैः प्रसादप्रवरैः शुभा ॥ २-५७-७ (१३५९६)
तस्मिन्पुरवारश्रेष्ठे दाशार्हाणां यशस्विनाम्।
नेश्मानि जहृषे दृष्ट्वा भगवान्पाकशासनः ॥ २-५७-८ (१३५९७)
समुच्छ्रितपताकानि पारिप्लवनिभानि च।
काञ्चनाभानि भास्वन्ति मेरुकूटनिभानि च ॥ २-५७-९ (१३५९८)
सुधापाण्डरशृङ्गैश्च शातकुम्भपरिच्छदैः।
रत्नसानुमहाशृङ्गैः सर्वरत्नसमन्वितैः? २-५७-१० (१३५९९)
सहर्म्यैः सार्धचन्द्रैश्च सनिर्यूहैः सपञ्जरैः।
सयन्त्रगृहसंबाधैः सधातुभिरिवाद्रिभिः ॥ २-५७-११
मणिकाञ्चनभोमैश्च सुधामृष्टतलैस्तथा।
जाम्बूनदमयद्वारैर्वैडूर्यविकृतार्गलैः ॥ २-५७-११ (१३६००)
सर्वर्तुसुखसंस्पर्शैर्महाधनपरिच्छदैः।
रम्यसानुगृहैः शृङ्गैर्विचित्रैरिव पर्वतैः ॥ २-५७-१३ (१३६०१)
पञ्चवर्णसवर्णैश्च पुष्पवृष्टिसमप्रभैः।
तुल्यैः पर्जन्यनिर्घोषैर्ह्रादैर्भोगवती यथा ॥ २-५७-१४ (१३६०२)
कृष्णध्वजोपवाह्यैश्च दाशार्हायुधरोहितैः।
वृष्णिवीरमयूरैश्च स्त्रीसहस्रप्रजाकुलैः ॥ २-५७-१५ (१३६०३)
वासुदेवेन्द्रपर्जन्यैर्गृहमेघैरलङ्कृता।
ददृशे द्वारकाऽतीव मेघैर्द्यौरिव संवृता ॥ २-५७-१६ (१३६०४)
साक्षाद्भगवतो वेश्म विहितं विश्वकर्मणा।
ददृशुर्वासुदेवस्य चतुर्योजनमायतम् ॥ २-५७-१७ (१३६०५)

तावदेव सुविस्तीर्णं सुसम्पूर्णं महाधनैः।
प्रासादवरसम्पन्नं युक्तं जगति पर्वतैः ॥ २-५७-१८ (१३६०६)
यं चकार महाभागस्त्वष्टा वासवचोदितः।
प्रासादं हेमनाभस्य सर्वतो योजनायतम् ॥ २-५७-१९ (१३६०७)
मेरोरिव गिरेः शृङ्गमुच्छ्रितं काञ्चनालयम्।
रुक्मिण्याः प्रवरो वासो निर्मितः सुमहात्मना ॥ २-५७-२० (१३६०८)
सत्यभामा पुनर्वेश्म सदा वसति पाण्डरम्।
विचित्रमणिसोपानं यं विदुः शीतवानिति ॥ २-५७-२१ (१३६०९)
विमलादित्यवर्णाभिः पताकाभिरलङ्कृतम्।
व्यक्तबद्धं यथोद्देशे चतुर्दशमहाध्वजम् ॥ २-५७-२२ (१३६१०)
सर्वप्रासादमुख्योऽत्र जाम्बवत्या विभूषितः।
प्रभाया जृम्भणैश्चित्रैस्त्रैलोक्यमिव भासयन् ॥ २-५७-२३ (१३६११)
यस्तु पाण्डरवर्णाभस्तयोरन्तरमाश्रितः।
विश्वकर्माकरोदेनं कैलासशिखरोपमम् ॥ २-५७-२४ (१३६१२)
जाम्बूनदप्रदीप्ताग्रः प्रदीप्तज्वलनोपमः।
सागरप्रतिमोऽतिष्ठन्मेरुरित्यभिविश्रुतः ॥ २-५७-२५ (१३६१३)
तस्मिन्गान्धारराजस्य दुहिता कुलशालिनी।
सुकेशी नाम विख्याता केशवेन निवेशिता ॥ २-५७-२६ (१३६१४)
पद्मकूट इति ख्यातः पद्मवर्णो महाप्रभः।
सुप्रभाया महाबाहो वासः स परमोच्छ्रितः ॥ २-५७-२७ (१३६१५)
यस्तु सूर्यप्रभो नाम प्रासादवर उच्यते।
लक्षणायाः कुरुश्रेष्ठ स दत्तः शार्ङ्गधन्वना ॥ २-५७-२८ (१३६१६)
वैडूर्यवरवर्णाभः प्रासादो हरितप्रभः।
श्वेतजाला हि यत्रैव यत्रैव च निवेशिता ॥ २-५७-२९ (१३६१७)
यं विदुः सर्वभूतानि हरिरित्येव भारत।
सुमित्रविजयावासो देवर्षिगणपूजितः ॥ २-५७-३० (१३६१८)
महिष्या वासुदेवस्य भूषणं सर्ववेश्मनाम्।
यस्तु प्रासादमुख्योऽत्र विहितः सर्वशिल्पिभिः ॥ २-५७-३१ (१३६१९)
महिष्या वासुदेवस्य केतुमानिति विश्रुतः।
प्रसादो विरजो नाम विरजस्को महात्मनः ॥ २-५७-३२ (१३६२०)
उपस्थानगृहं तात केशवस्य महात्मनः।
यस्तु प्रासादमुख्योऽत्र यं त्वष्टा व्यदधात्स्वयम् ॥ २-५७-३३ (१३६२१)
योजनायतविष्कम्भं सर्वरत्नमयं विभोः।
तेषां तु विहिताः सर्वे रुक्मदण्डाः पताकिनः ॥ २-५७-३४ (१३६२२)
सदने वासुदेवस्य मार्गसञ्जनना ध्वजाः।
घण्टाजालानि तत्रैव सर्वेषां निवेशने ॥ २-५७-३५ (१३६२३)

आहृत्य यदुसिंहेन वैजयन्तच्छलो महात्।
हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरो महत् ॥ २-५७-३६ (१३६२४)
षष्टितालसमुत्सेधमर्धयोजनविस्तृतम्।
सकिन्नरमहानादं तदप्यमिततेजसः ॥ २-५७-३७ (१३६२५)
पश्यतां सर्वभूतानां त्रिषु लोकेषु विश्रुतम्।
आदित्यपथगं यत्तन्मेरोः शिखरमुत्तमम् ॥ २-५७-३८ (१३६२६)
जाम्बूनदमयं दिव्यं त्रिषु लोकेषु विश्रुतम्।
तदप्युत्पाट्य कुच्छ्रेण स्वं निवेशनमाहृतम् ॥ २-५७-३९ (१३६२७)
भ्राजमानं पुरा तत्र सर्वौषधिविदीपितम्।
यमिन्द्रभवनाच्छौरिराजहार परन्तपः ॥ २-५७-४० (१३६२८)
पारिजातः स तत्रैव केशवेन निवेशितः।
लेपहस्तशतैर्जुष्टो विमानैश्च हिरण्मयैः ॥ २-५७-४१ (१३६२९)
विहिता वासुदेवेन तत्रैव च महाद्रुमाः।
पद्माकुलजलोपेता रक्तसौगन्धिकोत्पलाः ॥ २-५७-४२ (१३६३०)
मणिमौक्तिकवालूकाः पुष्करिण्यः सरांसि च।
तासां परमकूलि शोभयन्ति महाद्रुमाः ॥ २-५७-४३ (१३६३१)
सालतालाश्वकर्णाश्च शतशाखाश्च रोहिणः।
भल्लातककपित्थाश्च इन्द्रवृक्षाश्च चम्पकाः ॥ २-५७-४४ (१३६३२)
खादिरा मृतकाश्चैव समन्तात्परिरोपिताः।
ये च हैमवता वृक्षा ये च नन्दनजास्तथा ॥ २-५७-४५ (१३६३३)
आहृत्य यदुसिंहेन तेऽपि तत्र निवेशिताः।
रत्नपीतारुणप्रख्याः सितपुष्पाश्च पादपाः ॥ २-५७-४६ (१३६३४)
सर्वर्तुफलपूर्णास्ते ते च काननसिन्धुषु।
सहस्रपत्रपद्माश्च मन्दराश्च सहस्रशः ॥ २-५७-४७ (१३६३५)
अशोकाः कर्णिकाराश्च तिलका नाग मल्लिकाः।
कुरका नागपुष्पाश्च चम्पकास्तृणपुल्लिकाः ॥ २-५७-४८ (१३६३६)
सप्तवर्णाः कबन्धाश्च नीपाः कुरवकास्तथा।
केतकाः केसराश्चैव हिनतालतलताटकाः ॥ २-५७-४९ (१३६३७)
तालाः प्रलम्बा वकुलाः पिण्डिका बीजपूरकाः।
द्रुतामलकखर्जूरा महिता जम्बुकास्तथा ॥ २-५७-५० (१३६३८)
आम्राः पनसवृक्षाश्च चम्पकास्तिलतिन्दुकाः।
लिकुचामृताश्चैव क्षीरिका कर्णिका तथा ॥ २-५७-५१ (१३६३९)
नालिकेरेङ्गुदाश्चैव उत्क्रोशकवनानि च।
कदली जातमल्ली च पाटली कुमुदोत्पलाः ॥ २-५७-५२ (१३६४०)
नीलोत्पलकपूर्णाश्च वाप्यः कूपाः सहस्रशः।
फुल्लाशाककपित्थाश्च तैस्तीर्त्वा बन्धुजीवकाः ॥ २-५७-५३ (१३६४१)

प्रियालाशोकवादिर्याः प्राचीनाश्चापि सर्वशः।
प्रियङ्गुबदरीभिश्च यवैः स्यन्दनचन्दनैः ॥ २-५७-५४ (१३६४२)
शचीपीलुपलाश्चैश्च पलाशवधपिप्लैः।
उदुम्बरैश्च बिल्वैश्च पालाशैः पारिभद्रकैः ॥ २-५७-५५ (१३६४३)
इन्द्रवृक्षार्जुनैश्चैव अश्वत्थैश्चिरबिल्वकैः।
भौमगञ्जनवृक्षैश्च भल्लाभैरश्वसाह्वयैः ॥ २-५७-५६ (१३६४४)
सज्जैस्ताम्बूलवल्लीभिर्लवङ्गैः क्रमुकैस्तथा।
वंशैश्च विविधैस्तत्र समन्तात्परिरोपितैः ॥ २-५७-५७ (१३६४५)
ये च नन्दनजा वृक्षा ये च चैत्ररथे वने।
सर्वे ते यदुनाथेन समन्तात्परिरोपिताः ॥ २-५७-५८ (१३६४६)
समाहिता महानद्यः पीतलोहितवालुकाः।
तस्मिन्गृहवरे रम्ये मणिशक्रसवालुकाः ॥ २-५७-५९ (१३६४७)
मत्तबर्हिणनादाश्च कोकिलाश्च मदावहाः।
बभूवुः परमोपेताः सर्वे जगति पर्वताः ॥ २-५७-६० (१३६४८)
तत्रैव गजयूथानि तत्र गोमहिषास्तथा।
निवासाश्च कृतास्तत्र वराहा मृगपक्षिणाम् ॥ २-५७-६१ (१३६४९)
विश्वकर्मकृतः शैलः प्राकारस्तत्र वेश्मनि।
व्यक्तकिष्कुशतोद्यामः सुधारससमप्रभः ॥ २-५७-६२ (१३६५०)
तेन ते च महाशैलाः सरितश्च सरांसि च।
परिक्षिप्तानि वै तस्य वनान्युपवनानि च ॥ ॥ २-५७-६३ (१३६५१)

इति श्रीमन्महाभारते सभापर्वण अर्घाहरणपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७.।

सभापर्व - अध्याय ०५८
॥ श्रीः ॥
२.५८. अध्यायः ५८

Mahabharata - Sabha Parva - Chapter Topics
कृष्णदर्शनाय वसुदेवादीनामागमनम् ॥१.।रामकृष्णाभ्यां पित्रादिवन्दनपूर्वकं बन्धुभ्यो रत्नादिवितरणम् ॥२.।इन

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच।

एवमालोकयाञ्चक्रुर्द्वारकामृषभास्त्रयः।
उपेन्द्रबलदेवौ च वासवश्च महायशाः ॥ २-५८-१ (१३६५२)
ततस्तं पाण्डरं शौरिर्मूर्ध्नि तिष्ठन्गारुत्मतः।
प्रीतः शङ्खमुपाध्मासीद्द्विषतां रोमहर्षणम् ॥ २-५८-२ (१३६५३)
तस्य शङ्खस्य शब्देन सारश्चुक्षुभे भृशम्।
ररास च नभः सर्वं तच्चित्रमभवत्तदा ॥ २-५८-३ (१३६५४)
पाञ्चजन्यस्य निर्घोषं निशम्य कुकुरान्दकाः।
प्रीयमाणाः समाजग्मुरालोक्य मधुसूदनम् ॥ २-५८-४ (१३६५५)
वसुदेवं पुरस्कृत्य वेणुशङ्खरवैः सह।
उग्रसेनो ययौ राजा वासुदेवनिवेशनम् ॥ २-५८-५ (१३६५६)
आनन्दितुं पर्यचन्स्वेषु वेश्मसु देवकी।
रोहिणी च ययौ देशमाहुकस्य च याः स्त्रियः ॥ २-५८-६ (१३६५७)
हता ब्रह्मद्विषः सर्वे जयन्त्यन्धकवृष्णयटः।
एवमुक्तः सह स्त्रीभिरक्षतैर्मधुसूदनः ॥ २-५८-७ (१३६५८)
ततः शौरिः सुपर्णेन स्वं निवेशनमभ्ययात्।
चकाराथ यथोद्देशमीश्वरो मणिपर्वतम् ॥ २-५८-८ (१३६५९)
ततो धनानि रत्नानि सभायां मधुसूदनः।
निधाय पुण्डरीकाक्षः पितुर्दर्शनलालसः ॥ २-५८-९ (१३६६०)
ततः सान्दीपिनिं पूर्वं ब्राह्मणं चापि भारत।
यथान्यायं वासुदेव उपस्पृष्ट्वा महायशाः ॥ २-५८-१० (१३६६१)
ववन्दे पृथुताम्राक्षः प्रीयमाणो महायशाः।
तथाऽश्रुपरिपूर्णाक्षमानन्दभृतचेतसम् ॥ २-५८-११ (१३६६२)
ववन्दे सह रामेण पितरं वासवानुजः।
ताभ्यां च मूर्ध्न्युपाघ्रातः केशवः परवीरहा ॥ २-५८-१२ (१३६६३)
यथाश्रेष्ठमुपागम्य सात्वतान्यदुनन्दनः।
सर्वेषां नाम जग्राह दाशार्हाणामधोक्षजः ॥ २-५८-१३ (१३६६४)
ततः सर्वाणि वित्तानि सर्वरत्नमयानि च।
व्यभजत्तानि तेभ्योऽथ सर्वेभ्यो यदुनन्दनः ॥ २-५८-१४ (१३६६५)
सा केशवमहामात्रैर्महेन्द्रप्रतिमैः सभा।
शुशुभे वृष्णिशार्दूलैः सिंहैरिव गिरेर्गुहा ॥ २-५८-१५ (१३६६६)
अथासनगतान्सर्वानुवाच विबुधाधिपः।
शुभया हर्षयन्वाचा महेन्द्रस्तान्महायशाः।
कुकुरान्धकमुख्यांश्च तं च राजानमाहुकम् ॥ २-५८-१६ (१३६६७)
इन्द्र उवाच। २-५८-१७क्ष् (१४८३)
यदर्थं जन्म कृष्णस्य मानुषेषु महात्मनः।
यत्कृतं वासुदेवेन तद्वक्ष्यामि समासतः ॥ २-५८-१७ (१३६६८)

अयं शतसहस्राणि दानवानामरिन्दमः।
निहय् पुण्डरीकाक्षः पातालविवरं ययौ ॥ २-५८-१८ (१३६६९)
यच्च नाधिगतं पूर्वैः प्रह्लादबलिशम्बरैः।
तदिदं शौरिणा वित्तं प्रापितं भवतामिह ॥ २-५८-१९ (१३६७०)
सपाशं मुरमाक्रमय् पाञ्चजन्यं च धीमता।
शिलासङ्घानतिक्रम्य निशुम्भः सगणो हतः ॥ २-५८-२० (१३६७१)
हयग्रीवश्च विक्रान्तो दानवो निहतो बली।
मथितश्च मृधे भौमः कुण्डले चाहृते पुनः ॥ २-५८-२१ (१३६७२)
पुनर्बाणवधे शौरिमादित्या वसुभिः सह।
मन्मुखा आगमिष्यन्ति साध्याश्च मधुसूदनम् ॥ २-५८-२२ (१३६७३)
एवमुक्त्वा ततः सर्वानामन्त्र्य कुकुरान्धकान्।
सस्वजे रामकृष्णौ च वसुदेवं च वासवः ॥ २-५८-२३ (१३६७४)
प्रद्युम्नसाम्बप्रमुखाननिरूद्धं च सारणम्।
बभ्रुं झल्लिं गदं भानुं चारुदेष्णं च वृत्रहा ॥ २-५८-२४ (१३६७५)
सत्कृत्य सारणाक्रूरौ पुनराभाष्य सात्यकिम्।
सस्वजे वृष्णिराजानमाहुकं कुकुराधिपम्।
भोजं च कृतवर्णाणमन्यांश्चान्दकवृष्णिषु ॥ २-५८-२५ (१३६७६)
आमन्त्र्य देवप्रवरैर्वासवो वासवानुजम्।
ततः श्वेताचलप्रख्यं गजमैरावतं प्रभुः ॥ २-५८-२६ (१३६७७)
पश्यतां सर्वभातानामारुरोह शचीपतिः।
पृथिवीं चान्तरिक्षं च दिवं च वरवारणम् ॥ २-५८-२७ (१३६७८)
मुखाडम्बरनिर्घोषैः पूरयन्तमिवासकृत्।
हैमयन्त्रमहाकक्ष्यं हिरण्मयविषाणिनम् ॥ २-५८-२८ (१३६७९)
मनोहरकुथास्तीर्णं सर्वरत्नविभूषितम्।
नित्यस्रुतमदस्रावं क्षरन्तमिव तोयदम् ॥ २-५८-२९ (१३६८०)
दिशागजं महामात्रं काञ्चनस्रजमास्थितः।
प्रबभौ मन्दराग्रस्थः प्रतपन्भानुमानिव ॥ २-५८-३० (१३६८१)
ततो वज्मयं भीमं प्रगृह्य परामाङ्कुशम्।
ययौ बलवता सार्धं पावकेन शचीपतिः ॥ २-५८-३१ (१३६८२)
तं करेणुगजव्रातैर्विमानैश्च मरुद्गणाः।
पृष्ठतोऽनुययुः प्रीताः कुबेरवरुणग्रहाः ॥ २-५८-३२ (१३६८३)
स वायुपक्षमास्थाय वैश्वानरपथं गतः।
प्राप्य सूर्यपथं देवस्तत्रैवान्तरधीयत ॥ ॥ २-५८-३३ (१३६८४)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८.।

सभापर्व - अध्याय ०५९
॥ श्रीः ॥
२.५९. अध्यायः ५९

Mahabharata - Sabha Parva - Chapter Topics
कृष्णेनाहृतविभूतिविलोकनाय देवकीरुक्मिण्यादिस्त्रीणामागमनम् ॥१. ।सभामागतायाः यशोदासुतायाः रामकृष्ण

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

ततः सर्वदशार्हाणामाहुकस्य च याः स्त्रियः।
नन्दगोपस्य महिषी यशोदा लोकविश्रुता ॥ २-५९-१ (१३६८५)
रेवती च महाभागा रुक्मिणी च पतिव्रता।
सत्या जाम्बवती चोभे गान्धारी शिंशुमापि च ॥ २-५९-२ (१३६८६)
विशोका लक्षणा चापि सुमित्रा केतुमा तथा।
वासुदेवमहिष्योऽन्याः श्रिया सार्धं ययुस्तदा ॥ २-५९-३ (१३६८७)
विभूतिं द्रष्टुमनसः केशवस्य महात्मनः।
प्रीयमाणाः सभां जग्मुरालोकयितुमच्युतम् ॥ २-५९-४ (१३६८८)
देवकी सर्वदेवीनां रोहिणी च पुरस्कृता।
ददृशुर्देवमासीनं कृष्णं हलभृता सह ॥ २-५९-५ (१३६८९)
तौ तु पूर्वमतिक्रम्य रोहिणीमभिवाद्य च।
अभ्यवादयतां देवौ देवकीं रामकेशवौ ॥ २-५९-६ (१३६९०)
सा ताभ्यामृषभाक्षाभ्यां पुत्राभ्यां शुशुभेऽधिकम्।
देवकी देवमातेव मित्रेण वरुणेन च ॥ २-५९-७ (१३६९१)
ततः प्राप्ता यशोदाया दुहिता वै क्षणेन हि।
जाज्वल्यमाना वपुषा प्रभयाऽतीव भारत ॥ २-५९-८ (१३६९२)
एकानङ्गेति यामाहुः कन्यां वै कामरूपिणीम्।
यत्कृते सगणं कंसं जघान पुरुषोत्तमः ॥ २-५९-९ (१३६९३)
ततः स भगवान्रामस्तामुपाक्रम्य भामिनाम्।
मूर्ध्न्युपाघ्राय सव्येन परिजग्राह पाणिना ॥ २-५९-१० (१३६९४)
तां च तत्रोपसम्प्राप्य प्रियामिव सखीमिमाम्।
दक्षिणेन कराग्रेण पिरजग्राह माधवः ॥ २-५९-११ (१३६९५)
ददृशुस्तां सभामध्ये भगिनीं रामकृष्णयोः।

रुक्मपद्मशां पद्मश्रीमिवोत्तमनाभयोः ॥ २-५९-१२ (१३६९६)
अथाक्षतमहावष्ट्या लाजपुष्पघृतैरपि।
वृष्णयोऽवाकिरन्प्रीताः सङ्कर्षणजनार्दनौ ॥ २-५९-१३ (१३६९७)
सबालाः सहवृद्धाश्च ये ज्ञातिकुलबान्धवाः।
उपोपविविशुः प्रीता वृष्णयो मधुसूदनम् ॥ २-५९-१४ (१३६९८)
पूज्यमानो महाबाहुः पौराणां रतिवर्धनः।
विवेश पुरुषव्याघ्रः स्ववेश्म मधुसूदनः ॥ २-५९-१५ (१३६९९)
रुक्मिण्या सहितो देव्या प्रमुमोद सुखी सुखम्।
अनन्तरं च सत्याया जाम्बवत्याश्च भारत ॥ २-५९-१६ (१३७००)
सर्वासां च यदुश्रेष्ठो गेहे गेहे विहारवान्।
जगाम च हृषीकेशो रुक्मिण्याः सदनं पुनः ॥ २-५९-१७ (१३७०१)
एष तात महाबाहो विजयः शार्ङ्गधन्वनः।
एतदर्थं च जन्माहुर्मानुषेषु महात्मनः ॥ ॥ २-५९-१८ (१३७०२)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

सभापर्व - अध्याय ०६०
॥ श्रीः ॥
२.६०. अध्यायः ६०

Mahabharata - Sabha Parva - Chapter Topics
शर्ववरगर्वितेन बाणासुरेण स्वतनयया उषया सह गूढं रममाणस्य अनिरुद्घस्य कारा गृहप्राषणम् ॥१. ।नारदाद्वि

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

द्वारकायां ततः कृष्णः स्वदारेषु दिवानिशम्।
सुखं लब्ध्वा महाराज प्रमुमोद महायशाः ॥ २-६०-१ (१३७०३)
पौत्रस्य कारणाच्चक्रे विबुधानां प्रियं तदा।
सावसवैः सुरैः सर्वैर्दुष्करं भरतर्षभ ॥ २-६०-२ (१३७०४)
बाणो नामाऽभवद्राजा बलेर्ज्येष्ठसुतो बली।
वीर्यवान्भरतश्रेष्ठ स च बाहुसहस्रवान् ॥ २-६०-३ (१३७०५)
ततस्तेपे तपस्तीव्रं सत्वेन मनसा नृप।

रुद्रमाराधयामास स च बाणः समा बहु ॥ २-६०-४ (१३७०६)
तस्मै बहुवरा दत्ताः शङ्करेण महात्मना।
तांश्च लब्ध्वा वरान्बाणो दुर्लभानसुरैर्भुवि ॥ २-६०-५ (१३७०७)
स शोणितपुरे राज्यं चकाराप्रतिमो बली।
त्रासिताश्च सुराः सर्वे तेन बाणेन पाण्डव ॥ २-६०-६ (१३७०८)
विजित्य विबुधान्सेन्द्रान्बाणः संवत्सरान्बहून्।
अशासत महद्राज्यं कुबेर इव भारत ॥ २-६०-७ (१३७०९)
ततो राजन्नुषा नाम बाणस्य दुहिता यथा।
येनोपायेन कौन्तेय अनिरुद्धो महाद्युतिः ॥ २-६०-८ (१३७१०)
प्राद्युम्निस्तामुषां प्राप्य प्रच्छन्नः प्रमुमोद ह।
अथ बाणो महातेजास्तदा तत्र युधिष्ठिर ॥ २-६०-९ (१३७११)
तं गृह्यनिलयं ज्ञात्वा प्राद्युम्निं सुतया तदा।
गृहीत्वा कारयामास वस्तुं कारागृहे बलात् ॥ २-६०-१० (१३७१२)
स कुमारः सुखार्होऽथ तदा दुःखसमन्वितः।
बामेन घातितो राजन्ननिरुद्धो मुमोह च ॥ २-६०-११ (१३७१३)
एतस्मिन्नेव काले तु नारदो मुनिपुङ्गवः।
द्वारकां प्राप्य कौन्तेय कृष्णं दृष्ट्वा वचोऽब्रवीत् ॥ २-६०-१२ (१३७१४)
कृष्ण कृष्ण महाबाहो यदूनां कीर्तिवर्धन।
पौत्रस्ते बाध्यमानोऽत्र बाणेनामिततेजसा ॥ २-६०-१३ (१३७१५)
कृच्छ्रं प्राप्तोऽनिरुद्धो वै शेते कारागृहे सदा।
एतदुक्त्वा सुरर्षिर्वै बाणस्याथ पुरं ययौ ॥ २-६०-१४ (१३७१६)
नारदस्य वचः श्रुत्वा ततो राजञ्जनार्दनः।
जाहूय बलदेवं हि प्रद्युम्नं च महाद्युतिम् ॥ २-६०-१५ (१३७१७)
आरुरोह गरुत्मन्तं ताभ्यां सह जनार्दनः।
ततः सुपर्णमारुह्य जयाय भरतर्षभ ॥ २-६०-१६ (१३७१८)
जग्मुः क्रुधा महावीर्या बाणस्य नगरं प्रति।
अथासाद्य महाराज तत्पुरं ददृशुश्च ते ॥ २-६०-१७ (१३७१९)
ताम्रप्राकारसङ्गुप्तां हेमप्रासादसङ्कुलाम्।
दृष्ट्वा मुदा युताः सर्वे विस्मयं परमं ययुः ॥ २-६०-१८ (१३७२०)
तथा बाणपुरस्यासन्द्वारस्था देवताः सदा।
महेश्वरो गुहश्चैव भद्रकाली विनायकः ॥ २-६०-१९ (१३७२१)
अथ कृष्णो बलाज्जित्वा द्वारपालान्युधिष्ठिर।
सुसङ्क्रुद्धो महातेजाः शङ्खचक्रगदासिभृत् ॥ २-६०-२० (१३७२२)
आससादोत्तरद्वारं शङ्करेणाभिरक्षितम्।
तत्र तस्थौ महातेजाः शूलपाणिर्महेश्वरः ॥ २-६०-२१ (१३७२३)
पिनाकं सशरं गृह्य बाणस्य हितकाम्यया।

ज्ञात्वा तमागतं कृष्णं व्यादितास्यमिवान्तकम् ॥ २-६०-२२ (१३७२४)
ततस्तौ चक्रतुर्युद्धं वासुदेवमहेश्वरौ।
तद्युद्धमभवद्घोरमचिन्त्यं रोमहर्षणम् ॥ २-६०-२३ (१३७२५)
अन्योन्यं तौ ततक्षाते अन्योन्यजयकाङ्क्षिणौ।
दिव्यान्यस्त्राणि तौ देवौ क्रुद्धौ मुमुचतुस्तदा ॥ २-६०-२४ (१३७२६)
ततः कृष्णो रणं कृत्वा मुहूर्तं शूलपाणिना।
विजित्य तं महादेवं ततो युद्धे शूलपाणिना।
अन्यांश्च जित्वा द्वारस्थान्प्रविवेश पुरोत्तमम् ॥ २-६०-२५ (१३७२७)
प्रविश्य बाणमासाद्य स तत्राथ जनार्दनः।
चक्रे युद्धं महाक्रुद्धस्तेन बाणेन भरतर्षभ। २-६०-२६ (१३७२८)
बाणोऽपि सर्वशस्त्राणि शितानि भरतर्षभ।
सुसङ्क्रुद्धस्तदा युद्धे पातयामास केशवे ॥ २-६०-२७ (१३७२९)
पुनरुद्यम्य शस्त्राणि सहस्रं सर्वबाहुभिः।
मुमोच बाणः सङ्क्रुद्धः कृष्णं प्रति रणाजिरे ॥ २-६०-२८ (१३७३०)
ततः कृष्णस्तदा कृत्त्वा तानि सर्वाणि भारत।
कृत्त्वा मुहूर्तं बाणेन युद्धं राजन्नगोक्षजः ॥ २-६०-२९ (१३७३१)
चक्रमुद्यम्य रोषाद्वै दिव्यं शस्त्रोत्तमं ततः।
सहस्रबाहूंश्चिच्छेद बाणस्यामिततेजसः ॥ २-६०-३० (१३७३२)
ततो बाणो महाराज कृष्णेन भृशपीडितः।
भिन्नबाहुः पपाताशु विशाख इव पादपः ॥ २-६०-३१ (१३७३३)
स पातयित्वा बाणैस्तं बाणं कृष्णस्त्वरान्वितः।
प्राद्युम्निं मोचयामास क्षिप्रं राजगृहात्तदा ॥ २-६०-३२ (१३७३४)
मोक्षयित्वाऽथ गोविन्दः प्राद्युम्निं सह भार्यया।
बाणस्य सर्वरत्नानि असङ्ख्यानि जहार सः ॥ २-६०-३३ (१३७३५)
गोधनानि च सर्वस्वं स बाणस्यालये बलात्।
जहार च हृषीकेशो यदूनां कुलवर्धनः ॥ २-६०-३४ (१३७३६)
ततः स सर्वरत्नानि चाहृत्य मधुसूदनः।
क्षिप्रमारोपयाञ्चक्रे सर्वस्वं गरुडोपरि ॥ २-६०-३५ (१३७३७)
त्वरयाऽथ स कौन्तेय बलदेवं महाबलम्।
प्रादुम्निं च महावीर्यमनिरुद्धं महाद्युतिम् ॥ २-६०-३६ (१३७३८)
उषां च सुन्दरीं राजन्भृत्यदारगणैः सह।
सर्वानेतान्समारोप्य गरुडोपरि वीर्यवान् ॥ २-६०-३७ (१३७३९)
मुदा युक्तो महातेजाः पीताम्बरधरो बली।
दिव्याभरमचित्राङ्गः शङ्खचक्रगदासिभृत्। २-६०-३८च आरुरोह गरुत्मन्तमुदयं भास्करो यथा ॥ ॥ २-६०-३८ (१३७४०)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि षष्टितमोऽध्यायः ॥ ६०.।

सभापर्व - अध्याय ०६१
॥ श्रीः ॥
२.६१. अध्यायः ६१

Mahabharata - Sabha Parva - Chapter Topics
भीष्मेण नरकबाणासुरप्रमुखदुष्टनिग्रहादिरूपातीतानागतकृष्णचरित्रनिरूपणम् ॥ १.॥

Mahabharata - Sabha Parva - Chapter Text

भीष्ण उवाच ॥

सूदिता द्वारपालाश्च निशुम्भनरकौ हतौ।
कृतक्षेमः पुनः पन्थाः पुरं प्राग्ज्योतिषं प्रति ॥ २-६१-१ (१३७४१)
शौरिणा पृथिवीपालास्त्रासिता भरतर्षभ।
धनुषश्च प्रणादेन पाञ्चजन्यस्वनेन च ॥ २-६१-२ (१३७४२)
मेघप्रख्यैरनेकैश्च दाक्षिणात्याभिसंवृतम्।
रुक्मिणं त्रासयामास केशवो भरतर्षभ ॥ २-६१-३ (१३७४३)
ततः पर्जन्यघोषेण रथेनादित्यवर्चसा।
उवाह महिषीं भोज्यामेष चक्रगदाधरः ॥ २-६१-४ (१३७४४)
जारूथ्य आहृतक्रोधः शिशुपालश्च निर्जितः।
वक्रश्च स हतः सङ्ख्ये शतधन्वा च क्षत्रियः ॥ २-६१-५ (१३७४५)
इन्द्रद्युम्नो हतः कोपाद्यवनश्च कशेरुकः।
हतः सौभपतिश्चैव साल्वश्च कृतधन्वना ॥ २-६१-६ (१३७४६)
पर्वतानां सहस्रं च चक्रेण पुरुषोत्तमः।
विभज्य पुण्डरीकाक्षो द्युमत्सेनमपोथयत् ॥ २-६१-७ (१३७४७)
महेन्द्रशिखरे चैव निमेषान्तरचारिणौ।
जग्राह भरतश्रेष्ठ वानरावभितश्चरौ ॥ २-६१-८ (१३७४८)
इरावत्यां महाभोजो वह्निसूर्यसमो बले।
गोपतिस्तालकेतुश्च निहतौ शार्ङ्गधन्वना ॥ २-६१-९ (१३७४९)
अक्षप्रपत्तने राजन्नवहेलनतत्परौ।
उभौ तावपि कृष्णेन स्वराष्ट्रे विनिपातितौ ॥ २-६१-१० (१३७५०)
दग्धा वाराणसी तात केशवेन महात्मना।

पाण्ड्यं पौण्ड्रं च मात्स्यं च कलिङ्गं च जनार्दनः ॥ २-६१-११ (१३७५१)
जघान सहितान्सर्वानङ्गराजं च माधवः ॥ २-६१-१२ (१३७५२)
एष चैव शतं हत्वा रथेन क्षत्रपुङ्गवान्।
गान्धारीमवहत्कृष्णो महिषीं यादवर्षभः ॥ २-६१-१३ (१३७५३)
अथ गाण्डीवधन्वानं क्रीडार्थं मधुसूदनः।
जिगाय भरतश्रेष्ठ कुन्त्याश्च प्रमुखे विभुः ॥ २-६१-१४ (१३७५४)
द्रौणिं कृपं च कर्णं च भीमसेनं सुयोधनम्।
युद्धाय सहितान्राजञ्जिगाय भरतर्षभ ॥ २-६१-१५ (१३७५५)
बभ्रोश्च प्रियमन्विच्छन्नेष चक्रगदाधरः।
वेणुदारिवृतां भार्यां प्रममाथ युधिष्ठिर ॥ २-६१-१६ (१३७५६)
पर्याप्तां पृथिवीं सर्वां साश्वां सरथकुञ्जराम्।
वेणुदारिवशे युक्तां जिगाय मधुसूदनः ॥ २-६१-१७ (१३७५७)
अवाप्य तपसा वीर्यं बलमोजश्च भारत।
त्रासिताः सगणाः सर्वे बाणेन विबुधाधिपाः ॥ २-६१-१८ (१३७५८)
वज्राशनिगदाबामैस्ताडयद्भिरनेकशः।
तस्य नासीद्रणे मृत्युर्देवैरपि सवासवैः ॥ २-६१-१९ (१३७५९)
सोऽभिभूतश्च कृष्णेन न हतश्च मगात्मना।
छित्वा बाहुसहस्रं तु गोविन्देन महात्मना ॥ २-६१-२० (१३७६०)
एषोऽपीडन्महाबाहुः कंसं च मधुसूदनः।
अवाप्तं तपसा वीर्यं बलमोजश्च भारत।
कैटभं चातिलोमानि निजघान जनार्दनः ॥ २-६१-२१ (१३७६१)
जम्बुमैरावतं चैव विरूपं च महायशाः। २-६१-२२ब्जघान भरतश्रेष्ठ शम्बरं चारिमर्दनम् ॥ २-६१-२२ (१३७६२)
एष भोगवतीं गत्वा वासुकिं भरतर्षभ।
निर्जित्य पुण्डरीकाक्षो रौक्मिणेयममोचयत् ॥ २-६१-२३ (१३७६३)
एवं बहूनि कर्माणि शिशुरेव जनार्दनः।
कृतवान्पुण्डरीकाक्षः सङ्कर्षणसहायवान् ॥ २-६१-२४ (१३७६४)
एवमेषोऽसुराणां चसुराणामपि सर्वशः।
भयामयकरः कृष्णः सर्वलोकेश्वरः प्रभुः ॥ २-६१-२५ (१३७६५)
एवमेव महाबाहुः शास्ता सर्वदुरात्मनाम्।
कृत्वा देवार्थममितं स्वस्थानं प्राप्स्यते पुनः ॥ २-६१-२६ (१३७६६)
एष भोगवतीं पुण्यां रविकान्तिं महायशाः।
द्वारकामात्मसात्कृत्वा सागरं प्लावयिष्यति ॥ २-६१-२७ (१३७६७)
सुरासुरमनुष्येषु नाभून्न भविता क्वचित्।
यस्तामध्यवसद्राजा नान्यत्र मधुसूदनात् ॥ २-६१-२८ (१३७६८)
भ्राजमानास्तु वै सर्वे वृष्ण्यन्धकमहारथाः।

तेजिष्ठं प्रतिपत्स्यन्ते नाकपृष्टं गतासवः ॥ २-६१-२९ (१३७६९)
एवमेव दशार्हाणां विधाय विधिना विधिम्।
विष्णुर्नारायणः साक्षात्स्वस्थानं प्राप्स्यते ध्रुवम् ॥ २-६१-३० (१३७७०)
अप्रमेयोऽनियोज्यश्च यत्र कामगमो वशी। २-६१-३२अब् मोदते भगवान्प्रीतो वालः क्रीडानकैरिव ॥ २-६१-३१ (१३७७१)
नैष गर्भत्वमापेदे न योन्यामावसत्प्रभुः।
आत्मनस्तेजसा कृष्णः सर्वेषां कुरुते गतिम् ॥ २-६१-३२ (१३७७२)
यथा बुद्बुद उत्थाय तत्रैव प्रविलीयते।
चराचराणि भूतानि तथा नारायणे सदा ॥ २-६१-३३ (१३७७३)
न प्रमातुं महाबाहुः शक्यो भारत केशवः।
परं हि परतस्तस्माद्विश्वरूपान्न विद्यते ॥ ॥ २-६१-३४ (१३७७४)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि एकषष्टितमोऽध्यायः ॥ ६१.।

सभापर्व - अध्याय ०६२
॥ श्रीः ॥
२.६२. अध्यायः ६२

Mahabharata - Sabha Parva - Chapter Topics
भीष्मवाक्योपरमे सहदेवेन कृष्णपूजाविरुद्धभाषिणो वधे प्रतिज्ञाते राज्ञां त ऊष्णीम्भावः । ।१.।सहदेवमूर्ध्नि पुष्पवृ

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

एवमुक्त्वा ततो भीष्णो विरराम महाबलः।
व्याजहारोत्तरं तत्र सहदेवोऽर्थवद्वचः ॥ २-६२-१ (१३७७५)
केशवं केशिहन्तारमप्रमेयपराक्रमम्।
पूज्यमानं मया यो वः कृष्णं न सहते नृपाः ॥ २-६२-२ (१३७७६)
सर्वेषां बलिनां मूर्ध्नि मयेदं निहितं पदम्।
एवमुक्ते मया सम्यगुत्तरं प्रब्रवीतु सः ॥ २-६२-३ (१३७७७)
स एव हि मया वध्यो भविष्यति न संशयः।
मतिमन्तश्च ये केचिदाचार्यं पितरं गुरुम् ॥ २-६२-४ (१३७७८)
अर्च्यमर्चितमर्घार्हमनुजानन्तु ते नृपाः।

ततो न व्याजहारैषां कश्चिद्बुद्धिमतां सताम् ॥ २-६२-५ (१३७७९)
मानिनां बलिनां राज्ञां मध्ये वै दर्शिते पदे।
ततोऽपतत्पुष्पवृष्टिः सहदेवस्य मूर्धनि ॥ २-६२-६ (१३७८०)
अदृश्यरूपा वाचश्चाप्यब्रुवन्साधुसाध्विति।
अविध्यदजिनं कृष्णं भविष्यद्भूतजल्पनः ॥ २-६२-७ (१३७८१)
सर्वसंशयनिर्मोक्ता नारदः सर्वलोकवित्।
उवाचाखिलभूतानां मध्ये स्पष्टतरं वचः ॥ २-६२-८ (१३७८२)
कृष्णं कमलपत्राक्षं नार्चयिष्यन्ति ये नराः।
जीवन्मृतास्तु ते ज्ञेया न सभाष्याः कदाचना ॥ २-६२-९ (१३७८३)
वैशम्पायन उवाच। २-६२-१०क्ष् (१४८४)
पूजयित्वा च पूजार्हान्ब्रह्मक्षत्रविशेषवित्।
सहदेवो नृणां देवः समापयत कर्म तत् ॥ २-६२-१० (१३७८४)
तस्मिन्नभ्यर्चिते कृष्णे सुनीथः शत्रुकर्षणः।
अतिताम्रेक्षणः कोपादुवाच मनुजाधिपान् ॥ २-६२-११ (१३७८५)
स्थितः सेनापतिर्योऽहं मन्वध्वं किं तु साम्प्रतम्।
युधि तिष्ठाम सन्नह्य समेतान्वृष्णिपाण्डवान् ॥ २-६२-१२ (१३७८६)
इति सर्वान्समुत्साह्य राज्ञस्तांशाचेदिपुङ्गवः।
यज्ञोपघाताय ततः सोऽमन्त्रतय राजभिः ॥ २-६२-१३ (१३७८७)
तत्राहूतागताः सर्वे सुनीथप्रमुखा गणाः।
समदृश्यन्त सङ्क्रुद्धा विवर्णवदनास्तथा ॥ २-६२-१४ (१३७८८)
युधिष्ठिराभिषेकं च वासुदेवस्य चार्हणम्।
न स्याद्यथा तथा कार्यमेवं सर्वे तदाऽब्रुवन् ॥ २-६२-१५ (१३७८९)
निष्कर्षान्निश्चयात्सर्वे राजानः क्रोधमूर्छिताः।
अब्रुवंस्तत्र राजानो निर्वेदादात्मनिश्चयात् ॥ २-६२-१६ (१३७९०)
सुहृद्भिर्वार्यमाणानां तेषां हि वपुराबभौ।
आमिषादपकृष्टानां सिहानामिव गर्जताम् ॥ २-६२-१७ (१३७९१)
तं बलौघमपर्यन्तं राजसागारमक्षयम्।
कुर्वाणं समयं कृष्णो युद्धाय बुबुधे तदा ॥ ॥ २-६२-१८ (१३७९२)

इति श्रीमन्महाभारते सभापर्वणि अर्घाहरणपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२.।

सभापर्व - अध्याय ०६३
॥ श्रीः ॥
२.६३. अध्यायः ६३

Mahabharata - Sabha Parva - Chapter Topics

राज्ञां रणोद्यमाद्बिभ्यतो युधिष्ठिरस्य भीष्मेण समाश्वासनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततः सागरसङ्काशं दृष्ट्वा नृपतिमण्डलम्।
संवर्तवाताभिहतं भीमं क्षुब्धमिवार्णवम्। २-६३-१ (१३७९३)
रोषात्प्रचलितं सर्वमिदमाह युधिष्ठिरः।
भीष्मं मतिमतां मुख्यं वृद्धं कुरुपितामहम्।
बृहस्पतिं बृहत्तेजाः पुरुहूत इवारिहा। २-६३-२ (१३७९४)
असौ रोषात्प्रचलितो महान्नृपतिसागरः।
अत्र यत्प्रतिपत्तव्यं तन्मे ब्रूहि पितामह ॥ २-६३-३ (१३७९५)
यज्ञस्य च न विघ्नः स्यात्प्रजानां च हितं भवेत्।
यथा सर्वत्र तत्सर्वं ब्रूहि मेऽद्य पितामह ॥ २-६३-४ (१३७९६)
इत्युक्तवति धर्मज्ञे धर्मराजे युधिष्ठिरे।
उवाचेदं वचो भीष्मस्ततः कुरुपितामहः ॥ २-६३-५ (१३७९७)
मा भैस्त्वं कुरुशार्दूल श्वा सिंहं हन्तुमर्हति।
शिवः पन्थाः सुनीतोऽत्र मया पूर्वतरं वृतः ॥ २-६३-६ (१३७९८)
प्रसुप्ते हि यथा सिंहे श्वानस्तात समागताः।
भषेयुः सहिताः सर्वे तथेमे वसुधाधिपाः ॥ २-६३-७ (१३७९९)
वृष्णिसिंहस्य सुप्तस्य तथाऽमी प्रमुके स्थिताः।
भषन्ते तात सङ्क्रुद्धाः श्वानः सिंहस्य सन्निधौ ॥ २-६३-८ (१३८००)
न हि सम्बुध्यते यावत्सुप्तः सिंह इवाच्युतः।
ग तदिदं ज्ञातपूर्वं हि तव संस्तोतुमिच्छसि'।
तेन सिंहीकरोत्येतानसिंहश्चेदिपुङ्गवः ॥ २-६३-९ (१३८०१)
पार्थिवान्पार्थिवश्रेष्ठ शिशुपालोऽल्पचेतनः।
सर्वान्सर्वात्मना तात नेतुकामो यमक्षयम् ॥ २-६३-१० (१३८०२)
नूनमेतत्समादातुं पुनरिच्छत्यधोक्षजः।
यदस्य शिशुपालस्य तेजस्तिष्ठति भारत ॥ २-६३-११ (१३८०३)
विप्लुता चास्य भद्रं ते बुद्धिर्बुद्धिमतां वर।
चेदिराजस्य कौन्तेय सर्वेषां च महीक्षितम् ॥ २-६३-१२ (१३८०४)
आदातुं च नरव्याघ्रो यं यमिच्छत्ययं तदा।
तस्य विप्लवते बुद्धिरेवं चेदिपतेर्यथा ॥ २-६३-१३ (१३८०५)

चतुर्विधानां भूतानां त्रिषु लोकेषु माधवः।
प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिर ॥ २-६३-१४ (१३८०६)
वैशम्पायन उवाच। २-६३-१५क्ष् (१४८५)
इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः।
भीष्मं रूक्षाक्षरा वाचः श्रावयामास भारत ॥ ॥ २-६३-१५ (१३८०७)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-६३-७ भषणं श्वरवः ॥

सभापर्व - अध्याय ०६४
॥ श्रीः ॥
२.६४. अध्यायः ६४

Mahabharata - Sabha Parva - Chapter Topics
शिशुपालेन भीष्मस्तुतकृष्णचरित्रापहसनपूर्वकं भीष्मोपालम्भनम् ॥

Mahabharata - Sabha Parva - Chapter Text

शिशुपाल उवाच।

बिभीषिकाभिर्बह्वीभिर्भीषयन्भीष्म पार्थिवान्।
न व्यपत्रपसे कस्माद्वृद्धः सन्कुलपांसनः ॥ २-६४-१ (१३८०८)
युक्तमेतत्तृतीयायां प्रकृतौ वर्तता त्वया।
वक्तुं धर्मादपेतार्थं त्वं हि सर्वकुरूत्तमः ॥ २-६४-२ (१३८०९)
नावि नौरिव सम्बद्धा यथान्धो वान्धमन्वियात्।
तथाभूता हि कौरव्या येषां भीष्म त्वमग्रणीः ॥ २-६४-३ (१३८१०)
पूतनाघातपूर्वाणि कर्माण्यस्य विशेषतः।
त्वया कीर्तयताऽस्माकं भूयः प्रव्यथितं मनः ॥ २-६४-४ (१३८११)
अवलिप्तस्य मूर्शस्य केशवं स्तोतुमिच्छतः।
कथं भीष्म न ते जिह्वा शतधेयं विदीर्यते ॥ २-६४-५ (१३८१२)
यत्र कुत्सा प्रयोक्तव्या भीष्म बालतरैर्नरैः।
तमिमं ज्ञानवृद्धः सन्गोपं संस्तोतुमिच्छसि ॥ २-६४-६ (१३८१३)

यद्यनेन हता बाल्ये शकुनिश्चित्रमत्र किम्।
तौ वाऽश्ववृषभौ भीष्ण यौ न युद्धविशारदौ ॥ २-६४-७ (१३८१४)
चेतनारहितं काष्ठं यद्यनेन निपातितम्।
पादेन शकटं भीष्ण तत्र किं कृतमद्भुतम् ॥ २-६४-८ (१३८१५)
ग्अर्कप्रमाणौ तौ वृक्षौ यद्यनेन निपातितौ। '
नागश्च दमितोऽनेन तत्र को विस्मयः कृतः'॥ २-६४-९ (१३८१६)
वल्मीकमात्रः सप्ताहं यद्यनेन धृतोऽचलः।
तदा गोवर्धनो भीष्म न तच्चित्रं मतं मम ॥ २-६४-१० (१३८१७)
भुक्तमेतेन बह्वन्नं क्रीडता नगमूर्धनि।
इति ते भीष्ण शृण्वानाः परे विस्मयमागताः ॥ २-६४-११ (१३८१८)
यस्य चानेन धर्मज्ञ भुक्तमन्नं बलीयसः।
स चानेन हतः कंस इत्येतत्तु बलीयसः। २-६४-१२ (१३८१९)
स चानेन हतः कंस इत्येतत्तु महाद्भुतम् ॥
न ते श्रुतमिदं भीष्म नूनं कथयतां सताम्। २-६४-१३ (१३८२०)
यद्वक्ष्ये त्वामधर्मज्ञं वाक्यं कुरुकुलाधम ॥
स्त्रीषु गोषु न शस्त्राणि पातयेद्ब्राह्मणेषु च। २-६४-१४ (१३८२१)
इति सन्तोऽनुशासन्ति सञ्जना धर्मिणः सदा।
भीष्म लोके हि तत्सर्वं वितथं त्वयि दृश्यते ॥ २-६४-१५ (१३८२२)
ज्ञानवृद्धं च वृद्धं च भूयांसं केशवं मम।
अजानत इवाख्यासि संस्तुवन्कौरवाधम ॥ २-६४-१६ (१३८२३)
गोघ्नः स्त्रीघ्नश्च सन्भीष्म त्वद्वाक्याद्यदि पूज्यते।
एवम्भूतश्च यो भीष्म कथं संस्तवमर्हति ॥ २-६४-१७ (१३८२४)
असौ मतिमतां श्रेष्ठो य एष जगतः प्रभुः।
सम्भावयति चाप्येवं त्वद्वाक्याच्च जनार्दनः।
एवमेतत्सर्वमिति तत्सर्वं वितथं ध्रुवम् ॥ २-६४-१८ (१३८२५)
आत्मानमात्मनाऽऽधातुं यदि शक्तो जनार्दनः।
अकामयन्तं तं भीष्म कथं साध्विव पश्यसि ॥ २-६४-१९ (१३८२६)
न गाथा गाथिनं शास्ति बहुचेदपि गायति।
प्रकृतिं यान्ति भूतानि कुलिङ्गशकुनिर्यथा ॥ २-६४-२० (१३८२७)
नूनं प्रकृतिरेषा ते जघन्या नात्र संशयटः।
ग्नदीसुतत्वात्ते चित्तं चञ्चलं न स्थिरं स्मृतम्' ॥ २-६४-२१ (१३८२८)
अतः पापीयसी चैषां पाण्डवानामपीष्यते।
येषामर्च्यतमः कृष्णस्त्वं च येषां प्रदर्शकः ॥ २-६४-२२ (१३८२९)
धर्मवांस्त्वमधर्मज्ञः सतां मार्गादवप्लुतः।
को हि धर्मिणमात्मानं जानञ्ज्ञानविदां वरः ॥ २-६४-२३ (१३८३०)
कुर्याद्यथा त्वया भीषम कृतं धर्ममवेक्षता।

चेत्त्वं धर्मं विजानासि यदि प्राज्ञा मतिस्तव ॥ २-६४-२४ (१३८३१)
अन्यकामा हि धर्मज्ञा कन्यका प्राज्ञमानिना।
अम्बा नामेति भद्रं ते कथं साऽपहृता त्वया ॥ २-६४-२५ (१३८३२)
तां त्वयाऽपहृतां भीष्म कन्यां नैषितवान्नृपः।
भ्राता विचित्रवीर्यस्ते सतां मार्गमनुस्मरन् ॥ २-६४-२६ (१३८३३)
भार्ययोर्यस्य चान्येन मिषतः प्राज्ञमानिनः।
तव जातान्यपत्यानि सज्जनाचरिते पथि ॥ २-६४-२७ (१३८३४)
को हि धर्मोऽस्ति ते भीषम ब्रह्मचर्यमिदं वृथा।
यद्धारयसि मोहाद्वा क्लीबत्वाद्वा न संशयः ॥ २-६४-२८ (१३८३५)
न त्वं तव धर्मज्ञ पश्याम्युपचरं क्वचित्।
न हि ते सेविता वृद्धा य एवं धर्ममब्रवीः ॥ २-६४-२९ (१३८३६)
इष्टं दत्तमधीतं च यज्ञाश्च बहुदक्षिणाः।
सर्वमेतदपत्यस्य कलां नार्हन्ति षोडशीम् ॥ २-६४-३० (१३८३७)
व्रतोपवासैर्बहुभिः कृतं भवति भीष्म यत्।
सर्वं तदनपत्यस्य मोघं भवति निश्चयात् ॥ २-६४-३१ (१३८३८)
सोऽनपत्यश्च वृद्धश्च मिथ्याधर्मानुशासनात्।
हंसवत्त्वमपीदानीं ज्ञातिभ्यः प्राप्नुया वधम् ॥ २-६४-३२ (१३८३९)
एवं हि कथयन्त्यन्ये नरा ज्ञानविदः पुरा।
भीष्म यत्तदहं सम्यग्वक्ष्यामि तव शृण्वतः ॥ २-६४-३३ (१३८४०)
वृद्धः किल समुद्रान्ते कश्चिद्धंसोऽभवत्पुरा।
धर्मवागन्यथावृत्तः पक्षिणः सोऽनुशास्ति च ॥ २-६४-३४ (१३८४१)
धर्मं चरत माऽधर्ममिति तस्य वचः किल।
पक्षिणः शुश्रुवुर्भीष्म सततं धर्मवादिनः ॥ २-६४-३५ (१३८४२)
हंसस्य तु वचः श्रुत्वा मुदिताः सर्वपक्षिणः।
ऊचुश्चैव स्वगा हंसं परिवार्य च सर्वशः ॥ २-६४-३६ (१३८४३)
कथयस्व भवान्सर्वं पक्षिणां तु समासतः।
को हि नाम द्विजश्रेष्ठ ब्रूहि नो धर्म उत्तमः ॥ २-६४-३७ (१३८४४)
हंस उवाच ॥ २-६४-३८क्ष् (१४८६)
प्रजास्वहिंसा धर्मो वै हिंसाऽधर्मः खगव्रजाः।
एतदेवानुबोद्धव्यं धर्माधर्मः समासतः ॥ २-६४-३८ (१३८४५)
शिशुपाल उवाच ॥ २-६४-३९क्ष् (१४८७)
वृद्धहंसवचः श्रुत्वा पक्षिणस्ते सुसंहिताः।
ऊचुश्च धर्मलुब्धास्ते स्मयमाना इवाण्डजाः ॥ २-६४-३९ (१३८४६)
धर्मं यः कुरुते नित्यं लोके धीरतरोऽण्डजः।
स यत्र गच्छेद्धर्मात्मा तन्मे ब्रूहीह तत्त्वतः ॥ २-६४-४० (१३८४७)
हंस उवाच ॥ २-६४-४१क्ष् (१४८८)

बाला यूयं न जानीध्वं धर्मसूक्ष्मं विहङ्गमाः।
धर्मं यः कुरुते लोके सततं शुभबुद्धिना।
न चायुषोऽन्ते स्वं देहं त्यक्त्वा स्वर्गं स गच्छति ॥ २-६४-४१ (१३८४८)
तथाऽहमपि च त्यक्त्वा काले देहमिमं द्विजाः।
स्वर्गलोकं गमिष्यामि इयं धर्मस्य वै गतिः ॥ २-६४-४२ (१३८४९)
एवं धर्मकथां चक्रे स हंसः पक्षिणां भृशम्।
पक्षिणः शुश्रुवुर्भीष्म सततं धर्ममेव ते ॥ २-६४-४३ (१३८५०)
अथास्य भक्ष्यमाजह्रुः समुद्रजलचारिणः।
अण्डजा भीष्म तस्यान्ये धर्मार्थमिति शुश्रुम ॥ २-६४-४४ (१३८५१)
ते च तस्य समभ्याशे निक्षिप्याण्डानि सर्वशः।
समुद्राम्भस्यमोदन्त चरन्तो भीष्म पक्षिणः ॥ २-६४-४५ (१३८५२)
तेषामण्डानि सर्वेषां भक्षयामास पापकृत्।
स हंसः सम्प्रमत्तानामप्रमत्तः स्वकर्मणि ॥ २-६४-४६ (१३८५३)
ततः प्रक्षीयमाणेषु तेषु तेष्वण्डजोऽपरः।
अशङ्कत महाप्राज्ञः स कदाचिद्ददर्श ह ॥ २-६४-४७ (१३८५४)
ततः सङ्कथयामास दृष्ट्वा हंसस्य किल्बिषम्।
तेषां परमदुःखार्तः स पक्षी सर्वपक्षिणाम् ॥ २-६४-४८ (१३८५५)
ततः प्रत्यक्षतो दृष्ट्वा पक्षिणस्ते समीपगाः।
निजघ्नस्तं तदा हंसं मिथ्यावृत्तं कुरूद्वह ॥ २-६४-४९ (१३८५६)
एवं त्वां हंसधर्माणमपीमे वसुधाधिपाः।
निहन्युर्भीष्म सङ्क्रुद्धाः पक्षिणस्तं यथाण्डजम् ॥ २-६४-५० (१३८५७)
गाथामप्यत्र गायन्ति ये पुराणविदो जनाः।
भीष्म यां तां च ते सम्यक्वथयिष्यामि भारत ॥ २-६४-५१ (१३८५८)
अन्तरात्मन्यभिहते रौषि पत्ररथाशुचि।
अण्डभक्षणकर्मैतत्तव वाचमतीयते ॥ ॥ २-६४-५२ (१३८५९)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि चतुःषष्टितोऽध्यायः ॥ ६४ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-६४-२ तृतीयायां प्रकृतौ नपुंसकत्वे ॥
२-६४-
२० कुलिगोनाम भूशायी पक्षी मासाहसमित्यनिशं वदन्नपि सिंहदंष्टान्तरस्थं मांसमा दत्ते स्वयं साहसमतिशयितं करोति ॥

सभापर्व - अध्याय ०६५

॥ श्रीः ॥
२.६५. अध्यायः ६५

Mahabharata - Sabha Parva - Chapter Topics
कृष्णनिन्दाश्रवणेन शिशुपालजिघांसया उत्पततो भीमस्य भीष्मेण विनिवर्तनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

शिशुपाल उवाच।

स मे बहुमतो राजा जरासन्धो महाबलः।
योऽनेन युद्धं नेयेष दासोऽयमिति संयुगे ॥ २-६५-१ (१३८६०)
केशवेन कृतं कर्म जरासन्धवधे तदा।
भीमसेनार्जुनाभ्यां च कस्तत्साध्विति मन्यते ॥ २-६५-२ (१३८६१)
उद्वारेण प्रविष्टेन छद्मना ब्रह्मवादिना।
दृष्टः प्रभावः कृष्णेन जरासन्धस्य भूपतेः ॥ २-६५-३ (१३८६२)
येन धर्मात्मनाऽऽत्मानं ब्रह्मण्यमभिजानता।
प्रेषितं पाद्यमस्मै तद्दातुमग्रे दुरात्मने ॥ २-६५-४ (१३८६३)
भुज्यतामिति तेनोक्ताः कृष्णभीमधनञ्जयाटः।
जरासन्धेन कौरव्य कृष्णेन विकृतं कृतम् ॥ २-६५-५ (१३८६४)
यद्ययं जगतः कर्ता यथैनं मूर्ख मन्यसे।
कस्मान्न ब्राह्मणं सम्यगात्मानमवगच्छति ॥ २-६५-६ (१३८६५)
इदं त्वाश्चर्यभूतं मे यदिमे पाण्डवास्त्वया।
अपकृष्टाः सतां मार्गान्मन्यन्ते तच्च साध्विति ॥ २-६५-७ (१३८६६)
अथवा नैतदाश्चर्यं येषां त्वमसि भारत।
स्त्रीसधर्मा च वृद्धश्च सर्वार्थानां प्रदर्शकः ॥ २-६५-८ (१३८६७)
वैशम्पायन उवाच ॥ २-६५-९क्ष् (१४८९)
तस्य तद्वचनं श्रुत्वा रूक्षं रूक्षाक्षरं बहु।
चकोप बलिनां श्रेष्ठो भीमसेनः प्रतापवान् ॥ २-६५-९ (१३८६८)
तथा पद्मप्रतीकाशे स्वभावायतविस्तृते।
भूयः क्रोधाभिताम्राक्षे रक्ते नेत्रे बभूवतुः ॥ २-६५-१० (१३८६९)
त्रिशिखां भ्रुकुटीं चास्य ददृशुः सर्वपार्थिवाः।
ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव ॥ २-६५-११ (१३८७०)
दन्तान्सन्दशतस्तस्य कोपाद्ददृशुराननम्।
युगान्ते सर्वभूतानि कालस्येव जिघत्सतः ॥ २-६५-१२ (१३८७१)
उत्पतन्तं तु वेगेन जग्राहैनं मनस्विन्।

भीष्म एव महाबाहुर्महासेनमिवेश्वरः ॥ २-६५-१३ (१३८७२)
तस्व भीमस्य भीष्मेण वार्यमाणस्य भारत।
गुरुणा विविधैर्वाक्यैः क्रोधः प्रशममागतः ॥ २-६५-१४ (१३८७३)
नातिचक्राम भीष्मस्य स हि वाक्यमरिन्दमः।
समुद्वृत्तो घनापाये वेलामिव महोदधिः ॥ २-६५-१५ (१३८७४)
शिशुपालस्तु सङ्क्रुद्धे भीमसेने जनाधिप।
नाकम्पत तदा वीरः पौरुषे व्यवस्थितः ॥ २-६५-१६ (१३८७५)
उत्पतन्तं तु वेगेन पुनः पुनररिन्दमः।
न स तं चिन्तयामास सिंहः क्रुद्धो मृगं यथा ॥ २-६५-१७ (१३८७६)
प्रहसंश्चाब्रवीद्वाक्यं चेदिराजः प्रतापवान्।
भीमसेनमभिक्रुद्धं दृष्ट्वा भीमपराक्रमम् ॥ २-६५-१८ (१३८७७)
मुञ्चैनं भीष्म पश्यन्तु यावदेनं नराधिपः।
मत्प्रभावविनिर्दग्धं पतङ्गमिव वह्निना ॥ २-६५-१९ (१३८७८)
ततश्चेदिपतेर्वाक्यं श्रुत्वा तत्कुरुसत्तमः।
भीमसेनमुवाचेदं भीष्मे मतिमतां वरः ॥ २-६५-२० (१३८७९)
ग्नैषा चेदिपतेर्बुद्धिर्यत्त्वामाह्वयतेऽच्युतम्।
भीमसेन महाबाहो कृष्णस्यैव विनिश्चयः'॥ ॥ २-६५-२१ (१३८८०)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि पञ्चषष्टितमोऽध्यायः ॥६५.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-६५-१३ महासेन कार्तिकयम् ॥

सभापर्व - अध्याय ०६६
॥ श्रीः ॥
२.६६. अध्यायः ६६

Mahabharata - Sabha Parva - Chapter Topics
भीष्मेण शिशुपालवृत्तान्तकथनपूर्वकं स्वेन भीमनिषेधने स्वाभिप्रायाविष्करणम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः।
रासभारावसदृशं ररास च ननाद च ॥ २-६६-१ (१३८८१)
तेनास्य मातापितरौ त्रेसतुस्तौ सबान्धवौ।
वैकृतं तस्यत तौ दृष्ट्वा त्यागायाकुरुतां मतिम् ॥ २-६६-२ (१३८८२)
ततः सभार्यं नृपतिं सामात्यं सपुरोहितम्।
चिन्तासंमूढहृदयं वागुवाचाशरीरेणी ॥ २-६६-३ (१३८८३)
एष ते नृपते पुत्रः श्रीमाञ्जातो बलाधिकः।
तस्मादस्मान्न भेतव्यमव्यग्रः पाहि वै शिशुम् ॥ २-६६-४ (१३८८४)
न च वै तस्य मृत्युस्त्वं न कालः प्रत्युपस्थितः।
यश्च शस्त्रेण हन्ताऽस्य स चोत्पन्नो नराधिप ॥ २-६६-५ (१३८८५)
संश्रुत्योदाहृतं वाक्यं भूतमन्तर्हितं ततः।
पुत्रस्नेहाभिसन्तप्ता जननी वाक्यमब्रवीत् ॥ २-६६-६ (१३८८६)
येनेदमीरितं वाक्यं ममैतं तनयं प्रति।
प्राञ्जलिस्तं नमस्यामि ब्रवीतु स पुनर्वचः ॥ २-६६-७ (१३८८७)
याथातथ्येन भगवान्देवो वा यदि वेतरः।
श्रोतुमिच्छामि पुत्रस्य कोऽस्य मृत्युर्भविष्यति ॥ २-६६-८ (१३८८८)
अन्तर्भूतं ततो भूतमुवाचेदं पुनर्वचः।
यस्योत्सङ्गे गृहीतस्य भुजावभ्यधिकावुभौ ॥ २-६६-९ (१३८८९)
पतिष्यतः क्षितितले पञ्चशीर्षाविवोरगौ।
तृतीयमेतद्बालस्य ललाटस्थं तु लोचनम् ॥ २-६६-१० (१३८९०)
निमज्जिष्यति यं दृष्ट्वा सोऽस्य मृत्युर्भविष्यति।
त्र्यक्षं चतुर्भुजं श्रुत्वा तथा च समुदाहृतम् ॥ २-६६-११ (१३८९१)
पृथिव्यां पार्थिवाः सर्वे अभ्यागच्छन्दिदृक्षवः।
तान्पूजयित्वा सम्प्राप्तान्यथार्हं स महीपतिः ॥ २-६६-१२ (१३८९२)
एकैकस्य नृपस्याङ्के पुत्रमारोपयत्तदा।
एवं राजसहस्राणा पृथक्त्वेन यथाक्रमम् ॥ २-६६-१३ (१३८९३)
शिशुरङ्के समारूढो न तत्प्राय निदर्शनम्।
एतदेव तु संश्रुत्य द्वारवत्यां महाबलौ ॥ २-६६-१४ (१३८९४)
ततश्चेदिपुरं प्राप्तौ सङ्कर्षणजनार्दनौ।
यादवौ यादवीं द्रष्टुं स्वसारं तौ पितुस्तदा ॥ २-६६-१५ (१३८९५)
अभिवाद्य यथान्यायं यथाश्रेष्ठं नृपं च ताम्।
कुशलानामयं पृष्ट्वा निषण्णौ रामकेशवौ ॥ २-६६-१६ (१३८९६)
साऽभ्यर्च्य तौ तदा वीरौ प्रीत्या चाभ्यधिकं ततः।
पुत्रं दामोदरोत्सङ्गे देवी संन्यदधात्स्वयम् ॥ २-६६-१७ (१३८९७)
न्यस्तमात्रस्य तस्याङ्के भुजावभ्यधिकावुभौ।
पेततुस्तच्च नयनं न्यमज्जत ललाटजम् ॥ २-६६-१८ (१३८९८)

तद्दृष्ट्वा व्यथिता त्रस्ता वरं कृष्णमयाचत।
ददस्व मे वरं कृष्ण भयार्ताया महाभुज ॥ २-६६-१९ (१३८९९)
त्वं ह्यार्तानां समाश्वासो भीतानामभयप्रदः।
एवमुक्तस्ततः कृष्णः सोऽब्रवीद्यदुनन्दनः ॥ २-६६-२० (१३९००)
मा भैस्त्वं देवि धर्मज्ञे न मत्तोऽस्ति भयं तव।
ददामि कं वरं किं च करवाणि पितृष्वसः ॥ २-६६-२१ (१३९०१)
शक्यं वा यदि वाऽशक्यं करिष्याणि वचस्तव।
एवमुक्ता ततः कृष्णमब्रवीद्यदुनन्दनम् ॥ २-६६-२२ (१३९०२)
शिशुपालस्यापराधान्क्षमेथास्त्वं महाबल।
मत्कृते यदुशार्दूल विद्धयेनं मे वरं प्रभो ॥ २-६६-२३ (१३९०३)
कृष्ण उवाच। २-६६-२४क्ष् (१४९०)
अपराधशतं क्षाम्यं मया ह्यस्य पितृष्वसः।
पुत्रस्य ते वधार्हस्य मा त्वं शोके मनः कृथाः ॥ २-६६-२४ (१३९०४)
भीष्म उवाच। २-६६-२५क्ष् (१४९१)
ग्स जानन्नात्मनो मृत्युं कृष्णं यदुसुखावहम्'।
एवमेष नृपः पापः शिशुपाः सुमन्दधीः।
त्वां समाह्वयते वीर गोविन्दवरदर्पितः ॥ ॥ २-६६-२५ (१३९०५)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सभापर्व - अध्याय ०६७
॥ श्रीः ॥
२.६७. अध्यायः ६७

Mahabharata - Sabha Parva - Chapter Topics
शिशुपालेन राज्ञां प्रशंसनपूर्वकं गर्हितेन भीष्मेण राज्ञां तिरस्करणादिकम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

भीष्म उवाच ॥

नैषा चेदिपतेर्बुद्धिर्यया त्वाह्वयतेऽच्युतम्।
नूनमेव जगद्भर्तुः कृष्णस्यैव विनिश्चयः। २-६७-१ (१३९०६)
को हि मां भीमसेनाद्य क्षितावर्हति पार्थिवः।

क्षेप्तुं कालपरीतात्मा यथैष कुलपांसनः ॥ २-६७-२ (१३९०७)
एष ह्यस्य महाबाहुस्तेजोंशश्च हरेर्ध्रुवम्।
तमेव पुनरादातुं कुरुतेऽत्र मतिं हरिः ॥ २-६७-३ (१३९०८)
येनैष कुरुशार्दूल शार्दूल इव चेदिराट्।
गर्जत्यतीव दुर्बुद्धिः सर्वानस्मानचिन्तयन् ॥ २-६७-४ (१३९०९)
वैशम्पायन उवाच ॥ २-६७-५क्ष् (१४९२)
ततो न ममृषे चैद्यस्तद्भीष्मवचनं तदा।
उवाच चैन सङ्क्रुद्धः पुनर्भीष्ममथोत्तरम् ॥ २-६७-५ (१३९१०)
शिशुपाल उवाच ॥ २-६७-६क्ष् (१४९३)
द्विषतां नोऽस्तु भीष्मैष प्रभावः केशवस्य यः।
यस्य संस्तववक्ता त्वं बन्दिवत्सततोत्थितः ॥ २-६७-६ (१३९११)
संस्तवे चमनो भीष्म परेषां रमते यदि।
तदा संस्तुहि राज्ञस्त्वमिमं हित्वा जनार्दनम् ॥ २-६७-७ (१३९१२)
दरदं स्तुहि बाह्लीकमिमं पार्थिवसत्तमम्।
जायमानेन येनेयभवद्दारिता मही ॥ २-६७-८ (१३९१३)
वङ्गाङ्गविषयाध्यक्षं सहस्राक्षसमं बले।
स्तुहि कर्णमिमं भीष्म महाचापविकर्षणम् ॥ २-६७-९ (१३९१४)
यस्येमे कुण्डले दिव्ये सहजे देवनिर्मिते।
कवचं च महाबाहो बालार्कसदृशप्रभम् ॥ २-६७-१० (१३९१५)
वासवप्रतिमो येन जरासन्धोऽतिदुर्जयः।
विजितो बाहुयुद्धेन देहभेदं च लम्भितः ॥ २-६७-११ (१३९१६)
द्रोणं द्रौणिं च साधु त्वं पितापुत्रौ महारथौ।
स्तुहि स्तुत्यावुभौ भीष्म सततं द्विजसत्तमौ ॥ २-६७-१२ (१३९१७)
ययोरन्यतरो भीष्म सङ्क्रुद्धः सचराचराम्।
इमां वसुमतीं कुर्यान्निः शेषामिति मे मतिः ॥ २-६७-१३ (१३९१८)
द्रोणस्य हि समं युद्धे न पश्यामि नराधिपम्।
नाश्वत्थाम्नः समं भीष्म न च तौ स्तोतुमिच्छसि ॥ २-६७-१४ (१३९१९)
पृथिव्यां सागरान्तायां यो वैप्रतिसमो भवेत्।
दुर्योधनं त्वं राजेन्द्रमतिक्रम्य महाभुजम् ॥ २-६७-१५ (१३९२०)
जयद्रथं च राजानं कृतास्त्रं दृढविक्रमम्।
द्रुमं किम्पुरुषाचार्यं लोके प्रथितविक्रमम्।
अतिक्रम्य महावीर्यं किं प्रशंससि केशवम् ॥ २-६७-१६ (१३९२१)
वृद्धं च भरताचार्यं तथा शारद्वतं कृपम्।
अतिक्रम्य महावीर्यं किं प्रशंससि केशवम् ॥ २-६७-१७ (१३९२२)
धनुर्धराणां प्रवरं रुक्मिणं पुरुषोत्तमम्।
अतिक्रम्य महावीर्यं किं प्रशंससि केशवम् ॥ २-६७-१८ (१३९२३)

भीष्मकं च महावीर्यं दन्तवक्त्रं च भूमिपम्।
भगदत्तं यूपकेथु जयत्सेनं च मागधम् ॥ २-६७-१९ (१३९२४)
विराटद्रुपदौ चोभौ शकुनिं च बहद्बलम्।
विन्दानुविन्दावावन्त्यौ पाण्ड्यं श्वेतमथोत्तमम् ॥ २-६७-२० (१३९२५)
शङ्खं च सुमहाभागं वृषसेनं च मानिनम्।
एकलव्यं च विक्रान्तं कालिङ्गं च महारथम् ॥ २-६७-२१ (१३९२६)
अतिक्रम्य महावीर्यं किं प्रशंससि केशवम्।
शल्यादीनपि कस्मात्त्वं न स्तौषि वसुधाधिपान्।
स्तवाय यदि ते बुद्धिर्वर्तते भीष्म वसुधाधिपान्। २-६७-२२ (१३९२७)
किं हि शक्यं मया कर्तुं यद्वृद्धानां त्वया नृप।
पुरा कथयतां नूनं न श्रुतं धर्मवादिनाम् ॥ २-६७-२३ (१३९२८)
आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः।
अनाचरितमार्याणामिति ते भीष्म न श्रुतम् ॥ २-६७-२४ (१३९२९)
यदस्तव्यमिमं शश्वन्मोहात्संस्तौषि भक्तितः।
केशवं तच्च ते भीष्म न कश्चिदनुमन्यते ॥ २-६७-२५ (१३९३०)
कथं भोजस्य पुरुषे वत्सपाले दुरात्मनि।
समावेशयसे सर्वं जगत्केवलकाम्यया ॥ २-६७-२६ (१३९३१)
अथ चैषा न ते बुद्धिः प्रकृतिं याति भारत।
मयैव कथितं पूर्वं कुलिङ्गशकुनिर्यथा ॥ २-६७-२७ (१३९३२)
कुलिङ्गशकुनिर्नाम पार्श्वे हिमवतः परे।
भीष्म तस्याः सदा वाचः श्रूयन्तेऽर्थविगर्हिताः ॥ २-६७-२८ (१३९३३)
मा साहसमितीदं सा सततं वाशते किल।
साहसं चात्मनातीव चरन्ती नावबुध्यते ॥ २-६७-२९ (१३९३४)
सा हि मांसार्गलं भीष्म मुखात्सिंहस्य खादतः।
दन्तान्तरविलग्नं यत्तदादत्तेऽल्पचेतना ॥ २-६७-३० (१३९३५)
इच्छतः सा हि सिंहस्य भीष्म जीवत्यसंशयम्।
तद्वत्त्वमप्यधर्मिष्ठ सदा वाचः प्रभाषसे ॥ २-६७-३१ (१३९३६)
इच्छतां भूमिपालानां भीष्म जीवस्यसंशयम्।
लोकविद्विष्टकर्मा हि नान्योऽस्ति भवता समः ॥ २-६७-३२ (१३९३७)
वैशम्पायन उवाच ॥ २-६७-३३क्ष् (१४९४)
ततश्चेदिपतेः श्रुत्वा भीष्मः स कटुकं वचः।
उवाचेदं वचो राजंश्चेदिराजस्य शृण्वतः ॥ २-६७-३३ (१३९३८)
इच्छतां किल नामाहं जीवाम्येषां महीक्षिताम्।
सोऽहं न गणयाम्येतांस्तृणेनापि नराधिपान् ॥ २-६७-३४ (१३९३९)
एवमुक्ते तु भीष्मेण ततः सञ्चुक्रुशुर्नृपाः।
केचिज्जहृषिरे तत्र केचिद्भीष्मं जगर्हिरे ॥ २-६७-३५ (१३९४०)

केचिदूचुर्महेष्वासाः श्रुत्वा भीष्मस्य यद्वचः।
पापोऽवलिप्तो वृद्धश्च नायं भीष्मोऽर्हति क्षमाम् ॥ २-६७-३६ (१३९४१)
हन्यतां दुर्मतिर्भीष्मः पशुवत्साध्वयं नृपाः।
सर्वैः समेत्य संरब्धैर्दह्यतां वा कटाग्निना ॥ २-६७-३७ (१३९४२)
इति तेषां वचः श्रुत्वा ततः कुरुपितामहः।
उवाच मतिमान्भीष्मस्तानेव वसुधाधिपान् ॥ २-६७-३८ (१३९४३)
उक्तस्योक्तस्य नेहान्तमहं समुपलक्षये।
यत्तु वक्ष्यामि तत्सर्वं शृणुध्वं वसुधाधिपाः ॥ २-६७-३९ (१३९४४)
पशुवद्घातनं वा मे दहनं वा कटाग्निना।
क्रियतां मूर्ध्नि वो न्यस्तं मयेदं सकलं पदम् ॥ २-६७-४० (१३९४५)
एष तिष्ठति गोविन्दः पूजितोऽस्माभिरच्युतः।
यस्य वस्त्वरते बुद्धिर्मरणाय स माधवम् ॥ २-६७-४१ (१३९४६)
कृष्णमाह्वयतामद्य युद्धे चक्रगदाधरम्।
यादवस्यैव देवस्य देहं विशतु पातितः ॥ ॥ २-६७-४२ (१३९४७)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-६७-१५ वैप्रतिसमः विगतः प्रतिसमो यस्य स तथा ।स्वार्थे तद्धितः।अतुल इत्यर्थः ॥
२-६७-२७ कुलिङ्गशकुनिरिति स्त्रीपक्षिविशेषः ॥
२-६७-३७ कटाग्निना कक्षाग्निना ॥

सभापर्व - अध्याय ०६८
॥ श्रीः ॥
२.६८. अध्यायः ६८

Mahabharata - Sabha Parva - Chapter Topics
भीष्मवाक्यात्कुपितेन शशुपालेन राज्ञः सज्ञाह्य युयुत्सया कृष्णस्याह्वानम् ॥१.।कृष्णेन स्वस्मिन् शिशुपालकृताप

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

वचः श्रुत्वैव भीष्मस्य चेदिराडुरुविक्रमः।

युयुत्सुर्वासुदेवेन वासुदेवमुवाच ह ॥ २-६८-१ (१३९४८)
आह्वये त्वां रणं गच्छ मया सार्धं जनार्दन।
यावदद्य निहन्मि त्वां सहितं सर्वपाण्डवैः ॥ २-६८-२ (१३९४९)
सह त्वया हि मे वध्याः सर्वथा कृष्ण पाण्डवाः।
नृपतीन्समतिक्रम्य यैरराजा त्वमर्चितः ॥ २-६८-३ (१३९५०)
ये त्वां दासमराजानं बाल्यादर्चन्ति दुर्मतिम्।
अनर्हमर्हवत्कृष्ण वध्यास्त इति मे मतिः ॥ २-६८-४ (१३९५१)
इत्युक्त्वा राजशार्दूल ग्शार्दूल इव नादयन्।
पश्यतां सर्वभूतानां शिशुपालः प्रतापवान् ॥ २-६८-५ (१३९५२)
स रणायैव सङ्क्रुद्धः सन्नद्धः सर्वराजभिः।
सुनीथः प्रययौ क्षिप्रं पार्थयज्ञजिघांसया ॥ २-६८-६ (१३९५३)
ततश्चक्रगदापाणिः केशवः केशिहा हरिः।
सध्वजं रथमास्थाय दारुकेण सुसत्कृतम्।
भीष्मेण दत्तहस्तोऽसावारुरोह रथोत्तमम् ॥ २-६८-७ (१३९५४)
तेन पापस्वभावेन कोपितान्सर्वपार्थिवान्।
आससाद रणे कृष्णः सज्जितैकरथः स्थितः ॥ २-६८-८ (१३९५५)
ततः पुष्करपत्राक्षं तार्क्ष्यध्वजरथे स्थितम्।
दिवाकरमिवोद्यन्तं ददृशुः सर्वपार्थिवाः ॥ २-६८-९ (१३९५६)
आरोपयन्तं ज्यां कृष्णं प्रतपन्तमिवौजसा।
स्थितं पुष्परथे दिव्ये पुष्पकेतुमिवापरम् ॥ २-६८-१० (१३९५७)
दृष्ट्वा कृष्णं तथा यान्तं प्रतपन्तमिवौजसा।
यथार्हं केशवे वृत्तिमवशाः प्रतिपेदिरे ॥ २-६८-११ (१३९५८)
तानुवाच महाबाहुर्महाऽसुरनिबर्हणः।
वृष्णिवीरस्तदा राजन्सान्त्वयन्परवीरहा ॥ २-६८-१२ (१३९५९)
श्रीभगवानुवाच ॥ २-६८-१३क्ष् (१४९५)
अपेत सबलाः सर्व आस्वस्ता मम शासनात्।
मा दृष्टो दूषयेत्पाप एष वः सर्वपार्थिपाः ॥ २-६८-१३ (१३९६०)
एष नः शत्रुरत्यन्तमेष वृष्णिविमर्दनः।
सात्वतां सात्वतीपुत्रो वैरं चरति शाश्वतम्'॥ २-६८-१४ (१३९६१)
प्राग्ज्योतिषपुरं यातानस्माञ्ज्ञात्वा नृशंसकृत्।
अदहद्द्वारकामेष स्वस्त्रीयः सन्नराधिपाः ॥ २-६८-१५ (१३९६२)
क्रीडतो भोजराजस्य एव रैवतके गिरौ।
हत्वा बध्वा च तान्सार्वानुपायात्स्वपुरं पुरा ॥ २-६८-१६ (१३९६३)
अश्वमेधे हयं मेध्यमुत्सृष्टं रक्षिभिर्वृतम्।
पितुर्मे यज्ञविघ्नार्थमहरत्पापनिश्चयः ॥ २-६८-१७ (१३९६४)
सौवीरान्प्रतियातां च बभ्रोरेष तपस्विनः।

भार्यामभ्यहरन्मोहादकामां तामितो गताम् ॥ २-६८-१८ (१३९६५)
एष मायाप्रतिच्छन्नः कारूशार्थे तपस्विनीम्।
जहार भद्रां वैशालीं मातुलस्य नृशंसकृत् ॥ २-६८-१९ (१३९६६)
वृष्णिदारान्विलाप्यैव हत्वा च कुकुरान्धकान्।
पापाबुद्धिरुपातिष्ठत्स प्रविश्य ससम्भ्रमम् ॥ २-६८-२० (१३९६७)
विशालराज्ञो दुहितां मम पित्रा वृतां सतीम्।
अनेन कृत्वा सन्धानं करूशेन जिगीषया ॥ २-६८-२१ (१३९६८)
जरासन्धं समाश्रित्य कृतवान्विप्रियाणि मे।
तानि सर्वाणि सङ्ख्यातुं न शक्नोमि नराधिपाः ॥ २-६८-२२ (१३९६९)
एवमेतदपर्यन्तमेष वृष्णिषु किल्बिषी।
अस्माकमयमारम्भांश्चकार परभानृजुः ॥ २-६८-२३ (१३९७०)
शतं क्षन्तव्यमस्माभिर्वधार्हाणां किलागसाम्।
बद्धोऽस्मि समयैर्घोरैर्मातुरस्यैव सङ्गरे ॥ २-६८-२४ (१३९७१)
तत्तथा शतमस्माकं क्षान्तं क्षयकरं मया।
द्वौ तु मे वधकालेऽस्मिन्न क्षन्तव्यौ कथञ्चन ॥ २-६८-२५ (१३९७२)
यज्ञविघ्नकरं हन्यां पाण्डवानां च दुर्हृदम्।
इति मे वर्तते भावस्तमतीयां कथं न्वहम् ॥ २-६८-२६ (१३९७३)
पितृष्वसुः कृते दुःखं सुमहन्मर्षयाम्यहम्।
दिष्ट्या हीदं सर्वराज्ञां सन्निधावद्य वर्तते ॥ २-६८-२७ (१३९७४)
पश्यन्ति हि भवन्तोऽद्य मय्यतीव व्यतिक्रमम्।
कृतानि तु परोक्षं मे यानि तानि निबोधत ॥ २-६८-२८ (१३९७५)
इमं त्वस्य न शक्ष्यामि क्षन्तुमद्य व्यतिक्रमम्।
अवलेपाद्वधार्हस्य समग्रे राजमण्डले ॥ २-६८-२९ (१३९७६)
रुक्मिण्यामस्य मूढस्य प्रार्थनाऽऽसीन्मुमूर्षतः।
न च तां प्राप्तवान्मूढः शूद्रो वेदश्रुतीमिव ॥ २-६८-३० (१३९७७)
वैशम्पायन उवाच ॥ २-६८-३१क्ष् (१४९६)
एवमादि ततः सर्वे सहितास्ते नराधिपाः।
गर्हणं शिशुपालस्य वासुदेवेन विश्रुतः ॥ २-६८-३१ (१३९७८)
वासुदेववचः श्रुत्वा चेदिराजं व्यगर्हयन्।
रथोपस्थे धनुष्मन्तं शरान्सन्दधतं रुषा ॥ २-६८-३२ (१३९७९)
श्रुत्वाऽपि च विलोक्याशु दुद्रुवुः सर्वपार्थिवाः।
विहाय परमोद्विग्नाश्चेदिराजं चमूमुखे ॥ २-६८-३३ (१३९८०)
तस्य तद्वचनं श्रुत्वा शिशुपालः प्रतापवान्।
जहास स्वनवद्धासं वाक्यं चेदमुवाच ह ॥ २-६८-३४ (१३९८१)
मत्पूर्वां रुक्मिणीं कृष्ण संसत्सु परिकीर्तयन्।
विशेषतः पार्थिवेषु व्रीडां न कुरुषे कथम् ॥ २-६८-३५ (१३९८२)

मन्यमानो हि कः सत्सु पुरुषः परिकीर्तयेत्।
अन्यपूर्वां स्त्रियं जातु त्वदन्यो मधूसूदन ॥ २-६८-३६ (१३९८३)
क्षमा वा यदि ते श्रद्धा मा वा कृष्ण मम क्षम।
क्रुद्धाद्वापि प्रसन्नाद्वा किं मे त्वत्तो भविष्यते ॥ २-६८-३७ (१३९८४)
ग्वैशम्पायन उवाच ॥ २-६८-३८क्ष् (१४९७)
स तांस्तु विद्रुतान्सर्वान्साश्वपत्तिरथद्विपान्।
कृष्णतेजोहतान्सर्वान्समीक्ष्य वसुधाधिपान् ॥ २-६८-३८ (१३९८५)
शिशुपालो रथेनैकः प्रत्युपायात्स केशवम्।
रुषा ताम्रेक्षणो राजञ्छलभः पावकं यथा ॥ ॥ २-६८-३९ (१३९८६)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-६८-३१ विश्रुताः श्राविताः ॥

सभापर्व - अध्याय ०६९
॥ श्रीः ॥
२.६९. अध्यायः ६९

Mahabharata - Sabha Parva - Chapter Topics
शिशुपाले सन्नद्धे सति उत्पातदर्शनेन युधिष्ठिरस्य प्रश्ने नारदेन तत्तदुत पातानां विशिष्य फलकथनम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततो युद्धाय संनद्धं चेदिराजं युधिष्ठिरः।
दृष्ट्वा मतिमतां श्रेष्ठो नारदं समुवाच ह ॥ २-६९-१ (१३९८७)
युधिष्ठिर उवाच ॥ २-६९-२क्ष् (१४९८)
अन्तरिक्षे च भूमौ च तेऽस्त्यविदितं क्वचित्।
यानि राजविनाशाय भौमानि च खगानि च ॥ २-६९-२ (१३९८८)
निमित्तानीह जायन्ते उत्पाताश्च पृथग्विधाः।
एतदित्च्छामि कात्स्न्र्येन श्रोतुं त्वत्तो महामुने ॥ २-६९-३ (१३९८९)
वैशम्पायन उवाच। २-६९-४क्ष् (१४९९)

इत्येवं मितमान्विप्रः कुरुराजस्य धीमतः।
पृच्छतः सर्वमव्यग्रमाचचक्षे महायशाः ॥ २-६९-४ (१३९९०)
नारद उवाच ॥ २-६९-५क्ष् (१५००)
पराक्रमं च मार्गं च संनिपातं समुच्छ्रयम्।
आरोहणं कुरुश्रेष्ठ अन्योन्यं प्रतिसर्पणम् ॥ २-६९-५ (१३९९१)
पश्मीनां व्यतिसंसर्गं व्यायामं वृत्तिपीडनम्।
दर्शनादर्शनं चैव अदृश्यानां च दर्शनम् ॥ २-६९-६ (१३९९२)
हानिं वृद्धिं च ह्रासं च वर्णस्थानं बलाबलम्।
सर्वमेतत्परीक्षेत ग्रहाणां ग्रहकोविदः ॥ २-६९-७ (१३९९३)
भौमाः पूर्वं प्रवर्तन्ते खेचराश्च ततः परम्।
उत्पद्यन्ते च लोकेऽस्मिन्नुत्पाता देवनिर्मिताः ॥ २-६९-८ (१३९९४)
यदा तु सर्वभूतानां छाया न परिवर्तते।
अपरेण गते सूर्ये तत्पराभवलक्षणम् ॥ २-६९-९ (१३९९५)
अच्छाये विमलच्छाया प्रतिच्छायेव दृश्यते।
यत्र चैत्यकवृक्षाणां तत्र विद्यान्महद्भयम् ॥ २-६९-१० (१३९९६)
शीर्णपर्णप्रवालाश्च शुष्कपर्णाश्च चैत्यकाः।
अपभ्रष्टप्रवालाश्च तत्राभावं विनिर्दिशेत् ॥ २-६९-११ (१३९९७)
स्निग्धपर्णप्रवालाश्च दृश्यन्ते यत्र चैत्यकाः।
ईहमानाश्च वृक्षाश्च भावस्तत्र न संशयटः ॥ २-६९-१२ (१३९९८)
पुष्पे पुष्पं प्रजायेत फले वा फलमाश्रितम्।
राजा वा राजमात्रो वा मरणायोपपद्यते ॥ २-६९-१३ (१३९९९)
प्रावृट्छरदि हेमन्ते वसन्ते वापि सर्वशः।
आकालिकं पुष्पफलं राष्ट्रक्षोभं विनिर्दिशेत् ॥ २-६९-१४ (१४०००)
नदीनां स्त्रोतसोऽकाले द्योतयन्ति महाभयम्।
वनस्पतिः पूज्यमानः पूजितोऽपूजितोऽपि वा ॥ २-६९-१५ (१४००१)
यदा भज्येत वातेन भिद्यते नमितोऽपि वा।
अग्निवायुभयं विद्याच्छ्रेष्ठो वापि विनश्यति ॥ २-६९-१६ (१४००२)
दिशः सर्वाश्च दीप्यन्ते जायन्ते राजविभ्रमाः।
भिद्यमानो यदा वृक्षो निनदेच्चापि पातितः।
सह राष्ट्रं च पतितं नतं वृक्षं प्रपातयेत् ॥ २-६९-१७ (१४००३)
अथैनं छेदयेत्कश्चित्प्रतिक्रुद्धो वनस्पतिः।
छेत्ता भेत्ता पतिश्चैव क्षिप्रमेव नशिष्यति ॥ २-६९-१८ (१४००४)
देवतानां च पतनं मष्टपानां च पातनम्।
अचलानां प्रकम्पश्च तत्पराभवलक्षणम् ॥ २-६९-१९ (१४००५)
निशि चेन्द्रधनुर्दृष्टं ततोपि च महद्भयम्।
तद्द्रष्टरेव भीतिः स्यान्नान्येषां भरतर्षभ ॥ २-६९-२० (१४००६)

रात्राविन्द्रधनुर्दृष्ट्वा तद्राष्ट्रं परिवर्जयेत् ॥ २-६९-२१ (१४००७)
अर्चा यत्र प्रनृत्यन्त नदन्ति च हसन्ति च।
उन्मीलन्ति निमीलन्ति राष्ट्रक्षोभं विनिर्दिशेत् ॥ २-६९-२२ (१४००८)
शिला यदि प्रसिञ्चन्ति स्नेहांश्चोदकसम्भवान्।
अन्यद्वा विकृतं किञ्चित्तद्भयस्य निदर्शनम् ॥ २-६९-२३ (१४००९)
म्रियन्ते वा महामात्रा राजा सपरिवारकः।
पुरस्य या भवेद्व्याधी राष्ट्रे देशे च विभ्रमाः ॥ २-६९-२४ (१४०१०)
देवतानां यदाऽऽवासे राज्ञां वा यत्र वेश्मनि।
भाण्डागारायुधागारे निविशेत यदा मधु ॥ २-६९-२५ (१४०११)
सर्वं तदा भवेत्स्थानं हन्यमानं बलीयसा।
आगन्तुकं भयं तत्र भवेदित्येव निर्दिशेत् ॥ २-६९-२६ (१४०१२)
पादपश्चैव यो यत्र रक्तं स्रवति शोणितम्।
दन्ताग्रात्कुञ्जरो वापि शृङ्गाद्वा वृषभस्तथा ॥ २-६९-२७ (१४०१३)
पादपाद्राष्ट्रिविभ्रंशः कुञ्जराद्राजविभ्रमः।
गोब्राह्मणविनाशः स्याद्वृवभस्येति निर्दिशेत् ॥ २-६९-२८ (१४०१४)
छत्रं नरपतेर्यत्र निपतेत्पृथिवीतले।
सराष्ट्रो नृपती राजन्क्षिप्रमेव विनश्यति ॥ २-६९-२९ (१४०१५)
देवागारेषु वा यत्र राज्ञो वा यत्र वेश्मनि।
विकृतं यदि दृश्येत नागावासेषु वा पुनः ॥ २-६९-३० (१४०१६)
तस्य देशस्य पीडा स्याद्राज्ञो जनपदस्य वा।
अनावृष्टिभयं घोरमतिदुर्भिक्षमादिशेत् ॥ २-६९-३१ (१४०१७)
अर्चाया बाहुभङ्गेन गृहस्थानां भयं भवेत्।
भग्ने प्रहरणे विद्यात्सेनापतिविनाशनम् ॥ २-६९-३२ (१४०१८)
आगन्तुका तु प्रतिमा स्थानं यत्र न विन्दति।
जभ्यन्तरेण षण्मासाद्राजा त्यजति तत्पुरम् ॥ २-६९-३३ (१४०१९)
प्रदीर्यते मही यत्र विनदत्यपि पात्यते।
म्रियते तत्र राजा च तत्र राष्ट्रं विनश्यति ॥ २-६९-३४ (१४०२०)
एणीपदान्वा सर्पान्वा डुण्डुभानथ दीप्यकान्।
मण्डूको ग्रसते यत्र तत्र राजा विनश्यति ॥ २-६९-३५ (१४०२१)
अभिन्नं वाप्यपक्वं वा यत्रान्नमुपचीयते।
जीर्यन्ते वा म्रियन्ते वा तदन्नं नोपभुञ्जते ॥ २-६९-३६ (१४०२२)
उदपाने च यत्रापो विवर्धन्ते युधिष्ठिर।
स्थावरेषु प्रवर्तन्ते निर्गच्छेन्न पुनस्ततः ॥ २-६९-३७ (१४०२३)
अपादं वा त्रिपादं वा द्विशीर्षं वा चतुर्भुजम्।
स्त्रियो यत्र प्रसूयन्ते ब्रूयात्तत्र पराभवम् ॥ २-६९-३८ (१४०२४)
अजैडकाः स्त्रियो गावो ये चान्ये च वियोनयः।

विकृतानि प्रजायन्ते तत्र तत्र पराभवः ॥ २-६९-३९ (१४०२५)
नदी यत्र प्रतिस्रोता आवहेत्कलुषोदकम्।
दिशश्च न प्रकाशन्ते तत्पराभवलक्षणम् ॥ २-६९-४० (१४०२६)
एतानि च निमित्तानि यानि चान्यानि भारत।
केशवादेव जायन्ते भौमानि च खगानि च ॥ २-६९-४१ (१४०२७)
चन्द्रादित्यौ ग्रहाश्चैव नक्षत्राणि च भारत।
वायुरग्निस्तथा चापः पृथिवी च जनार्दनात् ॥ २-६९-४२ (१४०२८)
यस्य देशस्य हानिं वा वृद्धिं वा कर्तुमिच्छति।
तस्मिन्देशे निमित्तानि तानि तानि करोत्ययम् ॥ २-६९-४३ (१४०२९)
सोसौ चेदिपतेस्तात विनाशं समुपस्थितम्।
निवेदयति गोविन्दः स्वैरुपायैर्न संशयः ॥ २-६९-४४ (१४०३०)
इयं प्रचलिता भूमिरशिवा वान्ति मारुताः।
राहुश्चाप्यपतत्सोममपर्वणि विशाम्पते ॥ २-६९-४५ (१४०३१)
सनिर्घाताः पतन्त्युल्कास्तमः सञ्जायते भृशम्।
चेदिराजविनाशाय हरिरेष विजृम्भते ॥ २-६९-४६ (१४०३२)
वैशम्पायन उवाच ॥ २-६९-४७क्ष् (१५०१)
एवमुक्त्वा तु देवर्षिर्नारदो विरराम ह।
ताभ्यां पुरुषसिंहाभ्यां तस्मिन्युद्ध उपस्थिते। २-६९-४७ (१४०३३)
ददृशुर्भूमिपालास्ते घोरानौत्पातिकान्बहून् ॥
तत्र वै दृश्यमानानां दिक्षु सर्वासु भारत। २-६९-४८ (१४०३४)
अश्रूयन्त तदा राजञ्छिवानामशिवा रवाः ॥
ररास च मही कृत्स्ना सवृक्षवनपर्वता। २-६९-४९ (१४०३५)
अपर्वणि च मध्याह्ने सूर्यं स्वर्भानुरग्रसत् ॥
ध्वजाग्रे चेदिराजस्य सर्वरत्नपरिष्कृते। २-६९-५० (१४०३६)
अपतत्खाच्च्युतो गृध्रस्तीक्ष्णतुण्डः परन्तप ॥
आरण्यैः सहसा हृष्टा ग्राम्याश्च मृगपक्षिणः। २-६९-५१ (१४०३७)
चुक्रुशुर्भैरवं तत्र तस्मिन्युद्ध उपस्थिते ॥
एवमादिनि घोराणि भौमानि च स्वगानि च। २-६९-५२ (१४०३८)
औत्पातिकान्यदृश्यन्त सङ्क्रुद्धे शार्ङ्गधन्वनि ॥ ॥ २-६९-५३ (१४०३९)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सभापर्व - अध्याय ०७०
॥ श्रीः ॥

२.७०. अध्यायः ७०

Mahabharata - Sabha Parva - Chapter Topics
कृष्णशिशुपालयोर्युद्धवर्णनम् ॥ १.। शिशुपालवधः ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततो विष्फारयन्राजा महच्चैदिपतिर्धनुः।
अभियास्यन्हृषीकेशमुवाच मधुसूदनम् ॥ २-७०-१ (१४०४०)
एकस्त्वमसि मे शत्रुस्तत्त्वां हत्वाऽद्य माधव।
ततः सागरपर्यन्तां पालयिष्यामि मेदिनीम् ॥ २-७०-२ (१४०४१)
द्वैरथं काङ्क्षितं यद्वै तदिदं पर्युपस्थितम्।
चिरस्य वत मे दिष्ट्या वासुदेव सह त्वया।
अद्य त्वां निहनिष्यामि भीष्मं च सह पाण्डवैः ॥ २-७०-३ (१४०४२)
वैशम्पायन उवाच। २-७०-४क्ष् (१५०२)
एवमुक्त्वा स तं बाणैर्निशितैरक्ततेजनैः।
विव्याध युधि तीक्ष्णाग्रैश्चेदिराड्यपुङ्गवम्? २-७०-४ (१४०४३)
कङ्कपत्रच्छदा बाणाश्चेदिराजधनुश्च्युताः।
विविशुस्ते तदा कृष्णं भुजङ्गा इव पर्वतम्? २-७०-५ (१४०४४)
नाददानस्य चैद्यस्य शरानत्यस्यतोपि वा।
दधृशुर्विवरं केचिद्गतिं वायोरिवाम्बरे? २-७०-६ (१४०४५)
चेदिराजमहामेधः शरजालाम्बुमांस्तदा।
अभ्यवर्षद्धृषीकेशं पयोद इव पर्वतम्? २-७०-७ (१४०४६)
ततः शार्ङ्गममित्रघ्नः कृत्वा सशरमच्युतः।
आबभाषे महबाहुः सुनीथं परवीरहा ॥ २-७०-८ (१४०४७)
अयं त्वं भामकस्तीक्ष्णश्चेदिराज महाशरः।
भेत्तुमर्हति वेगेन महाशनिरिवाचलम् ॥ २-७०-९ (१४०४८)
वैशम्पायन उवाच। २-७०-१०क्ष् (१५०३)
एवं ब्रुवति गोविन्दे ततश्चेदिपतिः पुनः।
मुमोच निशितानन्यान्कृष्णं प्रति शरान्बहून् ॥ २-७०-१० (१४०४९)
अथ बाणार्दितः कृष्णः शार्ङ्गमायम्य दीप्तिमान्।
मुमोच निशितान्बाणाञ्छतशोथ सहस्रशः ॥ २-७०-११ (१४०५०)
ताञ्छरांस्तु स चिच्छेद शरवर्षैस्तु चेदिराट्।
षड्भिश्चान्यैर्जघानाशु केशवं चेदिपुङ्गवः ॥ २-७०-१२ (१४०५१)

ततोऽस्त्रं सहसा कृष्णः प्रमुमोच जगद्गुरुः।
अस्त्रेण तन्महाबाहुर्वारयामास चेदिराट् ॥ २-७०-१३ (१४०५२)
ततः शतसहस्रेण शराणां नतपर्वणाम्।
सर्वतः समवाकीर्य शौरिं दामोदरं तदा ॥ २-७०-१४ (१४०५३)
ननाद बलवान्क्रुद्धः शिशुपालः प्रतापवान्।
इदं चोवाच संरब्धः केशवं परवीरहा ॥ २-७०-१५ (१४०५४)
शिशुपाल उवाच ॥ २-७०-१६क्ष् (१५०४)
अद्याङ्गं मामका बाणा भेत्स्यन्ति तव संयुगे।
हत्वा त्वां समुतामात्यं पाण्डवांश्च तरस्विनः ॥ २-७०-१६ (१४०५५)
अनृण्यमद्यय यास्यामि जरासन्धस्य धीमतः।
कंसस्य केशिनश्चैव नरकस्य तथैव ह ॥ २-७०-१७ (१४०५६)
वैशम्पायन उवाच ॥ २-७०-१८क्ष् (१५०५)
इत्युक्त्वा क्रोधताम्राक्षः शिशुपालो जनार्दनम्।
अदृश्यं शरवर्षेण सर्वतः स चकार ह ॥ २-७०-१८ (१४०५७)
ततोऽस्त्रेणैव चान्योन्यं निकृत्य च शरान्बहून्।
शरवर्षैस्तदा चैद्यमन्तर्धातुं प्रचक्रमे ॥ २-७०-१९ (१४०५८)
अन्तर्धानगतौ वीरौ शुशुभाते महारथौ।
तौ दृष्ट्वा सर्वभूतानि साधुसाध्वित्यपूजयन् ॥ २-७०-२० (१४०५९)
न दृष्टपूर्वमस्माभिर्युद्धमीदृशकं पुरा।
ततः कृष्णं जघानाशु शुशुपालस्त्रिभिः शरैः ॥ २-७०-२१ (१४०६०)
कृष्णोऽपि बाणैर्विव्याध सुनीथं पञ्चभिर्युधि।
ततः सुनीथं सप्तत्या नाराचैर्दयद्बली। २-७०-२२ (१४०६१)
ततोऽतिविद्धः कृष्णेन सुनीथः क्रोधमूर्च्छितः।
विव्याध निशितैर्बाणैर्वासुदेवं स्तनान्तरे ॥ २-७०-२३ (१४०६२)
पुनः कृष्णं त्रिभिर्विद्ध्वा ननादावसरे नृपः।
ततोऽतिदारुणं युद्धं सहसा चक्रतुस्तदा ॥ २-७०-२४ (१४०६३)
नौ नखैरिव शार्दूलौ दन्तैरिव महागजौ।
दंष्ट्राभिरिव पञ्चास्यौ चरणैरिव कुक्कुटौ ॥ २-७०-२५ (१४०६४)
दारयेतां शरैस्तीक्ष्णैरन्योन्यं युधि तावुभौ।
ततो मुमुचतुः क्रुद्धौ शरवर्षमनुत्तमम् ॥ २-७०-२६ (१४०६५)
शरैरेव शराञ्छित्वा तावुभौ पुरुषर्षभौ।
चक्रातेऽस्त्रमयं युद्धं घोरं तदतिमानुषम् ॥ २-७०-२७ (१४०६६)
आग्नेयमस्त्रं मुमुचे शिशुपालः प्रतापवान्।
वारुणास्त्रेण तच्छीघ्रं नाशयामास केशवः ॥ २-७०-२८ (१४०६७)
कौबेरमस्त्रं सहसा चेदिराट् प्रमुमोच ह। २-७०-२९ कौबेरणैव सहसाऽनाशयत्तं जगत्प्रभुः ॥ २-७०-२९ (१४०६८)

याम्यमस्त्रं ततः क्रुद्धो मुमुचे कालमोहितः।
याम्येनैवास्त्रयोगेन याम्यमस्त्रं व्यनाशयत् ॥ २-७०-३० (१४०६९)
गान्धर्वेण च गान्धर्वं मानवं मानवेन च।
वायव्येन च वायव्यं रौद्रं रौद्रेण चाभिभूः ॥ २-७०-३१ (१४०७०)
ऐन्द्रमैन्द्रेण भगवान्वैष्णवेन च वैष्णवम्।
एवमस्त्राणि कुर्वाणौ युयुधाते महाबलौ ॥ २-७०-३२ (१४०७१)
ततो मायां विकुर्वाणो दमगोषसुतो बली।
गदामुसलसंयुक्ताञ्छक्तितोमरसायकान् ॥ २-७०-३३ (१४०७२)
परश्वथमुसण्डीश्च ववर्ष युधि केशवम्।
अमोघास्त्रेण भगवान्नाशयामास केशिहा ॥ २-७०-३४ (१४०७३)
शिलावर्षं महाघोरं ववर्ष युधि चेदिराट्।
वज्रास्त्रेणाभिसङ्क्रुद्धश्चूर्णं तदकरोत्प्रभुः ॥ २-७०-३५ (१४०७४)
जलवर्षं ततो घोरं व्यसजच्चेदिपुङ्गवः।
वायव्यास्त्रेण भगवान्व्याक्षिपच्छतशो हि तत् ॥ २-७०-३६ (१४०७५)
निहत्य सर्वमायां वै सुनीतस्य जनार्दनः।
स मुहूर्तं चकाराशु द्वन्द्वयुद्धं महारथः ॥ २-७०-३७ (१४०७६)
स बाणयुद्धं कुर्वाणो भर्त्सयामास चेदिराट्।
दमघोषसुतो धृष्टमुवाच यदुपुङ्गवम् ॥ २-७०-३८ (१४०७७)
अद्य कृष्णमकृष्णं तु कुर्वन्तु मम सायकाः।
इत्येवमुक्त्वा दुष्टात्मा शरवर्षं जनार्दने ॥ २-७०-३९ (१४०७८)
मुमोच पुरुषव्याघ्रो घोरं वै चेदिपुङ्गवः।
शरसंङ्कृत्तगात्रस्तु क्षणेन यदुनन्दनः ॥ २-७०-४० (१४०७९)
रुधिरं परिसुस्राव मदं मत्त इव द्विपः।
न यन्ता न रथो वापि न चाश्वाः पर्वतोपमाः ॥ २-७०-४१ (१४०८०)
दृश्यन्ते शरसञ्छन्नाः केशवस्य महात्मनः।
केशवं तदवस्थं तु दृष्ट्वा भूतानि चक्रुशुः ॥ २-७०-४२ (१४०८१)
दारुकस्तु तदा प्राह कृष्णं यादवनन्दनम्।
नेदृशो दृष्टपूर्वो हि सङ्ग्रामो वै पुरा मया ॥ २-७०-४३ (१४०८२)
स्थातव्यमिति तिष्ठामि त्वत्प्रभावेण माधव।
अन्यथा न च मे प्राणा धरायेयुर्जनार्दन ॥ २-७०-४४ (१४०८३)
अतः सञ्चिन्त्य गोविन्द क्षिप्रमस्य वधं कुरु।
एवमुक्तस्तु सूतेन केशवो वाक्यमब्रवीत् ॥ २-७०-४५ (१४०८४)
एष ह्यतिबलो दैत्यो हिरण्यकशिपुः पुरा।
रिपुः सुराणामभवद्वरदानेन गर्वितः ॥ २-७०-४६ (१४०८५)
तथाऽऽसीद्रावणो नाम राक्षसो ह्यतिवीर्यवान्।
तेनैव बलवीर्येण बलं नागणयन्मम ॥ २-७०-४७ (१४०८६)

अहं मृत्युश्च भविता काले काले दुरात्मनः।
न भेतव्यं तथा सूत नैष कश्चिन्मयि स्थिते ॥ २-७०-४८ (१४०८७)
इत्येवमुक्त्वा भगवान्ननर्द गरुडध्वजः।
पाञ्चजन्यं महाशङ्खं पूरयामास केशवः ॥ २-७०-४९ (१४०८८)
संमोहयित्वा भगवांश्चक्रं दिव्यं समाददे।
चिच्छेद च सुनीथस्य शिरश्चक्रेण संयुगे'॥ २-७०-५० (१४०८९)
स पपात महाबाहुर्वज्राहत इवाचलः।
ततश्चेदिपतेर्देहात्तेजोऽग्र्यं ददृशुर्नृपाः ॥ २-७०-५१ (१४०९०)
उत्पतन्तं महाराज गगनादिव भास्करम्।
ततः कमलपत्राक्षं कृष्णं लोकनमस्कृतम्।
ववन्दे तत्तदा तेजो विवेश च नराधिप ॥ २-७०-५२ (१४०९१)
तदद्भुतममन्यन्त दृष्ट्वा सर्वे महीक्षितः।
यद्विवेश महाबाहुं तत्तेजः पुरुषोत्तमम् ॥ २-७०-५३ (१४०९२)
अनभ्रे प्रववर्ष द्यौः पपात ज्वलिताशनिः।
कृष्णेन निहते चैद्ये चचाल न वसुन्धरा ॥ २-७०-५४ (१४०९३)
ततः केचिन्महीपाला नाब्रुवंस्तत्र किञ्चन।
अतीतवाक्पथे काले प्रेक्षमाणा जनार्दनम् ॥ २-७०-५५ (१४०९४)
हस्तैर्हस्ताग्रमपरे प्रत्यपिंषन्नमर्षिताः।
अपरे दशनैरोष्ठानदशन्क्रोधमूर्च्छिताः ॥ २-७०-५६ (१४०९५)
रहश्च केचिद्वार्ष्णेयं प्रशशंसुर्नराधिपाः।
केचिदेव सुसंरब्धा मध्यस्थास्त्वपरेऽभवन् ॥ २-७०-५७ (१४०९६)
प्रहृष्टाः केशवं जग्मुः संस्तुवन्तो महर्षयः।
ब्राह्मणाश्च महात्मानः पार्थिवाश्च महाबलाः।
शशंसुर्निर्वृताः सर्वे दृष्ट्वा कृष्णस्य विक्रमम् ॥ २-७०-५८ (१४०९७)
ग्सदेवगन्धर्वगणा राजानो भुवि विश्रुताः।
प्रणामं हि हृषीकेशे प्राकुर्वत महात्मनि ॥ २-७०-५९ (१४०९८)
ये त्वासुरगणाः पक्षाः सम्भूताः क्षत्रिया इह।
ते निन्दन्ति हृषीकेशं दुरात्मानो गतायुषः ॥ २-७०-६० (१४०९९)
प्रजापतिगणा ये तु मध्यस्थाश्च महात्मनि।
ब्रह्मर्षयश्च सिद्धाश्च गन्धर्वोरगचारणाः ॥ २-७०-६१ (१४१००)
ते वै स्तुवन्ति गोविन्दं दिव्यैर्मङ्गलसंयुतैः।
परस्परं च नृत्यन्ति गीतेन विविधेन च।
उपतिष्ठन्ति गोविन्दं प्रीतियुक्ता महात्मनि ॥ २-७०-६२ (१४१०१)
प्रहृष्टाः केशवं जग्मुः संस्तुवन्तो महर्षयः।
ब्राह्मणाश्चापि सुप्रीताः पाण्डवाश्च महाबलाः ॥ २-७०-६३ (१४१०२)
पाण्डवस्त्वब्रवीद्भ्रातॄन्सत्कारेण महीपतिम्।

दमघोषात्मजं शूरं संस्कारयत मा चिरम् ॥ २-७०-६४ (१४१०३)
कुरुराजवचः श्रुत्वा भ्रातरस्ते त्वरान्विताः।
तथा च कृतवन्तस्ते भ्रातुर्वै शासनं तदा ॥ २-७०-६५ (१४१०४)
चेदीनामाधिपत्ये च पुत्रं तस्याज्ञया हरेः।
अभ्यषिञ्चत तं पार्थः सहितैर्वसुधाधिपैः ॥ ॥ २-७०-६६ (१४१०५)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि सप्ततितमोऽध्यायः ॥ ७०.।

सभापर्व - अध्याय ०७१
॥ श्रीः ॥
२.७१. अध्यायः ७१

Mahabharata - Sabha Parva - Chapter Topics
विस्तरेण राजसूयवर्णनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततः प्रववृते यज्ञो धर्मराजस्य धीमतः।
शान्तविघ्नार्हणक्षोभो महर्षिगणसङ्कुलः ॥ २-७१-१ (१४१०६)
तं तु यज्ञं महाबाहुरासमाप्तेर्जनार्दनः।
ररक्ष भगवाञ्छौरिः शार्ङ्गचक्रगदाधरः ॥ २-७१-२ (१४१०७)
तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः।
हेतुवादान्बहून्प्राहुः परपक्षजिगीषवः ॥ २-७१-३ (१४१०८)
ददृशुस्ते नृपतयो यज्ञस्य विधिमुत्तमम्।
उपेन्द्रस्येव विहितं सहदेवेन भारत ॥ २-७१-४ (१४१०९)
तद्यज्ञे न्यवसन्राजन्ब्राह्मणा भृशमुत्सुकाः।
कथयन्तः कथाः पुण्याः पश्यन्तो नटनर्तकान् ॥ २-७१-५ (१४११०)
ददृशुस्तोरणान्यत्र हेमतालमयानि च।
दीप्तभास्करतुल्यानि प्रदीप्तानीव तेजसा ॥ २-७१-६ (१४१११)
स यज्ञस्तोरणैस्तत्र ग्रहैर्द्यौरिव सम्बभौ।
शय्यासनविहारांश्च सुबहून्रत्नसंवृतान् ॥ २-७१-७ (१४११२)
घटान्पात्रीकटाहानि कलशानि समन्ततः।

न ते किञ्चिदसौवर्णमपश्यंस्तत्र पार्थिवाः ॥ २-७१-८ (१४११३)
भुञ्जानानां च विप्राणां स्वादुभोज्यैः पृथग्विधैः।
अनिशं श्रूयते तत्र मुदितानां महात्मनाम् ॥ २-७१-९ (१४११४)
दीयतां दीयतामेषां भुज्यतां भुज्यतामिति।
एवम्प्रकाराः सञ्जल्पाः श्रूयन्ते तत्र नित्यशः ॥ २-७१-१० (१४११५)
ओदनानां विकाराणि स्वादूनि च बहूनि च।
विविधआनि च भक्ष्याणि पेयानि मधुराणि च ॥ २-७१-११ (१४११६)
ददुर्द्विजानां सततं राजप्रेष्या महाध्वरे।
पूर्णे शतसहस्रे तु विप्राणां भुञ्जतां तदा ॥ २-७१-१२ (१४११७)
स्थापितस्तत्र सञ्ज्ञार्थं शङ्खोऽध्मायत नित्यशः।
मुहुर्मुहुः प्रणादस्तु तस्य शङ्खस्य भारत ॥ २-७१-१३ (१४११८)
उत्तमः श्रूयते शब्दः श्रुत्वा विस्मयमागमन्।
एवं प्रवृत्ते यज्ञे तु तुष्टपुष्टजनायुते ॥ २-७१-१४ (१४११९)
अन्नस्य बहुशो राजन्नुत्सेधाः पर्वतोपमाः।
दधिकुल्याश्च ददृशुः सर्पिषश्च ह्रदाञ्जनाः ॥ २-७१-१५ (१४१२०)
जम्बूद्वीपो हि सकलो नानाजनपदायुतः।
राजन्नदृश्यतैकस्थो राज्ञस्तस्मिन्महाक्रतौ ॥ २-७१-१६ (१४१२१)
तत्र राजसहस्राणि पुरुषाणां ततस्ततः।
गृहीत्वा धनमाजग्मुस्तस्य राज्ञो महाक्रतौ ॥ २-७१-१७ (१४१२२)
राजानः स्रग्विणश्चैव संमृष्टमणिकुण्डलाः।
तान्परीविविषुर्विप्राञ्छतशोऽथ सहस्रशः ॥ २-७१-१८ (१४१२३)
विविधान्यन्नपानानि लेह्यानि विविधानि च।
तेषां नृपोपभोग्यानि ब्राह्मणेभ्यो ददुः स्म ते ॥ २-७१-१९ (१४१२४)
नानाविधानि भक्ष्याणि स्वादुपुष्पफलानि च।
गुलानि स्वादुक्षौद्राणि ददुस्ते ब्राह्मणेषु वै ॥ २-७१-२० (१४१२५)
एतानि सततं भुक्त्वा तस्मिन्यज्ञे द्विजातयः।
परां प्रीतिं ययुः सर्वे मोदमानास्ततस्ततः ॥ २-७१-२१ (१४१२६)
एवं प्रमुदितं सर्वं बहुशो धनधान्यवत्।
यज्ञवाटं नृपा दृष्ट्वा विस्मयं परमं ययुः ॥ २-७१-२२ (१४१२७)
यथावद्धूयमानाग्निं राजसूयं महाक्रतुम्।
पाण्डवस्य यथाशास्त्रं जुहुवुः सर्वयाजकाः ॥ २-७१-२३ (१४१२८)
व्यासधौम्यादयः सर्वे विधिवत्षोडशर्त्विजः।
स्वस्वकर्माणि चक्रुस्ते पाण्डवस्य महाक्रतौ ॥ २-७१-२४ (१४१२९)
नाषडङ्गविदत्रासीत्सदस्यो नाबहुश्रुतः।
नाव्रतो नानुपाध्यायो न पापो नाक्षमो द्विजः ॥ २-७१-२५ (१४१३०)
न तत्र कृपणः कश्चिद्दरिद्रो न बभूव ह।

क्षुधितो दुःखितो वापि प्राकृतो वापि मानुषः ॥ २-७१-२६ (१४१३१)
भोजनं भोजनार्थिभ्यो दापयामास सर्वदा।
सहदेवो महातेजाः सततं राजशासनात् ॥ २-७१-२७ (१४१३२)
संस्तरे कुशलाश्चापि सर्वकर्माणि याजकाः।
दिवस दिवसे चक्रुर्यथाशास्त्रार्थचक्षुषः ॥ २-७१-२८ (१४१३३)
ब्राह्मणा देवशास्त्रज्ञः कथाश्चक्रुश्च सर्वतः।
रेमिरे च कथान्ते तु सर्वे तस्मिन्महाक्रतौ ॥ २-७१-२९ (१४१३४)
सा वेदिर्वेदसम्पन्नैर्देवद्विजमहर्षिभिः।
आबभासे तदा कीर्णा नक्षत्रैर्द्यौरिवामला ॥ २-७१-३० (१४१३५)
पाण्डित्यदर्शनार्थाय केचन द्विजसत्तमाः।
तर्कार्थमागताः केचित्केचिद्विद्याभिमानिनः ॥ २-७१-३१ (१४१३६)
केचिद्दिदृक्षया केचिद्भीत्या राज्ञः प्रतापिनः।
सर्वेऽप्यवभृथस्नाता याजकाः केचन द्विजाः ॥ २-७१-३२ (१४१३७)
ततो वै हेमयूपांश्च सर्वरत्नसमाचितान्।
शोभार्थं कारयामास सहदेवो महाद्युतिः ॥ २-७१-३३ (१४१३८)
ददृशुस्तोरणान्यत्र हेमतालमयानि च।
स यज्ञस्तोरणैस्तैश्च ग्रहैर्द्यौरिव सम्बभौ ॥ २-७१-३४ (१४१३९)
तालानां तोरणैर्हैमैर्दान्तैरिव दिशागजैः।
दिक्षु सर्वासु विन्यस्तैस्तेजोभिर्भास्करैर्यथा ॥ २-७१-३५ (१४१४०)
सकिरीटैर्नृपैश्चैव शुशुभे तत्सदस्तदा।
देवैर्दिव्यैश्च यक्षैश्च उरगैर्दिव्यमानुषैः ॥ २-७१-३६ (१४१४१)
विद्याधरगणैः कीर्णः पाण्डवस्य महात्मनः।
स राजसूयः शुशुभे धर्मराजस्य धीमतः ॥ २-७१-३७ (१४१४२)
गन्धर्वगणसङ्कीर्णः शोभितोऽप्सरसां गणैः।
देवैर्मुनिगणैर्यक्षैर्देवलोक इवापरः ॥ २-७१-३८ (१४१४३)
स किम्पुरुषगीतैश्च किन्नरैरुपशोभितः।
नारदश्च जगौ तत्र तुम्बुरुश्च महाद्युतिः ॥ २-७१-३९ (१४१४४)
विश्वासुश्चित्रसेनस्तथाऽन्ये गीतकोविदाः।
रमयन्ति स्म तान्सर्वान्यज्ञकर्मान्तरेष्वथ ॥ २-७१-४० (१४१४५)
तत्र चाप्सरसः सर्वाः सुन्दर्यः प्रियदर्शनाः।
ननृतुश्च जगुश्चात्र नित्यं कर्मान्तरेष्वथ ॥ २-७१-४१ (१४१४६)
इतिहासपुराणानि आख्यानानि च सर्वशः।
ऊचुर्वै शब्दशास्त्रज्ञा नित्यं कर्मान्तरेष्वथ ॥ २-७१-४२ (१४१४७)
भेर्यश्च मुरजाश्चैव मड्डुका गोमुखाश्च ये।
शृङ्गवंशाम्बुजा वीणाः श्रूयन्ते स्म सहस्रशः ॥ २-७१-४३ (१४१४८)
लोकेऽस्मिन्सर्वविप्राश्च वैश्याः शूद्रा नृपादयः।

सर्वे म्लेच्छाः सर्वगणास्त्वादिमध्यान्तजास्तथा। २-७१-४४ (१४१४९)
नानादेशसमुद्भूतैर्नानाजातिभिरागतैः।
पर्याप्त इव लोकोऽयं युधिष्ठिरनिवेशने ॥ २-७१-४५ (१४१५०)
भीष्मद्रोणादयः सर्वे कुरवः ससुयोधनाः।
वृष्णयश्च समग्राश्च पाञ्चालाश्चापि सर्वशः ॥ २-७१-४६ (१४१५१)
यज्ञेऽस्मिन्सर्वकर्माणि चक्रुर्दासा इव क्रतौ।
एवं प्रवृत्तो यज्ञः स धर्मराजस्य धीमतः ॥ २-७१-४७ (१४१५२)
शुशुभे च महाबाहो सोमस्येव क्रतुर्यथा।
वस्त्राणि कम्बलांश्चैव प्रावारांश्चैव सर्वदा ॥ २-७१-४८ (१४१५३)
निष्कहेमजभाण्डानि भूषणानि च सर्वशः।
प्रददौ तत्र विप्राणां धर्मराजो युधिष्ठिरः ॥ २-७१-४९ (१४१५४)
यानि तत्र महीपालैर्लब्धवान्भरतर्षभः।
तानि सर्वाणि रत्नानि ब्राह्मणानां ददौ तदा'॥ ॥ २-७१-५० (१४१५५)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि एकसप्ततितमोऽध्यायः ॥७१ ॥

सभापर्व - अध्याय ०७२
॥ श्रीः ॥
२.७२. अध्यायः ७२

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिरेण व्यासादीनां पूजनम् ॥१.।राज्ञां युधिष्ठिरमामन्त्र्य स्वस्वदेशगमनम् ॥२.।श्रीकृष्णस्य युधिष्ठिरादीनाम्

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततः स कुरुराजस्य सर्वकर्मसमृद्धिमान्।
यज्ञः प्रीतिकरो राजन्संबभौ विपुलोत्सवः ॥ २-७२-१ (१४१५६)
शान्तविघ्नः सुखारम्भः प्रभूतधनधान्यवान्।
अन्नवान्बहुभक्ष्यश्च केशवेन सुरक्षितः ॥ २-७२-२ (१४१५७)
समापयामास च तं राजसूयं महाक्रतुम्।
ग्कोटिसहस्रं प्रददौ ब्राह्मणानां महात्मनाम् ॥ २-७२-३ (१४१५८)
न करिष्यति तं लोके कश्चिदन्यो महीपतिः।

याजकाः सर्वकामैश्च सततं ततृपुर्धनैः ॥ २-७२-४ (१४१५९)
ततश्चावभृथस्नातः स राजा पाण्डुनन्दनः।
व्यासं धौम्यं वसिष्ठं च नारदं च महामुनिम् ॥ २-७२-५ (१४१६०)
सुमन्तु जैमिनिं पैलं वैशम्पायनमेव च।
याज्ञवल्क्यं च कपिलं कपालं कौशिकं तथा।
सर्वांश्च ऋत्विक्प्रवरान्पूजयामास सत्कृतान् ॥ २-७२-६ (१४१६१)
युधिष्ठिर उवाच ॥ २-७२-७क्ष् (१५०६)
युष्मत्प्रसादात्प्राप्तोऽयं राजसूयो महाक्रतुः।
जनार्दनप्रसादाद्धि सम्पूर्णो मे मनोरथः ॥ २-७२-७ (१४१६२)
वैशम्पायन उवाच ॥ २-७२-८क्ष् (१५०७)
अथ यज्ञं समाप्यान्ते पूजयामास माधवम्।
बलदेव च देवेशं भीष्माद्यांश्च कुरूद्वहान्'॥ २-७२-८ (१४१६३)
ततस्त्ववभृथस्नातं धर्मात्मानं युधिष्ठिरम्।
समस्तं पार्थिवं क्षत्रमुपगम्येदमब्रवीत् ॥ २-७२-९ (१४१६४)
दिष्ट्या वर्धसि धर्मज्ञ साम्राज्यं प्राप्तवानसि।
आजमीढाजमीढानां यशः संवर्धितं त्वया ॥ २-७२-१० (१४१६५)
कर्मणैतेन राजेन्द्र धर्मश्च सुमहान्कृतः।
आपृच्छामो नरव्याघ्र सर्वकामैः सूपूजिताः ॥ २-७२-११ (१४१६६)
स्वराष्ट्राणि गमिष्यामस्तदनुज्ञातुमर्हसि।
श्रुत्वा तु वचनं राज्ञां धर्मराजो युधिष्ठिरः ॥ २-७२-१२ (१४१६७)
यथार्हं पूज्य नृपतीन्भ्रातॄन्सर्वानुवाच ह।
राजानः सर्व एवैते प्रीत्याऽस्मान्प्तमुपागताः ॥ २-७२-१३ (१४१६८)
प्रस्थिताः स्वानि राष्ट्राणि मामापृच्छ्य परन्तपाः।
अनुव्रजत भद्रं वो विषयान्तं नृपोत्तमान् ॥ २-७२-१४ (१४१६९)
भ्रातुर्वचनमाज्ञाय पाण्डवा धर्मचारिणः।
यथार्हं नृपतीन्सर्वानेकैकं समनुव्रजन् ॥ २-७२-१५ (१४१७०)
विरायटमन्वायात्तूर्णं धृष्टद्युम्नः प्रतापवान्।
धनञ्जयो यज्ञसेनं महात्मानं महारथम् ॥ २-७२-१६ (१४१७१)
भीष्मं च धृतराष्ट्रं च भीमसेनो महाबलः।
द्रोणं तु ससुतं वीरं सहदेवो युधां पतिः ॥ २-७२-१७ (१४१७२)
नकुलः सुबलं राजन्सहपुत्रं समन्वयात्।
द्रौपदेयाः ससौभद्राः पार्वतीयान्महारथान् ॥ २-७२-१८ (१४१७३)
अन्वगच्छंस्तथैवान्यान्क्षत्रियान्क्षत्रियर्षभाः।
एवं सुपूजिताः सर्वे जग्मुर्विप्राः सहस्रशः ॥ २-७२-१९ (१४१७४)
गतेषु पार्थिवेन्द्रेषु सर्वेषु ब्राह्मणेषु च।
युधिष्ठिरमुवाचेदं वासुदेवः प्रतापवान् ॥ २-७२-२० (१४१७५)

आपृच्छे त्वां गमिष्यामि द्वारकां कुरुनन्दन।
राजसूयं क्रतुश्रेष्ठं दिष्ट्या त्वं प्राप्तवानसि ॥ २-७२-२१ (१४१७६)
तमुवाचैवमुक्तस्तु धर्मराजो जनार्दनम्।
तव प्रसादाद्गोविन्द प्राप्तः क्रतुवरो मया ॥ २-७२-२२ (१४१७७)
क्षत्रं समग्रमपि च त्वत्प्रसादाद्वशे स्थितम्।
उपादाय बलिं मुख्यं मामेव समुपस्थितम् ॥ २-७२-२३ (१४१७८)
कथं त्वद्गमनार्थं मे वाणी वितरतेऽनघ ॥ २-७२-२४ (१४१७९)
न ह्यहं त्वामृते वीरं रतिं प्राप्नोमि कर्हचित्।
अवश्यं चैव गन्तव्या भवता द्वारका पुरी ॥ २-७२-२५ (१४१८०)
वैशम्पायन उवाच ॥ २-७२-२६क्ष् (१५०८)
एवमुक्तः स धर्मात्मा युधिष्ठिरसहायवान्।
अभिगम्याब्रवीत्प्रीतः पृथां पृथुयशा हरिः ॥ २-७२-२६ (१४१८१)
साम्राज्यं समनुप्राप्ताः पुत्रास्तेऽद्य पितृष्वसः।
सिद्धार्था वसुमन्तश्च सा त्वं प्रीतिमवाप्नुहि ॥ २-७२-२७ (१४१८२)
अनुज्ञातस्त्वया चाहं द्वारकां गन्तुमुत्सहे।
सुभद्रां द्रौपदीं चैव सभाजयत केशवः ॥ २-७२-२८ (१४१८३)
निष्क्रम्यान्तः पुरात्तस्माद्युधिष्ठिरसहायवान्।
स्नातश्च कृतजप्यश्च ब्राह्मणान्स्वस्ति वाच्य च ॥ २-७२-२९ (१४१८४)
ततो मेघवपुः प्रग्व्यं स्यन्दनं च सुकल्पितम्।
योजयित्वा महाबाहुर्दारुकः समुपस्थितः ॥ २-७२-३० (१४१८५)
उपस्थितं रथं दृष्ट्वा तार्क्ष्यप्रवरकेतनम्।
प्रदक्षिणमुपावृत्य समारुह्य महामनाः ॥ २-७२-३१ (१४१८६)
प्रययौ पुण्डरीकाक्षस्ततो द्वारवतीं पुरीम् ॥ २-७२-३२ (१४१८७)
तं पद्भ्यामनुवव्राज धर्मराजो युधिष्ठिरः।
भ्रातृभिः सहितः श्रीमान्वासुदेवं महाबलम् ॥ २-७२-३३ (१४१८८)
ततो मुहूर्तं सङ्गृह्य स्यन्दनप्रवरं हरिः।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ २-७२-३४ (१४१८९)
अप्रमत्तः स्थितो नित्यं प्रजाः पाहि विशाम्पते।
पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः ॥ २-७२-३५ (१४१९०)
बान्धवास्त्वोपजीवन्तु सहस्राक्षमिवामराः।
कृत्वा परस्परेणैव संवादं कृष्णपाण्डवौ ॥ २-७२-३६ (१४१९१)
अन्योन्यं समनुज्ञाप्य जग्मतुः स्वगृहान्प्रति।
गते द्वारवतीं कृष्णे सात्वतप्रवरे नृप ॥ २-७२-३७ (१४१९२)
महादुर्योधनो राजा शकुनिश्चापि सौबलः।
ग्सूतपुत्रश्च गधेयः सह दुःशासनादिभिः ॥ २-७२-३८ (१४१९३)
सर्वकामगुणोपेतैरर्च्यमानास्तु भारत'।

तस्यां सभायां दिव्यायामवसंस्तत्र पाण्डवैः ॥ ॥ २-७२-३९ (१४१९४)

इति श्रीमन्महाभारते सभापर्वणि शिशुपालवधपर्वणि द्विसप्ततितमोऽध्यायः ॥७२ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-७२-२८ सभाजयत प्रीणितवान् ॥

सभापर्व - अध्याय ०७३
॥ श्रीः ॥
२.७३. अध्यायः ७३

Mahabharata - Sabha Parva - Chapter Topics
व्यासम्प्रति युधिष्ठिरेण उत्पातफलप्रश्ने व्यासेन तत्कथनपूर्वकं कैलासगमनम ॥१.।व्यासोक्तं भ्रातृषु निवेद्य शोच

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ग्अनुसंसार्य नृपतीन्पाण्डवाः पाण्डवाग्रजम्।
अभिजग्मुर्महेष्वासा धर्मराजं युधिष्ठिरम् ॥ २-७३-१ (१४१९५)
सोऽनुमेने महाबाहुर्भ्रातॄंश्च सुहृदस्तथा'।
शिष्यैः परिवृतो व्यासः पुरस्तात्समपद्यत ॥ २-७३-२ (१४१९६)
सोऽभ्ययादासनात्तूर्णं भ्रातृभिः परिवारितः।
पाद्येनासनदानेन पितामहमपूजयत् ॥ २-७३-३ (१४१९७)
अथोपविश्य भगवान्काञ्चने परमासने।
आस्यतामिति चोवाच धर्मराजं युधिष्ठिरम् ॥ २-७३-४ (१४१९८)
अथोपविष्टं राजानं भ्रातृभिः परिवारितम्।
उवाच भगवान्व्यासस्तत्तद्वाक्यविशारदः ॥ २-७३-५ (१४१९९)
दिष्ट्या वर्धसि कौन्तेय साम्राज्यं प्राप्य दुर्लभम्।
वर्धिताः कुरवः सर्वे त्वया कुरुकुलोद्वह ॥ २-७३-६ (१४२००)
आपृच्छे त्वां गमिष्यामि पूजितोऽस्मि विशाम्पते।
एवमुक्तः स कृष्णेन धर्मराजो युधिष्ठिरः ॥ २-७३-७ (१४२०१)
अभिवाद्योपसङ्गृह्य पितामहमथाब्रवीत् ॥ २-७३-८ (१४२०२)
युधिष्ठिर उवाच। २-७३-८क्ष् (१५०९)

संशयो द्विपदां श्रेष्ठ ममोत्पन्नः सुदुर्लभः।
तस्य नान्योऽस्ति वक्ता वै त्वामृते द्विजपुङ्गव ॥ २-७३-९ (१४२०३)
उत्पातांस्त्रिविधान्प्राह नारदो भगवानृषिः।
दिव्यांश्चैवान्तरिक्षांश्च पार्थिवांश्च पितामह ॥ २-७३-१० (१४२०४)
ग्सुमहच्च फलं तेषां भवितेति न संशयः'।
अपि चैद्यस्य पतनाच्छान्तमौत्पातिकं महत् ॥ २-७३-११ (१४२०५)
वैशम्पायन उवाच ॥ २-७३-१२क्ष् (१५१०)
राज्ञस्तु वचनं श्रुत्वा पराशरसुतः प्रभुः।
कृष्णद्वैपायनो व्यास इदं वचनमब्रवीत् ॥ २-७३-१२ (१४२०६)
त्रयोदश समा राजन्नुत्पातानां फलं महत्।
सर्वक्षत्रविनाशाय भविष्यति विशाम्पते ॥ २-७३-१३ (१४२०७)
त्वामेकं कारणं कृत्वा कालेन भरतर्षभ।
समेतं पार्थिवं क्षत्रं क्षयं यास्यति भारत।
दुर्योधनापराधेन भीमार्जुनबलेन च ॥ २-७३-१४ (१४२०८)
स्वप्नं द्रक्ष्यसि राजेन्द्र तस्मिन्काल उपस्थिते।
तत्तेऽहं सम्प्रवक्ष्यामि तन्निबोध युधिष्ठिर ॥ २-७३-१५ (१४२०९)
यान्तं द्रक्ष्यसि राजेन्द्र क्षपान्ते त्वं वृषध्वजम्।
नीलकण्ठं भवं स्थाणुं कपालिं त्रिपुरान्तकम् ॥ २-७३-१६ (१४२१०)
उग्रं रुद्रं पशुपतिं महादेवमुमापतिम्।
हरं शर्वं वृषं शूलं पिनाकिं कृत्तिवाससम् ॥ २-७३-१७ (१४२११)
कैलासकूडप्रतिमे वृषभेऽवस्थितं शिवम्।
निरीक्षमाणं सततं पितृराजाश्रितां दिशम् ॥ २-७३-१८ (१४२१२)
एवमीदृशकं स्वप्नं द्रक्ष्यसि त्वं विशाम्पते।
मा तत्कृते ह्यनुध्याहि कालो हि दुरतिक्रमः ॥ २-७३-१९ (१४२१३)
स्वस्ति तेऽस्तु गमिष्यामि कैलासं पर्वतं प्रति।
अप्रमत्तः स्थितो दान्तः पृथिवीं परिपालय ॥ २-७३-२० (१४२१४)
वैशम्पायन उवाच ॥ २-७३-२१क्ष् (१५११)
एवमुक्त्वा स भगवान्कैलासं पर्वतं ययौ।
कृष्णद्वैपायनो व्यासः सह शिष्यैः सहानुगैः ॥ २-७३-२१ (१४२१५)
गते पितामहे राजा चिन्ताशोकसमन्वितः।
निः श्वसन्नुष्णमसकृत्तमेवार्थं विचिन्तयन् ॥ २-७३-२२ (१४२१६)
कथं तु दैवं शक्येत पौरुषेण प्रबाधितुम्।
अवश्यमेव भविता यदुक्तं परमर्षिणा ॥ २-७३-२३ (१४२१७)
ततोऽब्रवीन्महातेजाः सर्वान्भ्रातॄन्युधिष्ठिरः।
श्रुतं वै पुरुषव्याघ्रा यन्मां द्वैपायनोऽब्रवीत् ॥ २-७३-२४ (१४२१८)
तदा तद्वचनं श्रुत्वा मरणे निश्चिता मतिः।

सर्वक्षत्रस्य निधने यद्यहं हेतुरीप्सितः ॥ २-७३-२५ (१४२१९)
कालेन निर्मितस्तात को ममार्थोऽस्ति जीवतः।
एवं ब्रुवन्तं राजानं फाल्गुनः प्रत्यभाषत ॥ २-७३-२६ (१४२२०)
मा राजन्कश्मलं घोरं प्रविशो बुद्धिनाशनम्।
सम्प्रधार्य महाराज यत्क्षमं तत्समाचर ॥ २-७३-२७ (१४२२१)
वैशम्पायन उवाच ॥ २-७३-२८क्ष् (१५१२)
ततोऽब्रवीत्सत्यधृतिर्भ्रातॄन्सर्वान्युधिष्ठिरः।
द्वैपायनस्य वचनं तत्रैव समचिन्तयत् ॥ २-७३-२८ (१४२२२)
अद्यप्रभृति भद्रं वः प्रतिज्ञां मे निबोधत।
त्रयोदश समास्तात को ममार्थो ऽस्ति जीवतः ॥ २-७३-२९ (१४२२३)
न प्रवक्ष्यामि परुषं भ्रातॄनन्यांश्च पार्थिवान्।
स्थितो निदेशे ज्ञातीनां योक्ष्ये तत्सुमुदाहरन् ॥ २-७३-३० (१४२२४)
एवं मे वर्तमानस्य स्वसुतेऽष्वितरेषु च।
भेदो न भविता लोके भेदमूलो हि विग्रहः ॥ २-७३-३१ (१४२२५)
विग्रहं दूरतो रक्षन्प्रियाण्येव समाचरन्।
वाच्यतां न गमिष्यामि लोकेषु मनुजर्षभाः ॥ २-७३-३२ (१४२२६)
भ्रातृर्ज्येष्ठस्य वचनं पाण्डवाः संनिशम्य तत।
तमेव समवर्तन्त धर्मराजहिते रताः ॥ २-७३-३३ (१४२२७)
संसत्सु समयं कृत्वा धर्मराड्भ्रातृभिः सह।
पितॄंस्तर्प्य यथान्यायं देवताश्च विशाम्पते ॥ २-७३-३४ (१४२२८)
कृतमङ्गलकल्यामो भ्रातृभिः पिरवारितः।
गतेषु क्षत्रियेन्द्रेषु सर्वेषु भरतर्षभ ॥ २-७३-३५ (१४२२९)
युधिष्ठिरः सहामात्यः प्रविवेश पुरोत्तमम्।
दुर्योधनो महाराज शकुनिश्चापि सौबलः।
सभायां समणीयायां तत्रैवास्ते नराधिप ॥ ॥ २-७३-३६ (१४२३०)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

सभापर्व - अध्याय ०७४
॥ श्रीः ॥
२.७४. अध्यायः ७४

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिरसभायां दुर्योधने निर्जलदेशे जलभ्रमेण परिधानमुत्कर्षति सति तथा स जलदेशे स्थलभ्रान्त्या भवनधानग

वैशम्पायन उवाच ॥

वसन्दुर्योधनस्तस्यां सभायां पुरुषर्षभ।
शनैर्ददर्श तां सर्वां सभां शकुनिना सह ॥ २-७४-१ (१४२३१)
तस्यां दिव्यानभिप्रायान्ददर्श कुरुनन्दनः।
न दृष्टपूर्वा ये तेन नगरे नागसाह्वये ॥ २-७४-२ (१४२३२)
स कदाचित्सभामध्ये धार्तराष्ट्रो महीपतिः।
स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया ॥ २-७४-३ (१४२३३)
स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः।
दुर्मना विमुखश्चैव परिचक्राम तां सभाम् ॥ २-७४-४ (१४२३४)
ततः स्थले निपतितो दुर्मना व्रीडितो नृपः।
निः श्वसन्विमुखश्चापि परिचक्राम तां सभाम् ॥ २-७४-५ (१४२३५)
ततः स्फाटिकतोयां वै स्फाटिकाम्बुजशोभिताम्।
वापीं मत्वा स्थलमिव सवासाः प्रापतञ्जले ॥ २-७४-६ (१४२३६)
जले निपतितं दृष्ट्वा भीमसेनो महाबलः।
जहास जहसुश्चैव किङ्कराश्च सुयोधनम् ॥ २-७४-७ (१४२३७)
वासांसि च शुभान्यस्मै प्रददू राजशासनात्।
तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः ॥ २-७४-८ (१४२३८)
अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्तदा।
नामर्षयत्ततस्तेषामवहासममर्षणः ॥ २-७४-९ (१४२३९)
आकारं रक्षमाणस्तु न स तान्समुदैक्षत।
पुनर्वसनमुत्क्षिप्य प्रतिरिष्यन्निव स्थलम् ॥ २-७४-१० (१४२४०)
आरुरोह ततः सर्वे जहसुश्च पुनर्जनाः।
द्वारं तु पिहिताकारं स्फाटिकं प्रेक्ष्य भूमिपः।
प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इव स्थितः ॥ २-७४-११ (१४२४१)
तादृशं च परं द्वारं स्फाटिकोरुकवाटकम्।
विघट्टयन्कराभ्यां तु निष्क्रम्याग्रे पपात हा ॥ २-७४-१२ (१४२४२)
द्वारं तु वितताकारं समापेदे पुनश्च सः।
तद्वृत्तं चेति मन्वानो द्वारस्थानादुपारमत् ॥ २-७४-१३ (१४२४३)
एवं प्रलम्भान्विविधान्प्राप्य तत्र विशाम्पते।
पाण्डवेयाभ्यनुज्ञातस्ततो दुर्योधनो नृपः ॥ २-७४-१४ (१४२४४)
अपहृष्टेन मनसा राजसूये महाक्रतौ।
प्रेक्ष्य तामद्भुतामृद्धिं जगाम गजसाह्वयम् ॥ २-७४-१५ (१४२४५)

पाण्डवश्रीप्रतप्तस्य ध्यायमानस्य गच्छतः।
दुर्योधनस्य नृपतेः पापा मतिरजायत ॥ २-७४-१६ (१४२४६)
पार्थान्सुमनसो दृष्ट्वा पार्थिवांश्च वशानुगान्।
कृत्स्नं चापि हितं लोकमाकुमारं कुरूद्वह ॥ २-७४-१७ (१४२४७)
महिमानं परं चापि पाण्डवानां महात्मनाम्।
दूर्योधनो धार्तराष्ट्रो विवर्णः समपद्यत ॥ २-७४-१८ (१४२४८)
स तु गच्छन्ननेकाग्नः सभामेकोऽन्वचिन्तयत्।
श्रियं च तामनुपमां धर्मराजस्य धीमतः ॥ २-७४-१९ (१४२४९)
प्रमत्तो धृतराष्ट्रस्य पुत्रो दुर्योधनस्तदा।
नाभ्यभाषत्सुबलजं भाषमाणं पुनः पुनः ॥ २-७४-२० (१४२५०)
अनेकाग्रं तु तं दृष्ट्वा शकुनिः प्रत्यभाषत।
दुर्योधन कुतोमूलं निःश्वसन्निव गच्छसि ॥ २-७४-२१ (१४२५१)
दुर्योधन उवाच ॥ २-७४-२२क्ष् (१५१३)
दृष्ट्वेमां पृथिवीं कृत्स्नां युधिष्ठिरवशानुगाम्।
जितामस्त्रप्रतापेन श्वेताश्वस्य महात्मनः ॥ २-७४-२२ (१४२५२)
तं च यज्ञं तथाभूतं दृष्ट्वा पार्थस्य मातुल।
यथा शक्रस्य देवेषु तथाभूतं महाद्युतेः ॥ २-७४-२३ (१४२५३)
अमर्षेण तु सम्पूर्णो दह्यमानो दिवानिशम्।
शुचिशुक्रागमे काले शुष्ये तोयमिवाल्पकम् ॥ २-७४-२४ (१४२५४)
पश्य सात्वतमुख्येन शिशुपालो निपातितः।
न च तत्र पुमानासीत्कश्चित्तस्य पदानुगः ॥ २-७४-२५ (१४२५५)
दह्यमाना हि राजानः पाण्डवोत्थेन वह्निना।
क्षान्तवन्तोऽपराधं ते को हि तत्क्षन्तुमर्हति ॥ २-७४-२६ (१४२५६)
वासुदेवेन तत्कर्म यथाऽयुक्तं महत्कृतम्।
सिद्धं च पाण्डुपुत्राणां प्रतापेन महात्मनाम् ॥ २-७४-२७ (१४२५७)
तथाहि रत्नन्यादाय विविधानि नृपा नृपम्।
उपातिष्ठन्त कौन्येयं वैश्या इव करप्रदाः ॥ २-७४-२८ (१४२५८)
श्रियं तथागतं दृष्ट्वा ज्वलन्तीमिव पाण्डवे।
अमर्षवशमापन्नो दह्यामि न तथोचितः ॥ २-७४-२९ (१४२५९)
वह्निमेव प्रवेक्ष्यामि भक्षयिष्यामि वा विषम्।
अपो वापि प्रवेक्ष्यामिन हि शक्ष्यामि जीवितुम् ॥ २-७४-३० (१४२६०)
को हि नाम पुमांल्लोके मर्षयिष्यति सत्ववान्।
सपत्नानृद्ध्यतो दृष्ट्वा हीनमात्मानमेव च ॥ २-७४-३१ (१४२६१)
सोऽहं न स्त्री न चाप्यस्त्री न पुमान्नापुमानपि।
योऽहं तां मर्षयाम्यद्य तादृशीं श्रियमागताम् ॥ २-७४-३२ (१४२६२)
ईश्वरत्वं पृथिव्याश्च वसुमत्तां च तादृशीम्।

यज्ञं च तादृशं दृष्ट्वा मादृशः को न संज्ज्वरेत् ॥ २-७४-३३ (१४२६३)
अशक्तश्चैक एवाहं तामाहर्तुं नृपश्रियम्।
सहायांश्च न पश्यामि तेन मृत्युं विचिन्तये ॥ २-७४-३४ (१४२६४)
दैवमेव परं मन्ये पौरुषं च निरर्थकम्।
दृष्ट्वा कुन्तीसुते शुद्धां श्रियं तामहतां तथा ॥ २-७४-३५ (१४२६५)
कृतो यत्नो मया पूर्वं विनाशे तस्य सौबल।
तच्च सर्वमतिक्रम्य संवृद्धोऽप्स्विव पङ्कजम् ॥ २-७४-३६ (१४२६६)
तेन दैवं परं मन्ये पौरुषं च निरर्थकम्।
धार्तराष्ट्राश्च हीयन्ते पार्था वर्धन्ति नित्यशः। २-७४-३८च्ग्कृष्णस्तु सुमनास्तेषां विवर्धयति सम्पदः'॥ २-७४-३७ (१४२६७)
सोऽहं श्रियं च तां दृष्ट्वा सभां तां च तथाविधाम्।
रक्षिभिश्चावहासं तं परितप्ये यथाऽग्निना ॥ २-७४-३८ (१४२६८)
अमर्षं च समाविष्टं धृतराष्ट्रे निवेदय ॥ ॥ २-७४-३९ (१४२६९)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि चतुःसप्ततितमोऽध्यायः ॥ ७४.।

सभापर्व - अध्याय ०७५
॥ श्रीः ॥
२.७५. अध्यायः ७५

Mahabharata - Sabha Parva - Chapter Topics
शकुनिना दुर्योधनम्प्रति पाण्डवानां पौरुषेणाजय्यत्वकथनपूर्वकं द्यूतेन जेष यामीति समाश्वासनादिकम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

शकुनिरुवाच ॥

दुर्योधन न तेऽमर्षः कार्यः प्रति युधिष्ठिरम्।
भागधेयानि हि स्वानि पाण्डवा भुञ्जते सदा ॥ २-७५-१ (१४२७०)
विधानं विविधाकारं परं तेषां विधानतः।
अनेकैरभ्युपायैश्च त्वया न शकिताः पुरा ॥ २-७५-२ (१४२७१)
आरब्धा हि महाराज पुनः पुनररिन्दम।
विमुक्ताश्च नरव्याघ्रा भगधेयपुरस्कृताः।
ग्उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु'॥ २-७५-३ (१४२७२)

तैर्लब्धा द्रौपदी भार्या द्रुपदश्च सुतैः सह।
सहायाः पृथिवीपाला वासुदेवश्च वीर्यवान् ॥ २-७५-४ (१४२७३)
लब्धश्चानभिभूतार्थैः पित्र्योंशः पृथिवीपते।
विवृद्धस्तेजसा तेषां तत्र का परिदेवना ॥ २-७५-५ (१४२७४)
धनञ्जयेन गाण्डीवमक्षय्यौ च महेषुधी।
लब्धान्यस्त्राणि दिव्यानि तोषयित्वा हुताशनम् ॥ २-७५-६ (१४२७५)
तेन कार्मुकमुख्येन बाहुवीर्येण चात्मनः।
कृता वशे महीपालास्तत्र का परिदेवना ॥ २-७५-७ (१४२७६)
अग्निदाहान्मयं चापि मोक्षयित्वा स दानवम्।
सभां तां कारयामास सव्यसाची परन्तपः ॥ २-७५-८ (१४२७७)
तेन चैव मयेनोक्ताः किङ्करा नाम राक्षसाः।
वहन्ति तां सभां भीमास्तत्र का परिदेवना ॥ २-७५-९ (१४२७८)
यच्चासहायतां राजन्नुक्तवानसि भारत।
तन्मिथ्या भ्रातरो हीमे तव सर्वे वशानुगाः ॥ २-७५-१० (१४२७९)
द्रोणस्तव महेष्वासः सह पुत्रेण वीर्यवान्।
सूतपुत्रश्च राधेयो दृढधन्वा महारथः ॥ २-७५-११ (१४२८०)
ग्स एकः समरे सर्वान्पाण्डवान्सहसोमकान्।
विजेष्यति महाबाहो किं सहायैः करिष्यसि ॥ २-७५-१२ (१४२८१)
भीष्मश्च पुरुषव्याघ्रो गौतमश्च महारथः।
जयद्रथश्च बलावान्सोमदत्तस्तथैव च'॥ २-७५-१३ (१४२८२)
अहं च सह सोदर्यैः सौमदत्तिश्च पार्थिवः।
एतैस्त्वं सहितः सर्वैर्जय कृत्स्नं वसुन्दराम् ॥ २-७५-१४ (१४२८३)
दुर्योधन उवाच। २-७५-१५क्ष् (१५१४)
त्वया च सहितो राजन्नेतैश्चान्यैर्महारथैः।
एतानहं विजेष्यामि यदि त्वमनुमन्यसे ॥ २-७५-१५ (१४२८४)
एतेषु विजितेष्वद्य भविष्यति मही मम।
सर्वे च पृथिवीपालाः सभा सा च महाधना ॥ २-७५-१६ (१४२८५)
शकुनिरुवाच ॥ २-७५-१७क्ष् (१५१५)
धनञ्जयो वासुदेवो भीमसेनो युधिष्ठिरः।
नकुलः सहदेवश्च द्रुपदश्च सहात्मजैः ॥ २-७५-१७ (१४२८६)
नैते युधि पराजेतुं शक्या देवगणैरपि।
महारथा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः ॥ २-७५-१८ (१४२८७)
अहं तु तद्विजानामि विजेतुं येन शक्यते।
युधिष्ठिरं स्वयं राजंस्तन्निबोध जुषस्व च ॥ २-७५-१९ (१४२८८)
दुर्योधन उवाच ॥ २-७५-२०क्ष् (१५१६)
अप्रमादेन सुहृदामन्येषां च महात्मनाम्।

यदि शक्या विजेतुं ते तन्ममाचक्ष्व मातुल ॥ २-७५-२० (१४२८९)
शकुनिरुवाच। २-७५-२१x (१५१७)
द्यूतप्रियश्च कौन्तेयो न स जानाति देवितुम्।
समाहूतश्च राजेन्द्रो न शक्ष्यति तिवर्तितुम् ॥ २-७५-२१ (१४२९०)
देवने कुशलश्चाहं न मेऽस्ति सदृशो भुवि।
त्रिषु लोकेषु कौरव्य तं त्वं द्यूते समाह्वय ॥ २-७५-२२ (१४२९१)
तस्याक्षकुशलो राजन्नादास्येऽहमसंशयम्।
राज्यं श्रियं च तां दीप्तां त्वदर्थं पुरुषर्षभ ॥ २-७५-२३ (१४२९२)
इदं तु सर्वं त्वं राज्ञे दुर्योधन निवेदय।
अनुज्ञातस्तु ते पित्रा विजेष्ये तान्न संशयः ॥ २-७५-२४ (१४२९३)
दुर्योधन उवाच। २-७५-२५x (१५१८)
त्वमेव करुमुख्याय धृतराष्ट्राय सौबल।
निवेदय यथान्यायं नाहं शक्ष्ये निवेदितुम् ॥ ॥ २-७५-२५ (१४२९४)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि पञ्चसप्ततितमोऽध्यायः ॥७५ ॥

सभापर्व - अध्याय ०७६
॥ श्रीः ॥
२.७६. अध्यायः ७६

Mahabharata - Sabha Parva - Chapter Topics
शकुनिना दुर्योधनस्य चिन्तया कार्श्यादिकं बोधितेन धृतराष्ट्रेण दुर्योधनम् प्रति चिन्ताकारणप्रश्नः ॥१.।दुर्योधने

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

अनुभूय तु राज्ञस्तं राजसूयं सुदुर्मतिः।
ग्युधिष्ठिरस्य शकुनिर्दुर्योधसुसंयुतः ॥ २-७६-१ (१४२९५)
विवेश हास्तिनपुरं दुर्योधनमतेन सः।
वाढमित्येव शकुनिर्दृढं हृदि चकार ह ॥ २-७६-२ (१४२९६)
अस्वस्थतां चतां दृष्ट्वा धार्तराष्ट्रस्य पापकृत्।
भारतानां च दुष्टात्मा क्षयाय हि नृपक्षयः'॥ २-७६-३ (१४२९७)
प्रियकृन्मतमाज्ञाय पूर्वं दुर्योधनस्य तत्।

प्रज्ञाचक्षुषमासीनं शकुनिः सौबलस्तदा ॥ २-७६-४ (१४२९८)
दुर्योधनवचः श्रुत्वा धृतराष्ट्रं जनाधिपम्।
उपगम्य महाप्राज्ञं शकुनिर्वाक्यमब्रवीत् ॥ २-७६-५ (१४२९९)
शकुनिरुवाच। २-७६-६क्ष् (१५१९)
दुर्योधनो महाराज विवर्णो हरिणः कृशः।
दीनश्चिन्तापरश्चैव तं विद्धि मनुजाधिप ॥ २-७६-६ (१४३००)
न वै परीक्षसे सम्यगसह्यं शत्रुसंभवम्।
ज्येष्ठपुत्रस्य हृच्छोकं किमर्थं नावबुध्यसे ॥ २-७६-७ (१४३०१)
ग्एवमुक्तः शकुनिना धृतराष्ट्रो जनेश्वरः।
दुर्योधनं समाहूयं इदं वचनमब्रवीत्'॥ २-७६-८ (१४३०२)
धृतराष्ट्र उवाच। २-७६-९क्ष् (१५२०)
दुर्योधन कृतोमूलं भृशमार्तोऽसि पुत्रक।
श्रोतव्यश्चेन्मया सोऽर्थो ब्रूहि मे कुरुनन्दन ॥ २-७६-९ (१४३०३)
अयं त्वां शकुनिः प्राह विवर्णं हरिमं कृशम्।
चिन्तयंश्च न पश्यामि शोकस्य तव सम्भवम् ॥ २-७६-१० (१४३०४)
ऐश्वर्यं हि महत्पुत्र त्वयि सर्वं प्रतिष्ठितम्।
भ्रातरः सुहृदश्चैव नाचरन्ति तवाप्रियम् ॥ २-७६-११ (१४३०५)
आच्छादयसि प्रावारानश्नासि पिशितौदनम्।
आजानेया वहन्त्यश्वाः केनासि हरिणः कृशः ॥ २-७६-१२ (१४३०६)
शयनानि महार्हाणि योषितश्च मनोरमाः।
गुणवन्ति च वेश्मानि विहाराश्च यथासुखम् ॥ २-७६-१३ (१४३०७)
देवनामिव ते सर्वं वाचि बद्धं न संशयः।
स दीन इव दुर्धर्ष कस्माच्छोचसि पुत्रक ॥ २-७६-१४ (१४३०८)
ग्मात्रा पित्रा च पुत्रस्य यद्वै कार्यं परं स्मृतम्।
प्राप्तस्त्वमसि तत्तात निखिलां नः कुलश्रियम् ॥ २-७६-१५ (१४३०९)
उपस्थितः सर्वकामैस्त्रिदिवे वासवो यथा।
विविधैरन्नपानैश्च प्रवरैः किं नु शोचसि ॥ २-७६-१६ (१४३१०)
निरुक्तं निगमं छन्दः षडङ्गान्यस्त्रशास्त्रवान्।
अधीती कृतविद्यस्त्वं दशव्याकरणैः कृपात् ॥ २-७६-१७ (१४३११)
हलायुधात्कृपाद्द्रोणादस्त्रविद्यामधीतवान्।
भ्राताज्येष्ठः स्थितो राज्ये किमु शोचसि पुत्रक ॥ २-७६-१८ (१४३१२)
पृथग्जनैरलभ्यं यदशनाच्छादनं बहु।
प्रभुः सन्भुञ्जसे पुत्र संस्तुतः सूतमागधैः ॥ २-७६-१९ (१४३१३)
तस्य ते विदितप्रज्ञ शोकमूलमिदं कथम्।
लोकेस्मिञ्ज्येष्ठभागन्यस्तन्ममाचक्ष्व पृच्छतः ॥ २-७६-२० (१४३१४)
वैशम्पायन उवाच ॥ २-७६-२१क्ष् (१५२१)

तस्य तद्वचनं श्रुत्वा मन्दः क्रोधवशानुगः।
पितरं प्रत्युवाचेदं स्वमतिं सम्प्रकाशयन् '॥ २-७६-२१ (१४३१५)
दुर्योधन उवाच ॥ २-७६-२२क्ष् (१५२२)
अश्नाम्याच्छादये चाहं यथा कुपुरुषस्तथा।
अमर्षं धारये चोग्रं निनीषुः कालपर्ययम् ॥ २-७६-२२ (१४३१६)
अमर्षणः स्वाः प्रकृतीरभिभूय परं स्थितः।
क्लेशान्मुमुक्षुः परजान्स वै पुरुष उच्यते ॥ २-७६-२३ (१४३१७)
सन्तोषो वै श्रियं हन्ति ह्यभिमानं च भारत।
अनुक्रोशभये चोभे यैर्वृतो नाश्नुते महत् ॥ २-७६-२४ (१४३१८)
न मां प्रीणाति मद्भुक्तं श्रियं दृष्ट्वा युधिष्ठिरे।
अतिज्वलन्तीं कौन्तेये विवर्णकरणीं मम ॥ २-७६-२५ (१४३१९)
सपत्नानृद्ध्यतोत्मानं हीयमानं निशाम्य च।
अदृश्यामपि कौन्तेय श्रियं पश्यन्निवोद्यताम् ॥ २-७६-२६ (१४३२०)
तस्मादहं विवर्णश्च दीनश्च हरिमः कृशः।
अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः ॥ २-७६-२७ (१४३२१)
त्रिंशद्दासीक एकैको यान्बिभर्ति युधिष्ठिरः।
दशान्यानि सहस्राणि यतीनामूर्ध्वरेतसाम्।
भुञ्जते रुक्मपात्रीभिर्युधिष्ठिरनिवेशने ॥ २-७६-२८ (१४३२२)
कदलीमृगमोकानि कृष्णश्यामारुणानि च।
काम्भोजः प्राहिणोत्तस्मै परार्ध्यानपि कम्बलान्।
गजयोषिद्गवाश्वस्य शतशोऽथ सहस्रशः ॥ २-७६-२९ (१४३२३)
त्रिशतं चोष्ट्रवामीनां शतानि विचरन्त्युत।
राजन्या बलिमादाय समेता हि नृपक्षये ॥ २-७६-३० (१४३२४)
पृथग्विधानि रत्नान पार्थिवाः पृथिवीपते।
आहरन्क्रतुमुख्येऽस्मिन्कुन्तीपुत्राय भूरिशः ॥ २-७६-३१ (१४३२५)
न क्वचिद्धि मया तादृग्दृष्टपूर्वो न च श्रुतः।
यादृग्धनागमो यज्ञे पाण्डुपुत्रस्य धीमतः ॥ २-७६-३२ (१४३२६)
ग्असत्यं चेदिदं सर्वं सञ्जयं प्रष्टुमर्हसि'।
अपर्यन्तं धनौघं तं दृष्ट्वा शत्रोरहं नृप।
शर्म नैवाभिगच्छामि चिन्तयानो विशाम्पते ॥ २-७६-३३ (१४३२७)
ब्रह्मणा वाटधानाश्च गोमन्तः शतसङ्घशः।
त्रिखर्वं बलिमादाय द्वारि तिष्ठन्ति वारिताः ॥ २-७६-३४ (१४३२८)
कमण्डलूनुपादाय जातरूपमयाञ्शुभान्।
त्रैखर्वाः प्रतिवेद्यास्मै लेभिरेऽथ प्रवेशनम् ॥ २-७६-३५ (१४३२९)
यथैव मधु शक्राय धारयन्त्यमरस्त्रियटः।
तदस्मै कांस्यमाहार्षीद्वारुणं कलशोदधिः ॥ २-७६-३६ (१४३३०)

शङ्खप्रवरमादाय वासुदेवोऽभिषिक्तवान्।
शक्यं रुक्मसहस्रस्य बहुरत्नविभूषितम् ॥ २-७६-३७ (१४३३१)
दृष्ट्वा च मम तत्सर्वं ज्वररूपमिवाभवत्।
गृहीत्वा तत्तु गच्छन्ति समुद्रौ पूर्वदक्षिणौ ॥ २-७६-३८ (१४३३२)
तथैव पश्चिमं यान्ति गृहीत्वा भरतर्षभ।
उत्तरं तु न गच्छन्ति विना तात पतत्रिणः।
तत्र गत्वाऽर्जुनो दण्डमाजहारामितं धनम् ॥ २-७६-३९ (१४३३३)
ग्कृतां बैन्दुसरै रत्नैर्मयेन स्फाटिकच्छदाम्।
अपश्यं नलिनीं पूर्णामुदकस्येव भारत ॥ २-७६-४० (१४३३४)
उत्कर्षन्तं च वासश्च प्राहसन्मां वृकोदरः।
किङ्कराश्च सभापाला जहसुर्भरतर्षभ ॥ २-७६-४१ (१४३३५)
पित्रोरर्थे विशेषेण प्रावृण्वं तत्र जीवितम्।
तत्र त्म यदि शक्तः स्यां घातयेयं वृकोदरम् ॥ २-७६-४२ (१४३३६)
सपत्नेनापहासो हि स मां दहति भारत ॥ २-७६-४३ (१४३३७)
तत्र स्फाटिकतोयां हि स्फाटिकाम्बुजशोभिताम्।
सभां पुष्करिणीं मत्वा पतितोऽस्मि नराधिप ॥ २-७६-४४ (१४३३८)
तत्र मामहसज्जीमः सह पार्थेन सस्वरम्।
द्रौपदी चसह स्त्रीभिः पातयन्ती मनो मम ॥ २-७६-४५ (१४३३९)
क्लिन्नवस्त्रस्य च जले किङ्करा राजचोदिताः।
ददुर्वासांसि मेऽन्यानि तच्च दुःखतरं मम ॥ २-७६-४६ (१४३४०)
अस्तम्भा इव तिष्ठन्ति स्तम्भा इव सहस्रशः।
सोहं तत्राहतो राजन्स्फटिकाभ्यन्तरे विभो ॥ २-७६-४७ (१४३४१)
अद्वारेण विनिर्गच्छन्द्वारसंस्थानरूपिणा।
अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः ॥ २-७६-४८ (१४३४२)
आमृशन्निव तां दृष्ट्वा मार्गान्तरमुपाविशम्।
इदं द्वारमिदं राजन्नद्वारमिति मां प्रति।
अद्भुतं प्रहसन्वाक्यं बभाषे स वृकोदरः ॥ २-७६-४९ (१४३४३)
स्त्रियश्च तत्र मां दृष्ट्वा जहसुस्तादृशं नृप।
सर्वं हासकरं तेषां सदस्यानां नरर्षभ ॥ २-७६-५० (१४३४४)
न श्रुतानि न दृष्टानि यानि रत्नान मे क्वचित्।
तानि मे तत्र दृष्टानि तेन तप्तोस्मि दुःखितः ॥ २-७६-५१ (१४३४५)
हुताशनं प्रवेक्ष्यामि प्रवेक्ष्यामि महोदधिम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते'॥ २-७६-५२ (१४३४६)
इदं चाद्भुतमत्रासीत्तन्मे निगदतः शृणु ॥ २-७६-५३ (१४३४७)
पूर्णे शतसहस्रे तु विप्राणां भुञ्जतां सदा।
स्थापितस्तत्र सञ्ज्ञार्थं शङ्खो ध्मायति नित्यसः ॥ २-७६-५४ (१४३४८)

मुहुर्मुहुः प्रणदतस्तस्य शङ्खस्य भारत।
अनिशं शब्दमश्रौषं ततो रोमाणि मेऽहृषन् ॥ २-७६-५५ (१४३४९)
पार्थिवैर्बहुभिः कीर्णमुपस्थानं दिदृक्षुभिः।
अशोभत महाराज नक्षत्रैर्द्यौरिवामला ॥ २-७६-५६ (१४३५०)
सर्वरत्नान्युपादाय पार्थिवा वै जनेश्वर।
यज्ञे तस्य महाराज पाण्डुपुत्रस्य धीमतः ॥ २-७६-५७ (१४३५१)
वैश्या इव महीपाला द्विजातिपरिवेषकाः।
न सा श्रीर्देवराजस्य यमस्य वरुणस्य च।
गुह्यकाधिपतेर्वापि या श्री राजन्युधिष्ठिरे ॥ २-७६-५८ (१४३५२)
तां दृष्ट्वा पाण्डुपुत्रस्य श्रियं परमिकामहम्।
शान्तिं न परिगच्छामि दह्यमानेन चेतसा ॥ २-७६-५९ (१४३५३)
ग्अप्राप्य पाण्डवैश्वर्यं शमो मम न विद्यते।
अरीन्बाणैः शाययिष्ये शयिष्ये वा हतः परैः ॥ २-७६-६० (१४३५४)
एतादृशस्य मे किं तु जीवितेन परन्तप।
वर्धन्ते पाण्डवा राजन्वयं हि स्थितवृद्धयः'॥ २-७६-६१ (१४३५५)
शकुनिरुवाच ॥ २-७६-६२क्ष् (१५२३)
यामेतामतुलां लक्ष्मीं दृष्टवानसि पाण्डवे।
तस्याटः प्राप्तावुपायं मे शृणु सत्यपराक्रम ॥ २-७६-६२ (१४३५६)
अहमक्षेष्वभिज्ञोऽस्मि पृथिव्यामपि भारत।
हृदयज्ञः पणज्ञश्च विशेषज्ञश्च देवने ॥ २-७६-६३ (१४३५७)
द्यूतप्रियश्च कौन्तेयो न च जानाति देवितुम्।
आहूतश्चैष्यति व्यक्तं नित्यमेवाह्वयत्स्वयम् ॥ २-७६-६४ (१४३५८)
नियतं तं विजेष्यामि कृत्वा तु कपटं विभो।
आनयामि समृद्धिं तां दिव्यां चोपाह्वयस्व तम् ॥ २-७६-६५ (१४३५९)
वैशम्पायन उवाच ॥ २-७६-६६क्ष् (१५२४)
एवमुक्तः शकुनिना राजा दुर्योधनस्ततः।
धृतराष्ट्रमिदं वाक्यमपदान्तरमब्रवीत् ॥ २-७६-६६ (१४३६०)
अयमुत्सहते राजञ्श्रियमाहर्तुमक्षवित्।
द्यूतेन पाण्डुपुत्रस्य तदनुज्ञातुमर्हसि ॥ २-७६-६७ (१४३६१)
धृतराष्ट्र उवाच ॥ २-७६-६८क्ष् (१५२५)
क्षत्ता मन्त्री महाप्राज्ञः स्थितो यस्यास्मि शासने।
तेन सङ्गम्य वेत्स्यामि कार्यस्यास्य विनिश्चयम् ॥ २-७६-६८ (१४३६२)
स हि धर्मं पुरस्कृत्य दीर्घदर्शी परं हितम्।
उभयोटः पक्षयोर्युक्तं वक्ष्यत्यर्थविनिश्चयम् ॥ २-७६-६९ (१४३६३)
दुर्योधन उवाच। २-७६-७०क्ष् (१५२६)
निवर्तयिष्यति त्वाऽसौ यदि क्षत्ता समेष्यति।

निवृत्ते त्वयि राजेन्द्र मरिष्येऽहमसंशयम् ॥ २-७६-७० (१४३६४)
स त्वं मयि मृते राजन्विदुरेण सुखी भव।
भोक्ष्यसे पृथिवीं कृत्स्नां किं मया त्वं करिष्यसि ॥ २-७६-७१ (१४३६५)
वैशम्पायन उवाच ॥ २-७-७२क्ष् (१५२७)
आर्तवाक्यं तु तत्तस्य प्रणयोक्तं निशम्य सः।
धृतराष्ट्रोऽब्रवीत्प्रेष्यन्दुर्योधनमते स्थितः ॥ २-७६-७२ (१४३६६)
स्थूणासहस्रैर्बृहतीं शतद्वारां सभां मम।
मनोरमां दर्शनीयामाशु कुर्वन्तुं शिल्पिनः ॥ २-७६-७३ (१४३६७)
ततः संस्तीर्य रत्नैस्तां तक्ष्ण आनाय्य सर्वशः।
सुकृतां सुप्रवेशां च निवेदयत मेऽशनैः ॥ २-७६-७४ (१४३६८)
दूर्योधनस्य शान्त्यर्थमिति निश्चित्य भूमिपः।
धृतराष्ट्रो महाराज प्राहिणोद्विदुराय वै ॥ २-७६-७५ (१४३६९)
अपृष्ट्वा विदुरं स्वस्यन नासीत्कश्चिद्विनिश्चयः।
द्यूते दोषांश्च जानन्स पुत्रस्नेहादकृष्यत ॥ २-७६-७६ (१४३७०)
तच्छ्रुत्वा विदुरो धीमान्कलिद्वारमुपस्थितम्।
विनाशमुखमुत्पन्नं धृतराष्ट्रमुपाद्रवत् ॥ २-७६-७७ (१४३७१)
सोऽभिगम्य महात्मानं भ्राता भ्रातरमग्रजम्।
मूर्ध्ना प्रणम्य चरणाविदं वचनमब्रवीत् ॥ २-७६-७८ (१४३७२)
विदुर उवाच। २-७६-७९क्ष् (१५२८)
नाभिनन्दामि ते राजन्व्यवसायमिमं प्रभो।
पुत्रैर्भेदो यथा न स्याद्द्यूतहेतोस्तथा कुरु ॥ २-७६-७९ (१४३७३)
धृतराष्ट्र उवाच। २-७६-८०क्ष् (१५२९)
क्षत्तः पुत्रेषु पुत्रैर्मे कलहो न भविष्यति।
यदि देवाः प्रसादं नः करिष्यन्ति न संशयः ॥ २-७६-८० (१४३७४)
अशुभं वा शुभं वापि हितं वा यदि वाऽहितम्। २-७६-८१ (१४३७५)
मयि सन्निहिते द्रोणे भीष्मे त्वयि च भारत।
अनयो दैवविहितो न कथञ्चिद्भविष्यति ॥ २-७६-८२ (१४३७६)
गच्छ त्वं रथमास्थाय हयैर्वातसमैर्जवे।
खाण्डवप्रस्थमद्यैव समानय युधिष्ठिरम् ॥ २-७६-८३ (१४३७७)
न वाच्यो व्यवसायो मे विदुरैतद्ब्रवीमि ते।
दैवमेव परं मन्ये येनैतदुपपद्यते ॥ २-७६-८४ (१४३७८)
इत्युक्तो विदुरो धीमान्नेदमस्तीति चिन्तयन्।
आपगेयं महाप्राज्ञमभ्यगच्छत्सुदुः खितः ॥ ॥ २-७६-८५ (१४३७९)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-७६-९ कुतोमूलं किंमुलम् ।कुतइति प्रथमार्थे तसिः ॥
२-७६-२१ कदलीमृगा हरिणविशेषास्तेषां मोकान्यजिनानि तान्येव कृष्णश्यामारुणानि चित्र वर्णानीत्यर्थः ॥
२-७६-
३४ वाटाः क्षेत्रादिवृत्तयस्तासां धाना अभिनवोद्भेदो येषां ते सस्यादिसम्पन्नक षेत्रादिवृत्तिमन्त इत्यर्थः ॥
२-७६-
३७ शैक्यं वरत्रामयं पात्राधारभूतं शिक्यं कावडीति प्रसिद्धं तत्र स्थितं पात् रं शैक्यम् ।एतेन सामुद्रय आप उक्ताः ॥

सभापर्व - अध्याय ०७७
॥ श्रीः ॥
२.७७. अध्यायः ७७

Mahabharata - Sabha Parva - Chapter Topics
जनमेजयेन विस्तरेण द्यूतवृत्तान्तकथनप्रार्थनम् ॥१.।धृतराष्ट्रेण दुर्योधनम्प्रति द्यूतनिषेधनम् ॥२.।दुर्योधनेन धृत

Mahabharata - Sabha Parva - Chapter Text

जनमेजय उवाच ॥

कथं समभवद्द्यूतं भ्रातॄणां तन्महात्ययम्।
यत्र तद्व्यसनं प्राप्तं पाण्डवैर्मे पितामहैः ॥ २-७७-१ (१४३८०)
के च तत्र समास्तारा राजानो ब्रह्मवित्तम।
के चैनमन्वमोदन्त के चैनं प्रत्यषेधयन् ॥ २-७७-२ (१४३८१)
विस्तरेणैतदिच्छामि कथ्यमानं त्वया द्विज।
मूलं ह्येतद्विनाशस्य पृथिव्या द्विजसत्तम ॥ २-७७-३ (१४३८२)
सौतिरुवाच। २-७७-४क्ष् (१५३०)
एवमुक्तस्ततो राज्ञा व्यासशिष्यः प्रतापवान्।
आचचक्षेऽथ यद्वृत्तं तत्सर्वं वेदतत्त्वविद् ॥ २-७७-४ (१४३८३)
वैशम्पायन उवाच ॥ २-७७-५क्ष् (१५३१)
एवमुक्तस्ततो राज्ञा व्यासशिष्यः प्रतापवान्।
आचचक्षेऽथ यद्वृत्तं तत्सर्वं वेदतत्त्ववित् ॥ २-७७-५ (१४३८४)
विदुरस्य मतिं ज्ञात्वा धृतराष्ट्रोऽम्बिकासुतः।
दुर्योधनमिदं वाक्यमुवाच विजने पुनः ॥ २-७७-६ (१४३८५)
अलं द्यूतेन गान्धारे विदुरो न प्रशंसति।

न ह्यसौ सुमहाबुद्धिरहितं नो वदिष्यति ॥ २-७७-७ (१४३८६)
हितं हि परमं मन्ये विदुरो यत्प्रभाषते।
क्रियतां पुत्र तत्सर्वमेतन्मन्ये हितं तव ॥ २-७७-८ (१४३८७)
देवर्षिर्वासवागुरुर्देवराजाय धीमते।
यत्प्राह शास्त्रं भगवान्बृहस्पतिरुदारधीः।
तद्वे विदुरः सर्वं सरहस्यं महाकविः ॥ २-७७-९ (१४३८८)
स्थितस्तु वचने तस्य सदाऽहमपि पुत्रक।
विदुरो वापि मेधावी कुरूणां प्रवरो मतः ॥ २-७७-१० (१४३८९)
उद्धवो वा महाबुद्धिर्वृष्णीनामर्चितो नृप।
तदलं पुत्र द्यूतेन द्यूते भेदो हि दृश्यते ॥ २-७७-११ (१४३९०)
भेदे विनाशो राज्यस्य तत्पुत्र परिवर्जय ॥ २-७७-१२ (१४३९१)
पित्रा मात्रा च पुत्रस्य यद्वै कार्यं परं स्मृतम्।
प्राप्तस्त्वमसि तन्नाम पितृपैतामहं पदम् ॥ २-७७-१३ (१४३९२)
अधीतवान्कृती शास्त्रे लालितः सततं गृहे।
भ्रातृज्येष्ठः स्थितो राज्ये विन्दसरे किं न शोभनम् ॥ २-७७-१४ (१४३९३)
पृथग्जनैरलभ्यं यद्भोजनाच्छादनं परम्।
तत्प्राप्तोसि महाबाहो कस्माच्छोनसि पुत्रक ॥ २-७७-१५ (१४३९४)
स्फीतं राष्ट्रं महाबाहो पितृपैतामहं महत्।
नित्यमाज्ञापयन्भासि दिवि देवेश्वरो यथा ॥ २-७७-१६ (१४३९५)
ग्यादृशं च तवैश्वर्यं तदन्येषां सुदुर्लभम्।
ये चोपभोगास्ते राजन्मया ते परिकीर्तिताः'॥ २-७७-१७ (१४३९६)
तस्य ते विदितप्रज्ञ शोकमूलमिदं कथम्।
समुत्थितं दुःखकरं तन्मे शंसितुमर्हसि ॥ २-७७-१८ (१४३९७)
दुर्योधन उवाच ॥ २-७७-१९क्ष् (१५३२)
अश्नाम्याच्छादयामीति प्रपश्यन्हीनपौरुषः।
नामर्षं कुरुते यस्तु पुरुषः सोऽधमः स्मृतः ॥ २-७७-१९ (१४३९८)
न मां प्रीणाति राजेन्द्र लक्ष्मीः साधारणी विभो।
ज्वलितामेव कौन्येये श्रियं दृष्ट्वा च विव्यथे ॥ २-७७-२० (१४३९९)
सर्वां च पृथिवीं चैव युधिष्ठिरवशानुगाम्।
स्थिरोऽस्मि योऽहं जीवामि दुःखादेतद्ब्रवीमि ते। २-७७-२१ (१४४००)
आवर्जिता इवाभान्ति नीपाश्चित्रककौकुराः।
कारस्कारा लोहजङ्घा युधिष्ठिरनिवेशने ॥ २-७७-२२ (१४४०१)
हिमवत्सागरानुपाः सर्वे रत्नाकरास्तथा।
अन्त्याः सर्वे पर्युदस्ता युधिष्ठिरनिवेशने ॥ २-७७-२३ (१४४०२)
ज्येष्ठोऽयमिति मां मत्वा श्रेष्ठश्चेति विशाम्पते।
युधिष्ठिरेण सत्कृत्य युक्तो रत्नपरिग्रहे ॥ २-७७-२४ (१४४०३)

उपस्थितानां रत्नानां श्रेष्ठानामर्घहारिणाम्।
नादृश्यत परः पारो नापरस्तत्र भारत ॥ २-७७-२५ (१४४०४)
न मे हस्तः समभवद्वसु तत्प्रतिगृह्णतः।
अतिष्ठन्त मयि श्रान्ते गृग्य दूराहृतं वसु ॥ २-७७-२६ (१४४०५)
कृतां बिन्दुसरोरत्नैर्मयेन स्फाटिकच्छदाम्।
अपश्यं नलिनीं पूर्णामुदकस्येव भारत ॥ २-७७-२७ (१४४०६)
वस्त्रमुत्कर्षति मयि प्राहसत्स वृकोदरः।
शत्रोर्ऋद्धिविशेषेण विमूढ रत्तवर्जितम् ॥ २-७७-२८ (१४४०७)
तत्र स्म यदि शक्तः स्यं पातयेऽहं वृकोदरम्।
यदि कुर्यां समारम्भं भीमं हन्तुं नराधिप ॥ २-७७-२९ (१४४०८)
शिशुपाल इवास्माकं गतिः स्यान्नात्र संशयः।
सपत्नेनावहासो मे स मां दहति भारत ॥ २-७७-३० (१४४०९)
पुनश्च तादृशीमेव वापीं जलजशालिनीम्।
मत्वा शिलासमां तोये पतितोऽस्मि नराधिप ॥ २-७७-३१ (१४४१०)
तत्र मां प्राहसत्कृष्णः पार्थेन सह सुस्वरम्।
द्रौपदी च सह स्त्रीभिर्व्यथयन्ती मनो मम ॥ २-७७-३२ (१४४११)
क्लिन्नवस्त्रस्य तु जले किङ्करा राजनोदिताः।
ददुर्वासांसि मेऽन्यानि तच्च दुःखं परं मम ॥ २-७७-३३ (१४४१२)
प्रलम्भं च शृणुष्वान्यद्वदतो मे नराधिप।
अद्वारेण विनिर्गच्छन्द्वारसंस्थानरूपिणा।
अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः ॥ २-७७-३४ (१४४१३)
तत्र मां यमजौ दूरादालोक्याभिहतं तदा।
बाहुभिः परिगृह्णीतां शोचन्तौ सहितावुभौ ॥ २-७७-३५ (१४४१४)
उवाच सहदेवस्तु तत्र मां विस्मयन्निव।
इद द्वारं धार्तराष्ट्र मा गच्छेति पुनः पुनः ॥ २-७७-३६ (१४४१५)
भीमसेनेन तत्रोक्तो धृतराष्ट्रात्मजेति च।
सम्बोध्य प्रहसित्वा च इतो द्वारं नराधिप ॥ २-७७-३७ (१४४१६)
नामधेयानि रत्नानां पुरस्तान्न श्रुतानि मे।
यानि दृष्टानि मे तस्यां मनस्तपति तच्च मे ॥ ॥ २-७७-३८ (१४४१७)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-७७-२२ नीपादयो राजानः ।आवर्जिता दासवद्वशगाः ॥
२-७७-२३ पर्युदस्ता दूरक्षिप्ताः ॥

२-७७-२६ न समभवत् समर्थो नाभवत् ॥

सभापर्व - अध्याय ०७८
॥ श्रीः ॥
२.७८. अध्यायः ७८

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनेन धृतराष्ट्रसमीपे युधिष्ठिराय नानादेशीयराजोपाहृतोपायनवर्णनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

दुर्योधन उवाच ॥

यन्मया पाण्डवोयानां दृष्टं तच्छृणु भारत।
आहृतं भूमिपालैर्हि वसु मुख्यं ततस्ततः ॥ २-७८-१ (१४४१८)
नाविदं मूढमात्मानं दृष्ट्वाहं तदरेर्धनम्।
फलतो भूमितो वाऽपि प्रतिपद्यस्व भारत ॥ २-७८-२ (१४४१९)
और्णान्बैलान्वार्षदंशान् जातरूपपरिष्कृतान्।
प्रावाराजिनमुख्यांश्च काम्भोजः प्रददौ बहून् ॥ २-७८-३ (१४४२०)
अश्वांस्तित्तिरिकल्माषांस्त्रिशतं शुकनासिकान्।
अष्ट्रवामीस्त्रिगर्ताश्च पुष्टाः पीलुशमीङ्गुदैः ॥ २-७८-४ (१४४२१)
गोपाः स्वीयेन सहितास्तदादाय चतुष्पदम्।
वसातयोऽन्यद्द्रव्यं द्वारि तस्यावतस्थिरे ॥ २-७८-५ (१४४२२)
कमण्डलूनुपादाय जातरूपमयञ्छिवान्।
रत्नानि च हिरण्यं च सुवर्णं चैव केवलम्। २-७८-६ (१४४२३)
प्रीयमाणः प्रसन्नात्मा स्वयं स्वजनसंवृतः।
त्रैखर्वो रथमुख्येशः पाण्डवाय न्यवेदयत् ॥ २-७८-७ (१४४२४)
यश्च स द्विजमुख्येन राज्ञः शङ्खो निवेदितः।
प्रीत्या दत्तः कुविन्देन धर्मराजाय धीमते ॥ २-७८-८ (१४४२५)
तं सर्वे भ्रातरो भ्रात्रे ददुः शङ्खं किरीटिने।
तं प्रत्यगृह्णाद्बीभत्सुस्तोयजं हेममालिनम् ॥ २-७८-९ (१४४२६)
चित्रं निष्कसहस्रेण भ्राजमानं स्वतेजसा।
रुचिरं दर्शनीयं च पूजितं विश्वकर्मणा ॥ २-७८-१० (१४४२७)
अधारयच्च धर्मश्च तं नमस्य पुनः पुनः।
योऽनादनेऽपि नदति स ननादाधिकं तदा ॥ २-७८-११ (१४४२८)

प्रणादाद्भूमिपास्तस्य पेतुर्हीनाः स्वतेजसा।
धृष्टद्युम्नः पाण्डवाश्च सात्यकिः केशवोऽष्टमः ॥ २-७८-१२ (१४४२९)
सत्वेन स्वेन सम्पन्ना अन्योन्यप्रियकारिणः।
विसञ्ज्ञान्भूमिपान्दृष्ट्वा मां च ते प्राहसंस्तदा ॥ २-७८-१३ (१४४३०)
ततः प्रहृष्टो बीभत्सुरददाद्धेमशृङ्गिणः।
शताननडुहान्पञ्च द्विजमुख्याय भारत ॥ २-७८-१४ (१४४३१)
सुमुखेन बलिर्मुख्यः प्रेषितोऽजातशत्रवे।
कुविन्देन हिरण्यं च वासांसि विविधानि च ॥ २-७८-१५ (१४४३२)
काश्मीरराजो मार्द्वीकं शुद्धं च सरसं मधु।
बलिं च कुत्स्नमादाय पाण्डवायाभ्युटपागमत् ॥ २-७८-१६ (१४४३३)
यवना हयानुपादाय पार्वतीयान्मनोजवान्।
आसनानि महार्हाणि कम्बलांश्च महाधनान् ॥ २-७८-१७ (१४४३४)
नवान्सूक्ष्मांश्च हृद्यांश्च परार्थ्यान्सुप्रदर्शनान्।
अन्यच्च विविधं रत्नं द्वारि ते न्यवतस्थिरे ॥ २-७८-१८ (१४४३५)
श्रुतायुरपि कालिङ्गो मणिरत्नमनुत्तमम्।
अङ्गः स्त्रियो दर्शनीया जातरूपविभूषिताः ॥ २-७८-१९ (१४४३६)
वङ्गो जाम्बूनदमयान्पर्यङ्गाञ्छतशो नृप।
दक्षिणात्सागराभ्याशात्प्रावारांश्च परश्शतम् ॥ २-७८-२० (१४४३७)
औदकानि सरत्नानि बलिं चादाय भारत।
अन्येभ्यो भूमिपालेभ्यः पाण्डवाय न्यवेदयत् ॥ २-७८-२१ (१४४३८)
दार्दुरं चन्दनं मुख्यं भारं षण्णवति द्रुतम्।
पाण्डवाय ददौ पाण्ड्यः शङ्खांस्तावत एव च ॥ २-७८-२२ (१४४३९)
चन्दनागरु चानन्तं मुक्तावैडूर्यचित्रिताः।
चोलश्च केरलश्चोमौ ददतुः पाण्डवाय वै ॥ २-७८-२३ (१४४४०)
अश्मको हेमशृङ्गीश्च दोग्ध्रीर्हेमविभूषितः।
सवत्साः कुम्भदोहाश्च सहस्राण्यददाद्दश ॥ २-७८-२४ (१४४४१)
सैन्धवानां सहस्राणि हयानां पञ्चविंशतिम्।
अददात्सैन्धवो राजा हेममाल्यैरलङ्कृतान् ॥ २-७८-२५ (१४४४२)
सौवीरो हस्तिभिर्युक्तान्रथांश्च त्रिशतं परान्।
जातरूपपरिष्कारान्मणिरत्नविभूषितान् ॥ २-७८-२६ (१४४४३)
मध्यन्दिनार्कप्रतिमांस्तेजसा ज्वलितानिव।
बलिं च कृत्स्नमादाय पाण्डवाय न्यवेदयत् ॥ २-७८-२७ (१४४४४)
अवन्तिराजो रत्नानि विविधानि सहस्रशः।
हाराङ्गदांश्च मुख्यान्वै विविधं च विभूषणम् ॥ २-७८-२८ (१४४४५)
दासीनामयुतं चापि बलिमादाय भारत।
सभाद्वारि नरश्रेष्ठ दिदृक्षुरवतिष्ठते ॥ २-७८-२९ (१४४४६)

दशार्णश्चेदिराजश्च शूरसेनश्च वीर्यवान्।
वस्त्राणि मुख्यान्यादाय रत्नानि विविधानि च।
बलिं च कृत्स्नमादाय पाण्डवाय न्यवेदयत् ॥ २-७८-३० (१४४४७)
काशिराजेन हृष्टेन बली राज्ञि निवेदितः।
अशीतिगोसहस्राणि शतान्यष्टौ च दन्तिनाम् ॥ २-७८-३१ (१४४४८)
अयुतं च नदीजानां हयानां हेममालिनाम्।
विविधानि च रत्नानि काशिराजो बलिं ददौ ॥ २-७८-३२ (१४४४९)
कृतक्षणश्च वैदेहः कौसलश्च बृहद्बलः।
ददतुर्वाजिमुख्यांश्च सहस्राणि चतुर्दश ॥ २-७८-३३ (१४४५०)
शैब्यो वसादिभिः सार्धं त्रिगर्तो मालवैः सह।
तेभ्यो रत्नानि ददतुरेकैको भूमिपोऽमितम् ॥ २-७८-३४ (१४४५१)
हारान्मुख्यान्परार्ध्यांश्च विविधं च विभूषणम्।
शतं दासीसहस्राणि कार्पासिकनिवासिनाम् ॥ २-७८-३५ (१४४५२)
श्यामास्तन्वीर्दीर्घकेशीर्हेमाभरणभूषिताः।
बलिं च कृत्स्नमादाय भारुकच्छो नरर्षभ ॥ २-७८-३६ (१४४५३)
शुद्धान्विप्रोत्तमार्हांश्च कम्बलप्रवरान्ददौ।
ते सर्वे पाण्डुपुत्रस्य द्वार्यतिष्ठन्दिदृक्षवः ॥ २-७८-३७ (१४४५४)
उपायनं यदा दद्युस्तदा द्वारमलभ्यत।
इन्द्रकृष्टैर्वर्धयन्ति धान्यैर्नदमुखैस्तु ये ॥ २-७८-३८ (१४४५५)
समुद्रनिकटे जाताः परिसिन्धुनिवासिनः।
ते वै द्रुमाः पारदाश्च काश्यकैरातकैः सह ॥ २-७८-३९ (१४४५६)
बलिं विविधमादाय रत्नानि विविधानि च।
अजाविकं गोहिरण्यं खरोष्ट्रं फलवन्मधु ॥ २-७८-४० (१४४५७)
कम्बलान्विविधांश्चैव द्वारि तिष्ठन्ति वारिताः।
प्राग्ज्योतिषपतिः शूरो म्लेच्छानामधिपो बली ॥ २-७८-४१ (१४४५८)
यवनैः सहितो राजा भगदत्तो महाबलः।
आजानेयान्हयाञ्छीघ्रमादायानिलरंहसः ॥ २-७८-४२ (१४४५९)
बलिं च कृत्स्नमादाय द्वारि तिष्ठति वारितः।
अश्वसारमयान्भाण्डाञ्छुभान्दन्तत्सरूनसीन् ॥ २-७८-४३ (१४४६०)
प्राग्ज्योतिषाधिपो दत्त्वा भगदत्तोऽव्रजत्तदा।
व्यक्षाञ्त्र्यक्षांल्ललाटाक्षान्नानादिग्भ्यः समागतान् ॥ २-७८-४४ (१४४६१)
औष्णीषआनहयांश्चैव बाहुकान्पुरुषादकान्।
एकपादांश्च तत्राहमपश्यं द्वारि वारितान् ॥ २-७८-४५ (१४४६२)
बल्यर्थं ददतस्तस्य हिरण्यं रजतं वसु।
इन्द्रगोपकसङ्काशाञ्छुकवर्णान्मनोजवान् ॥ २-७८-४६ (१४४६३)
तथैवेन्द्रायुधनिभान्सन्ध्याभ्रसदृशानपि।

अनेकवर्णानारण्यान्गृहीत्वाश्वांस्तथा बहून् ॥ २-७८-४७ (१४४६४)
जातरूपमनर्घ्यं च ददुस्तस्यैकपादकाः।
सिंहलश्च तदा राजा परिगृह्य धनं बहु ॥ २-७८-४८ (१४४६५)
गोशीर्षं हरितश्यामं चन्दनप्रवरं महत्।
भाराणां शतमेकं तु द्वारि तिष्ठति वारितः ॥ २-७८-४९ (१४४६६)
ये नग्नविषया राजन्बर्बरेयाश्च विश्रुताः।
शतं दासीसहस्राणां कम्बलांश्च सहस्रशः।
परिगृह्य महाराज द्वारि तिष्ठन्ति वारिताः ॥ २-७८-५० (१४४६७)
पौण्ड्राश्च दामलिप्ताश्च यथाकामकृतो नृपाः।
कालेयकं च रूप्यं च परिगृह्य परिच्छदान् ॥ २-७८-५१ (१४४६८)
अगरूस्फाटिकांश्चैव दन्ताञ्जातीफलानि च।
तक्कोलांश्च लवङ्गाश्च कर्पूरांश्च महाबल ॥ २-७८-५२ (१४४६९)
अन्यांश्च विविधान्द्रव्यान्परिगृह्योपतस्थिरे।
एते सर्वे महात्मानो द्वारि तिष्ठन्ति वारिताः ॥ २-७८-५३ (१४४७०)
शैलेयश्च ततो राजा पत्रोर्णान्परिगृह्य सः।
द्वारि तिष्ठन्महाराज द्वारपालैर्निवारितः ॥ २-७८-५४ (१४४७१)
चीना हूणाः कषाः काचाः पर्वतान्तरवासिनः।
आहार्षुर्दशसाहस्रान्विन्नीतान्दिक्षु विश्रुतान् ॥ २-७८-५५ (१४४७२)
औष्णीकं कम्बलं चैव कीटजं मणिजं तथा।
प्रमाणरागस्पर्शाढ्यं बाह्लीचीनसमुद्भवम् ॥ २-७८-५६ (१४४७३)
रसान् गन्धान्प्रशंसन्तस्ततो द्वारमलभ्यत।
खर्वटास्तोमराश्चैव शूरा वर्धनकास्तथा ॥ २-७८-५७ (१४४७४)
चेलान्बहुविधान्गृह्य द्वारि तिष्ठन्ति वारिताः।
प्राक्कोटा नाटकेयाश्च नन्दीनगरकास्तथा ॥ २-७८-५८ (१४४७५)
नापितास्त्रैपुराश्चैव पञ्चमेयाः सहोरुजाः।
तथा चाटविकाः सर्वे नानाद्रव्यपरिच्छदान् ॥ २-७८-५९ (१४४७६)
परिगृह्य महाराज द्वारि तिष्ठन्ति वारिताः।
शकास्तुषाराः कौरव्य रोमकाः शृङ्गिणोश्मकाः ॥ २-७८-६० (१४४७७)
बलादूरुगमा राजन्गणितं चार्बुदं मया।
कूटीकृतं सुवर्णं च पद्मकिञ्जल्कसंनिभम् ॥ २-७८-६१ (१४४७८)
शितान्दीर्घानसीनन्यान्यष्टिशक्तिपरश्वथान्।
श्लक्ष्णं वस्त्रमकार्पसमाविकं मृदु चाजिनम् ॥ २-७८-६२ (१४४७९)
बलं मत्तं समादाय द्वारि तिष्ठन्ति वारिताः।
आसनानि महार्हाणि यानानि शयनानि च ॥ २-७८-६३ (१४४८०)
मणिकाञ्चनचित्राणि गजदन्तमयानि च।
रथांश्च विविधाकाराञ्जाम्बूनदपरिष्कृतान् ॥ २-७८-६४ (१४४८१)

हयैर्विनीतैः सम्पन्नान्वैयाघ्रपरिवारितान्।
विचित्रान्सपरिस्तोमांश्चापानि विविधानि च। २-७८-६५ (१४४८२)
नाराचानर्धनाराचाञ्छस्त्राणि विविधानि च।
एतद्द्रव्यं महद्गृह्य पूर्वदेशाधिपो नृपः ॥ २-७८-६६ (१४४८३)
प्रविष्टो यज्ञसदनं पाण्डवस्य महात्मनः।
जन्तुचेलान्द्विसाहस्रान्दुकूलान्ययुतानि च ॥ २-७८-६७ (१४४८४)
कांस्यानि चैव भाण्डानि महार्हाणि कुथानि च।
एतान्यन्यानि रत्नानि ददौ पार्थस्य वै मुदा ॥ २-७८-६८ (१४४८५)
अन्यान्बहुविधान्राजन्नरः सागरमाश्रिताः।
रत्नानि विविधान्गृह्य ददुस्ते पाण्डवाय तु ॥ २-७८-६९ (१४४८६)
मालवाश्च ततो राजन्रत्नानि विविधानि च।
गोधूमानां च राजेन्द्र द्रोणानां कोटिसंमितम् ॥ २-७८-७० (१४४८७)
अन्यांश्च विविधान्धान्यान्परिगृह्य महाबलः।
पाण्डवाय ददौ प्रीत्या प्रविवेश महाध्वरम् ॥ २-७८-७१ (१४४८८)
नानारत्नान्बहून्गृह्य सुराष्ट्राधिपतिर्नृपः।
तैलकुम्भान्महाराज द्रोणानामयुतानि च ॥ २-७८-७२ (१४४८९)
गुडानपि स तान्स्वादून्सहस्रशकटैर्नृपः।
एतानि सर्वाण्यादाय ददौ कुन्तीसुताय सः ॥ २-७८-७३ (१४४९०)
अन्ये च पार्थिवा राजन्नानादेशसमागताः।
रत्नानि विविधान्गृह्य ददुस्ते कौरवाय तु ॥ २-७८-७४ (१४४९१)
जम्बूद्वीपे समस्ते तु सराष्ट्रवनपर्वते।
करं तु न प्रयच्छेत नास्ति पार्थस्य पार्थिवः ॥ २-७८-७५ (१४४९२)
नरः सप्तसु वर्षेसु तद्यज्ञे नास्ति नागतः।
क्रतुर्नानागणैः कीर्णो बभौ शक्रसदो यथा ॥ २-७८-७६ (१४४९३)
इमांश्च दायान्विविधान्निबोध मम पार्थिव।
यज्ञाप्थे राजभिर्दत्तान्महतो धनसञ्चयान् ॥ २-७८-७७ (१४४९४)
मेरुमन्दरयोर्मध्ये शैलोदामभितो नदीम्।
ये ते कीचकवेणूनां छायां रम्यामुपासते ॥ २-७८-७८ (१४४९५)
खषा एकासनाद्यर्हाः प्रदरा दीर्घवेणवः।
पारदाश्च कुलिन्दाश्च तङ्कणाः परतङ्कणाः ॥ २-७८-७९ (१४४९६)
तद्वै पिपीलिकं नाम उद्धृतं यत्पिपीलिकैः।
जातरूपं द्रोणमेयमहार्षुः कुञ्जशो नराः ॥ २-७८-८० (१४४९७)
कृष्णवालांश्च चमराञ्छुक्लवालांस्तथा परान्।
हिमवत्पुष्पजं चैव स्वादुक्षौद्ररसं बहु ॥ २-७८-८१ (१४४९८)
उत्तरेभ्यः कुरुभ्यश्च व्यूढमाल्यैर्महात्मभिः।
उत्तरादपि कैलासादोषधीः सुमहाबलाः ॥ २-७८-८२ (१४४९९)

पार्वतीयाश्चराजान आहृत्य प्रणताः स्थिताः।
अजातशत्रवे राजन्द्वारि तिष्ठन्ति वारिताः ॥ २-७८-८३ (१४५००)
ये परार्घ्या हिमवतः सूर्योदयगिरेरनु।
एवंरूपाः समुद्रान्ते लौहित्यमभितश्च ये ॥ २-७८-८४ (१४५०१)
फलमूलाशना ये च किराताश्चर्मवाससः।
चन्दनागरुमुख्यानि महार्हान्कम्बलानि च ॥ २-७८-८५ (१४५०२)
चर्मरत्नसुवर्णानि गन्धानुच्चावचानि च।
कैरातकीनामयुतं दासीनां च विशंपते ॥ २-७८-८६ (१४५०३)
आहृत्य रमणीयार्थान्दूरगान्मृगपक्षिणः।
निचितं पर्वतेभ्यश्च हिरण्यंभूरिवर्चसम् ॥ २-७८-८७ (१४५०४)
बलिं च कृत्स्नमादाय द्वारि तिष्टन्ति वारिताः।
कापव्या दरदा दर्वाः शूरा वै यमकास्तथा ॥ २-७८-८८ (१४५०५)
औदुम्बरा दुर्विभागा द्वारि तिष्टन्ति वारिताः।
काश्मीराश्च कुमाराश्च गौरका हंसकास्तथा ॥ २-७८-८९ (१४५०६)
शिबित्रैगर्तयौधेया राजन्या मद्रकैः सह।
वसुतेयाः समौलेया दाहक्षुद्रकमालवैः ॥ २-७८-९० (१४५०७)
चौण्डिकाश्चौदकाश्चैव साल्वाश्चैव विशम्पते।
अङ्कवङ्काश्च यवना अनवद्या गयैः सह ॥ २-७८-९१ (१४५०८)
सुजातयः श्रेणिमन्तः श्रेयांसः शस्त्रधारिणः।
आहार्षुः क्षत्रिया वित्तं शतशोऽजातशत्रवे ॥ २-७८-९२ (१४५०९)
वङ्गाः कलिङ्गा मगधास्ताम्रलिप्ताः सपुण्ड्रकाः।
दुकूलं कौशिकं चैव पत्रोर्णं चैव भारत ॥ २-७८-९३ (१४५१०)
उपावृत्ता नृपास्तस्य ददुः प्रीतिं न चागमन्।
उच्यन्ते तत्र हि द्वार्स्थैर्बलिमादाय विष्ठिताः ॥ २-७८-९४ (१४५११)
ईषादन्तान्हेमकक्ष्यान्पद्मवर्णान्कुथावृतान्।
शैलाभान्नित्यमत्तांश्चाप्यभितः काम्यकं सरः ॥ २-७८-९५ (१४५१२)
क्षमावतः कुलीनांश्च कुञ्जरान्सपरिच्छदान्।
दत्त्वैकैको दशशतान्द्वारेण प्रविशन्त्विति ॥ २-७८-९६ (१४५१३)
वैदेहकाश्च पुण्ड्राश्च गौलेयास्ताम्रलिप्तकाः।
मरुकाः काशिका दर्दा भौमेया नटनाटकाः ॥ २-७८-९७ (१४५१४)
कर्णाटाः कांस्यकुट्टाश्च पद्मजालाः सतीनराः।
दाक्षिणात्याः पुलिन्दाश्च शवेरास्तङ्कणाः शषाः ॥ २-७८-९८ (१४५१५)
बर्बरा यवनाश्चैव गर्गराभीरकास्तथा।
पल्लवाः शककारूशास्तुम्बकाः काशिकास्तदा ॥ २-७८-९९ (१४५१६)
एते चान्ये च बहवो नानादिगभ्यः समागताः।
अन्यैश्चोपहृतान्यत्र रत्नानि हि महात्मभिः ॥ २-७८-१०० (१४५१७)

समुद्रसारवैडूर्यान्मुक्ताः शङ्खास्तथैव च।
शुभावर्ताञ्छुभाञ्छुक्तीः सिंहलाः समुपाहरन् ॥ २-७८-१०१ (१४५१८)
सम्भृतान्मणिचीरैश्च श्यामांस्ताम्रान्तलोचनान्।
राजा चित्ररथो नाम गन्धर्वो वासवानुगः।
शतानि चत्वार्यददद्धयानां वातरंहसाम् ॥ २-७८-१०२ (१४५१९)
तुम्बुरुस्तु प्रमुदितो गन्धर्वो वाजिनां शतम्।
आम्रपत्रसवर्णानामददद्धेममालिनाम् ॥ २-७८-१०३ (१४५२०)
कृती राजा च कौरव्य शूकराणां विशाम्पते।
अददद्गजरत्नानां शतानि सुबहून्यथ ॥ २-७८-१०४ (१४५२१)
विराटेन तु मत्स्येन बल्यर्थं हेममालिनाम्।
कुञ्जराणां सहस्रे द्वे मत्तानां समुपाहृते ॥ २-७८-१०५ (१४५२२)
पांसुराष्ट्राद्वसुदानो राजा षड्विंशतिं गजान्।
अश्वानां चसहस्रे द्वे राजन्काञ्चनमालिनाम् ॥ २-७८-१०६ (१४५२३)
जवसत्वोपपन्नानां वयस्थानां नराधिप।
बलिं च कृत्स्नमादाय पाण्डवेभ्यो न्यवेदयत् ॥ २-७८-१०७ (१४५२४)
यज्ञसेनेन दासीनां सहस्राणि चतुर्दश।
दासानामयुतं चैव सदाराणां विशाम्पते ॥ २-७८-१०८ (१४५२५)
गजयुक्ता महाराज रथाः षड्विंशतिस्तथा।
राज्यं च कृत्स्नं पार्थेभ्यो यज्ञार्थं वै निवेदितम् ॥ २-७८-१०९ (१४५२६)
वासुदेवोऽपि वार्ष्णेयो मानं कुर्वन्किरीटिनः।
अददद्गजमुख्यानां सहस्राणि चतुर्दश ॥ २-७८-११० (१४५२७)
आत्मा हि कृष्णः पार्थस्य कृष्णस्यात्मा धनञ्जयः।
यद्ब्रूयादर्जुनः कृष्णं सर्वं कुर्यादसंशयम् ॥ २-७८-१११ (१४५२८)
कृष्णो धनञ्जयस्यार्थे स्वर्गलोकमपि त्यजेत्।
तथैव पार्थः कृष्णार्थे प्राणानपि परित्यजेत् ॥ २-७८-११२ (१४५२९)
सुरभींश्चन्दनरसान्हेमकुम्भसमास्थितान्।
मलयाद्दर्दुराच्चैव चन्दनागुरुसञ्चयान् ॥ २-७८-११३ (१४५३०)
मणिरत्नानि भास्वन्ति काञ्चनं सूक्ष्मवस्त्रकम्।
चोलपाण्ड्यावपि द्वारं न लेभाते ह्युपस्थितौ ॥ २-७८-११४ (१४५३१)
समुद्रसारं वैदूर्यं मुक्तासङ्घांस्तथैव च।
शतशश्च कुथांस्तत्र सिंहलाः समुपाहरन् ॥ २-७८-११५ (१४५३२)
संवृता मणिचीरैस्तु श्यामास्ताम्रान्तलोचनाः।
ता गृहीत्वा नरास्तत्र द्वारि तिष्ठन्ति वारिताः ॥ २-७८-११६ (१४५३३)
प्रीत्यर्थं ब्राह्मणश्चैव क्षत्रियाश्च विनिर्जिताः।
उपाजह्रुर्विशश्चैव शूद्राः शुश्रूषवस्तथा ॥ २-७८-११७ (१४५३४)
प्रीत्या च बहुमानाच्चाप्युपागच्छन्युधिष्ठिरम्।

सर्वे म्लेच्छाः सर्ववर्णा आदिमध्यान्तजास्तथा ॥ २-७८-११८ (१४५३५)
नानादेशसमुत्थैश्चन नानाजितिभिरेव च।
पर्यस्त इव लोकोऽयं युधिष्ठिरनिवेशने ॥ २-७८-११९ (१४५३६)
उच्चावचानुपग्राहान्राजभिः प्रापितान्बहून्।
शत्रूणां पश्यतो दुःखान्मुमूर्षा मे व्यजायत ॥ २-७८-१२० (१४५३७)
भृत्यास्तु ये पाण्डवानां तांस्ते वक्ष्यामि पार्थिव।
येषामामं च पक्वं च संविधत्ते युधिष्ठिरः ॥ २-७८-१२१ (१४५३८)
अयुतं त्रीणि पद्मानि गजारोहाः ससादिनः।
रथानामर्बुदं चापि पादाता बहवस्तथा ॥ २-७८-१२२ (१४५३९)
प्रमीयमाणमां च पच्यमानं तथैव च।
विसृज्यमानं चान्यत्र पुण्याहस्वन एव च ॥ २-७८-१२३ (१४५४०)
नाभुक्तवन्तं नापीतं नालङ्कृतमसत्कृतम्।
अपश्यं सर्ववर्णानां युधिष्ठिरनिवेशने ॥ २-७८-१२४ (१४५४१)
अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः।
त्रिंशद्दासीक एकैको यान्बिभर्ति युधिष्ठिरः।
सुप्रीताः परितृष्टाश्च ते ह्याशंसत्त्यरिक्षयम् ॥ २-७८-१२५ (१४५४२)
दशान्यानि सहस्राणि यतीनामूर्ध्वरेतसाम्।
भुञ्जते रुक्मपात्रीभिर्युधिष्ठिरनिवेशने ॥ २-७८-१२६ (१४५४३)
अभुक्तं भुक्तवद्वापि सर्वमाकुब्जवामनम्।
अभुञ्जाना याज्ञसेनी प्रत्यवैक्षद्विशाम्पते ॥ २-७८-१२७ (१४५४४)
द्वौ करौ न प्रयच्छेतां कुन्तीपुत्राय भारत।
साम्बन्धिकेनपाञ्चालाः सख्येनान्धकवृष्णयः ॥ ॥ २-७८-१२८ (१४५४५)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि अष्टसप्ततितमोऽध्यायः ॥७८.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-७८-
२ नाविदमिति सम्बन्धः ।अपि तथापि मुख्यतो वक्ष्यमाणं धनं प्रतिपद्यस्वेत्यर्थ ः।फलतो जातं वस्त्रादि।भूमितो जातं हीर
२-७८-५ वस्त्राणि धान्यद्रव्यं च घ पाठः ॥
२-७८-१०४

सभापर्व - अध्याय ०७९
॥ श्रीः ॥
२.७९. अध्यायः ७९

Mahabharata - Sabha Parva - Chapter Topics

दुर्योधनेन धृतराष्ट्रसमीपे राजसूयवर्णनादि ॥१.।

Mahabharata - Sabha Parva - Chapter Text

दुर्योधन उवाच ॥

आर्यास्तु ये वै राजानः सत्यसन्धा महाव्रताः।
पर्याप्तविद्या वक्तारो वेदान्तावभृथप्लुताः ॥ २-७९-१ (१४५४६)
धृतिमन्तो ह्रीनिषेवा धर्मात्मानो नाशस्विनः।
मूर्धाभिषिक्तास्ते चैनं राजानः पर्युपासते ॥ २-७९-२ (१४५४७)
दक्षिणार्थं समानीत राजभिः कांस्यदोहनाः।
आरण्या बहुसाहस्रा अपश्यंस्तत्रतत्र गाः ॥ २-७९-३ (१४५४८)
आजह्रुस्तत्र सत्कृत्य स्वयमुद्यम्य भारत।
अभिषेकार्थमव्यग्रा भाण्डमुच्चावचं नृपाः ॥ २-७९-४ (१४५४९)
बाह्लीको रथमाहार्षीज्जाम्बूनदविभूषितम्।
सुदक्षिणस्तु युयुजे श्वेतैः काम्भोजजैर्हयैः ॥ २-७९-५ (१४५५०)
सुनीथः प्रीतिमांश्चैव ह्यनुकर्षं महाबलः।
ध्वजं चेदिपतिश्चैवमहार्षीत्स्वयमुद्यतम् ॥ २-७९-६ (१४५५१)
दाक्षिणात्यः सन्नहनं स्रगुष्णीषे च मागधः।
वसुदानो महेष्वासो गजेन्द्रं षष्टिहायनम् ॥ २-७९-७ (१४५५२)
मत्स्यस्त्वक्षान्हेमनद्धानेकलव्य उपानहौ।
आवन्त्यस्त्वभिषेकार्थमपो बहुविधास्तथा ॥ २-७९-८ (१४५५३)
चेकितान उपासङ्गं धनुः काश्य उपाहरत्।
असिं च सुत्सरुं शल्यः शैक्यं काञ्चनभूषणम् ॥ २-७९-९ (१४५५४)
अभ्यपिञ्चत्ततो धौम्यो व्यासश्च समुहातपाः।
नारदं च पुरस्कृत्य देवलं चासितं मुनिम् ॥ २-७९-१० (१४५५५)
प्रीतिमन्त उपातिष्ठन्नभिषेकं महर्षयः।
जामदग्न्येन सहितास्तथान्ये वेदपारगाः ॥ २-७९-११ (१४५५६)
अभिजग्मर्महात्मानो मन्त्रवद्भूरिदक्षिणम्।
महेन्द्रमिव देवेन्द्रं दिवि सप्तर्षयो यथा ॥ २-७९-१२ (१४५५७)
अधारयच्छत्रमस्य सात्यकिः सत्यविक्रमः।
धनञ्जयश्च व्यजने भीमसेनश्च पाण्डवः ॥ २-७९-१३ (१४५५८)
चामरे चापि शुद्धे द्वे यमौ जगृहतुस्तथा।
उपागृह्णाद्यमिन्द्राय पुराकल्पे प्रजापतिः ॥ २-७९-१४ (१४५५९)

तमस्मै शङ्खमाहार्षीद्वारुणं कलशोदधिः।
शैक्यं निष्कसहस्रेण सुकृतं विश्वकर्मणा ॥ २-७९-१५ (१४५६०)
तेनाभिषिक्तः कृष्णेन तत्र मे कश्मलोऽभवत्।
गच्छन्ति पूर्वादपरं समुद्रं चापि दक्षिणम् ॥ २-७९-१६ (१४५६१)
उत्तरं तु गच्छन्ति विना तात पतत्रिभिः।
तत्र स्म दध्मुः शतशः शङ्खान्मङ्गलकारकान् ॥ २-७९-१७ (१४५६२)
प्राणदन्त समाध्मातास्ततो रोमाणि मेऽहृषन्।
प्रापतन्भूमिपालाश्च ये तु हीनाः स्वतेजसा ॥ २-७९-१८ (१४५६३)
धृष्टद्युम्नः पाण्डवाश्च सात्यकिः केशवोऽष्टमः।
सत्वस्था वीर्यसम्पन्ना ह्यन्योन्यप्रियदर्शनाः ॥ २-७९-१९ (१४५६४)
विसञ्ज्ञान्भूमिपान्दृष्ट्वा मां च ते प्राहसंस्तदा।
ततः प्रहृष्टो बीभत्सुः प्रादाद्धेमविषाणिनाम् ॥ २-७९-२० (१४५६५)
शतान्यनडुहां पञ्च द्विजमुख्येषु भारत।
न रन्तिदेवो नाभागो यौवनाश्वो मनुर्न च ॥ २-७९-२१ (१४५६६)
न च राजा पृथुर्वैन्यो न चाप्यासीद्भगीरथः।
ययातिर्नहुषो वापि यथा राजा युधिष्ठिरः ॥ २-७९-२२ (१४५६७)
यथाऽतिमात्रं कौन्तेयः श्रिया परमया युतः।
राजसूयमवाप्यैवं हरिश्चन्द्र इव प्रभुः ॥ २-७९-२३ (१४५६८)
एतां दृष्टा श्रियं पार्थे हरिश्चन्द्रे यथा विभो।
कथं तु जीवितं श्रेयो मम पश्यसि भारत ॥ २-७९-२४ (१४५६९)
अन्धेनेव युगं नद्धं विपर्यस्तं नराधिप।
कनीयांसो विवर्धन्ते ज्येष्ठा हीयन्त एव च ॥ २-७९-२५ (१४५७०)
एवं दृष्ट्वा नाभिविन्दामि शर्म
समीक्षमाणोऽपि कुरुप्रवीर।
तेनाहमेवं कृशतां गतश्च
विवर्णतां चैव सशोकतां च ॥ ॥ २-७९-२६ (१४५७१)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि ऊनाशीतितमोऽध्यायः ॥७९ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-७९-२ हीनिषेवा लज्जावन्तः ॥

सभापर्व - अध्याय ०८०
॥ श्रीः ॥

२.८०. अध्यायः ८०

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनम्प्रति धृतराष्ट्रेण पाण्डवेषु द्वेषनिषेधनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

धृतराष्ट्र उवाच।

त्वं वै ज्येष्ठो ज्यैष्ठिनेयः पुत्र मा पाण्डवान्द्विषः।
द्वेषा ह्यसुखमादत्ते यथैव निघनं तथा ॥ २-८०-१ (१४५७२)
अव्युत्पन्नं समानार्थं तुल्यमित्रं युधिष्ठिरम्।
अद्विषन्तं कथं द्विष्यात्त्वादृशो भरतर्षभ ॥ २-८०-२ (१४५७३)
तुल्याभिजनवीर्यश्च कथं भ्रातुः श्रियं नृप।
पुत्र कामयसे मोहान्मैवं भूः शाम्य मा शुचः ॥ २-८०-३ (१४५७४)
अथ यज्ञविभूतिं तां काङ्क्षसे भरतर्षभ।
ऋत्विजस्तव तन्वन्तु सप्ततन्तुं महाध्वरम् ॥ २-८०-४ (१४५७५)
आहरिष्यन्ति राजानस्तवापि विपुलं धनम्।
प्रीत्या च बहुमानाच्च रत्नान्याभरणानि च ॥ २-८०-५ (१४५७६)
अनार्याचरितं तात परस्वस्पृहणं भृशम्।
स्वसन्तुष्टः स्वधर्मस्थो यः स वै सुखमेधते ॥ २-८०-६ (१४५७७)
ग्मही कामदुघा सा हि वीरपत्नीति चोच्यते।
तथा वीरस्य भार्या श्रीस्ते इमे हि कलत्रवत् ॥ २-८०-७ (१४५७८)
तवाप्यस्ति हे चेद्वीर्यं भोक्ष्यसे हि महीमिमाम् ॥ २-८०-८ (१४५७९)
अयुक्तमिदमेतत्तु परस्वहरणं भृशम्।
उभयोर्लोकयोर्दुःखं सुहृदां काङ्क्षतोऽनयम् ॥ २-८०-९ (१४५८०)
अव्यापारः परार्तेषु नित्योद्योगः स्वकर्मसु।
रक्षणं समुपात्तानामेतद्वैभवलक्षणम् ॥ २-८०-१० (१४५८१)
विपत्तिष्वव्यथो दक्षो नित्यमुत्थानवान्नरः।
अप्रमत्तो विनीतात्मा नित्यं भद्राणि पश्यति ॥ २-८०-११ (१४५८२)
बाहूनिवैतान्मा च्छेत्सीः पाण्डुपुत्रास्तथैव ते।
भ्रातृणां तद्धनार्थं वै मित्रद्रोहं च मा कुरु ॥ २-८०-१२ (१४५८३)
पाण्डोः पुत्रान्मा द्विषस्वेह राजं-
स्तथैव ते भ्रातृधनं समग्रम्।
मित्रद्रोहे तात महानधर्मः
पितामहा ये तव तेऽपि तेषाम् ॥ २-८०-१३ (१४५८४)

अन्तर्वेद्यां ददद्वित्तं कामाननुभवन्प्रियान्।
क्रीडन्स्त्रीभिर्निरातङ्कः प्रशाम्य भरतर्षभ ॥ ॥ २-८०-१४ (१४५८५)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि अशीतितमोऽध्यायः ॥८० ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८०-१ ज्येष्ठाया अपत्यं ज्यैष्ठिनेयः ॥
२-८०-
२ अव्युत्पन्नं परकपटानभिज्ञम् । समानार्थं तुल्यधनम्। तुल्यमित्रं त्वन्मित्रा द्रोहिणम् अद्विषन्तं च त्वामपीति शेषः ॥

सभापर्व - अध्याय ०८१
॥ श्रीः ॥
२.८१. अध्यायः ८१

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनेन धृतराष्ट्रोक्तिप्रतिकूलभाषणम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

दुर्योधन उवाच ॥

यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः।
न स जानाति शास्त्रार्थं दर्वी सूपरसानिव ॥ २-८१-१ (१४५८६)
जानन्वै मोहयति मां नावि नौरिव संयता।
स्वार्थे किं नावधानं ते उताहो द्वेष्टि मां भवान् ॥ २-८१-२ (१४५८७)
न सन्तीमे धार्तराष्ट्रा येषां त्वमनुशासिता।
भविष्यमर्थमाख्यासि सर्वदा कृत्यमात्मनः ॥ २-८१-३ (१४५८८)
परनेयोऽग्रणीर्यस्य स मार्गान्प्रतिमुह्यति।
पन्थानमनुगच्छेयुः कथं तस्य पदानुगाः ॥ २-८१-४ (१४५८९)
राजन्परिणतप्रज्ञो वृद्धसेवी जितेन्द्रियः।
प्रतिपन्नान्स्वकार्येषु संमोहयसि नो भृशम् ॥ २-८१-५ (१४५९०)
लोकवृत्ताद्राजवृत्तमन्यदाह बृहस्पतिः।
तस्माद्राज्ञाऽप्रमत्तेन स्वार्थश्चिन्त्यः सदैव हि ॥ २-८१-६ (१४५९१)
क्षत्रियस्य महाराज जये वृत्तिः समाहिता।

स वै धर्मस्त्वधर्मो वा स्ववृत्तौ का परीक्षणा ॥ २-८१-७ (१४५९२)
प्रकालयेद्दिशः सर्वाः प्रतोदेनेव सारथिः।
प्रत्यमित्रश्रियं दीप्तां जिघृक्षुर्भरतर्षभ ॥ २-८१-८ (१४५९३)
प्रच्छन्नो वा प्रकाशो वा योगो योऽरिं प्रबाधते।
तद्वै शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतम् ॥ २-८१-९ (१४५९४)
शत्रुश्चैव हि मित्रं च न लेख्यं न च मातृका।
यो वै सन्तापयति यं स शत्रुः प्रोच्यते नृप ॥ २-८१-१० (१४५९५)
असन्तोषः श्रियो मूलं तस्मात्तं कामयाम्यहम्।
समुच्छ्रये यो यतते स राजन्परमो नयः ॥ २-८१-११ (१४५९६)
ममत्वं हि न कर्तव्यमैश्वर्ये वा धनेऽपि वा।
पूर्वावाप्तं हरन्त्यन्ये राजधर्मं हि तं विदुः ॥ २-८१-१२ (१४५९७)
अद्रोहसमंय कृत्वा चिच्छेद नमुचेः शिरः।
शक्रः साऽभिमता तस्य रिपौ वृत्तिः सनातनी ॥ २-८१-१३ (१४५९८)
द्वावेतौ ग्रसते भूमिः सर्पो बिलशयानिव।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ २-८१-१४ (१४५९९)
नास्ति वै जातितः शत्रुः पुरुषस्य विशाम्पते।
येन साधारणी वृत्तिः स शत्रुर्नेतरो जनः ॥ २-८१-१५ (१४६००)
शत्रुपक्षं समृध्यन्तं यो मोहात्समुपेक्षते।
व्याधिराप्यायित इव तस्य मूलं छिनत्ति सः ॥ २-८१-१६ (१४६०१)
अल्पोऽपि ह्यरिरत्यर्थं वर्धमानः पराक्रमैः।
वल्मीको मूलज इव ग्रसते वृक्षमन्तिकात् ॥ २-८१-१७ (१४६०२)
आजमीढ रिपोर्लक्ष्मीर्मा ते रोचिष्ट भारत।
एष भारः सत्ववतां न यः शिरसि धिष्ठितः ॥ २-८१-१८ (१४६०३)
जन्मवृद्धिमिवार्थानां यो वृद्धिमाभिकाङ्क्षते।
एधते ज्ञातिषु स वै सद्यो वृद्धिर्हि विक्रमः ॥ २-८१-१९ (१४६०४)
नाप्राप्य पाण्डवैश्वर्यं संशयो मे भविष्यति।
अवाप्स्ये वा श्रियं तां हि शयिष्ये वा हतो युधि ॥ २-८१-२० (१४६०५)
एतादृशस्य किं मेऽद्य जीवितेन विशाम्पते।
वर्धन्ते पाण्डवा नित्यं वयं स्वस्थिरवृद्धयः ॥ ॥ २-८१-२१ (१४६०६)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि एकाशीतितमोऽध्यायः ॥८१ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८१-३ कृत्यं इदानीं कर्तव्यम् ॥
२-८१-१४ अप्रवासिनं तीर्थाटनादिरहितम् ॥

२-८१-१५ साधारणी तुल्या वृत्तिर्जीविका ।एकामिषत्वमित्यर्थः ॥

सभापर्व - अध्याय ०८२
॥ श्रीः ॥
२.८२. अध्यायः ८२

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनम्प्रति शकुनिना द्यूताय प्रोत्साहनम् ॥१.।धृतराष्ट्राज्ञया शिल्पिभिः सभानिर्माणम् ॥२.।धृतराष्ट्रेण पाण्

Mahabharata - Sabha Parva - Chapter Text

शकुनिरुवाच ॥

यां त्वमेतां श्रियं पाण्डुपुत्रे युधिष्ठिरे।
तप्यसे तां हरिष्यामि द्यूतेन जयतां वर ॥२-८२-१ (१४६०७)
आहूयतां परं राजन्कुन्तीपुत्रो युधिष्ठिरः।
अगत्वा संशयमहमयुद्ध्वा च चमूमुखे ॥२-८२-२ (१४६०८)
अक्षान्क्षिपन्नक्षतः सन्विद्वानविदुषो जये।
ग्लहान्धनूंषि मे विद्धि शरानक्षांश्च भारत ॥२-८२-३ (१४६०९)
अक्षाणां हृदयं मे ज्यां रथं विद्धि ममास्फुरम् ॥ २-८२-४ (१४६१०)
दुर्योधन उवाच।२-८२-५क्ष् (१५३३)
अयमुत्सहते राजच्छ्रियमाहर्तुमक्षवित्।
द्यूतेन पाण्डुपुत्रेभ्यस्तदनुज्ञातुमर्हसि ॥२-८२-५ (१४६११)
धृतराष्ट्र उवाच।२-८२-६क्ष् (१५३४)
स्थितोऽस्मि शासने भ्रातुर्विदुरस्य महात्मनः।
तेन सङ्गम्य वेत्स्यामि कार्यस्यास्य विनिश्चयम् ॥२-८२-६ (१४६१२)
दुर्योधन उवाच ॥२-८२-७क्ष् (१५३५)
ग्कृष्णादभ्याधिकः सोऽपि क्षत्ता बोद्धा विशाम्पते।
केवलं धर्ममेवाह न तद्विजयसाधकम् ॥२-८२-७ (१४६१३)
जयश्च धर्मतोपेतस्तथैव भरतर्षभ।
तस्माद्विनयतो जेता तावुभौ च विरोधिनौ'॥२-८२-८ (१४६१४)
व्यपनेष्यति ते बुद्धिं विदुरो मुक्तसंशयः।
पाण्डवानां हिते युक्तो न तथा मम कौरव ॥२-८२-९ (१४६१५)
नारभेतान्यसामर्थ्यात्पुरुषः कार्यमात्मनः।
मतिसाम्यं द्वयोर्नास्ति कार्येषु कुरुनन्दन ॥२-८२-१० (१४६१६)

भयं परिहरन्मत्त आत्मानं परिपालयन्।
वर्षासु क्लिन्नवटवत्तिष्ठन्नैवावसीदति ॥ २-८२-११ (१४६१७)
न व्याधयो नापि यमः प्राप्तुं श्रेयः प्रतीक्षते।
यावदेव भवेत्कल्पस्तावच्छ्रेयः समाचरेत् ॥ २-८२-१२ (१४६१८)
धृतराष्ट्र उवाच ॥ २-८२-१३क्ष् (१५३६)
सर्वथा पुत्र बलिभिर्विग्रहो मे रोचते।
वैरं विकारं सृजति तद्धि शस्त्रमनायसम् ॥ २-८२-१३ (१४६१९)
अनर्थमर्थं मन्यसे राजपुत्र
सङ्ग्रन्थनं कलहस्यातियाति।
तद्धि प्रवृत्तं तु यथाकथञ्चित्
सृजेदसीन्निशितान्सायकांश्च ॥ २-८२-१४ (१४६२०)
दुर्योधन उवाच ॥ २-८२-१५क्ष् (१५३७)
द्यूते पुराणैर्व्यवहारः प्रणीत-
स्तत्रात्ययो नास्ति न सम्प्रहारः।
तद्रोचतां शकुनेर्वाक्यमद्य
सभां क्षिप्रं त्वमिहाज्ञापयस्व ॥ २-८२-१५ (१४६२१)
स्वर्गद्वारं दीव्यतां नो विशिष्टं
तद्वर्तिनां चापि तथैव युक्तम्।
भवेदेवं ह्यात्मना तुल्यमेव
दुरोदरं पाण्डवैस्त्वं कुरुष्व ॥ २-८२-१६ (१४६२२)
धृतराष्ट्र उवाच। २-८२-१७क्ष् (१५३८)
वाक्यं न मे रोचते यत्त्वयोक्तं
यत्ते प्रियं तत्क्रियतां नरेन्द्र।
पश्चात्तप्स्यसे तदुपाक्रम्य वाक्यं
न हीदृशं भावि वचो हि धर्म्यम् ॥ २-८२-१७ (१४६२३)
दृष्टं ह्येतद्विदुरेणै सर्वं
विपश्चिता बुद्धिविद्यानुगेन।
तदेवैतदवशस्याभ्युपैति
महद्भयं क्षत्रियजीवघाति ॥ २-८२-१८ (१४६२४)
वैशम्पायन उवाच ॥ २-८२-१९क्ष् (१५३९)
एवमुक्त्वा धृतराष्ट्रो मनीषी
दैवं मत्वा परमं दुस्तरं च।
शशासोच्चैः पुरुषान्पुत्रवाक्ये
स्थितो राजा दैवसंमूढचेताः ॥ २-८२-१९ (१४६२५)
सहस्रस्तम्भां हेमवैदूर्यचित्रां
शतद्वारां तोरणस्फाटिकाढ्याम्।

सभामग्र्यां क्रोशमात्रायतां मे
तद्विस्तारामाशु कुर्वन्तु युक्ताः ॥ २-८२-२० (१४६२६)
श्रुत्वा तस्य त्वरिता निर्विशङ्काः
प्राज्ञा दक्षास्तां तदा चक्रुराशु।
सर्वद्रव्याण्युपजह्रुः सभायां
सहस्रशः शिल्पिनश्चैव युक्ताः ॥ २-८२-२१ (१४६२७)
कालेनाल्पेनाथ निष्ठां गतां तां
सभां रम्यां बहुरत्नां विचित्राम्।
चित्रैर्हैमैरासनैरभ्युपेता-
माचख्युस्ते तस्य राज्ञः प्रतीताः ॥ २-८२-२२ (१४६२८)
ततो विद्वान्विदुरं मन्त्रिमुख्य-
मुवाचेदं धृतराष्ट्रो नरेन्द्रः।
युधिष्ठिरं राजपुत्रं च गत्वा
मद्वाक्येन क्षिप्रमिहानयस्व ॥ २-८२-२३ (१४६२९)
सभेयं मे बहुरत्ना विचित्रा
शय्यासनैरुपपन्ना महार्हैः।
सा दृश्यतां भ्रातृभिः सार्धमेत्य
सुहृद्द्यूतं वर्ततामत्र चेति ॥ २-८२-२४ (१४६३०)
वैशम्पायन उवाच ॥ २-८२-२५क्ष् (१५४०)
मतमाज्ञाय पुत्रस्य धृतराष्ट्रो नराधिपः।
मत्वा च दुस्तरं दैवमेतद्राजंश्चकार ह ॥ २-८२-२५ (१४६३१)
अन्यायेन तथोक्तस्तु विदुरो विदुषां वरः।
नाभ्यनन्दद्वचो भ्रातुर्वचनं चेदमब्रवीत् ॥ २-८२-२६ (१४६३२)
विदुर उवाच ॥ २-८२-२७क्ष् (१५४१)
नाभिनन्दे नृपते प्रैषमेतं
मैवं कृथाः कुलनाशाद्बिभेमि।
पुत्रैर्भिन्नैः कलहस्ते ध्रुवं स्या-
देतच्छङ्के द्यूतकृते नरेन्द्र ॥ २-८२-२७ (१४६३३)
धृतराष्ट्र उवाच। २-८२-२८क्ष् (१५४२)
नेह क्षत्तः कलहस्तप्स्यते मां
न चेद्दैवं प्रतिलोमं भविष्यत्।
धात्रा तु दिष्टस्य वशे किलेदं
सर्वं जगच्चेष्टति न स्वतन्त्रम् ॥ २-८२-२८ (१४६३४)
तदद्य विदुर प्राप्य राजानं मम शासनात्।
क्षिप्रमानय दुर्धर्षं कुन्तीपुत्रं युधिष्ठिरम् ॥ ॥ २-८२-२९ (१४६३५)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८२-३ ग्लहान् पणान् ॥
२-८२-४ आस्फुरमक्षविन्यासपातनादिस्थानम् ॥
२-८२-८ विनयतः अनयात् ॥
२-८२-१६ दुरोदरं द्यूतम् ॥

सभापर्व - अध्याय ०८३
॥ श्रीः ॥
२.८३. अध्यायः ८३

Mahabharata - Sabha Parva - Chapter Topics
विदुरस्य इन्द्रप्रस्थगमनम् ॥ १.। पाण्डवानां द्यूतसभाप्रवेशः ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततः प्रायाद्विदुरोऽश्वैरुदारै-
र्महाजवैर्बलिभिः साधु दान्तैः।
बलान्नियुक्तो धृतराष्ट्रेण राज्ञा
मनीषिणां पाण्डवानां सकाशे ॥ २-८३-१ (१४६३६)
सोऽभिपत्य तदध्वानमासाद्य नृपतेः पुरम्।
प्रविवेश महाबुद्धिः पूज्यमानो द्विजातिभिः ॥ २-८३-२ (१४६३७)
स राजगृहमासाद्य कुबेरभवनोपमम्।
अभ्यागच्छत धर्मात्मा धर्मपुत्रं युधिष्ठिरम् ॥ २-८३-३ (१४६३८)
तं वै राजा सत्यधृतिर्महात्मा
अजातशत्रुर्विदुरं यथावत्।
पूजापूर्वं प्रतिगृह्याजमीढ-
स्ततोऽपृच्छद्धृतराष्ट्रं सपुत्रम् ॥ २-८३-४ (१४६३९)
युधिष्ठिर उवाच ॥ २-८३-५क्ष् (१५४३)
विज्ञायते ते मनसोऽप्रहर्षः
कच्चित्क्षत्तः कुशलेनागतोऽसि।

कच्चित्पुत्राः स्थविरस्यानुलोमा
वशानुगाश्चापि विशोऽथ कच्चित् ॥ २-८३-५ (१४६४०)
विदुर उवाच ॥ २-८३-६क्ष् (१५४४)
राजा महात्मा कुशली सपुत्र
आस्ते वृतो ज्ञातिभिरिन्द्रकल्पः।
प्रीतो राजन्पुत्रगुणैर्विनीतो
विशोक एवात्मरतिर्महात्मा ॥ २-८३-६ (१४६४१)
इदं तु त्वां कुरुराजोऽभ्युवाच
पूर्वं पृष्ट्वा कुशलं चाव्ययं च।
इयं सभा त्वत्सभातुल्यरूपा
भ्रातॄणां ते दृस्यतामेत्य पुत्र ॥ २-८३-७ (१४६४२)
समागम्य भ्रातृभिः पार्थ तस्यां
सुहृद्द्यूतं क्रियतां रम्यतां च।
प्रीयामहे भवतां सङ्गमेन
समागताः कुरवश्चापि सर्वे ॥ २-८३-८ (१४६४३)
दुरोदरा विहिता ये तु तत्र
महात्मना धृतराष्ट्रेण राज्ञा।
तान्द्रक्ष्यसे कितवान्सन्निविष्टा-
नित्यागतोऽहं नृपते तज्जुषस्व ॥ २-८३-९ (१४६४४)
युधिष्ठर उवाच ॥ २-८३-१०क्ष् (१५४५)
द्यूते क्षत्तः कलहो विद्यते नः
को वै रोचतने बुध्यमानः।
किं वा भवान्मन्यते युक्तरूपं
भवद्वाक्ये सर्व एव स्थिताः स्मः ॥ २-८३-१० (१४६४५)
विदुर उवाच ॥ २-८३-११क्ष् (१५४६)
जानाम्यहं द्यूतमनर्थमूलं
कृतश्च यत्नोऽस्य मया निवारणे।
राजा च मां प्राहिमोत्त्वत्सकाशं
श्रुत्वा विद्वञ्श्रेय इहाचरस्व ॥ २-८३-११ (१४६४६)
युधिष्ठिर उवाच ॥ २-८३-१२क्ष् (१५४७)
के तत्रान्ये कितवा दीव्यमाना
विना राज्ञो धृतराष्ट्रस्य पुत्रैः।
पृच्छामि त्वां विदुर ब्रूहि नस्तान्
यैर्दीव्यामः शतशः सन्निपत्य ॥ २-८३-१२ (१४६४७)
विदुर उवाच ॥ २-८३-१३क्ष् (१५४८)
गन्धारराजः शकुनिर्विशाम्पते

राजाऽतिदेवी कृतहस्तो मताक्षः।
विनिंशतिश्चित्रसेनश्च राजा
सत्यव्रतः पुरुमित्रो जयश्च ॥ २-८३-१३ (१४६४८)
युधिष्ठिर उवाच ॥२-८३-१४क्ष् (१५४९)
महाभयाः कितवाः सन्निविष्टा
मायोपधा देवितारोऽत्र सन्ति।
धात्रा तु दिष्टस्य वशे किलेदं
सर्वं जगत्तिष्ठति न स्वतन्त्रम् ॥ २-८३-१४ (१४६४९)
नाहं राज्ञो धृतराष्ट्रस्य शासना-
न्न गन्तुमिच्छामि कवे दुरोदरम्।
इष्टो हि पुत्रस्य पिता सदैव
तदस्मि कर्ता विदुरात्थ मां यथा ॥ २-८३-१५ (१४६५०)
न चाकामः शकुनिना देविताहं
न चेन्मां जिष्णुराह्वयिता सभायाम्।
आहूतोऽहं न निवर्ते कदाचित्
तदाहितं शाश्वतं वै व्रतं मे ॥ २-८३-१६ (१४६५१)
वैशम्पायन उवाच ॥२-८३-१७क्ष् (१५५०)
एवमुक्त्वा विदुरं धर्मराजः
प्रायात्रिकं सर्वमाज्ञाप्य तूर्णम्।
प्रायाच्छ्वोभूते सगणः सानुयात्रः
सह स्त्रीभिर्द्रौपदामादि कृत्वा ॥ २-८३-१७ (१४६५२)
दैवं हि प्रज्ञां मुष्णाति चक्षुस्तेज इवापतत्।
धातुश्च वशमन्वेति पाशैरिव नरः सितः ॥२-८३-१८ (१४६५३)
इत्युक्त्वा प्रययौ राजा सह क्षत्त्रा युधिष्ठिरः।
अमृष्यमाणस्तस्याथ समाह्वानमरिन्दमः ॥२-८३-१९ (१४६५४)
बाह्लिकेन रथं यत्तमास्थाय परवीरहा।
परिच्छन्नो ययौ पार्थो भ्रातृभिः सह पाण्डवः।
राजश्रिया दीप्यमानो ययौ ब्रह्मपुरः सरः ॥ २-८३-२० (१४६५५)
ग्सन्दिदेश ततः प्रेष्यानागतान्नगरं प्रति।
ततस्ते नृपशार्दूल चक्रुर्वै नृपशासनम् ॥२-८३-२१ (१४६५६)
ततो राजा महातेजाः संयम्य सपरिच्छदम्।
ब्राह्मणैः स्वस्ति वाच्याथ प्रययौ मन्दिराद्बहिः २-८३-२२ (१४६५७)
ब्राह्मणेभ्यो धनं दत्त्वा गत्यर्थं स यथाविधि।
अन्येभ्यः स तु दत्त्वा च गन्तुमेवोपचक्रमे ॥२-८३-२३ (१४६५८)
सर्वलक्षणसम्पन्नं राजहंसपरिच्छदम्।
तमारुह्य महाराजो गजेन्द्रं षष्टिहायनम् ॥२-८३-२४ (१४६५९)

हारी किरीटी हेमाभः सर्वाभरणभूषितः।
रराज राजन्पार्थो वै परया नृपशोभया ॥ २-८३-२५ (१४६६०)
रुक्मवेदिगतः प्राज्यो ज्वलन्निव हुताशनः।
ततो जगाम राजा स प्रहृष्टनरवाहनः ॥ २-८३-२६ (१४६६१)
रथघोषेण महता पूरयन्वै नभः स्थलम्।
संस्तूयमानः स्तुतिभिः सूतमागधबन्दिभिः ॥ २-८३-२७ (१४६६२)
महासैन्येन सहितो यथादित्यः स्वरश्मिभिः।
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ २-८३-२८ (१४६६३)
बभौ युधिष्ठिरो राजा पौर्णमास्यामिवोडुराट्।
चामरैर्हेमदण्डैश्च धूयमानः समन्ततः ॥ २-८३-२९ (१४६६४)
जयाशिषः प्रहृष्टानां नराणां पथि पाण्डवः।
प्रत्यगृह्णाद्यथान्यायं यथआवद्भरतर्षभः ॥ २-८३-३० (१४६६५)
तथैव सैनिका राजन्राजानमनुयान्ति ये।
तेषां हलहलाशब्दो दिवं स्तब्धः प्रतिष्ठितः ॥ २-८३-३१ (१४६६६)
नृपस्याग्ने ययौ राजन्भीमसेनो रथी बली।
उभौ पार्श्वगतौ राज्ञः सतल्पौ वै सुकल्पितौ ॥ २-८३-३२ (१४६६७)
अधिरूढौ यमौ चापि जग्मतुर्भरतर्षभ।
शोभयन्तौ महासैन्यं तावुभौ रूपशालिनौ ॥ २-८३-३३ (१४६६८)
पृष्ठतोऽनुययौ जिष्णुर्वीरः शस्त्रभृतां वरः।
श्वेताश्वो गाण्डिवं गृह्य अग्निदत्तं रथं गतः ॥ २-८३-३४ (१४६६९)
सैन्यमध्ये ययौ राजन्कुरुराजो युधिष्ठिरः।
द्रौपदीप्रमुखा नार्यः सानुगाः सपरिच्छदाः ॥ २-८३-३५ (१४६७०)
आरुह्य ता विचित्राङ्ग्यो यानानि विविधानि च।
महत्या सेनया राजन्नग्रे यानानि विविधानि च। २-८३-३६ (१४६७१)
समृद्धनरनागाश्वं सपताकरथध्वजम्।
संनद्धवरनिस्त्रिंशं पथि निर्घोषनिः स्वनम् ॥ २-८३-३७ (१४६७२)
शङ्खदुन्दुभितालानां वेणुवीणानुवनादितम्।
शुशुभे पाण्डवं सैन्यं प्रयास्यत्तत्तदा नृप ॥ २-८३-३८ (१४६७३)
यथा कुबेरो लङ्कायां पुरा चात्यन्तशोभया।
महत्या सेनया सार्धं गुरुमिन्द्रं स गच्छति ॥ २-८३-३९ (१४६७४)
तथा ययौ स पार्थोऽपि असङ्ख्येयविभूतिना।
सुसमृद्धेन सैन्येन यथा वैश्रवणस्तथा ॥ २-८३-४० (१४६७५)
स सरांसि नदीश्चैव वनान्युपवनानि च।
अत्यक्रामन्महाराज पुरीं चाभ्यवपद्यत ॥ २-८३-४१ (१४६७६)
स हास्तिनसमीपे तु कुरुराजो युधिष्ठिरः।
चक्रे निवेशनं तत्र ततः स सहसैनिकाः ॥ २-८३-४२ (१४६७७)

शिवे देशे समे चैव न्यवसत्पाण्डवस्तदा।
ततोराजन्समाहूय शोकविह्वलया गिरा ॥ २-८३-४३ (१४६७८)
एतद्वाक्यं च सर्वस्वं धृतराष्ट्रचिकीर्षितम्।
आचचक्षे यथावृत्तं विदुरोऽथ नृपस्य ह ॥ २-८३-४४ (१४६७९)
तच्छ्रुत्वा भाषितं तेन धर्मराजोऽब्रवीदिदम्।
न मर्षयाम्यहं क्षत्तः समाह्वानं व्रतं हि मे।
स्वस्त्यस्तु लोके विप्राणां प्रजानां चैव सर्वदा ॥ २-८३-४५ (१४६८०)
वैशम्पायन उवाच ॥ २-८३-४६क्ष् (१५५१)
प्रविवेश ततो राजा नगरं नागसाह्वयम्।
धृतराष्ट्रेण चाहूतः कालस्य समयेन च'॥ २-८३-४६ (१४६८१)
स हास्तिनपुरं गत्वा धृतराष्ट्रगृहं ययौ।
समियाय च धर्मात्मा धृतराष्ट्रेण पाण्डवः ॥ २-८३-४७ (१४६८२)
तथा भीष्मेण द्रोणेन कर्णेन च कृपेण च।
समियाय यथान्यायं द्रौणिना च विभुः सह २-८३-४८ (१४६८३)
समेत्य च महाबाहुः सोमदत्तेन चैव ह।
दूर्योधनेन सभ्रात्रा सौबलेन च वीर्यवान् ॥ २-८३-४९ (१४६८४)
ये चान्ये तत्र राजानः पूर्वमेव समागताः।
दुःशासनेन वीरेण सर्वैर्भ्रातृभिरेव च ॥ २-८३-५० (१४६८५)
जयद्रथेन च तथा कुरुभिश्चापि सर्वशः।
ततः सर्वैर्महाबाहुर्भ्रातृभिः परिवारितः ॥ २-८३-५१ (१४६८६)
प्रविवेश गृहं राज्ञो धृतराष्ट्रस्य धीमतः।
ददर्श तत्र गान्धारीं देवीं पतिमनुव्रताम् ॥ २-८३-५२ (१४६८७)
स्नुषाभिः संवृतां शश्वत्ताराभिरिव रोहिणीम्।
अभिवाद्य स गान्धारीं तया च प्रतिनन्दितः ॥ २-८३-५३ (१४६८८)
ददर्श पितरं वृद्धं प्रज्ञाचक्षुषमीश्वरम् ॥ २-८३-५४ (१४६८९)
राज्ञा मूर्धन्युपाघ्रातास्ते च कौरवनन्दनाः।
चत्वारः पाण्डवा राजन्भीमसेनपुरोगमाः ॥ २-८३-५५ (१४६९०)
ततो हर्षः समभवत्कौरवाणां विशाम्पते।
तान्दृष्ट्वा पुरुषव्याघ्रान्पाण्डवान्प्रियदर्शनान् ॥ २-८३-५६ (१४६९१)
विविशुस्तेऽभ्यनुज्ञाता रत्नवन्ति गृहाणि च।
ददृशुश्चोपयातारो द्रौपदीप्रमुखाः स्त्रियः ॥ २-८३-५७ (१४६९२)
याज्ञसेन्याः परामृद्धिं दृष्ट्वा प्रज्वलितामिव।
स्नुषास्ता धृतराष्ट्रस्य नातिप्रमनसोऽभवन् ॥ २-८३-५८ (१४६९३)
ततस्ते पुरुषव्याघ्रा गत्वा स्त्रीभिस्तु संविदम्।
कृत्वा व्यायामपूर्वाणि कृत्यानि प्रतिकर्म च ॥ २-८३-५९ (१४६९४)
ततः कृताह्निकाः सर्वे दिव्यचन्दनभूषिताः।

कल्याणमनसश्चैव ब्राह्मणान्स्वस्ति वाच्य च ॥ २-८३-६० (१४६९५)
मनोज्ञमशनं भुक्त्वा विविशुः शरणान्यथ।
उपगीयमाना नारीभिरस्वपन्कुरुपुङ्गवाः ॥ २-८३-६१ (१४६९६)
जगाम तेषां सा रात्रिः पुण्या रतिविहारिणाम्।
स्तूयमानाश्च विश्रान्ताः काले निद्रामथात्यजन् ॥ २-८३-६२ (१४६९७)
सुखोषितास्ते रजनीं प्रातः सर्वे कृताह्निकाः।
सभां रम्यां प्रविविशुः कितवैरभिनन्दिताः ॥ ॥ २-८३-६३ (१४६९८)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि त्र्यशीतितमोऽध्यायः ॥८३ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८३-२ द्विजातिभिस्त्रैवर्णिकैः ॥
२-८३-६ आत्मरतिः आत्मनः स्वस्योत्कर्ष एव रतिर्यस्य नतु धर्ममन्वीक्षते इति भावः ॥
२-८३-७ अव्ययं धनादेरविनाशम् ॥
२-८३-९ दुरोदरा द्यूतकराः ॥
२-८३-१७ आदि अविभक्तिकनिर्देशः ॥
२-८३-५७ यातारः यातरः ॥
२-८३-
५९ संविदं मिथः कथाम् ।व्यायामः श्रमानोदनव्यापारः पूर्वो येषां तानि। प्रतिकर म केशप्रसाधनादिपरिष्कारम् ॥

सभापर्व - अध्याय ०८४
॥ श्रीः ॥
२.८४. अध्यायः ८४

Mahabharata - Sabha Parva - Chapter Topics
शकुनियुधिष्ठिरयोः संवादः ॥१.। द्यूतनिर्धारणम् ॥२.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

प्रविश्य तां सभां पार्था युधिष्ठिरपुरोगमाः।
समेत्य पार्थिवान्सर्वान्पूजार्हानभिपूज्य च ॥ २-८४-१ (१४६९९)
यथावयः समेयाना उपविष्टा यथार्हतः।

आसनेषु विचित्रेषु स्पर्द्ध्यास्तरणवत्सु च ॥ २-८४-२ (१४७००)
तेषु तत्रोपविष्टेषु सर्वेष्वथ नृपेषु च।
शकुनिः सौबलस्तत्र युधिष्ठिरमभाषत ॥ २-८४-३ (१४७०१)
शकुनिरुवाच ॥ २-८४-४क्ष् (१५५२)
उपस्तीर्णा सभा राजन्सर्वे त्वयि कृतक्षणाः।
अक्षानुप्त्वा देवनस्य समयोऽस्तु युधिष्ठिर ॥ २-८४-४ (१४७०२)
युधिष्ठिर उवाच। २-८४-५क्ष् (१५५३)
नितिर्देवनं पापं न क्षात्रोऽत्र पराक्रमः।
न च नीतिर्ध्रुवा राजन्किं त्वं द्यूतं प्रशंससि ॥ २-८४-५ (१४७०३)
न हि मानं प्रशंसन्ति निकृतौ कितवस्य हि।
शकुने मैवं नोऽजैषीरमार्गेण नृशंसवत् ॥ २-८४-६ (१४७०४)
शकुनिरुवाच। २-८४-७क्ष् (१५५४)
यो वेत्ति सङ्ख्या निकृतौ विधिज्ञ-
श्चेष्टास्वखिन्नः कितवोऽक्षजासु।
महामतिर्यश्च जानाति द्यूतं
स वै सर्वं सहते प्रक्रियासु ॥ २-८४-७ (१४७०५)
अक्षग्लहः सोऽभिभवेत्परं न-
स्तेनैव दोषो भवतीह पार्थ।
दीव्यामहे पार्थिव मा विशङ्कां
कुरुष्व पाणं च चिरं च मा कृथाः ॥ २-८४-८ (१४७०६)
युधिष्ठिर उवाच। २-८४-९क्ष् (१५५५)
एवमाहायमसितो देवलो मुनिसत्तमः।
इमानि लोकद्वाराणि यो वै भ्राम्यति सर्वदा ॥ २-८४-९ (१४७०७)
इदं वै देवनं पापं निकृत्या कितवैः सह।
धर्मेण तु जयो युद्धे तत्परं न तु देवनम् ॥ २-८४-१० (१४७०८)
नार्या म्लेच्छन्ति भाषाभिर्मायया न चरन्त्युत।
अजिह्ममशठं युद्धमेतत्सत्पुरुषव्रतम् ॥ २-८४-११ (१४७०९)
शक्तितो ब्राह्मणार्थाय शिक्षितुं प्रयतामहे।
तद्वै वित्तं मातिदेवीर्माजैषीः शकुने परान् ॥ २-८४-१२ (१४७१०)
निकृत्या कामये नाहं सुखान्युत धनानि वा।
कितवस्येह कृतिनो वृत्तमेतन्न पूज्यते ॥ २-८४-१३ (१४७११)
शकुनिरुवाच। २-८४-१४क्ष् (१५५६)
श्रोत्रियः श्रोत्रियानेति निकृत्यैव युधिष्ठिर।
विद्वानविदुषोऽभ्येति नाहुस्तां निकृतिं जनाः ॥ २-८४-१४ (१४७१२)
अक्षैर्हि शिक्षितोऽभ्येति निकृत्यैव युधिष्ठिर।
विद्वानविदुषोऽभ्येति नाहुस्तां निकृतिं जनाः ॥ २-८४-१५ (१४७१३)

अकृतास्त्रं कृतास्त्रश्च दुर्बलं बलवत्तरः।
एवं कर्मसु सर्वेषु निकृत्यैव युधिष्ठिरः।
विद्वानविदुषोभ्येति नाहुस्तां निकृतिं जनाः ॥ २-८४-१६ (१४७१४)
एवं त्वं मामिहाभ्येत्य निकृतिं यदि मन्यसे।
देवनाद्विनिवर्तस्व यदि ते विद्यते भयम् ॥ २-८४-१७ (१४७१५)
युधिष्ठिर उवाच ॥ २-८४-१८क्ष् (१५५७)
आहूतो न निवर्तेयमिति मे व्रतमाहितम्।
विधिश्च बलवान्राजन्दिष्टस्यास्मि वशे स्थितः ॥ २-८४-१८ (१४७१६)
अस्मिन्समागमे केन देवनं मे भविष्यति।
प्रतिपाणश्च कोऽन्योस्ति ततो द्यूतं प्रवर्तताम् ॥ २-८४-१९ (१४७१७)
दुर्योधन उवाच। २-८४-२०क्ष् (१५५८)
अहं दातास्मि रत्नानां धनानां च विशाम्पते।
मदर्थे देविता चायं शकुनिर्मातुलो मम ॥ २-८४-२० (१४७१८)
युधिष्ठिर उवाच ॥ २-८४-२१क्ष् (१५५९)
अन्येनान्यस्य वै द्यूतं विषमं प्रतिभाति मे।
एतद्विद्विन्नुपादत्स्व काममेवं प्रवर्तताम् ॥ ॥ २-८४-२१ (१४७१९)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि चतुरशीतितमोऽध्यायः ॥८४ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८४-५ पापं पापहेतुः ॥
२-८४-८ पाणं पणनीयद्रव्यम् ॥

सभापर्व - अध्याय ०८५
॥ श्रीः ॥
२.८५. अध्यायः ८५

Mahabharata - Sabha Parva - Chapter Topics
भीषमद्रोणादीनां द्यूतसभाप्रवेशः ॥१.।द्यूतीपक्रमः ॥२.।युधिष्ठिरेण पणीकृतानां सर्ववस्तूनां शकुनिना अपहारः

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

उपोह्यमाने द्यूते तु राजानः सर्व एव ते।
धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां ततः ॥ २-८५-१ (१४७२०)
भीष्मो द्रोणः कृपश्चैव विदुरश्च महामतिः।
नातिप्रीतेन मनसा तेऽन्ववर्तन्त भारत ॥ २-८५-२ (१४७२१)
ते द्वन्द्वशः पृथक्चैव सिंहग्रीवा महौजसः।
सिंहासनानि भूरिणी विचित्राणि च भेजिरे ॥ २-८५-३ (१४७२२)
शुशुभे सा सभा राजन्राजभिस्तैः समागतैः।
देवैरिव महाभागैः समवेतैस्त्रिविष्टपम् ॥ २-८५-४ (१४७२३)
सर्वे वेदविदः शूराः सर्वे भास्वरमूर्तयः।
प्रवर्तत महाराज सुहृद्द्यूतमनन्तरम् ॥ २-८५-५ (१४७२४)
युधिष्ठिर उवाच ॥ २-८५-६क्ष् (१५६०)
अयं बुहधनो राजन्सागरावर्तसम्भवः।
मणिर्हारोत्तरः श्रीमान्कनकोत्तमभूषणः ॥ २-८५-६ (१४७२५)
एतद्राजन्मम धनं प्रतिपाणोऽस्ति कस्तव।
येन मां त्वं महाराज धनेन प्रतिदीव्यसे ॥ २-८५-७ (१४७२६)
दुर्योधन उवाच ॥ २-८५-८क्ष् (१५६१)
सन्ति मे मणयश्चैव धनानि सुबहूनि च।
मत्सरश्च न मेऽर्थेषु जयस्वैनं दुरोदरम् ॥ २-८५-८ (१४७२७)
वैशम्पायन उवाच ॥ २-८५-९क्ष् (१५६२)
ततो जग्राह शकुनिस्तानक्षानक्षतत्त्ववित्।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-९ (१४७२८)
युधिष्ठिर उवाच ॥ २-८५-१०क्ष् (१५६३)
मत्त कैतकेनैव यज्जितोऽस्मि दुरोदरे।
शकुने हन्त दीव्यामो ग्लहमानाः परस्परम् ॥ २-८५-१० (१४७२९)
सन्ति निष्कसहस्रस्य भाण्डिन्यो भरिताः शुभाः।
कोशो हिरण्यमक्षय्यं जातरूपमनेकशः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-११ (१४७३०)
वैशम्पायन उवाच ॥ २-८५-१२क्ष् (१५६४)
कौरवाणां कुलकरं ज्येष्ठं पाण्डवमच्युतम्।
इत्युक्तः शकुनिः प्राह जितमित्येव तं नृपम् ॥ २-८५-१२ (१४७३१)
युधिष्ठिर उवाच ॥ २-८५-१३क्ष् (१५६५)
अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः।
सुचक्रोपस्करः श्रीमान्किङ्किणीजालमण्डितः ॥ २-८५-१३ (१४७३२)
संह्रादनो राजरथो य इहास्मानुपावहत्।
जैत्रो रथवरः पुण्यो मेघसागरनिः स्वनः ॥ २-८५-१४ (१४७३३)
अष्टौ यं कुररच्छायाः सदश्वा राष्ट्रसंमताः।

वहन्ति नैषां मुच्येत पदाङ्गमिमुपस्पृशन्।
एतद्राजन्धनं मह्यं तेन दीव्याम्यहं त्वया ॥ २-८५-१५ (१४७३४)
वैशम्पायन उवाच ॥ २-८५-१६क्ष् (१५६६)
एवं श्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-१६ (१४७३५)
युधिष्ठिर उवाच ॥ २-८५-१७क्ष् (१५६७)
शतं दासीसहस्राणि तरुण्यो हेमभद्रिकाः।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः ॥ २-८५-१७ (१४७३६)
महार्हमाल्याभरणाः सुवस्त्राश्चन्दनोक्षिताः।
मणीन्हेम च बिभ्रत्यश्चतुःषष्टिविशारदाः ॥ २-८५-१८ (१४७३७)
अनुसेवां चरन्तीमाः कुशला नृत्तसामसु।
स्नातकानाममात्यानां राज्ञां च मम शासनात्।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-१९ (१४७३८)
वैशम्पायन उवाच ॥ २-८५-२०क्ष् (१५६८)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-२० (१४७३९)
युधिष्ठिर उवाच। २-८५-२१क्ष् (१५६९)
एतावन्ति च दासानां सहस्राण्युत सन्ति मे।
प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा ॥ २-८५-२१ (१४७४०)
प्राज्ञा मेधाविनो दान्ता युवानो मृष्टकुण्डलाः।
पात्रीहस्ता दिवारात्रमतिथीन्भोजयन्त्युत।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-२२ (१४७४१)
वैशम्पायन उवाच ॥ २-८५-२३क्ष् (१५७०)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरभाषत ॥ २-८५-२३ (१४७४२)
युधिष्ठिर उवाच ॥ २-८५-२४क्ष् (१५७१)
सहस्रसङ्ख्या नगा मे मत्तास्तिष्ठन्ति सौबल।
हेमकक्षाः कृतापीडाः पद्मिनो हेममालिनः ॥ २-८५-२४ (१४७४३)
सुदान्ता राजवहनाः सर्वशब्दक्षमा युधि।
ईषादन्ता महाकायाः सर्वे चाष्टकरेणवः ॥ २-८५-२५ (१४७४४)
सर्वे च पुरभेत्तारो नवमेघनिभा गजाः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-२६ (१४७४५)
वैशम्पायन उवाच ॥ २-८५-२७क्ष् (१५७२)
इत्येवंवादिनं पार्थं प्रहसन्निव सौबलः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-२७ (१४७४६)
युधिष्ठिर उवाच ॥ २-८५-२८क्ष् (१५७३)

रथास्तावन्त एवेमे हेमदण्डाः पताकिनः।
हयैर्विनीतैः सम्पन्ना रथिभिश्चित्रयोधिभिः ॥ २-८५-२८ (१४७४७)
एकैको ह्यत्र लभते सहस्रपरमां भृतिम्।
युध्यतोऽयुध्यतो वापि वेतनं मासकालिकम्।
एतद्राजन्म धनं तेन दीव्याम्यहं त्वया ॥ २-८५-२९ (१४७४८)
वैशम्पायन उवाच ॥ २-८५-३०क्ष् (१५७४)
इत्येवमुक्ते वचने कृतवैरो दुरात्मवान्।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-३० (१४७४९)
युधिष्ठिर उवाच ॥ २-८५-३१क्ष् (१५७५)
अश्वांस्तित्तिरिकल्माषान्गान्धर्वान्हेममालिनः।
ददौ चित्ररथस्तुष्टो यांस्तान्गाण्डीवधन्वने ॥ २-८५-३१ (१४७५०)
युद्धे जितः पराभूतः प्रीतिपूर्वमरिन्दमः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-३२ (१४७५१)
वैशम्पायन उवाच ॥ २-८५-३३क्ष् (१५७६)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-३३ (१४७५२)
युधिष्ठिर उवाच ॥ २-८५-३४क्ष् (१५७७)
रथानां शकटानां च श्रेष्ठानां चायुतानि मे।
युक्तान्येव हि तिष्ठन्ति वाहैरुच्चावचैस्तथा ॥ २-८५-३४ (१४७५३)
एवं वर्णस्य वर्णस्य समुच्चीय सहस्रशः।
यथा समुदिता वीराः सर्वे वीरपराक्रमाः ॥ २-८५-३५ (१४७५४)
क्षीरं पिबन्तस्तिष्ठन्ति भुञ्जानाः शालितण्डुलान्।
षष्टिस्तानि सहस्राणि सर्वे विपुलवक्षसः।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-३६ (१४७५५)
वैशम्पायन उवाच ॥ २-८५-३७क्ष् (१५७८)
एतच्छ्रुत्वा व्यवसितो निकृति समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८५-३७ (१४७५६)
युधिष्ठिर उवाच। २-८५-३८क्ष् (१५७९)
ताम्रलोहैः परिवृता निधयो ये चतुः शताः।
पञ्चद्रौणिक एकैकः सुवर्णस्याहतस्य वै ॥ २-८५-३८ (१४७५७)
जातरूपस्य मुख्यस्य नार्घो यस्य हि भारत।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८५-३९ (१४७५८)
वैशम्पायन उवाच ॥ २-८५-४०क्ष् (१५८०)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभापतः ॥ ॥ २-८५-४० (१४७५९)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि पञ्चाशीतितमोऽध्यायः ॥८५ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८५-८ दुरोदरं पणम् ॥
२-८५-११ भाण्डिन्यो मञ्जषाः ॥
२-८५-१७ कम्बवः शङ्खवलयानि । निष्पो वक्षोभूषणम् ॥
२-८५-१८ चतुष्षष्टिकलासु विशारदाः ॥
२-८५-१९ नृत्तसामसु नर्तने गीतिविशेषेषु च ॥
२-८५-२४ कृतपीडाः कृतभूषणाः ॥
२-८५-२५ ईषा लाङ्गलदण्डः । अष्टकरेणवः, अष्टहस्तिनीकाः ॥

सभापर्व - अध्याय ०८६
॥ श्रीः ॥
२.८६. अध्यायः ८६

Mahabharata - Sabha Parva - Chapter Topics
विदुरेण धृतराष्ट्रं प्रति दुर्योधननिन्दापूर्वकं द्यूतोपरमचोदनम् ॥१.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

एवं प्रवर्तिते द्यूते घोरे सर्वापहारिणि।
सर्वसंशयनिर्मोक्ता विदुरो वाक्यमब्रवीत् ॥ २-८६-१ (१४७६०)
महाराज विजानीहि यत्त्वां वक्ष्यामि भारत।
मुमूर्षोरौषधमिव न रोचेतापि ते श्रुतम् ॥ २-८६-२ (१४७६१)
यद्वै पुरा जातमात्रो रुराव
गोमायुवद्विस्वरं पापचेताः।
दुर्योधनो भारतानां कुलघ्नः
सोऽयं युक्तो भवतां कालहेतुः ॥ २-८६-३ (१४७६२)
गृहे वसन्तं गोमायुं त्वं वै मोहान्न बुध्यसे।
दुर्योधनस्य रूपेण शृणु काव्यां गिरं मम ॥ २-८६-४ (१४७६३)
मधु वै माध्विको लब्ध्वा प्रपातं नैव बुध्यते।
आरुह्य तं मज्जति वा पतनं चाधिगच्छति ॥ २-८६-५ (१४७६४)

सोऽयं मत्तोऽक्षद्यूतेन मधुवन्न पीरक्षते।
प्रपातं बुध्यते नैव वैरं कृत्वा महारथैः ॥ २-८६-६ (१४७६५)
विदितं मे महाप्राज्ञ भोजेष्वेवासमञ्जसम्।
पुत्रं संत्यक्तवान्पूर्वं पौराणां हितकाम्यया ॥ २-८६-७ (१४७६६)
अन्धका यादवा भोजाः समेताः कंसमत्यजन्।
नियोगात्तु हते तस्मिन्कृष्णेनामित्रघातिना ॥ २-८६-८ (१४७६७)
एवं ते ज्ञातयः सर्वे मोदमानाः शतं समाः।
त्वन्नियुक्तः सव्यसाची निगृह्णातु सुयोधनम् ॥ २-८६-९ (१४७६८)
निग्रहादस्य पादस्य मोदन्तां कुरवः सुखम्।
काकेनेमांश्चित्रवर्हाञ्शार्दूलान्क्रोष्टुकेन च।
क्रीणीष्व पाण्डवान्राजन्मा मज्जीः शोकसागरे ॥ २-८६-१० (१४७६९)
त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ २-८६-११ (१४७७०)
सर्वज्ञः सर्वभावज्ञः सर्वशत्रुभयङ्करः।
इति स्म भाषते काव्यो जम्भत्यागे महाऽसुरान् ॥ २-८६-१२ (१४७७१)
हिरण्यष्ठीविनः कांश्चित्पक्षिणो वनगोचरान्।
गृहे किल कृतावासाँल्लोभाद्राजा न्यपीडयत्।
स चोपभोगलोभान्धो हिरण्यार्थी परन्तप ॥ २-८६-१३ (१४७७२)
आयतिं च तदात्वं च उभे सद्यो व्यनाशयत्।
तदर्थकामस्तद्वत्त्वं माद्रुहः पाण्डवान्नृप ॥ २-८६-१४ (१४७७३)
मोहात्मा तप्स्यसे पश्चात्पत्रिहा पुरुषो यथा।
जातञ्जातं पाण्डवेभ्यः पुष्पमादत्स्व भारत ॥ २-८६-१५ (१४७७४)
मालाकार इवारामे स्नेहं कुर्वन्पुनः पुनः।
वृक्षानङ्गारकारीव मैनाद्याक्षीः समूलकान्।
मा गमः समुतामात्यः सबलश्च यमक्षयम् ॥ २-८६-१६ (१४७७५)
समवेतान्हि कः पार्थान्प्रतियुध्येत भारत।
मरुद्भिः सहितो राजन्नपि साक्षान्मरुत्पतिः ॥ २-८६-१७ (१४७७६)
द्यूतं मूलं कलहस्याभ्युपैति
मिथो भेदं महते दारुणाय।
तदा स्थितोऽयं धृतराष्ट्रस्य पुत्रो
दुर्योधनः सृजते वैरमुग्रम् ॥ २-८६-१८ (१४७७७)
प्रातिपेयाः शान्तनवा भीमसेनाः सबाह्लिकाः।
दुर्योधनापराधेन कृच्छ्रं प्राप्स्यन्ति सर्वशः ॥ २-८६-१९ (१४७७८)
दुर्योधनो मदेनैव क्षेमं व्यपोहति।
विषाणं गौरिव मदात्स्वयमारुजतेत्मनः ॥ २-८६-२० (१४७७९)
यश्चित्तमन्वेति परस्य राजन्

वीरः कविः स्वामवमत्य दृष्टिम्।
नावं समुद्र इव बालनेत्रा-
मारुह्य घोरे व्यसने निमज्जेत् ॥ २-८६-२१ (१४७८०)
दुर्योधनो ग्लहते पाण्डवेन
प्रीयायसे त्वं जयतीति तच्च।
अतिनर्मा जायते संप्रहारो
यतो विनाशः समुपैति पुंसाम् ॥ २-८६-२२ (१४७८१)
आकर्षस्तेऽवाक्फलः सुप्रणीतो
हृदि प्रौढो मन्त्रपदः समाधिः।
युधिष्ठिरेण कलहस्तवाय-
मचिन्तितोऽभिमतः स्वबन्धुना ॥ २-८६-२३ (१४७८२)
प्रातिपेयाः शान्तनवाः शृणुध्वं
काव्यां वाचं संसदि कौरवाणाम्।
वैश्वानरं प्रज्वलितं सुघोरं
मा यास्यध्वं मन्दमनुप्रपन्नाः ॥ २-८६-२४ (१४७८३)
यदा मन्युं पाण्डवोऽजातशत्रु-
र्न संयच्छेदक्षमदाभिभूतः।
वृकोदरः सव्यसाची यमौ च
कोऽत्र द्वीपः स्यात्तुमुले वस्तदानीम् ॥ २-८६-२५ (१४७८४)
महाराज प्रभवस्त्वं धनानां
पुरा द्यूतान्मनसा यावदिच्छेः।
बहुवित्तान्पाण्डवांश्चेज्जयस्त्वं
किं ते तत्स्याद्वसु विन्देह पार्थान् ॥ २-८६-२६ (१४७८५)
जानीमहे देवितं सौबलस्य
वेद द्यूते निकृतिं पार्वतीयः।
यतः प्राप्तः शकुनिस्तत्र यातु
मा यूयुधो भारत पाण्डवेयान् ॥ ॥ २-८६-२७ (१४७८६)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि षडशीतितमोऽध्यायः ॥ ८६.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-८६-४ काव्यं कविना शुक्रेणोक्तां नीतिगिरम् ॥
२-८६-५ माध्विको मधुपण्यवान् ।प्रपातं भृगुम् ॥
२-८६-८ नियोगाद्दैवयोगात् ॥
२-८६-१० चित्रवर्हान् मयूरान् ॥

२-८६-१४ आयतिमुत्तरकालम् । तदात्वं सांप्रतम्। तत्तस्मात्। अर्थकामो धनकामः ॥
२-८६-१५ पत्रिहा पक्षिहा ॥
२-८६-२१ बालनेत्रामव्युत्पन्ननेतृकाम् ॥
२-८६-२२ ग्लहते पणं करोति । प्रीयायसे अतिशयेन प्रीयसे ॥
२-८६-२३ आकर्षो द्यूतम् ॥
२-८६-२६ जयः अजयः ॥

सभापर्व - अध्याय ०८७
॥ श्रीः ॥
२.८७. अध्यायः ८७

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनेन विदुरोपालम्भः ॥ १. । विदुरेण धृतराष्ट्रस्य हितोपदेशः ॥ २. ।

Mahabharata - Sabha Parva - Chapter Text

दुर्योधन उवाच ॥

परेषामेव यशसा श्लोघसे त्वं
सदा क्षत्तः कुत्सयन्धार्तराष्ट्रान्।
जानीमहे विदुर यत्प्रियस्त्वं
बालानिवास्मानवमन्यसे नित्यमेव ॥ २-८७-१ (१४७८७)
स विज्ञेयः पुरुषोऽन्यत्रकामो
निन्दाप्रशंसे हि तथा युनक्ति।
जिह्वाऽऽत्मनो हृदयस्थं व्यनक्ति
जानीमहे त्वन्मनसः प्रातिकूल्यम् ॥ २-८७-२ (१४७८८)
उत्सङ्गे च व्याल इवाहितोऽसि
मार्जरवत्पोषकं चोपहंसि।
भर्तृघ्नं त्वां न हि पापीय आहु-
स्तस्मात्क्षत्तः किं न बिभेषि पापात् ॥ २-८७-३ (१४७८९)
जित्वा शत्रून्फलमाप्तं महद्वै
माऽस्मान्क्षत्तः परुषाणीह वोचः।
द्विषद्भिस्त्वं सम्प्रयोगाभिनन्दी
मुहुर्द्वेषं यासि नः सम्प्रयोगात् ॥ २-८७-४ (१४७९०)
अमित्रतां याति नरोऽक्षमं ब्रुव-

न्निगूहते गुह्यममित्रसंस्तवे।
तदाश्रितोऽपत्रप किं नु बाधसे
यदिच्छसि त्वं तदिहाभिभाषतसे ॥ २-८७-५ (१४७९१)
मा नोऽवमंस्था विद्म मानस्तवेदं
शिक्षस्व बुद्धिं स्थविराणां सकाशात्।
यशो रक्षस्व विदुर सम्प्रणीतं
मा व्यापृतः परकार्येशु भूस्त्वम् ॥ २-८७-६ (१४७९२)
अहं कर्तेति विदूर मा च मंस्था
मा नो नित्यं परुषाणीह वोचः।
न त्वां पृच्छामि विदुर यद्धितं मे
स्वस्ति क्षत्तर्मा तितिक्षून् क्षिण् त्वम् ॥ २-८७-७ (१४७९३)
एकः शास्ता न द्वितीयोऽस्ति शास्ता
गर्भे शयानं पुरुषं शास्ति शास्ता।
तेनानुशिष्टः प्रवणादिवाम्भो
यथा नियुक्तोऽस्ति तथा भवामि ॥ २-८७-८ (१४७९४)
भिनत्ति शिरसा शैलमहिं भोजयते च यः।
धीरेव कुरुते तस्य कार्याणामनुशासनम्।
यो बलादनुशास्तीह सोऽमित्रं तेन विन्दति ॥ २-८७-९ (१४७९५)
मित्रतामनुवृत्तं तु समुपेक्षत्यपण्डितः।
दीप्य यः प्रदीप्ताग्निं प्राच्किरं नाभिधावति।
भस्मापि न स विन्देत शिष्टं क्वचन भारत ॥ २-८७-१० (१४७९६)
न वासयेत्पारवर्ग्यं द्विषन्तं
विशेषतः क्षत्तरहितं मनुप्यम्।
स यत्रेच्छसि विदुर तत्र गच्छ
सुसान्त्विता ह्यसती स्त्री जहाति ॥ २-८७-११ (१४७९७)
विदुर उवाच ॥ २-८७-१२क्ष् (१५८१)
एतावता पुरुषं ये त्यजन्ति
तेषां सख्यमन्तवद्ब्रूहि राजन्।
राज्ञां हि चित्तानि परिप्लुतानि
सान्त्वं दत्वा मुसलैर्घातयन्ति ॥ २-८७-१२ (१४७९८)
अबालत्वं मन्यसे राजपुत्र
बालोऽहमित्येव सुमन्दबुद्धे।
यः सौहृदे पुरुषं स्थापयित्वा
पश्चादेनं दूषयते स बालः ॥ २-८७-१३ (१४७९९)
न श्रेयसे नीयते मन्दबुद्धिः
स्त्री श्रोत्रियस्येव गृहे प्रदुष्टा।

ध्रुवं न रोचेद्भरतर्षभस्य
पतिः कुमार्या इव षष्टिवर्षः ॥ २-८७-१४ (१४८००)
अतः प्रियं चेदनुकाङ्क्षसे त्वं
सर्वेषु कार्येषु हिताहितेषु
स्त्रियश्च राजञ्जडपङ्गुकांश्च
पृच्छ त्वं वै तादृशांश्चैव सर्वान् ॥ २-८७-१५ (१४८०१)
लभ्यते खलु पापीयान्नरोऽनु प्रियवागिह।
अप्रियस्य हि पथ्यस्य वक्ता श्रोता च दुर्लभः २-८७-१६ (१४८०२)
यस्तु धर्मपरश्च स्याद्धित्वा भर्तुः प्रियाप्रिये।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥ २-८७-१७ (१४८०३)
अव्याधइजं कटुजं तीक्ष्णमुष्णं
यशोमुषं परुषं पूतिगन्धिम्।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज पिब प्रशाम्य ॥ २-८७-१८ (१४८०४)
वैचित्रवीर्यस्य यशो धनं च
वाञ्छाम्यहं सहपुत्रस्य शश्वत्।
यथा तथा तेऽस्तु नमश्चतेऽस्तु
ममापि च स्वस्ति दिशन्तु विप्राः ॥ २-८७-१९ (१४८०५)
आशीविषान्नेत्रविषान्कोपयेन्न च पण्डितः।
एवं तेऽहं वदामीदं प्रयतः कुरुनन्दन ॥ ॥ २-८७-२० (१४८०६)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-८७-३ पापीयः पापीयांसम् ॥
२-८७-११ पारवर्ग्यं शत्रुपक्षजातम् ॥

सभापर्व - अध्याय ०८८
॥ श्रीः ॥
२.८८. अध्यायः ८८

Mahabharata - Sabha Parva - Chapter Topics
सपत्नीभ्रातृकस्य युधिष्ठिरस्य शकुनिना पराजयः ॥ १.।

शकुनिरुवाच ॥

बहुवित्तं पराजैषीः पाण्डवानां युधिष्ठिर।
आचक्ष्व वित्तं कौन्तेय यदि तेऽस्त्यपराजितम् ॥ २-८८-१ (१४८०७)
युधिष्ठिर उवाच ॥ २-८८-२क्ष् (१५८२)
मम वित्तमसङ्ख्येयं यदहं वेद सौबल।
अथ त्वं शकुने कस्माद्वित्तं समनुपृच्छसि ॥ २-८८-२ (१४८०८)
अयुतं प्रयुतं चैव शङ्कुं पद्मं तथार्बुदम्।
खर्वं शङ्खं निखर्वं च महापद्मं च कोटयः ॥ २-८८-३ (१४८०९)
मध्यं चैव परार्धं च सपरं चात्र पण्यताम्।
एतन्मम धनं राजंस्तेन दीव्याम्यहं त्वया ॥ २-८८-४ (१४८१०)
वैशम्पायन उवाच ॥ २-८८-५क्ष् (१५८३)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-५ (१४८११)
युधिष्ठिर उवाच ॥ २-८८-६क्ष् (१५८४)
गवाश्वं बहुधेनूकमसङ्ख्येयमजाविकम्।
यत्किञ्चिदनु पर्णाशां प्राक् सिन्धोरपि सौबल।
एतन्मम धनं सर्वं तेन दीव्याम्यहं त्वया ॥ २-८८-६ (१४८१२)
वैशम्पायन उवाच ॥ २-८८-७क्ष् (१५८५)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-७ (१४८१३)
युधिष्ठिर उवाच ॥ २-८८-८क्ष् (१५८६)
पुरं जनपदो भूमिरब्राह्मणधनैः सह।
अब्राह्मणाश्च पुरुषा राजञ्शिष्टं धनं मम।
एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ॥ २-८८-८ (१४८१४)
वैशम्पायन उवाच ॥ २-८८-९क्ष् (१५८७)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-९ (१४८१५)
युधिष्ठिर उवाच ॥ २-८८-१०क्ष् (१५८८)
राजपुत्रा इमे राजञ्छोमन्ते यैर्विभूषिताः।
कुम्डलानि च निष्काश्च सर्वं राजविभूषणम्।
एतन्मम धनं राजंस्तेन दीव्याम्यहं त्वया ॥ २-८८-१० (१४८१६)
वैशम्पायन उवाच ॥ २-८८-११क्ष् (१५८९)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।

जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-११ (१४८१७)
युधिष्ठिर उवाच ॥ २-८८-१२क्ष् (१५९०)
श्यामो युवा लोहिताक्षः सिंहस्कन्धो महाभुजः।
नकुलो ग्लह एवैकी विद्धयेतन्मम तद्धनम् ॥ २-८८-१२ (१४८१८)
शकुनिरुवाच। २-८८-१३क्ष् (१५९१)
प्रियस्ते नकुलो राजन्राजपुत्रो युधिष्ठिर।
अस्माकं वशतां प्राप्तो भूयः केनेह दीव्यसे ॥ २-८८-१३ (१४८१९)
वैशम्पायन उवाच ॥ २-८८-१४क्ष् (१५९२)
एवमुक्त्वा तु तानक्षाञ्शकुनिः प्रत्यदीव्यत।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-१४ (१४८२०)
युधिष्ठिर उवाच ॥ २-८८-१५क्ष् (१५९३)
अयं धर्मान्सहदेवोऽनुशास्ति
लोके ह्यस्मिन्पण्डिताख्यां गतश्च।
अनर्हता राजपुत्रेण तेन
दीव्याम्यहं चाप्रियवत्प्रियेण ॥ २-८८-१५ (१४८२१)
वैशम्पायन उवाच ॥ २-८८-१६क्ष् (१५९४)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-१६ (१४८२२)
शकुनिरुवाच ॥ २-८८-१७क्ष् (१५९५)
माद्रीपुत्रौ प्रियौ राजंस्तवेमौ विजितौ मया।
गरीयांसौ तु मन्ये भीमसेनधनञ्जयौ ॥ २-८८-१७ (१४८२३)
युधिष्ठिर उवाच। २-८८-१८क्ष् (१५९६)
अधर्मं चरसे नूनं यो नावेक्षसि वै नयम्।
यो नः सुमनसां मूढ विभेदं कर्तुमिच्छसि ॥ २-८८-१८ (१४८२४)
शकुनिरुवाच ॥ २-८८-१९क्ष् (१५९७)
गर्ते मत्तः प्रपतते प्रमत्तः स्थाणुमृच्छति।
ज्येष्ठो राजन्वरिष्ठोऽसि नमस्ते भरतर्षभ ॥ २-८८-१९ (१४८२५)
स्वप्ने तानि न दृश्यन्ते जाग्रतो वा युधिष्ठिर।
कितवा यानि दीव्यन्तः प्रलपन्त्युत्कटा इव ॥ २-८८-२० (१४८२६)
युधिष्ठिर उवाच ॥ २-८८-२१क्ष् (१५९८)
यो नः सङ्ख्ये नौरिव पारनेता
जेता रिपूणां राजपुत्रस्तरस्वी।
अनर्हता लोकवीरेण तेन
दीव्याम्यहं शकुने फाल्गुनेन ॥ २-८८-२१ (१४८२७)
वैशम्पायन उवाच ॥ २-८८-२२क्ष् (१५९९)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।

जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-२२ (१४८२८)
शकुनिरुवाच। २-८८-२३क्ष् (१६००)
अयं मया पाण्डवानां धनिर्धरः
पराजितः पाण्डवः सव्यसाची।
भीमेन राजन्दयितेन दीव्य
यत्कैतवं पाण्डव तेऽवशिष्टम् ॥ २-८८-२३ (१४८२९)
युधिष्ठिर उवाच ॥ २-८८-२४क्ष् (१६०१)
यो नो नेता यो युधि नः प्रणेता
यथा वज्री दानवशत्रुरेकः।
तिर्यक्प्रेक्षी सन्नतभ्रूर्महात्मा
सिंहस्कन्धो यश्च सदाऽत्यमर्षी ॥ २-८८-२४ (१४८३०)
बलेन तुल्यो यस्यप पुमान्न विद्यते
गदाभृतामग्र्य इहारिमर्दनः।
अनर्हता राजपुत्रेण तेन
दीव्याम्यहं भीमसेनेन राजन् ॥ २-८८-२५ (१४८३१)
वैशम्पायन उवाच ॥ २-८८-२६क्ष् (१६०२)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-२६ (१४८३२)
शकुनिरुवाच। २-८८-२७क्ष् (१६०३)
बहुवित्तं पराजैषीर्भ्रातॄंश्च सहयद्विपान्।
आचक्ष्व वित्तं कौन्तेय यदि तेऽस्त्यपराजितम् ॥ २-८८-२७ (१४८३३)
युधिष्ठिर उवाच ॥ २-८८-२८क्ष् (१६०४)
अहं विशिष्टः सर्वेषां भ्रातॄणां दयितस्तथा।
कुर्यामहं जितः कर्म स्वयमात्मन्युपप्लुते ॥ २-८८-२८ (१४८३४)
वैशम्पायन उवाच ॥ २-८८-२९क्ष् (१६०५)
एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः।
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ २-८८-२९ (१४८३५)
शकुनिरुवाच। २-८८-३०क्ष् (१६०६)
एतत्पापिष्ठमकरोर्यदात्मानं पराजयेः।
शिष्टे सति धने राजन्पाप आत्मपराजयः ॥ २-८८-३० (१४८३६)
वैशम्पायन उवाच ॥ २-८८-३१क्ष् (१६०७)
एवमुक्त्वा मताक्षस्तान् ग्लहे सर्वानवस्थितान्।
पराजयल्लोकवीरानुक्त्वा राज्ञां पृथक् पृथक् ॥ २-८८-३१ (१४८३७)
शकुनिरुवाच ॥ २-८८-३२क्ष् (१६०८)
अस्ति ते वै प्रिया राजन् ग्लह एकोऽपराजितः।
पणस्व कृष्णां पाञ्चालीं तयात्मानं पुनर्जय ॥ २-८८-३२ (१४८३८)

युधिष्ठिर उवाच ॥ २-८८-३३क्ष् (१६०९)
नैव ह्रस्वा न महती न कृशा नातिरोहिणी।
नीलकुञ्चितकशी च तया दीव्याम्यहं त्वया ॥ २-८८-३३ (१४८३९)
शारदोत्पलपत्राक्ष्या शारदोत्पलगन्धया।
शारदोत्पलसेविन्या रूपेण श्रीसमानया ॥ २-८८-३४ (१४८४०)
तथैव स्यादानुशंस्यात्तथ स्याद्रूपसम्पदा।
तथा स्याच्छीलसम्पत्त्या यामिच्छेत्पुरुषः स्त्रियम् ॥ २-८८-३५ (१४८४१)
सर्वैर्गुणैर्हि सम्पन्नामनुकूलां प्रियंवदाम्।
यादृशीं धर्मकामार्थसिद्धिमिच्छेन्नरः स्त्रियम् ॥ २-८८-३६ (१४८४२)
चरमं संविशति या प्रथमं प्रतिबुध्यते।
आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम् ॥ २-८८-३७ (१४८४३)
आभाति पद्मवद्वक्त्रं सस्वेदं मल्लिकेव च।
वेदीमध्या दीर्घकेशी ताम्रास्या नातिलोमशा ॥ २-८८-३८ (१४८४४)
तयैवंविधया राजन्पाञ्चाल्याहं सुमध्यमा।
ग्लहं दीव्यामि चार्वङ्ग्या द्रौपद्या हन्त सौबल ॥ २-८८-३९ (१४८४५)
वैशम्पायन उवाच ॥ २-८८-४०क्ष् (१६१०)
एवमुक्ते तु वचने धर्मराजेन धीमता।
धिग्धिगित्येव वृद्धानां सभ्यानां निः सृता गिरः ॥ २-८८-४० (१४८४६)
चुक्षुभे सा सभा राजन्राज्ञां सञ्जज्ञिरे शुचः।
भीष्मद्रोणकृपादीनां स्वेदश्च समजायत ॥ २-८८-४१ (१४८४७)
शिरो गृहीत्वा विदुरो गतसत्व इवाभवत्।
आस्ते ध्यायन्नधोवक्त्रो निः श्वसन्निव पन्नगः ॥ २-८८-४२ (१४८४८)
ग्बाह्लीकः सोमदत्तश्च प्रातिपेयश्च सञ्जयः।
द्रौणिर्भूरिश्रवाश्चैव युयुत्सुर्धृतराष्ट्रजः।
आसुर्वीक्ष्य त्वधोवक्त्रा निश्वसन्त इवोरगाः'॥ २-८८-४३ (१४८४९)
धृतराष्ट्रस्तु संहृष्टः पर्यपृच्छत्पुनः पुनः।
किं जितं किं जितमिति ह्याकारं नाभ्यरक्षत ॥ २-८८-४४ (१४८५०)
जहर्ष कर्णोऽतिभृशं सह दुःशासनादिभिः।
इतरेषां तु सभ्यानां नेत्रेभ्यः प्रापतञ्जलम् ॥ २-८८-४५ (१४८५१)
सौबलस्त्वभिधायैव जितकाशी मदोत्कटः।
जितमित्येव तानक्षान्पुररेवान्वपद्यत ॥ ॥ २-८८-४६ (१४८५२)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि अष्टाशीतितमोऽध्यायः ॥८८.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-८८-६ पर्णाशा नदी ॥
२-८८-२३ कैतव कितवेभ्य आहर्तव्यं धनम् ॥
२-८८-४६ जितकाशी जयशोभी ॥

सभापर्व - अध्याय ०८९
॥ श्रीः ॥
२.८९. अध्यायः ८९

Mahabharata - Sabha Parva - Chapter Topics
दुश्शासनेन द्रौपद्याः सभां प्रत्यानयनम् ॥ १.। द्रौपद्या सभ्यान्प्रति प्रश्नः ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

दुर्योधन उवाच ॥

एहि क्षत्तर्द्रौपदीमानस्व
प्रियां भार्यां संमतां पाण्डवानाम्।
संमार्जतां वेश्म परैतु शीघ्रं
तत्रास्तु दासीभिरपुण्यशीला ॥ २-८९-१ (१४८५३)
विदुर उवाच ॥ २-८९-२क्ष् (१६११)
दर्विभाषं भाषितं त्वादृशेन
न मन्द सम्बुद्ध्यसि पाशबद्धः।
प्रपाते त्वं लम्बमानो न वेत्सि
व्याघ्रान्मृगः कोपयसेऽतिवेलम् ॥ २-८९-२ (१४८५४)
आशीविषास्ते शिरसि पूर्णकोपा महाविषाः।
मा कोपिष्ठाः सुमन्दात्मन्मा गमस्त्वं यमक्षयम् ॥ २-८९-३ (१४८५५)
न हि दासीत्वमापन्ना कृष्णा भवितुमर्हति।
जनीशेन हि राज्ञैषा पणे न्यस्तेति मे मतिः ॥ २-८९-४ (१४८५६)
अयं दत्ते वेणुरिवात्मघाती
फलं राजा धृतराष्ट्रस्य पुत्रः।
द्यूतं हि वैराय महाभयाय
मत्तो न बुध्यत्ययमन्तकालम् ॥ २-८९-५ (१४८५७)
नारुन्तुदः स्यान्न नृशंसवादी
न हीनताः परमभ्याददीत।
ययास्य वाचा पर उद्विजेत

न तां वदेदुशती पापलोक्याम् ॥ २-८९-६ (१४८५८)
समुच्चरन्त्यतिवादाश्च वक्त्रा-
ध्यौराहतः शौचति रात्र्यहानि।
परस्य नामर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ २-८९-७ (१४८५९)
अजो हि शस्त्रमगिलत्किलैकः
शस्त्रे विपन्ने शिरसास्य भूमौ।
निकृन्तनं स्वस्य कण्ठस्य घोरं
तद्वद्वैरं मा कृथाः पाण्डुपुत्रैः ॥ २-८९-८ (१४८६०)
न किञ्चिदित्थं प्रवदन्ति पार्था
वनेचरं वा गृहमेधिनं वा।
तपस्विनं वा परिपूर्णविद्यं
भषन्ति हैवं श्वनराः सदैव ॥ २-८९-९ (१४८६१)
द्वारं सुघोरं नरकस्य जिह्मं
न बुध्यते धृतराष्ट्रस्य पुत्रः।
तमन्वेतारो बहवः कुरूणां
द्यूतोदये सह दुःशासनेन ॥ २-८९-१० (१४८६२)
मज्जन्त्यलाबूनि शिलाः प्लवन्ते
मुह्यन्ति नावोम्भसि शश्वदेव।
मूढो राजा धृतराष्ट्रस्य पुत्रो
न मे वाचः पथ्यरूपाः शृणोति ॥ २-८९-११ (१४८६३)
अन्तो नूं भवितायं करूणां
सुदारुणः सर्वहरो विनाशः।
वाचः काव्याः सुहृदां पथ्यरूपा
न श्रूयन्ते वर्धते लोभ एव ॥ २-८९-१२ (१४८६४)
वैशम्पायन उवाच ॥ २-८९-१३क्ष् (१६१२)
धिगस्तु क्षत्तारमिति ब्रुवाणो
दर्पेण मत्तो धृतराष्ट्रस्य पुत्रः।
अवैक्षत प्रातिकामीं सभाया-
मुवाच चैनं परमार्यमध्ये ॥ २-८९-१३ (१४८६५)
दुर्योधन उवाच ॥ २-८९-१४क्ष् (१६१३)
त्वं प्रातिकामिन्द्रौपदीमानयस्व
न ते भयं विद्यते पाण्डवेभ्यः।
क्षत्ता ह्ययं विवदत्येव भीतो
न चास्माकं वृद्धिकामः सदैव ॥ २-८९-१४ (१४८६६)
वैशम्पायन उवाच ॥ २-८९-१५क्ष् (१६१४)

एवमुक्तः प्रातिकामी स सूतः
प्रायाच्छीघ्रं राजवचो निशम्य।
प्रविश्य च श्वेव हि सिंहगेष्ठं
समासदन्महिषीं पाण्डवानाम् ॥ २-८९-१५ (१४८६७)
प्रातिकाम्युवाच। २-८९-१६क्ष् (१६१५)
युधिष्ठिरो द्यूतमदेन मत्तो
दुर्योधनो द्रौपदि त्वामजैषीत्।
सा त्वं प्रपद्यस्व धृतराष्ट्रस्य वेश्म
नयामि त्वां कर्मणि याज्ञसेनि ॥ २-८९-१६ (१४८६८)
द्रौपद्युवाच ॥ २-८९-१७क्ष् (१६१६)
कथं त्वेवं वदसि प्रातिकामि-
को हि दीव्येद्भार्यया राजपुत्रः।
मूडो राजा द्यूतमदेन मत्तो
ह्यभून्नान्यत्कैतवमस्य किञ्चित् ॥ २-८९-१७ (१४८६९)
प्रातिकाम्युवाच ॥ २-८९-१८क्ष् (१६१७)
यदा नाभूत्कैतवमन्यदस्य
तदाऽदेवीत्पाण्डवोऽजातशत्रुः।
न्यस्ताः पूर्वं भ्रातरस्तेन राज्ञा
स्वयं चात्मा त्वमथो राजपुत्रि ॥ २-८९-१८ (१४८७०)
द्रौपद्युवाच ॥ २-८९-१९क्ष् (१६१८)
गच्छ त्वं कितवं गत्वा सभायां पृच्छ सूतज।
किं तु पूर्वं पराजैषीरात्मानमथवा नु माम् ॥ २-८९-१९ (१४८७१)
एतज्ज्ञात्वा समागच्छ ततो मां नयं सूतज।
ज्ञात्वा चिकीर्षितमहं राज्ञो यास्यामि दुःखिता ॥ २-८९-२० (१४८७२)
वैशम्पायन उवाच ॥ २-८९-२१क्ष् (१६१९)
सभां गत्वा स चोवाच द्रौपद्यस्तद्वचस्तदा।
युधिष्ठिरं नरेनद्राणां मध्ये स्थितमिदं वचः ॥ २-८९-२१ (१४८७३)
कस्येशो नः पराजैषीरिति त्वामाह द्रौपदी।
किं नु पूर्वं पराजैषीरात्मानमथवापि माम् ॥ २-८९-२२ (१४८७४)
वैशम्पायन उवाच ॥ २-८९-२३क्ष् (१६२०)
युधिष्ठिरस्तु निश्चेता गतसत्व इवाभवत्।
न तं सूतं प्रत्युवाच वचनं साध्वसाधु वा ॥ २-८९-२३ (१४८७५)
दुर्योधन उवाच ॥ २-८९-२४क्ष् (१६२१)
इहैवागत्य पाञ्चाली प्रश्नमेनं प्रभाषताम्।
इहैव सर्वे शृण्वन्तु तस्याश्चैतस्य यद्वचः ॥ २-८९-२४ (१४८७६)
वैशम्पायन उवाच ॥ २-८९-२५क्ष् (१६२२)

स गत्वा राजभवनं दुर्योधनवशानुगः।
उवाच द्रौपदीं सूतः प्रातिकामी व्यथन्निव ॥ २-८९-२५ (१४८७७)
सभ्यास्त्वमी राजपुत्र्याह्वयन्ति
मन्ये प्राप्तः संशयः कौरवाणाम्।
न वै समृद्धिं पालयते लघीयान्
यस्त्वां सभां नेष्यति राजपुत्रि ॥ २-८९-२६ (१४८७८)
द्रौपद्युवाच ॥ २-८९-२७क्ष् (१६२३)
एवं नूनं व्यदधात्संविधाता
स्पर्शावुभौ स्पृशतो वृद्धबालौ।
धर्मं त्वेकं परमं प्राह लोके
स नः शमं धास्यति गोप्यमानः ॥ २-८९-२७ (१४८७९)
सोऽयं धर्मो मा त्यगात्कौरवान्वै
सभ्यान्गत्वा पृच्छ धर्म्यं वचो मे।
ते मां ब्रूयुर्निश्चितं तत्करिष्ये
धर्मात्मानो नीतिमन्तो वरिष्ठाः ॥ २-८९-२८ (१४८८०)
वैशम्पायन उवाच ॥ २-८९-२९क्ष् (१६२४)
श्रुत्वा सूतस्तद्वचो याज्ञसेन्याः
सभां गत्वा प्राह वाक्यं तदानीम्।
अधोमुखास्ते न च किञ्चिदूचु-
र्निर्बन्धं तं धार्तराष्ट्रस्य बुद्ध्वा ॥ २-८९-२९ (१४८८१)
युधिष्ठिरस्तु तच्छ्रुत्वा दुर्योधनचिकीर्षितम्।
द्रौपद्याः संमतं दूतं प्राहिणोद्भरतर्षभ ॥ २-८९-३० (१४८८२)
एकवस्त्र त्वधोनीवो रोदमाना रजस्वला।
सभामागम्य पाञ्चालि श्वशुरस्याग्रतो भव ॥ २-८९-३१ (१४८८३)
अथ त्वामागतां दृष्ट्वा राजपुत्रीं सभां तदा।
सभ्याः सर्वे विनिन्देरन्मनोभिर्धृतराष्ट्रजम् ॥ २-८९-३२ (१४८८४)
वैशम्पायन उवाच ॥ २-८९-३३क्ष् (१६२५)
स गत्वा त्वरितं दूतः कृष्णाया भवनं नृप।
न्यवेदयन्मतं धीमान्धर्मराजस्य निश्चितम् ॥ २-८९-३३ (१४८८५)
पाण्डवाश्च महात्मानो दीना दुःखसमन्विताः।
सत्येनातिपरीताङ्गा नोदीक्षन्ते स्म किञ्चन ॥ २-८९-३४ (१४८८६)
ततस्त्वेषां मुखमालोक्य राजा
दुर्योधनः सूतमुवाच हृष्टः।
इहैवैतामानय प्रातिकामिन्
प्रत्यक्षमस्याः कुरवो ब्रुवन्तः ॥ २-८९-३५ (१४८८७)
ततः सूतस्तस्य वशानुगामी

भीतश्च कोपाद्द्रुपदात्मजायाः।
विहाय मानं पुनरेव सभ्या-
नुवाच कृष्णां किमहं ब्रवीमि ॥ २-८९-३६ (१४८८८)
दूर्योधन उवाच। २-८९-३७क्ष् (१६२६)
दुःशासनैष मम सूतपुत्रो
वृकोदरादुद्विजतेऽल्पचेताः।
स्वयं प्रगृह्यानय याज्ञसेनीं
किं ते करिष्यन्त्यवशाः सपत्नाः ॥ २-८९-३७ (१४८८९)
वैशम्पायन उवाच ॥ २-८९-३८क्ष् (१६२७)
ततः समुत्थाय स राजपुत्रः
श्रुत्वा भ्रातुः शासनं रक्तदृष्टिः।
प्रविश्य तद्वेश्म महारथाना-
मित्यब्रवीद्द्रौपदीं राजपुत्रीम् ॥ २-८९-३८ (१४८९०)
एह्येहि पाञ्चालि राजपुत्रीम्।
दुर्योधनं पश्य विमुक्तलज्जा।
कुरून्भजस्वायतपत्रनेत्रे
धर्मेण लब्धाऽसि सभां परैहि ॥ २-८९-३९ (१४८९१)
ततः समुत्थाय सुदूर्मनाः सा
विवर्णमामृज्य मुखं करेण।
आर्ता प्रदुद्राव यतः स्त्रियस्ता
वृद्धस्य राज्ञः कुरुपुङ्गवस्य ॥ २-८९-४० (१४८९२)
ततो जवेनाभिससार रोषा-
द्दुःशासनस्तामभिगर्जमानः।
दीर्घेषु नीलेष्वथ चोर्मिमत्सु
जग्राह केशेषु नरेन्द्रपत्नीम् ॥ २-८९-४१ (१४८९३)
ये राजसूयावभृथे जलेन
महाक्रतौ मन्त्रपूतेन सिक्ताः।
ते पाण्डवानां परिभूय वीर्यं
बलात्प्रमृष्टा धृतराष्ट्रजेन ॥ २-८९-४२ (१४८९४)
स तां पराकृष्य सभासमीप-
मानीय कृष्णामतिदीर्घकेशीम्।
दुःशासनो नाथवतीमनाथव-
च्चकर्ष वायुः कदलीमिवार्ताम् ॥ २-८९-४३ (१४८९५)
सा कृष्यमाणा नमिताङ्गयष्टिः
शनैरुवाचाथ रजस्वलाऽस्मि।
एकं च वासो मम मन्दबुद्धे

सभां नेतुं नार्हसि मामनार्य ॥ २-८९-४४ (१४८९६)
ततोऽब्रवीत्तां प्रसभं निगृह्य
केशेशु कृष्णेषु तदा स कृष्णाम्।
कृष्णं च जिष्णुं च हरिं नरं च
त्रायाय विक्रोशति याज्ञसेनि ॥ २-८९-४५ (१४८९७)
रजस्वला वा भव याज्ञसेनि
एकाम्बरा वाप्यथवा विवस्त्रा।
द्यूते जिता चासि कृताऽसि दासी
दासीषु वासस्व यथोपजोषम् ॥ २-८९-४६ (१४८९८)
वैशम्पायन उवाच। २-८९-४७क्ष् (१६२८)
प्रकीर्णकेशी पतितार्धवस्त्रा
दुःशासनेन व्यवधूयमाना।
ह्रीमत्यमर्षेण च दह्यमाना
शनैरिदं वाक्यमुवाच कृष्णा ॥ २-८९-४७ (१४८९९)
द्रौपद्युवाच। २-८९-४८क्ष् (१६२९)
इमे समायामुपनीतशास्त्राः
क्रियावन्तः सर्व एवेन्द्रकल्पाः।
गुरुस्थाना गुरवश्चैव सर्वे
तेषामग्रे नोत्सहे स्थातुमेवम् ॥ २-८९-४८ (१४९००)
नशंसकर्मंस्त्वमनार्यवृत
मा मा विवस्त्रां कुरु मा विकार्षीः।
न मर्षयेयुस्तव राजपुत्राः
सेन्द्रापि देवा यदि ते सहायाः ॥ २-८९-४९ (१४९०१)
धर्मे स्थितो धर्मसुतो महात्मा
धर्मश्च सूक्ष्मो निपुणोपलक्ष्यः।
वाचापि भर्तुः परमाणुमात्र-
मिच्छामि दोषं न गुणान्विसृज्य ॥ २-८९-५० (१४९०२)
इदं त्वकार्यं कुरुवीरमध्ये
रजस्वलां यत्परिकर्षसे माम्।
न चापि कश्चित्कुरुतेऽत्र कुत्सां
ध्रुवं तवेदं मतमभ्युपेतः ॥ २-८९-५१ (१४९०३)
धिगस्तु नष्टः खलु भारतानां
धर्मस्तथा क्षत्रविदां च वृत्तम्।
यत्र ह्यतीतां कुरुधर्मवेलां
प्रेक्षन्ति सर्वे कुरवः सभायाम् ॥ २-८९-५२ (१४९०४)
द्रोणस्य भीष्मस्य च नास्ति सत्त्वं

क्षत्तुस्तथैवास्य चनास्ति सत्त्वं
क्षत्तुस्तथैवास्य महात्मनोपि।
न लक्षयन्ति कुरुवृद्धमुख्याः ॥ २-८९-५३ (१४९०५)
वैशम्पायन उवाच ॥२-८९-५४क्ष् (१६३०)
तथा ब्रुवन्ती करुणं सुमध्यमा
भर्तॄन्कटाक्षैः कुपितानपश्यत्।
सा पाण्डवान्कोपपरीतदेहा-
न्सन्दीपयामास कटाक्षपातैः ॥ २-८९-५४ (१४९०६)
हृतेन राज्येन तथा धनेन
रत्नैश्च मुख्यैर्न तथा बभूव।
यथा त्रपाकोपसमीरितेन
कृष्णाकटाक्षेण बभूव दुःखम् ॥ २-८९-५५ (१४९०७)
दुःशासनश्चापि समीक्ष्य कृष्णा-
मवेक्षमाणां कृपणान्पतींस्तान्।
आधूय वेगेन विसञ्ज्ञकल्पा-
मुवाच दासीति हसन्सशब्दम् ॥ २-८९-५६ (१४९०८)
कर्णस्तु तद्वाक्यमतीव हृष्टः
सम्पूजयामास हसन्सशब्दम्।
गान्धारराजः सुबलस्य पुत्र-
स्तथैव दुःशासनमभ्यनन्दत् ॥ २-८९-५७ (१४९०९)
सभ्यास्तु ये तत्र बभूवुरन्ये
ताभ्यामृते धार्तराष्ट्रेण चैव।
तेषामभूद्दुःखमतीव कृष्णां
दृष्ट्वा सभायां परिकृष्यमाणाम् ॥ २-८९-५८ (१४९१०)
भीष्म उवाच। २-८९-५९क्ष् (१६३१)
न धर्मसौक्ष्म्यात्सुभगे विवेक्तुं
शक्नोमि ते प्रश्नमिमं यथावत्।
अस्वाम्यशक्तः पणितुं परस्वं
स्त्रियाश्च भर्तुर्वशतां समीक्ष्य ॥ २-८९-५९ (१४९११)
त्यजेत सर्वां पृथिवीं समृद्धां
युधिष्ठिरो धर्ममथो न जह्यात्।
उक्तं जितोऽस्मीति च पाण्डवेन
तस्मान्न शक्नोमि विवेक्तुमेतत् ॥ २-८९-६० (१४९१२)
द्यूतेऽद्वितीयः शकुनिर्नरेषु
कुन्तीसुतस्तेन निसृष्टकामः।
न मन्यते तां निकृतिं युधिष्ठिर-

स्तस्मान् ते प्रश्नमिमं ब्रवीमि ॥ २-८९-६१ (१४९१३)
द्रौपद्युवाच। २-८९-६१क्ष् (१६३२)
आहूय राजा कुशलैरनार्यै-
र्दुष्टात्मभिर्नैकृतिकैः सभायाम्।
द्यूतप्रियैर्नातिकृतप्रयत्नः
कस्मादयं नाम निसृष्टकामः ॥ २-८९-६२ (१४९१४)
अशुद्धभावैर्निकृतिप्रवृत्तै-
रबुध्यमानः कुरुपाण्डवाग्र्यः।
सम्भूय सर्वैश्च जितोऽपि यस्मा-
त्पश्चादयं कैतवमभ्युपेतः ॥ २-८९-६३ (१४९१५)
तिष्ठन्ति चेमे कुरवः सभाया-
मीशाः सुतानां च तथा स्नुषाणाम्।
समीक्ष्य सर्वे मम चापि वाक्यं
विब्रूत मे प्रश्नमिमं यथावत् ॥ २-८९-६४ (१४९१६)
न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न वदन्ति धर्मम्।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥ २-८९-६५ (१४९१७)
वैशम्पायन उवाच ॥ २-८९-६६क्ष् (१६३३)
तथा ब्रुवन्तीं करुणं रुदन्ती-
मवेक्षमाणां कृपणान्पतींस्तान्।
दुःशासनः परुषाण्यप्रियाणि
वाक्यान्युवाचामधुराणि चैव ॥ २-८९-६६ (१४९१८)
तां कृष्यमाणां च रजस्वलां च
स्रस्तोत्तरीयामतदर्हमाणाम्।
वृकोदरः प्रेक्ष्य युधिष्ठिरं च
चकार कोपं परमार्तरूपः ॥ ॥ २-८९-६७ (१४९१९)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि एकोननवतितमोऽध्यायः ॥ ८९.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-८९-१७ कैतवं कितवेभ्यो देयं धनम् ॥
२-८९-२७ स्पर्शो सुखदुःखे वृद्धबालौ स्पृशतः प्राप्नुतः । शमं स्वास्थ्यम् ॥
२-८९-४१ ऊर्मिमत्सु प्रवहन्नदीजलवन्निम्नोन्नतेषु ॥
२-८९-४९ सेन्द्रपि सेन्द्रा अपि ॥

२-८९-६४ विब्रूत विस्पष्ट ब्रूत नतु भईष्मवत्सन्दिग्धमिति भावः ॥

सभापर्व - अध्याय ०९०
॥ श्रीः ॥
२.९०. अध्यायः ९०

Mahabharata - Sabha Parva - Chapter Topics
भौमवचनम् ॥१.।विकर्णवचनम् ॥२.।दुःशासनेन द्रौपदीवस्त्रापहारः ॥३.।श्रीकृष्णप्रसादात् द्रौपद्याः वस्त्रराशिप्र

Mahabharata - Sabha Parva - Chapter Text

भीम उवाच।

भवन्ति गेहे बन्धक्यः कितवानां युधिष्ठिर।
भवन्ति दीव्यन्ति दया चैवास्ति तावस्वपि ॥ २-९०-१ (१४९२०)
काश्यो यद्धनमाहार्षीद्द्रव्यं यच्चान्यदुत्तमम्।
तथाऽन्ये पृथिवीपाला यानि रत्नान्युपाहरन् ॥ २-९०-२ (१४९२१)
वाहनानि धनं चैव कवचान्यायुधानि च।
राज्यमात्मा वयं चैव कैतवेन हृतं परैः ॥ २-९०-३ (१४९२२)
न च मे तत्र कोपोऽभूत्सर्वस्येशो हि नो भवान्।
इमं त्वतिक्रमं मन्यो द्रौपदी यत्र पण्यते ॥ २-९०-४ (१४९२३)
एषा ह्यनर्हती बाला पाण्डवान्प्राप्य कौरवैः।
त्वत्कृते क्लिश्यते क्षुद्रैर्नृशंसैरकृतात्मभिः ॥ २-९०-५ (१४९२४)
अस्याः कृते मन्युरयं त्वयि राजन्निपात्यते।
बाहू ते सम्प्रधक्ष्यामि सहदेवाग्निमानयः ॥ २-९०-६ (१४९२५)
अर्जुन उवाच। २-९०-७क्ष् (१६३४)
न पुरा भीमसेन त्वमीदृशीर्वदिता गिरः।
परैस्ते नाशितं नूनं नृशंसैर्धर्मगौरवम् ॥ २-९०-७ (१४९२६)
न सकामाः परो कार्या धर्ममेवाचरोत्तमम्।
भ्रातरं धार्मिकं ज्येष्ठं कोऽतिवर्तितुमर्हति ॥ २-९०-८ (१४९२७)
आहूतो हि परै राजा क्षात्रं व्रतमनुस्मरन्।
दीव्यते परकामेन तन्नः कीर्तिकरं महत् ॥ २-९०-९ (१४९२८)
भीमसेन उवाच ॥ २-९०-१०क्ष् (१६३५)
एवमस्मिन्कृतं विद्यां यदि नाहं धनञ्जय।
दीप्तेऽग्नौ सहितौ बाहू निर्दहेयं बलादिव ॥ २-९०-१० (१४९२९)

वैशम्पायन उवाच ॥ २-९०-११क्ष् (१६३६)
तथा तान्दुः खितान्दृष्ट्वा पाण्डवान्धृतराष्ट्रजः।
कृष्यमाणां च पाञ्चालीं विकर्ण इदमब्रवीत् ॥ २-९०-११ (१४९३०)
याज्ञसेन्या यदुक्तं तद्वाक्यं विब्रूत पार्थिवाः।
अविवेकेन वाक्यस्य नरकः सद्य एव नः ॥ २-९०-१२ (१४९३१)
भीष्मश्च धृतराष्ट्रश्च कुरुवृद्धतमावुभौ।
समेत्य नाहतुः किञ्चिद्विदुरश्च महामतिः ॥ २-९०-१३ (१४९३२)
भारद्वाजश्च सर्वेषामाचार्यः कृप एव च।
कुत एतावपि प्रश्नं नाहतुर्द्विजसत्तमौ ॥ २-९०-१४ (१४९३३)
ये त्वन्ये पृथिवीपालाः समेताः सर्वतोदिशम्।
कामक्रोधौ समुत्सृज्य ते ब्रुवन्तु यथामति ॥ २-९०-१५ (१४९३४)
यदितं द्रौपदी वाक्यमुक्तवत्यसकृच्छुभा।
विमृश्य कस्य कः पक्षः पार्थिवा वदतोत्तरम् ॥ २-९०-१६ (१४९३५)
वाशम्पायन उवाच ॥ २-९०-१७क्ष् (१६३७)
एवं स बहुशः सर्वानुक्तवांस्तान्सभासदः।
न च ते पृथिवीपालास्तमूचुः साध्वसाधु वा ॥ २-९०-१७ (१४९३६)
उक्त्वाऽसकृत्तथा सर्वान्विकर्णः पृथिवीपतीन्।
पाणौ पाणिं विनिष्पिष्य निःश्वसन्निदमब्रवीत् ॥ २-९०-१८ (१४९३७)
विब्रूत पृथिवीपाला वाक्यं मा वा कथञ्चनि।
मन्ये न्याय्यं यदत्राहं तद्धि वक्ष्यामि कौरवाः ॥ २-९०-१९ (१४९३८)
चत्वार्याहुर्नश्रेष्ठा व्यसनानि महीक्षिताम्।
मृगयां पानमक्षांश्च ग्राम्ये चैवातिरक्तताम् ॥ २-९०-२० (१४९३९)
एतेषु हि नरः सक्तो धर्ममुत्सृज्य वर्तते।
यथाऽयुक्तेन च कृतां क्रियां लोको न मन्यते ॥ २-९०-२१ (१४९४०)
तथेयं पाण्डुपुत्रेण व्यसने वर्तता भृशम्।
समाहूतेन कितवैरास्थितो द्रौपदीपणः ॥ २-९०-२२ (१४९४१)
साधारणी च सर्वेषां पाण्डवानामनिन्दिता।
जितेन पूर्वं चानेन पाण्डवेन कृतः पणः ॥ २-९०-२३ (१४९४२)
इयं च कीर्तिता कृष्णा सौबलेन पणार्थिना।
एतत्सर्वं विचार्याहं मन्ये न विजितामिमाम् ॥ २-९०-२४ (१४९४३)
वैशम्पायन उवाच ॥ २-९०-२५क्ष् (१६३८)
एतच्छ्रुत्वा महान्नादः सभ्यानामुदतिष्ठत।
विकर्णं शंसमानानां सौबलं चापि निन्दताम् ॥ २-९०-२५ (१४९४४)
तस्मिन्नुपरते शब्दे राधेयः क्रोधमूर्छितः।
प्रगृह्य रुचिरं बाहुमिदं वचनमब्रवीत् ॥ २-९०-२६ (१४९४५)
कर्ण उवाच ॥ २-९०-२७क्ष् (१६३९)

दृश्यन्ते वै विकर्णेह वैकृतानि बहून्यपि।
तज्जातस्तद्विनाशाय यथाऽग्निररणिप्रजः ॥ २-९०-२७ (१४९४६)
एते न किञ्चिदप्याहुश्चोदिता ह्यपि कृष्णया।
धर्मेण विजितामेतां मन्यन्ते द्रपदात्मजाम् ॥ २-९०-२८ (१४९४७)
त्वं तु केवलबाल्येन धार्तराष्ट्र विदीर्यसे।
यद्ब्रवीषि सभाम्ध्ये बालः स्थविरभाषितम् ॥ २-९०-२९ (१४९४८)
न च धर्म यथावत्त्वं कृष्णां च जितेति सुमन्दधीः।
यद्ब्रवीषि जितां कृष्णां न जितेति सुमन्दधीः ॥ २-९०-३० (१४९४९)
कथं ह्यविजितां कृष्णां मन्यसे धृतराष्ट्रज।
यदा सभायां सर्वस्वं न्यस्तवान्पाण्डवाग्रजः ॥ २-९०-३१ (१४९५०)
अभ्यन्तर च सर्वस्वे द्रौपदी भरतर्षभ।
एवं धर्मजितां कृष्णां मन्यसे न जितां कथम् ॥ २-९०-३२ (१४९५१)
कीर्तिता द्रौपदी वाचा अनुज्ञाता च पाण्डवैः।
भवत्यविजिता केन हेतुनैषा मता तव ॥ २-९०-३३ (१४९५२)
मन्यसे वा सभामेतामानीतामेकवाससम्।
अधर्मेणेति तत्रापि शृणु मे वाक्यमुत्तमम् ॥ २-९०-३४ (१४९५३)
एको भर्ता स्त्रिया देवैर्विहितः कुरुनन्दन।
इयं त्वनेकवशगा बन्धकीति विनिश्चिता ॥ २-९०-३५ (१४९५४)
अस्याः सभामानयनं न चित्रमिति मे मतिः।
एकाम्बरधरत्वं वाऽप्यथवाऽपि विवस्त्रता ॥ २-९०-३६ (१४९५५)
यच्चैषां द्रविणं किञ्चिद्या चैषा ये च पाण्डवाः।
सौबलेनेह तत्सर्वं धर्मेण विजितं वसु ॥ २-९०-३७ (१४९५६)
दुःशासन सुबालोऽयं विकर्णः प्राज्ञवादिकः।
पाण्डवानां च वासांसि द्रौपद्याश्चाप्युपाहर ॥ २-९०-३८ (१४९५७)
वैशम्पायन उवाच ॥ २-९०-३९क्ष् (१६४०)
तच्छ्रुत्वा पाण्डवाः सर्वे स्वानि वासांसि भारत।
अवकीर्योत्तरीयाणि सभायां समुपाविशन् ॥ २-९०-३९ (१४९५८)
ततो दुःशासनो राजन्द्रौपद्या वसनं बलात्।
सभामध्ये सभाक्षिप्य व्यपाक्रष्टुं प्रचक्रमे ॥ २-९०-४० (१४९५९)
ग्आकृष्यमाणे वसने विललाप सुदुःखिता।
ज्ञातं मया विसिष्ठेन पुरा गीतं महात्मना ॥ २-९०-४१ (१४९६०)
महत्यापदि सम्प्राप्ते स्मर्तव्यो भगवान्हरिः।
इति निश्चित्य मनसा शरणागतवत्सलम्।
आकृष्यमाणे वसने द्रौपदी कृष्णमस्तरत् ॥ २-९०-४२ (१४९६१)
शङ्खचक्रगदापाणे द्वारकानिलयाच्युत।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागताम् ॥ २-९०-४३ (१४९६२)

हा कृष्ण द्वारकावासिन्क्वासि यादवन्दन।
इमामवस्थां सम्प्राप्तामनाथां किमुपेक्षसे ॥ २-९०-४४ (१४९६३)
गोविन्द द्वारकावासिन्कृष्ण गोपीजनप्रिय।
कौरवैः परिभूतां मां किं न जानासि केशव'॥ २-९०-४५ (१४९६४)
हे नाथ हे रमानाथ व्रजनाथार्तिनाशन।
कौरवार्णवग्नां मामुद्धरस्व जनार्दन ॥ २-९०-४६ (१४९६५)
कृष्णकृष्ण महायोगिन्विश्वात्मन्विश्वभावन।
प्रपन्नां पाहि गोविन्द कुरमध्येऽवसीदतीम् ॥ २-९०-४७ (१४९६६)
इत्यनुस्मृत्य कृष्णं सा हरिं त्रिभुवनेश्वरम्।
प्रारुदद्दुः खिता राजन्मुखमाच्छाद्य भामिनी ॥ २-९०-४८ (१४९६७)
तस्य प्रसादाद्द्रौपद्याः कृष्णमाणेऽम्बरे तदा।
तद्रूपमपरे वस्त्रं प्रादुरासीदनेकशः ॥ २-९०-४९ (१४९६८)
नानारागविरागाणि वसनान्यथ वै प्रभो।
प्रादुर्भवन्ति शतशो धर्मस्य परिपालनात् ॥ २-९०-५० (१४९६९)
ततो हलहलाशब्दस्तत्रासीद्घोरदर्शनः।
तदद्भुततमं लोके वीक्ष्य सर्वे महीभृतः ॥ २-९०-५१ (१४९७०)
शशंसुर्द्रौपदीं तत्र कुत्सन्तो धृतराष्ट्रजम्।
गधिग्धिगित्यशिवां वाचमुत्सृजन्कौरवान्प्रति'॥ २-९०-५२ (१४९७१)
यदा तु वाससां राशिः सभामध्ये समाचितः'।
तदा दुःशासनः श्रान्तो व्रीडितः समुपाविशत् २-९०-५३ (१४९७२)
शशाप तत्र भीमस्तु राजमध्ये बृहत्स्वनः।
क्रोधाद्विस्फुरमाणौष्ठो विनिष्पिष्य करे करम् ॥ २-९०-५४ (१४९७३)
भीम उवाच ॥ २-९०-५५क्ष् (१६४१)
इदं मे वाक्यमादध्वं क्षत्रिया लोकवासिनः।
नोक्तपूर्वं नरैरन्यैर्न चान्यो यद्वदिष्यति ॥ २-९०-५५ (१४९७४)
यद्येतदेवमुक्त्वाऽहं न कुर्यां पृथिवीश्वराः।
पितामहानां पूर्वेषां नाहं गतिमवाप्नुयाम् ॥ २-९०-५६ (१४९७५)
अस्य पापस्य दुर्बुद्धेर्भारतापसदस्य च।
न पिबेयं बलाद्वक्षो भित्त्वा चेद्रुधिरं युधि ॥ २-९०-५७ (१४९७६)
वैशम्पायन उवाच ॥ २-९०-५८क्ष् (१६४२)
तस्य ते तद्वचः श्रुत्वा रौद्रं लोमप्रहर्षणम् ॥
प्रचक्रुर्बहुलां पूजां कुसन्तो धृतराष्ट्रजम् ॥ २-९०-५८ (१४९७७)
न विब्रुवन्ति कौरव्याः प्रश्नमेतमिति स्म ह।
सुजनः क्रोशति स्मात्र धृतराष्ट्रं विगर्हयन् ॥ २-९०-५९ (१४९७८)
विदुर उवाच।
द्रौपदी प्रश्नमुक्त्वैवं रोरवीति त्वनाथवत्। २-९०-६० (१४९७९)

वैशम्पायन उवाच ॥ २-९०-६१क्ष् (१६४३)
तस्य ते तद्वचः श्रुत्वा रौद्रं लोमप्रहर्षणम्।
न च विब्रूत तं प्रश्नं सभ्या धर्मोऽत्र पीड्यते ॥ २-९०-६१ (१४९८०)
सभां प्रपद्यते प्रश्नः प्रज्वलन्निव हव्यवाद्।
तं वै सत्येन धर्मेण सभ्याः प्रशमयन्त्युत ॥ २-९०-६२ (१४९८१)
धर्म्यं प्रश्नमतो ब्रूयादार्यः सत्येन मानवः।
विब्रूयुस्तत्र तं प्रश्नं कामक्रोधबलातिगाः ॥ २-९०-६३ (१४९८२)
विकर्णेन यथाप्रज्ञमुक्तः प्रश्नो नराधिपाः।
भवन्तोऽपि हि तं प्रश्नं विब्रुवन्तु यथामति ॥ २-९०-६४ (१४९८३)
यो हि प्रश्नं न विब्रूयाद्धर्मदर्शी सभां गतः।
अनृते या फलावाप्तिस्तस्याः सोऽर्धं समश्नुते ॥ २-९०-६५ (१४९८४)
यः पुनर्वितथं ब्रूयाद्धर्मदर्शी सभां गतः।
अनृतस्य फलं कृत्स्नं स प्राप्नोतीति निश्चयः ॥ २-९०-६६ (१४९८५)
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
प्रह्लादस्य च संवादं मुनेराङ्गिरसस्य च ॥ २-९०-६७ (१४९८६)
प्रह्लादो नाम दैत्येन्द्रस्तस्य पुत्रो विरोचनः।
कन्याहेतोराङ्गिरसं सुधन्वानमुपाद्रवत् ॥ २-९०-६८ (१४९८७)
अहं ज्यायानहं ज्यायानिति कन्येप्सया तदा।
तयोर्देवनमत्रासीत्प्राणयोरिति नः श्रुतम् ॥ २-९०-६९ (१४९८८)
तयोः प्रश्नविवादोऽभूत्प्रह्लादं तावपृच्छताम्।
ज्यायान्क आवयोरेकः प्रश्नं प्रब्रूहि मा मृषा ॥ २-९०-७० (१४९८९)
स वै विवदनाद्भीतः सुधन्वानं विलोकयन्।
तं सुधन्वाब्रवीत्क्रुद्धो ब्रह्मदम्ड इव ज्वलन् ॥ २-९०-७१ (१४९९०)
यदि वै वक्ष्यसि मृषा प्रह्लादाथ न वक्ष्यसि ॥
शतधा ते शिरो वज्री वज्रेण प्रहरिष्यति ॥ २-९०-७२ (१४९९१)
सुधन्वना तथोक्तः सन्व्यथितोऽश्वत्थपर्णवत्।
जगाम कश्यपं दैत्यः परिप्रष्टुं महौजसम् ॥ २-९०-७३ (१४९९२)
प्रह्लाद उवाच ॥ २-९०-७४क्ष् (१६४४)
त्वं वै धर्मस्य विज्ञाता दैवस्येहासुरस्य च।
ब्राह्मणस्य महाभाग धर्मकृच्छ्रमिदं शृणु ॥ २-९०-७४ (१४९९३)
यो वै प्रश्नं न विब्रूयाद्वितथं चैव निर्दिशेत्।
के वै तस्य परे लोकास्तन्ममाचक्ष्व पृच्छतः ॥ २-९०-७५ (१४९९४)
कश्यप उवाच ॥ २-९०-७६क्ष् (१६४५)
जानन्नविब्रुवन्प्रश्नान्कामात्क्रोधाद्भयात्तथा।
सहस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति ॥ २-९०-७६ (१४९९५)
साक्षी वा विब्रुवन्साक्ष्यं गोकर्णशिथिलश्चरन्।

सहस्रं वारुणान्पाशानात्मनि प्रतिमुञ्जति ॥ २-९०-७७ (१४९९६)
तस्य संवत्सरे पूर्णे पाश एकः प्रमुच्यते।
तस्मात्सत्यं तु वक्तव्यं जानता सत्यमुञ्जसा ॥ २-९०-७८ (१४९९७)
विद्धो धर्मो ह्यधर्मेण सभां यत्रोपपद्यते।
न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः ॥ २-९०-७९ (१४९९८)
अर्धं हरति वै श्रेष्ठः पादो भवति कर्तृषु।
पादश्चैव सभासत्सु ये न निन्दन्ति निन्दितम् ॥ २-९०-८० (१४९९९)
अनेना भवति श्रेष्ठो मुच्यन्ते च सभासदः।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥ २-९०-८१ (१५०००)
वितथं तु वदेयुर्ये धर्मं प्रह्लाद पृच्छते।
इष्टापूर्तं च ते घ्नन्ति सप्तसप्त परावरान् ॥ २-९०-८२ (१५००१)
हृतस्वस्य हि यद्दुःखं हतपुत्रस्य चैव यत्।
ऋणिनः प्रति यच्चैव स्वार्थाद्भ्रष्टस्य चैव यत् ॥ २-९०-८३ (१५००२)
स्त्रियाः पत्या विहीनाया राज्ञा ग्रस्तस्य चैव यत्।
अपुत्रायाश्च यद्दुःखं व्याघ्राघ्रातस्य चैव यत् ॥ २-९०-८४ (१५००३)
अध्यूढायाश्च यद्दुःखं व्याघ्राघ्रातस्य चैव यत् ॥
एतानि वै समान्याहुर्दुःखानि त्रिदिवेश्वराः ॥ २-९०-८५ (१५००४)
तानि सर्वाणि दुःखानि प्राप्नोति वितथं ब्रुवन्।
समक्षदर्शनात्साक्षी श्रवणाच्चेति धारणात् ॥ २-९०-८६ (१५००५)
तस्मात्सत्यं ब्रुवत्साक्षी धर्मार्थाभ्यां न हीयते।
कश्यपस्य वचः श्रुत्वा प्रह्लादः पुत्रमब्रवीत् ॥ २-९०-८७ (१५००६)
श्रेयान्सुधन्वा त्वत्तो वै मत्तः श्रेयांस्तथाङ्गिराः।
माता सुधन्वाऽयं प्राणानामीश्वरस्तव ॥
विरोचन सुधन्वाऽयं प्राणानामीश्वरस्तव ॥ २-९०-८८ (१५००७)
सुधन्वोवाच। २-९०-८९क्ष् (१६४६)
पुत्रस्नेहं परित्यज्य यस्त्वं धर्मे व्यवस्थितः।
अनुजानामि ते पुत्रं जीवत्वेव शतं समाः ॥ २-९०-८९ (१५००८)
विदुर उवाच। २-९०-९०क्ष् (१६४७)
एवं वै परमं धर्मं श्रुत्वा सर्वे सभासदः।
यथाप्रश्नं तु कृष्णाया मन्यध्वं तत्र किं परम् ॥ २-९०-९० (१५००९)
वैशम्पायन उवाच ॥ २-९०-९१क्ष् (१६४८)
विदुरस्य वचः श्रुत्वा नोचुः किञ्चन पार्थिवाः।
कर्णो दुःशासनं त्वाह कृष्णां दासीं गृहान्नय ॥ २-९०-९१ (१५०१०)
तां वेपमानां सव्रीडां प्रलपन्तीं स्म पाण्डवान्।
दुःशासनः सभामध्ये विचकर्ष तपस्विनीम् ॥ ॥ २-९०-९२ (१५०११)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि नवतितमोऽध्यायः ॥ ९०.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-९०-२० ग्राम्ये स्त्रीभोगी ॥
२-९०-
४१ आकृष्यमाणे वसने द्रौपद्या चिन्तितो हरिः ।गोविन्द द्वारकान्वासिन्कृष्ण गो पीजनप्रिय।कौरवैः परिभूतां मां किं ज ज
२-९०-७७ गोकर्णशिथिल उभयक्षस्पर्शी ॥

सभापर्व - अध्याय ०९१
॥ श्रीः ॥
२.९१. अध्यायः ९१

Mahabharata - Sabha Parva - Chapter Topics
द्रौपदीवचनम् ॥ १.। युधिष्ठिरेणैव द्रौपदीप्रश्नस्योत्तरं वक्तव्यमिति भीष्मवचनम् ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

द्रौपद्युवाच ॥

पुरस्तात्करणीयं मे न कृतं कार्यमुत्तरम्।
विह्वलाऽस्मि कृताऽनेन कर्षता बलिना बलात् ॥ २-९१-१ (१५०१२)
अभिवादं करोम्येषां कुरूणां कुरुसंसदि।
न मे स्यादपराधोऽयं तदिदं न कृतं मया ॥
वैशम्पायन उवाच ॥ २-९१-२ (१५०१३)
सा तेन च समाधूता दुःखेन च तपस्विनी।
पतिता विललापेदं सभायामतथोचिता ॥ २-९१-३ (१५०१४)
द्रौपद्युवाच। २-९१-४क्ष् (१६४९)
स्वयंवरे यास्मि नृपैर्दृष्टा रङ्गे समागतैः।
न दृष्टपूर्वा चान्यत्र साऽहमद्य सभां गता ॥ २-९१-४ (१५०१५)
यां न वायुर्न चादित्यो दृष्टवन्तौ पुरा गृहे।
साऽहमद्य सभामध्ये दृष्टास्मि जनसंसदि ॥ २-९१-५ (१५०१६)
यां न मृष्यन्ति वातेन स्पृश्यमानां गृहे पुरा।
स्पृश्यमानां सहन्तेऽद्य पाण्डवास्तां दुरात्मना ॥ २-९१-६ (१५०१७)
मृष्यन्ति कुरवश्चेमे मन्ये कालस्य पर्ययम्।

स्नुषां दुहितरं चैव क्लिश्यमानामनर्हतीम् ॥ २-९१-७ (१५०१८)
किन्वतः कृपणं भूयो यदहं स्त्री सती शुभा।
सभामध्यं विगाहेऽद्य क्व नु धर्मो महीक्षिताम् ॥ २-९१-८ (१५०१९)
धर्म्यं स्त्रियं सभां पूर्वे न नयन्तीति नः श्रुतम्।
स नष्टः कौरवेयेषु पूर्वो धर्मः सनातनः ॥ २-९१-९ (१५०२०)
कथं हि भार्या पाण्डुनां पार्षतस्य स्वसा सती।
वासुदेवस्य च सखी पार्थिवानां सभामियाम् ॥ २-९१-१० (१५०२१)
तामिमां धर्मराजस्य भार्यां सदृशवर्णजाम्।
ब्रूत दासीमदासीं वा तत्करिष्यामि कौरवाः। २-९१-११ (१५०२२)
अयं मां सुदृढं क्षुद्रः कौरवाणां यशोहरः।
क्लिश्नाति नाहं तत्सोढुं क्षुद्रः कौरवाणां यशोहरः। २-९१-१२ (१५०२३)
जितां वाऽप्यजितां वापि मन्यध्वं मां यथा नृपाः।
तथा प्रत्युक्तमिच्छामि तत्करिष्यामि कौरवाः ॥ २-९१-१३ (१५०२४)
भीष्म उवाच ॥ २-९१-१४क्ष् (१६५०)
उक्तवानस्मि कल्याणि धर्मस्य परमा गतिः।
लोके न शक्यते ज्ञातुमपि विज्ञैर्महात्मभिः ॥ २-९१-१४ (१५०२५)
बलवांश्च यथा धर्मं लोके पश्यति पुरुषः ॥
स धर्मो धर्मवेलायां भवत्यभिहतः परः ॥ २-९१-१५ (१५०२६)
न विवेक्तुं च ते प्रश्नमिमं शक्नोमि निश्चयात्।
सूक्ष्मत्वाद्गहनत्वाच्च कार्यस्यास्य च गौरवात् ॥ २-९१-१६ (१५०२७)
नूनमन्तः कुलस्यास्य भविता न चिरादिव।
तथा हि कुरवः सर्वे लोभमोहपरायणाः ॥ २-९१-१७ (१५०२८)
कुलेषु जाताः कल्याणि व्यसनैराहता भृशम्।
धर्म्यान्मार्गान्न च्यवन्ते येषां नस्त्वं बधूः स्थिता ॥ २-९१-१८ (१५०२९)
उपपन्नं च पाञ्चालि तवेदं वृत्तमीदृशम्।
यत्कृच्छ्रमपि सम्प्राप्ता धर्ममेवान्ववेक्षसे ॥ २-९१-१९ (१५०३०)
एते द्रोणादयश्चैव वृद्धा धर्मविदो जनाः।
शून्यैः शरीरैस्तिष्ठन्ति गतासव इवानताः ॥ २-९१-२० (१५०३१)
युधिष्ठिरस्तु प्रश्नोऽस्मिन्प्रमाणमिति मे मतिः।
अजितां वा जितां वेति स्वयं व्याख्यातुमर्हति ॥ ॥ २-९१-२१ (१५०३२)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि एकनवतितमोऽध्यायः ॥९१ ॥

सभापर्व - अध्याय ०९२

॥ श्रीः ॥
२.९२. अध्यायः ९२

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनवचनम् ॥१. ।दुर्योधनेन द्रौपदीं प्रति निजोरौ प्रदर्शिते भीमेन तद्भेदनप्रतिज्ञा ॥२. ।अर्जुनादिभिः कर्णादिह

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

तथा तु दृष्ट्वा बहु तत्र देवीं
रोरूयमाणां कुररीमिवार्ताम्।
नोचुर्वचः साध्वथवाऽप्यसाधु
महीक्षितो धार्तराष्ट्रस्य भीताः ॥ २-९२-१ (१५०३३)
दृष्ट्वा तथा पार्थिवपुत्रपौत्रां-
स्तूर्ष्णींभूतान्धृतराष्ट्रस्य पुत्रः।
स्मयन्निदं वचनं बभाषे
पाञ्चालराजस्य सुतां तदानीम् ॥ २-९२-२ (१५०३४)
दुर्योधन उवाच ॥ २-९२-३क्ष् (१६५१)
तिष्ठत्वयं प्रश्न उदारसत्वे
भीमेऽर्जुने सहदेवे तथैव।
पत्यौ च ते नकुले याज्ञसेनि
वदन्त्वेते वचनं त्वत्प्रसूतम् ॥ २-९२-३ (१५०३५)
अनीश्वरं विब्रुवन्त्वार्यमध्ये
युधिष्ठिरं तव पाञ्चालि हेतोः।
कुर्वन्तु सर्वे चानृतं धर्मराजं
पाञ्चालि त्वं मोक्ष्यसे दासभावात् ॥ २-९२-४ (१५०३६)
धर्मे स्थितो धर्मसुतो महात्मा
स्वयं चेदं कथयत्विन्द्रकल्पः।
ईशो वा ते ह्यनीशोऽथवैष
वाक्यादस्य क्षिप्रमेकं भजस्व ॥ २-९२-५ (१५०३७)
सर्वे हीमे कौरवेयाः सभायां
दुःखान्तरे वर्तमानास्तवैव।
न विब्रुवन्त्यार्यसत्वा यथाव-
त्पतींश्च ते समवेक्ष्याल्पभाग्यान् ॥ २-९२-६ (१५०३८)
वैशम्पायन उवाच ॥ २-९२-७क्ष् (१६५२)

ततः सभ्याः कुरुराजस्य तस्य
वाक्यं सर्वे प्रशशंसुस्तथोच्चैः।
चेलावेधांश्चापि चक्रुर्नदन्तो
हाहेत्यासीदपि चैवार्तनादः ॥ २-९२-७ (१५०३९)
श्रुत्वा तुं तद्वाक्यमनोहरं त-
द्धर्षश्चासीत्कौरवाणां सभायाम्।
सर्वे चासन्पार्थिवाः प्रीतिमन्तः
कुरुश्रेष्ठं धार्मिकं पूजयन्तः ॥ २-९२-८ (१५०४०)
युधिष्ठिरं च ते सर्वे समुदैक्षन्त पार्थिवाः।
किं नु वक्ष्यति धर्मज्ञ इति साचीकृताननाः ॥ २-९२-९ (१५०४१)
किं नु वक्ष्यति बीभत्सुरजितो युधि पाण्डवः।
भीमसेनो यमौ चोभौ भृशं कौतूहलान्विताः ॥ २-९२-१० (१५०४२)
तस्मिन्नुपरते शब्दे भीमसेनोऽब्रवीदिदम्।
प्रगृह्य रुचिरं दिव्यं भुजं चन्दनचर्चितम् ॥ २-९२-११ (१५०४३)
यद्येष गुरुरस्माकं धर्मराजो महामनाः।
न प्रभुः स्यात्कुलस्यास्य न वयं मर्षयेमहि ॥ २-९२-१२ (१५०४४)
ईशो नः पुण्यतपसां प्राणानामपि चेश्वरः।
मन्यते जितमात्मानं यद्येष विजिता वयम् ॥ २-९२-१३ (१५०४५)
न हि मुच्येत मे जीवन्पदा भूमिमुपस्पृशन्।
मर्त्यधर्मा परामृश्य पाञ्चाल्या मूर्धजानिमान् ॥ २-९२-१४ (१५०४६)
पश्यध्वं ह्यायतौ वृत्तौ भुजौ मे परिघाविव।
नैतयोरन्तरं प्राप्य मुच्येतापि शतक्रतुः ॥ २-९२-१५ (१५०४७)
धर्मपाशसितस्त्वेवमधिगच्छामि सङ्कटम्।
गौरवेण निरुद्धश्च निग्रहादर्जुनस्य च ॥ २-९२-१६ (१५०४८)
धर्मराजनिसृष्टस्तु सिंहः क्षुद्रमृगानिव।
धार्तराष्टारानिमान्पापान्निष्पषेयं तलासिभिः ॥ २-९२-१७ (१५०४९)
वैशम्पायन उवाच ॥ २-९२-१८क्ष् (१६५३)
तमुवाच तदा भीष्मो द्रोणो विदुर एव च।
क्षम्यतामिदमित्येवं सर्वं सम्भाव्यते त्वयि ॥ २-९२-१८ (१५०५०)
कर्ण उवाच ॥ २-९२-१९क्ष् (१६५४)
त्रयः किलेमे ह्यधना भवन्ति।
दासः पुत्रश्चास्वतन्त्रा च नारी।
दासस्य पत्नी त्वधनस्य भद्रे
हीनश्वरा दासधनं च सर्वम् ॥ २-९२-१९ (१५०५१)
प्रविश्य राज्ञः परिवारं भजस्व
तत्ते कार्यं शिष्टमादिश्यतेऽत्र।

ईशास्तु सर्वे तव राजपुत्रि
भवन्ति वै धार्तराष्ट्रा न पार्थाः ॥ २-९२-२० (१५०५२)
अन्यं वृणीष्व पतिमाशु भामिनि
यस्माद्दास्यं न लभसि देवनेन।
अवाच्या वै पतिषु कामवृत्ति-
र्नित्यं दास्ये विदितं तत्तवास्तु ॥ २-९२-२१ (१५०५३)
पराजितो नकुलो भीमसेनो
युधिष्ठरः सहदेवार्जुनौ च।
दासीभूता त्वं हि वै याज्ञसेनि
पराजितास्ते पतयो नैव सन्ति ॥ २-९२-२२ (१५०५४)
प्रयोजनं जन्मनि किं न मन्यते
पराक्रमं पौरुषं चैव पार्थटः।
पाञ्चाल्यस्य द्रुपदस्यात्मजामिमां
सभामध्ये यो व्यदेवीद्ग्लहेषु ॥ २-९२-२३ (१५०५५)
वैशम्पायन उवाच ॥ २-९२-२४क्ष् (१६५५)
तद्वै श्रुत्वा भीमसेनोऽत्यमर्षी
भृशं निशश्वास तदाऽर्तरूपः।
राजानुगो धर्मपाशानुबद्धो
दहन्निवैनं क्रोधसंरक्तदृष्टिः ॥ २-९२-२४ (१५०५६)
भीम उवाच ॥ २-९२-२५क्ष् (१६५६)
नाहं कुप्ये सूतपुत्रस्य राज-
न्नेष सत्यं दासधर्मः प्रदिष्टः।
किं विद्विषो वै मामेवं व्याहरेयु-
र्नादेवीस्त्वं यद्यनया नरेन्द्र ॥ २-९२-२५ (१५०५७)
वैशम्पायन उवाच ॥ २-९२-२६क्ष् (१६५७)
भीमसेनवचः श्रुत्वा राजा दुर्योधनस्तदा।
युधिष्ठिरमुवाचेदं तूष्णीम्भूतमचेतनम् ॥ २-९२-२६ (१५०५८)
भीमार्जुनौ यमौ चैव स्थितौ ते नृप शासने।
प्रश्नं ब्रूहि च कृष्णां त्वमजितां यदि मन्यसे ॥ २-९२-२७ (१५०५९)
एवमुक्त्वा तु कौन्येयमपोह्य वसनं स्वकम्।
स्मयन्निवेक्ष्य पाञ्चालीमैश्वर्यमदमोहितः ॥ २-९२-२८ (१५०६०)
कदलीदण्डसदृशं सर्वलक्षणसंयुतम्।
गजहस्तप्रतीकाशं वज्रप्रतिमगौरवम् ॥ २-९२-२९ (१५०६१)
अभ्युत्स्मयित्वा राधेयं भीममाधर्षयन्निव।
द्रौपद्याः प्रेक्षमाणायाः सव्यमूरुमदर्शयत् ॥ २-९२-३० (१५०६२)
भीमसेनस्तमालोक्य नेत्रे उत्फाल्य लोहिते।

प्रोवाच राजमध्ये तं सभां विश्रावयन्निव ॥ २-९२-३१ (१५०६३)
पितृभिः सह सालोक्यं मा स्म गच्छेद्वृकोदरः।
यद्येतमूरुं गदया न भिन्द्यां ते महाहवे ॥ २-९२-३२ (१५०६४)
वैशम्पायन उवाच ॥ २-९२-३३क्ष् (१६५८)
क्रुद्धस्य तस्य सर्वेभ्यः स्रोतोभ्यः पावकार्चिषः।
वृक्षस्येव विनिश्चेरुः कोटरेभ्यः प्रदह्यतः ॥ २-९२-३३ (१५०६५)
विदुर उवाच ॥ २-९२-३४क्ष् (१६५९)
परं भयं पश्यत भीमसेना-
त्तद्बुध्यध्वं पार्थिवाः प्रातिपेयाः।
दैवेरितो नूनमयं पुरस्ता-
त्परोऽनयो भरतेषूदपादि ॥ २-९२-३४ (१५०६६)
अतिद्यूतं कृतमिदं धार्तराष्ट्र
यस्मात्स्त्रियं विवदध्वं सभायाम्।
योगक्षेमौ नश्यतो वः समग्रौ
पापान्मन्त्रान्कुरवो मन्त्रयन्ति ॥ २-९२-३५ (१५०६७)
इमं धर्मं कुरवो जानताशु
ध्वस्ते धर्मे परिषत्सम्प्रदुष्येत्।
इमां चेत्पूर्वं कितवोऽग्लहिष्य-
दीशोऽभविष्यदपराजितात्मा ॥ २-९२-३६ (१५०६८)
स्वप्ने यथैतद्धि जितं धनं स्या-
देवं मन्ये यस्य दीव्यत्यनीशः।
गान्धारराजस्य वचो निशम्य
धर्मादस्मात्कुरवो माऽपयात ॥ २-९२-३७ (१५०६९)
दुर्योधन उवाच ॥ २-९२-३८क्ष् (१६६०)
भीमस्य वाक्ये तद्वदेवार्जुनस्य
स्थितोऽहं वै यमयोश्चैवमेव।
युधिष्ठिरं ते प्रवदन्त्वनीश-
मथो दास्यान्मोक्षसे याज्ञसेनि ॥ २-९२-३८ (१५०७०)
अर्जुन उवाच ॥ २-९२-३९क्ष् (१६६१)
ईशो राजा पूर्वमासीद्ग्लहे नः
कुन्तीसुतो धर्मराजो महात्मा।
ईशस्त्वयं कस्य पराजितात्मा
तज्जानीध्वं कुरवः सर्व एव ॥ २-९२-३९ (१५०७१)
ग्कर्ण उवाच ॥ २-९२-४०क्ष् (१६६२)
दुश्शासन निबोधेदं वचनं वै प्रभाषितम्।
किमनेन चिरं वीर नयस्व द्रुपदात्मजाम्।

दासीभावेन भुङ्क्ष्व त्वं यथेष्टं कुरुनन्दन ॥ २-९२-४० (१५०७२)
वैशम्पायन उवाच ॥ २-९२-४१क्ष् (१६६३)
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत्।
साधु कर्ण महाबाहो यथेष्टं क्रियतामिति ॥ २-९२-४१ (१५०७३)
ततो दुश्शासनस्तूर्णं द्रुपदस्य सुतां बलात्।
प्रवेशयितुमारब्धः स चकर्ष दुरात्मवान् ॥
ततो विक्रोशति तदा पाञ्चाली वरवर्णिनी ॥ २-९२-४२ (१५०७४)
द्रौपद्युवाच। २-९२-४४क्ष् (१६६४)
परित्रायस्व मां भीष्ण द्रोण द्रौणे तथा कृप।
परित्रायस्व विदुर धर्मिष्ठो धर्मवत्सल ॥ २-९२-४४ (१५०७५)
धृतराष्ट्र महाराज परित्रायस्व वै स्नुषाम्।
गान्धारि त्वं महाभागे सर्वज्ञे सर्वदर्शिनि।
पिरत्रायस्व मां भीरुं सुयोधनभयार्दिताम् ॥ २-९२-४५ (१५०७६)
त्वमार्ये वीरजननि किं मां पश्यसि यादवीम्।
क्लिश्यमानामनार्येण न त्रायसिव वधूं स्वकाम् ॥ २-९२-४६ (१५०७७)
यदि लालप्यमानां मां न कश्चित्किञ्चिदब्रवीत्।
हा हताऽस्मि सुमन्दात्मा सुयोधनवशं गता ॥ २-९२-४७ (१५०७८)
न वै पाण्डुर्नरपतिर्न धर्मो न च देवराट्।
न चायुर्नाश्विनौ वाऽपि परित्रायन्ति वै स्नुषाम् ॥
धिक्कष्टं यदि जीवेयं मन्दभाग्या पतिव्रता ॥ २-९२-४८ (१५०७९)
विदुर उवाच ॥ २-९२-५०क्ष् (१६६५)
शृणोमि वाक्यं तव राजपुत्रि
नेमे पार्थाः किञ्चिदपि ब्रुवन्ति।
सा त्वं प्रियार्थं शृणु वाक्यमेत-
द्यदुच्यते पापमतिः कृतघ्नः ॥ २-९२-५० (१५०८०)
सुयोधनः सानुचरः सुदुष्टः
सहैव राजा निकृतः सूनुना च
यद्येष वाचं महदुच्यमानां
न श्रोष्यते पापमतिः सुदुष्टः ॥ २-९२-५१ (१५०८१)
वैशम्पायन उवाच ॥ २-९२-५२क्ष् (१६६६)
इत्येवमुक्त्वा द्रुपदस्य पुत्रीं
क्षत्ताऽब्रवीद्धृतराष्ट्रस्य पुत्रम्। २-९२-५२ (१५०८२)
मा क्लिश्यतां वै द्रुपदस्य पुत्रीं
मा त्वं चरीं द्रक्ष्यसि राजपुत्र ॥ २-९२-५३ (१५०८३)
विदुर उवाच ॥ २-९२-५४क्ष् (१६६७)
यद्येवं त्वं महाराज सङ्क्लेशयसि द्रौपदीम्।

अचिरेणैव कालेन पुत्रस्ते सह मन्त्रिभिः।
गमिष्यति क्षयं पापः पाण्डवक्षयकारणात् ॥ २-९२-५४ (१५०८४)
भीमार्जुनाभ्यां क्रुद्धाभ्यां माद्रीपुत्रद्वयेन च।
तस्मान्निवारय सुतं मा विनाशं विचिन्तय ॥ २-९२-५५ (१५०८५)
वैशम्पायन उवाच ॥ २-९२-५६क्ष् (१६६८)
एतच्छ्रुत्वा मन्दबुद्धिर्नोत्तरं किञ्चिदब्रवीत्।
ततो दुर्योधनस्तत्र दैवमोहबलात्कृतः ॥ २-९२-५६ (१५०८६)
अचिन्त्य क्षत्तुर्वचनं हर्षेणायतलोचनः।
ऊरू दर्शयते पापो द्रौपद्या वै मुहुर्मुहुः ॥ २-९२-५७ (१५०८७)
ऊरौ सन्दर्श्यमाने तु निरीक्ष्य तु सुयोधनम्।
वृकोदरस्तदालोक्य नेत्रे चोल्फाल्य लोहिते ॥ २-९२-५८ (१५०८८)
एतत्समीक्ष्यात्मनि चावमानं
नियम्य मन्युं बलनान्स मानी।
राजानुजः संसदि कौरवाणां
विनिष्क्रमन्वाक्यमुवाच भीमः ॥ २-९२-५९ (१५०८९)
अहं दुर्योधनं हन्ता कर्णं हन्ता धनञ्जयः।
शकुनिं चाक्षकितवं सहदेवो हनिष्यति ॥ २-९२-६० (१५०९०)
इदं च भूयो वक्ष्यामि सभामध्ये बृहद्वचः।
सत्यं देवाः करिष्यन्ति यन्नो युद्धं भविष्यति ॥ २-९२-६१ (१५०९१)
सुयोधनमिमं पापं हन्ताऽस्मि गदया युधि।
शिरः पादेन चास्याहमधिष्ठास्यामि भूतले ॥ २-९२-६२ (१५०९२)
वक्षः शूरस्य निर्वास्य परुषस्य दुरात्मनः।
दुश्शासनस्य रुधिरं पास्यामि मृगराडिव ॥ २-९२-६३ (१५०९३)
अर्जुन उवाच ॥ २-९२-६४क्ष् (१६६९)
भीमसेन न ते सन्ति येषां वैरं त्वया सह।
नन्दा गृहेषु न बुद्ध्यन्ते महद्भयम् ॥ २-९२-६४ (१५०९४)
नैव वाचा व्यवसितं भीम विज्ञायते सताम्।
यदि स्थास्यन्ति सङ्ग्रामे क्षत्रधर्मेण वै सह ॥ २-९२-६५ (१५०९५)
दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः।
दुश्शासनचतुर्थानां भूमिः पास्यति शोणितम् ॥ २-९२-६६ (१५०९६)
असूयितारं वक्तारं प्रहृष्टानां दुरात्मनाम्।
भीमसेन नियोगात्ते हन्ताऽहं कर्णमाहवे ॥ २-९२-६७ (१५०९७)
कर्णं कर्णानुगांश्चैव रणे हन्ताऽस्मि पत्रिभिः।
ये चान्ये विप्रयोत्स्यन्ति बुद्धिमोहेन मां नृपाः।
तान्स्म सर्वञ्छितैर्बाणैर्नेताऽस्मि यमसादनम् ॥ २-९२-६८ (१५०९८)
चलेद्धि हिमवान्स्थानान्निष्प्रभः स्याद्दिवाकरः।

शैत्यं सोमात्प्रणश्येत मत्सत्यं विचलेद्यदि ॥ २-९२-६९ (१५०९९)
वैशम्पायन उवाच ॥ २-९२-७०क्ष् (१६७०)
उत्युक्तवति पार्थे तु श्रीमान्माद्रवतीसुतः।
प्रगृह्य विपुलं बाहुं सहदेवः प्रतापवान् ॥ २-९२-७० (१५१००)
सौबलस्य वधप्रेप्सुरिदं वचनमब्रवीत्।
क्रोधसंरक्तनयनो निश्वस्य च मुहुर्मुहुः ॥ २-९२-७१ (१५१०१)
सहदेव उवाच ॥ २-९२-७२क्ष् (१६७१)
यानक्षान्मन्यसे मूढ गान्धाराणां यशोहर।
नैते ह्यक्षाः शिता वाणास्त्वयैते समरे धृताः ॥ २-९२-७२ (१५१०२)
यथा चैवोक्तवान्भीमस्त्वामुद्दिश्य सबान्धवम्।
कर्ताऽहं कर्मणा चास्य कुरुकार्याणि सर्वशः।
यदि स्थस्यासि सङ्ग्रामे क्षत्रधर्मेण सौबल ॥ २-९२-७३ (१५१०३)
वैशम्पायन उवाच ॥ २-९२-७४क्ष् (१६७२)
सहदेववचः श्रुत्वा नकुलोऽपि विशाम्पते।
दर्शनीयतमो नृणामिदं वचनमब्रवीत् ॥ २-९२-७४ (१५१०४)
नकुल उवाच ॥ २-९२-७५क्ष् (१६७३)
सुतेयं यज्ञसेनस्य द्यूतेऽस्मिन्धृतराष्ट्रजैः।
यैर्वाचः श्राविता रूक्षा धूर्तैर्दुर्योधनप्रियैः ॥ २-९२-७५ (१५१०५)
धार्तराष्ट्रान्सुदुर्वृत्तान्मुमूर्षून्कालचोदितान्।
दर्शयिष्यामि भूयिष्ठमहं वैवस्वतक्षयम् ॥ २-९२-७६ (१५१०६)
उलूकं च दुरात्मानं सौबलस्य प्रियं सुतम्।
हन्ताऽहमस्मि समरे मम शत्रुं नराधमम् ॥ २-९२-७७ (१५१०७)
निदेशाद्धर्मराजस्य द्रौपद्याः पदवीं चरन्।
नर्धार्तराष्टां पृथिवीं कर्तास्मि नचिरादिवा ॥ २-९२-७८ (१५१०८)
द्रौपद्युवाच ॥ २-९२-७९क्ष् (१६७४)
यस्माच्चोरुं दर्शयसे यस्माच्चोरुं निरीक्षसे।
तस्मात्तव ह्यधर्मिष्ठ ऊरौ मृत्युर्भविष्यति ॥ २-९२-७९ (१५१०९)
यस्माच्चैवं क्लेशयति भ्राता ते मां दुरात्मवान्।
तस्मादुधिरमेवास्य पास्यते वै वृकोदरः ॥ २-९२-८० (१५११०)
इमं च पापिष्ठमतिं कर्णं समुतबान्धवम्।
सामात्यं सपरीवारं हनिष्यति धनञ्जयः ॥ २-९२-८१ (१५१११)
क्षुद्रधर्मं नैकृतिकं शकुनिं पापचेतसम्।
सहदेवो रणे क्रुद्धो हनिष्यति सबान्धवम् ॥ २-९२-८२ (१५११२)
वैशम्पायन उवाच ॥ २-९२-८३क्ष् (१६७५)
एवमुक्ते तु वचने द्रौपद्या धर्मशीलया।
ततोऽन्तरिक्षात्सुमहत्पुष्पवर्षमवापततम् ॥ २-९२-८३ (१५११३)

तेषां तु वचनं श्रुत्वा नोचुस्तत्र सभासदः।
अर्जुनस्य भयाद्राजन्नभून्निश्शब्दमत्र वै ॥ ॥ २-९२-८४ (१५११४)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि द्विनवतितमोऽध्यायः ॥९२ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-९२-१३ द्रौपदीपणनात् प्रागिति शेषः ।अतो द्रौपदी न दासभावमापन्नेति भावः ॥
२-९२-१६ पश्यसितः पाशबद्धः ॥
२-९२-३३ स्रोतोभ्यः रोमकूपेभ्यः ॥

सभापर्व - अध्याय ०९३
॥ श्रीः ॥
२.९३. अध्यायः ९३

Mahabharata - Sabha Parva - Chapter Topics
कुप्यतोऽर्जुनस्य युधिष्ठिरेण परिसान्त्वनम् ॥१.।धृतराष्ट्रेण वरं वरयेति द्रौपदीम्प्रति चोदनम् ॥२.।तत्प्रार्थनया

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

द्रौपद्या वचनं श्रुत्वा चुकोपाथ धनञ्जयः।
स तदा क्रोधताम्राक्ष इदं वचनमब्रवीत् ॥ २-९३-१ (१५११५)
अयं तु मां वारयते धर्मराजो युधिष्ठिरः।
इत्युक्त्वा क्रोधताम्राक्षो धनुरादाय वीर्यवान् ॥ २-९३-२ (१५११६)
सव्यसाची समुत्पत्य ताञ्छत्रून्समुदैक्षत।
उद्यतं फल्गुनं तत्र ददृशुः सर्वपार्थिवाः ॥ २-९३-३ (१५११७)
युगान्ते सर्वलोकांस्तु दहन्तमिव पावकम्।
वीक्षमाणं धनुष्पाणिं हन्तुकामं मुहुर्मुहुः ॥ २-९३-४ (१५११८)
हन्तुकामं पशून्क्रुद्धं रुद्रं दक्षक्रतौ यथा।
तथाभूतं नरं दृष्ट्वा विषेदुस्तत्र मानवाः ॥ २-९३-५ (१५११९)
धनञ्जयस्यव वीर्यज्ञा निराशा जीविते तदा।
मृतभूता भवन्सर्वे नेत्रैरनिमिषैरिव ॥ २-९३-६ (१५१२०)
अर्जुनं धर्मपुत्रं च समुदैक्षन्त पार्थिवाः।

क्रुद्धं तदाऽर्जुनं दृष्ट्वा पृथिवी च चचाल ह ॥ २-९३-७ (१५१२१)
खेचराणि च भूतानि वित्रेसुर्वै भयार्दिताः।
नादित्यो विरराजाथ नापि वान्ति च मारुताः। २-९३-८ (१५१२२)
न चन्द्रो न च नक्षत्रं द्यौर्दिशोन न विभान्ति ह।
सर्वमाविद्धमभवज्जगत्स्थावरजङ्गमम् ॥ २-९३-९ (१५१२३)
उत्पतन्स वभौ पार्तो दिवाकर इवाम्बरे। २-९३-१० (१५१२४)
पार्थं दृष्ट्वा क्रुद्धं कालान्तकयमोपमम्।
भीमसेनो मुदा युक्तो युद्धायैव मनो दधे ॥ २-९३-११ (१५१२५)
पाञ्चाली च ददर्शाथ सुसङ्क्रुद्धं धनञ्जयम्।
हन्तुकामं रिपून्मर्वान्सुपर्णमिव पन्नगान् ॥ २-९३-१२ (१५१२६)
दुष्प्रेक्षः सोऽभवत्क्रुद्धो युगान्ताग्निरिव ज्वलन्।
तं दृष्ट्वा तेजसा युक्तं विव्यधुः पुरवासिनः ॥ २-९३-१३ (१५१२७)
उत्पतन्तं तु वेगेन ततो दृष्ट्वा धनञ्जयम्।
जग्राह स तदा राजा पुरुहूतो यथा हरिम् ॥ २-९३-१४ (१५१२८)
उवाच स घृणी ज्येष्ठो धर्मराजो युधिष्ठिरः।
मा पार्थ साहसं कार्षीर्मा विनाशं गमेद्यशः ॥ २-९३-१५ (१५१२९)
अहमेतान्पापकृतो द्यूतज्ञान्दग्धुमुत्सहे।
कन्त्वसत्यगतिं दृष्ट्वा क्रोधो नाशमुपैति मे ॥ २-९३-१६ (१५१३०)
त्वमिमं जगतोऽर्थे वै कोपं संयच्छ पाण्डव ॥ २-९३-१७ (१५१३१)
वैशम्पायन उवाच ॥ २-९३-१८क्ष् (१६७६)
एवमुक्तस्तदा राज्ञा पाण्डवोऽथ धनञ्जयः।
क्रोधं संशमयन्पार्थो धार्तराष्ट्रं प्रति स्थितः ॥ २-९३-१८ (१५१३२)
तस्मिन्वीरे प्रशान्ते तु पाण्डवे फल्गुने पुनः।
सुसम्प्रहृष्टमभवज्जगत्स्थावरजङ्गमम् ॥ २-९३-१९ (१५१३३)
वारितं च तथा दृष्ट्वा भ्रात्रा पार्थं वृकोदरः।
बभूव विमना राजन्नभून्निश्शब्दमत्र वै ॥ २-९३-२० (१५१३४)
ततो राज्ञो धृतराष्ट्रस्य गेहे
गोमायुरुच्चैर्व्याहरदग्निहोत्रे।
तं रासभाः प्रत्यभाषन्त राज-
न्समन्ततः पक्षिणश्चैव रौद्राः ॥ २-९३-२१ (१५१३५)
तं वै शब्दं विदुरस्तत्त्ववेदी
शुश्राव घोरं सुबलात्मजा च।
भीष्मो द्रोणो गौतमश्चापि विद्वान्
स्वस्तिस्वस्तीत्यपि चैवाहुरुच्चैः ॥ २-९३-२२ (१५१३६)
ततो गान्धारी विदुरश्चापि विद्वां-
स्तमुत्पातं घोरमालक्ष्य राज्ञे।

निवेदयामासतुरार्तवत्तदा
ततो राजा वाक्यमिदं बभाषे ॥ २-९३-२३ (१५१३७)
धृतराष्ट्र उवाच ॥ २-९३-२४क्ष् (१६७७)
हतोऽसि दुर्योधन मन्दबुद्धे
यस्त्वं सभायां कुरुपुङ्गवानाम्।
स्त्रियं समाभाषसि दुर्विनीत
विशेषतो द्रौपदीं धर्मपत्नीम् ॥ २-९३-२४ (१५१३८)
वैशम्पायन उवाच ॥ २-९३-२५क्ष् (१६७८)
एवमुक्त्वा धृतराष्ट्रो मनीषी
हितान्वेषी बान्धवानामपायात्।
कृष्णां पाञ्चालीमब्रवीत्सान्त्वपूर्वं २-९३-२५ (१५१३९)
विमृश्यैतत्प्रज्ञया तत्त्वबुद्धिः ॥ २-९३-२६ (१५१४०)
धृतराष्ट उवाच ॥
वरं वृणीष्व पाञ्चालि मत्तो यदभिवाञ्छसि। २-९३-२६क्ष् (१६७९)
वधूनां हि विशिष्टा मे त्वं धर्मपरमा सती ॥ २-९३-२७ (१५१४१)
द्रौपद्युवाच ॥ २-९३-२७क्ष् (१६८०)
ददासि चेद्वरं मह्यंवृणोमि भरतर्षभ।
सर्वधर्मानुगः श्रीमानदासोऽस्तु युधिष्ठिरः ॥ २-९३-२७ (१५१४२)
मनस्विनमजानन्तो मैवं ब्रूयुः कुमारकाः।
एतं वै दासपुत्रेति प्रतिविन्ध्यं ममात्मजम् ॥ २-९३-२८ (१५१४३)
राजपुत्रः पुरा भूत्वा यथा नान्यः पुमान्क्वचित्।
लालितो दासपुत्रत्वं पश्यन्नश्येद्धि भारत ॥ २-९३-२९ (१५१४४)
धृतराष्ट्र उवाच ॥ २-९३-३०क्ष् (१६८१)
एवं भवतु कल्याणि यथा त्वमभिभाषसे।
द्वितीयं ते वरं भद्रे ददानि वरयस्व ह।
मनो हि मे वितरति नैकं त्वं वरमर्हसि ॥ २-९३-३० (१५१४५)
द्रौपद्युवाच ॥ २-९३-३१क्ष् (१६८२)
सरथौ सधनुष्कौ न भीमसेनधनञ्जयौ।
यमौ च वरये राजन्नदासान्स्ववशानहम् ॥ २-९३-३१ (१५१४६)
धृतराष्ट्र उवाच ॥ २-९३-३२क्ष् (१६८३)
तथाऽस्तु ते महाभागे यथा त्वं नन्दिनीच्छसि।
तृतीयं वरयास्मत्तो नासि द्वाभ्यां सुसंस्कृता। २-९३-३२ (१५१४७)
त्वं हि सर्वस्नुषाणां मे श्रेयसी धर्मचारिणी ॥ २-९३-३३ (१५१४८)
द्रौपद्युवाच। २-९३-३३क्ष् (१६८४)
लोभो धर्मस्य नाशाय भगवन्नाहमुत्सहे।
अनर्हा वरमादातुं तृतीयं राजसत्तम ॥ २-९३-३३ (१५१४९)

एकामाहुर्वैश्यवरं द्वौ तु क्षत्रस्त्रियो वरौ।
त्रयस्तु राज्ञो राजेन्द्र ब्राह्मणस्य शतं वराः ॥ २-९३-३४ (१५१५०)
पापीयांस इमे भूत्वा सन्तीर्णाः पतयो मम।
वेत्स्यन्ति चैव भद्राणि राजन्पुण्येन कर्मणा ॥ ॥ २-९३-३५ (१५१५१)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि त्रिनवतितमोऽध्यायः ॥९३ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-९३-२१ अग्निहोत्रे गृह्याग्निसमीपे ॥

सभापर्व - अध्याय ०९४
॥ श्रीः ॥
२.९४. अध्यायः ९४

Mahabharata - Sabha Parva - Chapter Topics
कर्णप्रलपितम् ॥ १.। क्रुद्धं भीमं निवार्य युधिष्ठिरस्य धृतराष्ट्रसमीपगमनम् ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

कर्ण उवाच ॥

या नः श्रुता मनुष्येषु स्त्रियो रूपेण संमताः।
तासामेतादृशं कर्म न कस्याश्चन शुश्रुम ॥ २-९४-१ (१५१५२)
क्रोधाविष्टेषु पार्थेषु धार्तराष्ट्रेषु चाप्यति।
द्रौपदी पाण्डुपुत्राणां कृष्णा शान्तिरिहाभवत् ॥ २-९४-२ (१५१५३)
अप्लवेऽम्भसि मग्नानामप्रतिष्ठे निमज्जताम्।
पाञ्चाली पाण्डुपुत्राणां नौरेषां पारगाऽभवत् ॥ २-९४-३ (१५१५४)
वैशम्पायन उवाच ॥ २-९४-४क्ष् (१६८५)
तद्वै श्रुत्वा भीमसेनः कुरुमध्येऽत्यमर्षणः।
स्त्री गतिः पाण्डुपुत्राणामित्युवाच सुदुर्मनाः ॥ २-९४-४ (१५१५५)
भीम उवाच ॥ २-९४-५क्ष् (१६८६)
त्रीणि ज्योतींषि पुरुष इति वै देवलोऽब्रवीत्।
अपत्यं कर्म विद्या च यतः सृष्टाः प्रजास्ततः ॥ २-९४-५ (१५१५६)
अमेध्ये वै गतप्राणे शून्ये ज्ञातिभिरुज्झिते।

देहे त्रितयमेवैतत्पुरुषस्योपयुज्यते ॥ २-९४-६ (१५१५७)
तन्नो ज्योतिरभिहतं दाराणामभिमर्शनात्।
धनञ्जय कथं स्वित्स्यादपत्यमभिमृष्टजम् ॥ २-९४-७ (१५१५८)
अर्जुन उवाच ॥ २-९४-८क्ष् (१६८७)
न चैवोक्ता न चानुक्ता हीनतः परुषा गिरः।
भारत प्रतिजल्पन्ति सदा तूत्तमपूरुषाः ॥ २-९४-८ (१५१५९)
स्मरन्ति सुकृतान्येव न वैराणि कृतान्यपि।
सन्तः प्रतिविजानन्तो लब्धसम्भावनाः स्वयम् ॥ २-९४-९ (१५१६०)
भीम उवाच ॥ २-९४-१०क्ष् (१६८८)
इहैवैतानहं सर्वान्हन्मि शत्रून्समागतान्।
अथ निष्क्रम्य राजेन्द्र समूलान्हन्मि भारत ॥ २-९४-१० (१५१६१)
किं नो विवदितेनेह किमुक्तेन च भारत।
अद्यैवैतान्निहन्मीह प्रशाधि पृथिवीमिमाम् ॥ २-९४-११ (१५१६२)
इत्युक्त्वा भीमसेनस्तु कनिष्ठैर्भ्रातृभिः सह।
मृगमध्ये यथा सिंहो मुहुर्मुहुरुदैक्षत ॥ २-९४-१२ (१५१६३)
सान्त्व्यमानो वीक्षमाणः पार्थेनाक्लिष्टकर्मणा।
खिद्यत्येव महाबाहुरन्तर्दाहेन वीर्यवान् ॥ २-९४-१३ (१५१६४)
क्रुद्धस्य तस्य स्रोतोभ्यः कर्णादिभ्यो नराधिप।
सधूमः सस्फुलिङ्गार्चिः पावकः समजायत ॥ २-९४-१४ (१५१६५)
भ्रुकुटीकृतदुष्प्रेक्ष्यमभवत्तस्य तन्मुखम्।
युगान्तकाले सम्प्राप्ते कृतान्तस्येव रूपिणः ॥ २-९४-१५ (१५१६६)
युधिष्ठिरस्तमावार्य बाहुना बाहुशालिनम्।
मैवमित्यब्रवीच्चैनं जोषमास्वेति भारत ॥ २-९४-१६ (१५१६७)
निवार्य च महाबाहुं कोपसंरक्तलोचनम्।
पितरं समुपातिष्ठद्धृतराष्ट्रं कृताञ्जलिः ॥ ॥ २-९४-१७ (१५१६८)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि चतुर्नवतितमोऽध्यायः ॥९४ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-९४-१६ जोषं तूष्णीम् ॥

सभापर्व - अध्याय ०९५
॥ श्रीः ॥
२.९५. अध्यायः ९५

Mahabharata - Sabha Parva - Chapter Topics

धृतराष्ट्रानुज्ञया सभ्रातृकस्य युधिष्ठिरस्य इन्द्रप्रस्थगमनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

युधिष्ठर उवाच ॥

राजन्किं करवामस्ते प्रशाध्यस्मांस्त्वमीश्वरः।
नित्यं हि स्थातुमिच्छामस्तव भारत शासने ॥ २-९५-१ (१५१६९)
धृतराष्ट्र उवाच ॥ २-९५-२क्ष् (१६८९)
अजातशत्रो भद्रं ते अरिष्टं स्वस्ति गच्छत।
अनुज्ञाताः सहधनाः स्वराज्यमनुशासत ॥ २-९५-२ (१५१७०)
इदं चैवावबोद्धव्यं वृद्धस्य मम शासनम्।
मया निगदितं सर्वं पथ्यं निःश्रेयसं परम् ॥ २-९५-३ (१५१७१)
वेत्थ त्वं तात धर्माणां गतिं सूक्ष्मां युधिष्ठिर।
विनीतोऽसि महाप्राज्ञ वृद्धानां पर्युपासिता ॥ २-९५-४ (१५१७२)
यतो बुद्धिस्ततः शान्तिः प्रशमं गच्छ भारत।
नादारुणि पतेच्छस्त्रं दारुण्येतन्निपात्यते ॥ २-९५-५ (१५१७३)
न वैराण्यभिजानन्ति गुणान्पश्यन्ति नागुणान्।
विरोधं नाधिगच्छन्ति ये त उत्तमपूरुषाः ॥ २-९५-६ (१५१७४)
स्मरन्ति सुकृतान्येव न वैराणि कृतान्यपि।
सन्तः परार्थं कुर्वाणा नावेक्षन्ति प्रतिक्रियाम् ॥ २-९५-७ (१५१७५)
संवादे परुषाण्याहुर्युधिष्ठिर नराधमाः।
प्रत्याहुर्मध्यमास्त्वेतेऽनुक्ताः नराधमाः। २-९५-८ (१५१७६)
न चोक्ता नैव चानुक्तास्त्वहिताः परुषा गिरः।
प्रतिजल्पन्ति वै धीराः सदा तूत्तमपुरुषाः ॥ २-९५-९ (१५१७७)
स्मरन्ति सुकृतान्येव न वैराणि कृतान्यपि।
सन्तः प्रतिविजानन्तो लब्ध्वा प्रत्ययमात्मनः ॥ २-९५-१० (१५१७८)
असम्भिन्नार्यमर्यादाः साधवः प्रियदर्शनाः।
तथा चरित्तंमार्येण त्वयाऽस्मिन्सत्समागमे ॥ २-९५-११ (१५१७९)
दुर्योधनस्य पारुष्यं तत्तात हृदि मा कृथाः।
मातरं चैव गान्धारीं मां च त्वं गुणकाङ्क्षया ॥ २-९५-१२ (१५१८०)
उपस्थितं वृद्धमन्धं पितरं पश्य भारत।
प्रेक्षापूर्वं मया द्यूतमिदमासीदुपेक्षितम् ॥ २-९५-१३ (१५१८१)
मित्राणि द्रष्टुकामेन पुत्राणां च बलाबलम्।

अशोच्याः कुरवो राजन्येषां त्वमनुशासिता ॥ २-९५-१४ (१५१८२)
मन्त्री च विदुरो धीमान्सर्वशास्त्रविशारदः।
त्वयि धर्मोऽर्जुने धैर्यं भीमसेने पराक्रमः ॥ २-९५-१५ (१५१८३)
शुद्धा च गुरुशुश्रूषा यमयोः पुरुषाग्र्ययोः।
अजातशत्रो भद्रं ते खाण्डवप्रस्थमाविश।
भ्रातृभिस्तेऽस्तु सौभ्रात्रं धर्मे ते धीयताम मनः ॥ २-९५-१६ (१५१८४)
वैशम्पायन उवाच ॥ २-९५-१७क्ष् (१६९०)
इत्युक्तो भरतश्रेष्ठ धर्मराजो युधिष्ठिरः।
कृत्वाऽऽर्यसमयं सर्वं प्रतस्थे भ्रातृभिः सह ॥ २-९५-१७ (१५१८५)
ते रथान्मेघसङ्काशानास्थाय सह कृष्णया।
प्रययुर्हृष्टमनस इन्द्रप्रस्थं पुरोत्तमम् ॥ ॥ २-९५-१८ (१५१८६)

इति श्रीमन्महाभारते सभापर्वणि द्यूतपर्वणि पञ्चनवतितमोऽध्यायः ॥९५ ॥

सभापर्व - अध्याय ०९६
॥ श्रीः ॥
२.९६. अध्यायः ९६

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनेन धृतराष्ट्रसमीपे कार्तवीर्यार्जुनोपाख्यानकथनम् ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

जनमेजय उवाच ॥

अनुज्ञातांस्तान्विदित्वा सरत्नधनसञ्जयान्।
पाण्डवान्धार्तराष्ट्राणां कथमासीन्मनस्तदा ॥ २-९६-१ (१५१८७)
वैशम्पायन उवाच ॥ २-९६-२क्ष् (१६९१)
अनुज्ञातांस्तान्विदित्वा धृतराष्ट्रेण धीमता।
राजन्दुः शासनः क्षिप्रं जगाम भ्रातरं प्रति ॥ २-९६-२ (१५१८८)
दुर्योधनं समासाद्य सामात्यं भरतर्षभ।
दुःखार्तो भरतश्रेष्ठ इदं वचनमब्रवीत् ॥ २-९६-३ (१५१८९)
दुःशासन उवाच ॥ २-९६-४क्ष् (१६९२)
दुःखेनैतत्समानीतं स्थविरो नाशयत्यसौ।

शत्रुसाद्गमयद्द्रव्यं तद्बुध्यध्वं महारथाः ॥ २-९६-४ (१५११९०)
अथ दुर्योधनः कर्णः शकुनिश्चापि सौबलः।
मिथः सङ्गम्य सहिताः पाण्डवान्प्रति मानिनः ॥ २-९६-५ (१५११९१)
वैचित्रवीर्यं राजानं धृतराष्ट्रं मनीषिणम्।
अभिगम्य त्वरायुक्ताः श्लक्ष्णं वचनमब्रुवन् ॥ २-९६-६ (१५११९२)
दुर्योधन उवाच ॥ २-९६-७क्ष् (१६९३)
न त्वयेदं श्रुतं राजन्यज्जगाद बृहस्पतिः।
शक्रस्य नीतिं प्रवदन्विद्वान्देवपुरोहितः ॥ २-९६-७ (१५११९३)
सर्वोपायैर्निहन्तव्याः शत्रवः शत्रुसूदन।
पुरा युद्धाद्बलाद्वापि प्रकुर्वन्ति तवाहितम् ॥ २-९६-८ (१५११९४)
ते वयं पाण्डवधनैः सर्वान्सम्पूज्य पार्थिवान्।
यदि तान्योधयिष्यामः किं वै निः परिहास्यति ॥ २-९६-९ (१५११९५)
अहीनाशीविषान्क्रुद्धान्नाशाय समुपस्थितान्।
कृत्वा कण्ठे च पृष्ठे च कः समुत्स्रष्टुमर्हति ॥ २-९६-१० (१५११९६)
आत्तशस्त्रा रथगताः कुपितास्तात पाण्डवाः।
निःशेषान्नः करिष्यन्ति क्रुद्धा ह्याशीविषा इव ॥ २-९६-११ (१५११९७)
सन्नद्धो ह्यर्जुनो याति विधृत्य परमेषुधी।
गाण्डीवं मुहुरादत्ते निःश्वसंश्च निरीक्षते ॥ २-९६-१२ (१५११९८)
गदां गुर्वीं समुद्यम्य त्वरितश्च वृकोदरः।
स्वरथं योजयित्वाऽशु निर्यात इति नः श्रुतम् ॥ २-९६-१३ (१५११९९)
नकुलः खड्गमादाय चर्म चाप्यर्धचन्द्रवत्।
सहदेवश्च राजा च चक्रुराकारमिङ्गितैः ॥ २-९६-१४ (१५१२००)
ते त्वास्थाय रथान्सर्वे बहुशस्त्रपरिच्छदान्।
अभिघ्नान्तो रथव्रातान्सेनायोगाय निर्ययुः ॥ २-९६-१५ (१५१२०१)
न क्षंस्यन्ते तथाऽस्माभिर्जातु विप्रकृता हि ते।
द्रौपद्याश्च परिक्लेशं कस्तेषां क्षन्तुमर्हति ॥ २-९६-१६ (१५१२०२)
ग न पश्यामि रणे क्रुद्धं बीभत्सुं प्रतिवारणम्।
भीष्मो द्रोणश्च कर्णश्च द्रौणिश्च रथिनां वरः ॥ २-९६-१७ (१५१२०३)
कृपश्च वृषसेनश्च विकर्णश्च जयद्रथः।
वाह्लीकः सोमदत्तश्च भूरिर्भूरिश्रवाः शलः ॥ २-९६-१८ (१५१२०४)
शकुनिः ससुतश्चैव नृपाश्चान्ये च कौरवाः।
नैते सर्वे रणोद्युक्ताः पार्थं सोढुमशक्नुवन् ॥ २-९६-१९ (१५१२०५)
अर्जुनेन समो लोके नास्ति वीर्ये धनुर्धरः।
योऽर्जुनेनार्जुनस्तुल्यो द्विबाहुर्बहुबाहुना ॥ २-९६-२० (१५१२०६)
धृतराष्ट्र उवाच ॥ २-९६-२१क्ष् (१६९४)
कस्त्वयोक्तः पुमान्वीरो बीभत्सुसमविक्रमः।

तं ये ब्रूहि महावीर्यं श्रोतुमिच्छामि पुत्रक ॥ २-९६-२१ (१५२०७)
दुर्योधन उवाच ॥ २-९६-२२क्ष् (१६९५)
कार्तवीर्यस्य चरितं शृणु राजन्महात्मनः।
अव्यक्तप्रभवो ब्रह्मा सर्वलोकपितामहः ॥ २-९६-२२ (१५२०८)
ब्रह्मणोऽत्रिः सुतो विद्वानत्रेः पुत्रो निशाकरः।
सोमस्य तदु बुधः पुत्रो बुधस्य तु पुरूरवाः ॥ २-९६-२३ (१५२०९)
तस्याप्यध सुतोऽप्यायुरायोस्तु नहुषः सुतः। २-९६-२४ (१५२१०)
स चार्जुनोऽथ तेजस्वी तपः परमदुश्चरम्।
दत्तमाराधयामास सोऽर्जुनोऽत्रिसुतं मुनिम् ॥ २-९६-३० (१५२१६)
तस्य दत्तो वरान्प्रादाच्चतुरः पार्थिवस्य वै।
पूर्वं बाहुसहस्रं तु प्रार्थितः परमो वरः ॥ २-९६-३१ (१५२१७)
अधर्मे प्रीयमाणस्य सद्भिस्तत्र निवारणम्।
धर्मेण पृथिवीं जित्वा धर्मेणैव हि रञ्जनम् ॥ २-९६-३२ (१५२१८)
सङ्ग्रामान्सुबहून्कृत्वा हत्वा चारीन्सहस्रशः।
सङ्ग्रामे यतमानस्य वधश्चैवाधिकाद्रणे ॥ २-९६-३३ (१५२१९)
तस्य बाहुसहस्रं तु युध्यतः किल भारत।
रथो ध्वजश्च सञ्जज्ञ इत्येवं मे श्रुतं परा ॥ २-९६-३४ (१५२२०)
तथेयं पृथिवी राजन्त्सप्तद्वीपा सपत्तना।
ससमुद्राकरा तात विधिनोग्रेण वै जिता ॥ २-९६-३५ (१५२२१)
चार्जुनोऽथ तेजस्वी सप्तद्वीपेश्वरोऽभवत्।
च राजा महायज्ञानाजहार महाबलः।
प्रशशास महाबाहुर्महीं स च समा बहूः ॥ २-९६-३६ (१५२२२)
ततोऽर्जुनः कदाचिद्वै राजन्माहिष्मतीपतिः।
नर्मदां भरतश्रेष्ठं तां तु दारैर्ययौ सह ॥ २-९६-३७ (१५२२३)
ततस्तां स नदीं गत्वा प्रविश्यन्तर्जले तदा।
कर्तुं राजञ्जलक्रीडां ततो राजोपचक्रमे ॥ २-९६-३८ (१५२२४)
तस्मिन्नेव ततः काले रावमो राक्षसैः सह।
लङ्काया ईश्वरस्तात तं देशं प्रययौ बली ॥ २-९६-३९ (१५२२५)
ततस्तमर्जुनं दृष्ट्वा नर्मदायां दशाननः।
नित्यं क्रोधपरो धीरो वरदानेन मोहितः ॥ २-९६-४० (१५२२६)
अभ्यघावत्सुसङ्क्रुद्धो महेन्द्रं शम्बरो यथा।
अर्जुनोऽप्यथ तं दृष्ट्वा रावणं प्रत्यवारयत् ॥ २-९६-४१ (१५२२७)
ततस्तौ चक्रतुर्युद्धं रावणश्चार्जुनश्च वै।
ततस्तु दुर्जयं वीरं वरदानेन दर्पितम् ॥ २-९६-४२ (१५२२८)
राक्षसेन्द्रं मनुष्येन्द्रो जित्वा बध्वा रणे बलात्।
बध्वा धनुर्ज्यया राजन्विवेशाथ पुरीं स्वकाम् ॥ २-९६-४३ (१५२२९)

स तु तं बन्धितं श्रुत्वा पुलस्त्यो रावणं तदा।
मोक्षयाणास बन्धाद्वै पुरे दृष्ट्वाऽर्जुनं तदा ॥ २-९६-४४ (१५२३०)
ततः कदाचित्तेजस्वी कार्तवीर्योर्जुनो बली।
समुद्रतीरं गत्वाथ विरचन्दर्पमोहितः ॥ २-९६-४५ (१५२३१)
अवाकिरच्छितशरैः समुद्रं स तु भारत।
तं समुद्रो नमस्कृत्य कृताञ्जलिरभाषत ॥ २-९६-४६ (१५२३२)
आशुगान्वीर मा मुञ्च ब्रूहि किं करवाणि ते।
मदाश्रयाणि सत्वानि त्वद्विसृष्टैर्महेषुभिः।
बाध्यन्ते राजशार्दूल तेभ्यो देह्यभयं विभो ॥ २-९६-४७ (१५२३३)
अर्जुन उवाच ॥ २-९६-४८क्ष् (१६९६)
देहि सिन्धुपते युद्धमद्यैव त्वरया मम।
अथवा पीडयामि त्वां तस्मात्त्वं कुरु माचिरम् ॥ २-९६-४८ (१५२३४)
समुद्र उवाच ॥ २-९६-४९क्ष् (१६९७)
लोके राजन्महावीर्या बहवो निवसन्ति ये।
तेषामेकेन राजेन्द्र कुरु युद्धं महाबल ॥ २-९६-४९ (१५२३५)
अर्जुन उवाच ॥ २-९६-५०क्ष् (१६९८)
मत्समो यदि सङ्ग्रामे वरायुधधरः क्वचित्।
विद्यते तं ममाचक्ष्व यः समासेत मा मृधे ॥ २-९६-५० (१५२३६)
समुद्र उवाच ॥ २-९६-५१क्ष् (१६९९)
महर्षिर्जमदग्निस्तु यदि राजन्परिश्रुतः।
तस्य पुत्रो रणं दातुं यथावद्वै तवार्हति ॥ २-९६-५१ (१५२३७)
दुर्योधन उवाच ॥ २-९६-५२क्ष् (१७००)
समुद्रस्य वचः श्रुत्वा राजा माहिष्मतीपतिः।
नारदस्य च वै पूर्वं क्रोधेन महता वृतः ॥ २-९६-५२ (१५२३८)
ततः प्रतिययौ शीघ्रं क्रोधेन सह भारत।
स तमाश्रममागत्य काममेवान्वपद्यत ॥ २-९६-५३ (१५२३९)
स कामं प्रतिकूलानि चकार सह बन्धुभिः।
आयासं जनयामास रामस्य स महात्मनः ॥ २-९६-५४ (१५२४०)
ततस्तेजः प्रजज्वाल रामस्यामिततेजसः।
प्रदहन्निव सैन्यानि रश्मिमानिव तेजसा ॥ २-९६-५५ (१५२४१)
अथ तौ चक्रतुर्युद्धं वृत्रवासवयोरिव ॥ २-९६-५६ (१५२४२)
ततः परशुमादाय नृपं बाहुसहस्रिणम्।
चिच्छेद सहसा रामो बहुशाखमिव द्रुमम् ॥ २-९६-५७ (१५२४३)
तं हतं पतितं दृष्ट्वा समेतास्तस्य बान्धवाः।
असीनादाय शक्तीश्च रामं ते प्रत्यवारयन् ॥ २-९६-५८ (१५२४४)
रामोऽपि रथमास्थाय धनुरायम्य सत्वरः।

विसृजन्परमास्त्राणि व्यधमत्पार्थिवान्बली ॥ २-९६-५९ (१५२४५)
ततस्तु क्षत्रिया राजञ्जामदग्न्यभयार्दिताः।
विविशुर्गिरिदुर्गाणि मृगाः सिंहभयादिव ॥ २-९६-६० (१५२४६)
तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठति।
प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् ॥ २-९६-६१ (१५२४७)
तथा च द्रविडाः काचाः पुण्डाश्च शबरैः सह।
वृषलत्वं परिगता विच्छिन्नाः क्षत्रधर्मिणः ॥ २-९६-६२ (१५२४८)
ततस्तु हतवीरासु क्षत्रियासु पुनः पुनः।
द्विजैरभ्युदितं क्षत्रं तानि रामो निहत्य च ॥ २-९६-६३ (१५२४९)
ततस्त्रिस्सप्तमे याते रामं वागशरीरिणी।
दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता ॥ २-९६-६४ (१५२५०)
रामराम निवर्तस्व स्वगुणं नात्र पश्यसि।
क्षत्रबन्धूनिमान्प्रामैर्विप्रयुज्य पुनः पुनः ॥ २-९६-६५ (१५२५१)
तथैव तं महात्मानमृचीकप्रमुखास्तथा।
रामराम महावीर्य निवर्तस्वेत्यथाब्रुवन् ॥ २-९६-६६ (१५२५२)
पितुर्वधमसमृष्यंस्तु रामः प्रोवाच तानृषीन्।
नार्हा हन्त भवन्तो मां निवारयितुमित्युत ॥ २-९६-६७ (१५२५३)
पितर ऊचुः। २-९६-६८क्ष् (१७०१)
नार्हसि क्षत्रबन्धूंस्त्वं निहन्तुं जयतां वर।
न हि युक्तं त्वया तात ब्राह्मणेनसता नृपान् ॥ २-९६-६८ (१५२५४)
दुर्योधन उवाच ॥ २-९६-६९क्ष् (१७०२)
पितॄणां वचनं श्रुत्वा क्रोधं त्यक्त्वा स भार्गवः।
अश्वमेधसहस्राणि नरमेधशतानि च ॥ २-९६-६९ (१५२५५)
इष्ट्वा सागरपर्यन्तां काश्यपाय ददौ महीम्।
तेन रामेण सङ्ग्रामे तुल्यस्तात दयञ्जयः ॥ २-९६-७० (१५२५६)
कार्तवीर्येण च रणे तुल्यः पार्थो न संशयः।
रणे विक्रम्य राजेन्द्र पार्थं जेतुं न शक्यते ॥ ॥ २-९६-७१ (१५२५७)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यूतपर्वणि षण्णवतितमोऽध्यायः ॥९६ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-९६-४ गमयत् अगमयत् ॥
२-९६-९ परिहास्यति नङ्क्ष्यति ॥

सभापर्व - अध्याय ०९७
॥ श्रीः ॥
२.९७. अध्यायः ९७

Mahabharata - Sabha Parva - Chapter Topics
दुर्योधनेन धृतराष्ट्रसमीपे अर्जुनप्रभाववर्णनम् ॥१.।दुर्योधनदुर्बोधनेन धृतराष्ट्रस्य पुनर्द्यूताय पाण्डवानयनाभ्यनु

Mahabharata - Sabha Parva - Chapter Text

दुर्योधन उवाच ॥

शृणु राजन्पुराऽचिन्त्यानर्जुनस्य च साहसान्।
अर्जुनो धन्विनां श्रेष्ठो दुष्करं कृतवान्पुरा ॥ २-९७-१ (१५२५८)
द्रुपदस्य पुरे राजन्द्रौपद्याश्च स्वयंवर ॥
आबालवृद्धसङ्क्षोभे सर्वक्षत्रसमागमे।
क्षिप्रकारी जले मत्स्यं दुर्निरीक्ष्यं ससर्ज ह ॥ २-९७-२ (१५२५९)
सर्वैर्नृपैरसाध्यं तत्कार्मुकप्रवरं च वै।
क्षणेन सज्यमकरोत्सर्वक्षत्रस्य पश्यतः ॥ २-९७-३ (१५२६०)
ततो यन्त्रमयं विध्वा विसारं फल्गुनो बली।
कृष्णया हेममाल्येन स्कन्धे स परिवेष्टितः ॥ २-९७-४ (१५२६१)
ततस्तया वृतं पार्थं दृष्ट्वा सर्वे नृपास्तदा।
रोषात्सर्वायुधान्गृह्य क्रुद्धा वीरा महौजसः।
वैकर्तनं पुरस्कृत्य सर्वे पार्थमुपाद्रवन् ॥ २-९७-५ (१५२६२)
स सर्वान्पार्थिवान्दृष्ट्वा क्रुद्धान्पार्थो महाबलः।
वारयित्वा शरैस्तीक्ष्णैरजयत्तत्र स स्वयम् ॥ २-९७-६ (१५२६३)
जित्वा तु तान्महीपालान्सर्वान्कर्णपुरोगमान्।
लेभे कृष्णां शुभां पार्थो युध्वा वीर्यबलात्तदा ॥ २-९७-७ (१५२६४)
सर्वक्षत्रसमूहेषु अम्बां भीष्मो यथा पुरा।
ततः कदाचिद्बीभत्सुस्तीर्थयात्रां ययौ स्वयम् ॥ २-९७-८ (१५२६५)
अथोलूपीं शुभां तात नागराजसतां तदा।
नागेष्वाप वराग्र्येषु प्रार्थितोऽथ यथा तथा ॥ २-९७-९ (१५२६६)
ततो गोदावरीं कृष्णां कावेरीं चावगाहत।
तत्र पाण्ड्यं समासाद्य तस्य कन्यामवाप सः ॥ २-९७-१० (१५२६७)
लब्ध्वा जिष्णुर्मुदं तत्र ततो याम्यां दिशं ययौ ॥ २-९७-११ (१५२६८)
स दक्षिणं समुद्रान्तं गत्वा चाप्सरसां च वै।
कुमारतीर्थमासाद्य मोक्षयामास चार्जुनः ॥ २-९७-१२ (१५२६९)

ग्राहरूपाश्च ताः पञ्च अतिशौर्येण वै बलात्।
कन्यातीर्थं समभ्येत्य ततो द्वारवतीं ययौ ॥। २-९७-१३ (१५२७०)
तत्र कृष्णनिदेशात्स सुभद्रां प्राप्य फल्गुनः।
तामारोप्य रथोपस्थे प्रययौ स्वपुरीं प्रति ॥ २-९७-१४ (१५२७१)
अथादाय गते पार्थे ते श्रुत्वा सर्वयादवाः।
तमभ्यधावन्त्सङ्क्रुद्धाः सिंहव्याघ्रगणा इव ॥ २-९७-१५ (१५२७२)
प्रद्युम्नः कृतवर्मा च गदः सारणसात्यकी।
आहुकश्चैव साम्बश्च चारुदेष्णो विदूरथः ॥ २-९७-१६ (१५२७३)
अन्ये च यादवाः सर्वे बलदेवपुरोगमाः।
एकमेव परे कृष्णं गजवाजिरथैर्युताः ॥ २-९७-१७ (१५२७४)
अथासाद्य वने यान्तं परिवार्य धनञ्जयम्।
चक्रुर्युद्धं सुसङ्क्रुद्धा बहुकोट्यश्च यादवाः ॥ २-९७-१८ (१५२७५)
एक एव तु पार्थस्तैर्युद्धं चक्रे सुदारुणम्।
तेन तेषां समं युद्धं मुहूर्तं प्रबभूव ह ॥ २-९७-१९ (१५२७६)
ततः पार्थो रणे सर्वान्वारयित्वा शितैः शरैः।
बलाद्विजित्य राजेन्द्र वीरस्तान्सर्वयादवान्।
तां सुभद्रामथादाय शक्रप्रस्थं विवेश ह ॥ २-९७-२० (१५२७७)
भूयः शृणु महाराज फल्गुनस्य च साहसम्।
ददौ स वह्नेर्बिभत्सुः प्रार्थितं खाण्डवं वनम् ॥ २-९७-२१ (१५२७८)
लब्धमात्रे तु तेनाथ भगवान्हव्यवाहनः।
भक्षितुं खाण्डवं राजंस्तत्रस्थानुपचक्रमे ॥ २-९७-२२ (१५२७९)
ततस्तं भक्षयन्तं वै सव्यसाची विभावसुम्।
रथा धन्वी शरान्गृह्य स कलापयुतः प्रभुः।
पालयामास राजेन्द्र स्ववीर्येण महाबलः ॥ २-९७-२३ (१५२८०)
ततः श्रुत्वा महेनद्रस्तु मेघांस्तान्सन्दिदेश ह।
तेनोक्ता मेघसङ्घास्ते ववर्षुरतिवृष्टिभिः ॥ २-९७-२४ (१५२८१)
ततो मेघगाणान्पार्थः शरव्रातैः समान्ततः।
खगमैर्वारयामास तदाश्चर्यमिवाभवत् ॥ २-९७-२५ (१५२८२)
वारितान्मेघसङ्घांश्च श्रुत्वा क्रुद्धः पुरन्दरः।
पाण्डरं गजमास्थाय सर्वदेवगणैर्वृतः।
ययौ पार्थेन संयोद्धुं रक्षार्थं खाण्डवस्य च ॥ २-९७-२६ (१५२८३)
रुद्राश्च मरुतश्चैव वसवश्चाश्विनौ तदा।
आदित्याश्चैव साध्याश्च निश्वेदेवाश्च भारत।
गन्धर्वाश्चैव सहिता अन्ये देवगणाश्च ये ॥ २-९७-२७ (१५२८४)
ते सर्वे शस्त्रसम्पन्ना दीप्यमानाः स्वतेजसा।
धनञ्जयं जिघांसन्तः प्रपेतुर्विबुधाधिपाः ॥ २-९७-२८ (१५२८५)

युगान्ते यानि दृश्यन्ते निमित्तानि महान्त्यपि।
सर्वाणि तत्र दृश्यन्ते निमित्तानि महीपते ॥ २-१७-२९ (१५२८६)
ततो देवगमाः सर्वे पार्थं समभिदुद्रुवुः।
असम्भ्रान्तस्तु तान्दृष्ट्वा स तां देवमयीं चमूम् ॥ २-१७-३० (१५२८७)
त्वरितः फल्गुनो गृह्य तीक्ष्णांस्तानाशुगांस्तदा।
इन्द्रं देवांश्च सम्प्रेक्ष्य तस्थौ काल इवात्यये ॥ २-१७-३१ (१५२८८)
ततो देवगणाः सर्वे बीभत्सुं सपुरन्दराः।
अवाकिरञ्छरव्रातैर्मानुषं तं महीपते ॥ २-१७-३२ (१५२८९)
ततः पार्थो महातेजा गाण्डिवं गृह्य सत्वरः।
वारयामास देवानां शरव्रातैः शरांस्तदा ॥ २-१७-३३ (१५२९०)
पुनः क्रुद्धाः सुराः सर्वे मर्त्यं तं सुमहाबलाः।
नानाशस्त्रैर्ववर्षुस्तं सव्यसाची महीपते ॥ २-१७-३४ (१५२९१)
तान्पार्थः शस्त्रवर्षान्वै विसृष्टान्विबुधैस्तदा।
द्विधा त्रिधा स चिच्छेद स एव निशितैः शरैः ॥ २-१७-३५ (१५२९२)
पुनश्च पार्थः सङ्क्रुद्धो मण्डलीकृतकार्मुकः।
देवसङ्घाञ्छरैस्तीक्ष्णैरर्पयन्वै समन्ततः ॥ २-१७-३६ (१५२९३)
ततो देवगणाः सर्वे युध्वा पार्थेन वै मुहुः।
रणे जेतुमशक्यं तं ज्ञात्वा ते भरतर्षभ ॥ २-१७-३७ (१५२९४)
शान्तास्ते विबुधाः सर्वे पार्थबाणाभिपीडिताः।
सद्विपं वासवं त्यक्त्वा दुद्रुवुः सर्वतो दिशम् ॥ २-१७-३८ (१५२९५)
प्राचीं रुद्राः सगन्धर्वा दक्षिणां मरुतो ययुः।
दिशं प्रतीचीं भीतास्ते वसवश्च तथाऽश्विनौ ॥ २-१७-३९ (१५२९६)
आदित्याश्चैव विश्वे च दुद्रुवुर्वा उदङ्मुखाः।
साध्याश्चोर्ध्वमुखा भीताश्चिन्तयन्तोऽस्य सायकान् ॥ २-१७-४० (१५२९७)
एवं सुरगणाः सर्वे प्राद्रवन्त्सर्वतो दिशम्।
मुहुर्मुहुः प्रेक्षमाणाः पार्थमेव सकार्मुकम् ॥ २-१७-४१ (१५२९८)
विद्रुतान्देवसङ्घांस्तान्रणे दृष्ट्वा पुरन्दरः।
ततः क्रुद्धो महातेजाः पार्थं बाणैरवाकिरत् ॥ २-१७-४२ (१५२९९)
पार्थोऽपि शक्रं विव्याथ मानुषो विबुधाधिपम् ॥ २-१७-४३ (१५३००)
ततः सोऽश्ममयं वर्षं व्यसृजद्विबुधाधिपः।
तच्छरैरर्जुनो वर्षं प्रतिजाघ्नेऽत्यमर्षणः ॥ २-१७-४४ (१५३०१)
अथ संवर्धयामास तद्वर्षं देवराडपि।
भूय एव महावीर्यं जिज्ञासुः सव्यसाचिनः ॥ २-१७-४५ (१५३०२)
सोऽश्मवर्षं महावेगमिषुभिः पाण्डवोऽपि च।
विलयं गमयामास हर्षयन्पाकशासनम् ॥ २-१७-४६ (१५३०३)
उपादाय तु पाणिभ्यामङ्गदं नाम पर्वतम्।

सद्रुमं व्यसृजच्छक्रो जिघांसुः श्वेतवाहनम् ॥ २-९७-४७ (१५३०४)
ततोऽर्जुनो वेगवद्भिर्ज्वलमानैरजिह्मगैः।
बाणैर्विध्वंसयामास गिरिराजं सहस्रधा ॥ २-९७-४८ (१५३०५)
शक्रं च पातयामास शरैः पार्थो महान्युधि।
ततः शक्रो महाराज रणे वीरं धनञ्जयम् ॥ २-९७-४९ (१५३०६)
ज्ञात्वा जेतुमशक्यं तं तेजोबलसमन्वितम्।
परां प्रीति ययौ तत्र पुत्रशौर्येण वासवः ॥ २-९७-५० (१५३०७)
तदा तत्र न तस्यास्ति दिवि कश्चिन्महायशाः।
समर्थो निर्जये राजन्नपि साक्षात्प्रजापतिः ॥ २-९७-५१ (१५३०८)
ततः पार्थः शरैर्हत्वा यक्षराक्षसपन्नगान्।
दीप्ते चाग्नौ महातेजाः पातयामास सन्ततम् ॥ २-९७-५२ (१५३०९)
प्रतिषेधयितुं पार्थं न शेकुस्तत्र केचन।
दृष्ट्वा निवारितं शक्रं दिवि देवगणैः सह ॥ २-९७-५३ (१५३१०)
यथा सुपर्णः सोमार्थं विबुधानजयत्पुरा।
तथा जित्वा सुरान्पार्थस्तर्पयामास पावकम् ॥ २-९७-५४ (१५३११)
ततोऽर्जुनः स्ववीर्येण तर्पयित्वा विभावसुम्।
रथं ध्वजं च सहयं दिव्यानस्त्रांश्च पाण्डवः ॥ २-९७-५५ (१५३१२)
गाण्डीवं च धनुः श्रेष्ठं तूणी चाक्षयसायकौ।
एतान्यपि च बीभत्सुर्लेभे कीर्तिं च भारत ॥ २-९७-५६ (१५३१३)
भूयोऽपि शृणु राजेन्द्र पार्थो गत्वोत्तरां दिशम्।
विजित्य नववर्षांश्च सपुरांश्च सपर्वतान् ॥ २-९७-५७ (१५३१४)
जम्बुद्वीपं वशे कृत्वा सर्वं तद्भरतर्षभ।
बलाज्जित्वा नृपान्सर्वान्करे चविनिवेश्य च ॥ २-९७-५८ (१५३१५)
रत्नान्यादाय सर्वाणि गत्वा चैव पुनः पुरीम्।
ततो ज्येष्ठं महात्मानं धर्मराजं युधिष्ठिरम्।
राजसूयं क्रतुश्रेष्ठं कारयामास भारत ॥ २-९७-५९ (१५३१६)
स तान्यन्यानि कर्माणि कृतवानर्जुनः पुरा।
अर्जुनेन समो वीर्ये त्रिषु लोकेषु न क्वचित् ॥ २-९७-६० (१५३१७)
देवदानवयक्षाश्च पिशाचोरगराक्षसाः।
भीष्मद्रोणादयः सर्वे कुरवश्च महारथाः ॥ २-९७-६१ (१५३१८)
लोके सर्वनृपाश्चैव वीराश्चान्ये धनुर्धराः।
एते पार्थं रणे युक्ताः प्रतियोद्धुं न शक्नुयुः ॥ २-९७-६२ (१५३१९)
अहं हि नित्यं कौरव्य फल्गुनं हृदि संस्थितम्।
अपश्यं चिन्तयित्वा तं समुद्विग्नोऽस्मि तद्भयात् ॥ २-९७-६३ (१५३२०)
गृहे गृहे च पश्यामि तात पार्थमहं सदा।
शरगाण्डीवसंयुक्तं पाशहस्तमिवान्तकम् ॥ २-९७-६४ (१५३२१)

अपि पार्थसहस्राणि भीतः पश्यामि भारत।
पार्थभूतमिदं सर्वं नगरं प्रतिभाति मे ॥ २-९७-६५ (१५३२२)
पार्थमेव हि पश्यामि रहिते तात भारत।
दृष्ट्वा स्वप्नगतं पार्थमुद्धमामि विचेतनः ॥ २-९७-६६ (१५३२३)
अकारादीनि नामानि अर्जुनग्रस्तचेतसः।
अश्वाक्षराम्बुजाश्चैव त्रासं सञ्जनयन्ति मे ॥ २-९७-६७ (१५३२४)
नास्ति पार्थादृते तात परवीराद्भयं मम।
प्रह्लादं वा बलिं वापि हन्याद्धि विजयो रणे ॥ २-९७-६८ (१५३२५)
तस्मात्तेन महाराज युद्धं नस्तात न क्षमम्।
अहं तस्य प्रभावज्ञो नित्यं दुःखं वहामि च ॥ २-९७-६९ (१५३२६)
पुरा हि दण्डकारण्ये मारीचस्य यथा भयम्।
भवेद्रामे महावीर्ये तथा पार्थे भयं मम ॥ २-९७-७० (१५३२७)
धृतराष्ट्र उवाच ॥ २-९७-७१क्ष् (१७०३)
जानाम्येव महद्वीयं जिष्णोरेतद्दुरासदम्।
एतद्वीरस्य पार्थस्य कार्षीस्त्वं तु विप्रियम् ॥ २-९७-७१ (१५३२८)
द्यूतं वा शस्त्रयुद्धं वा दुवाक्यं वा कथञ्चन।
एतेष्वेवं कृते तस्य विग्रहश्चैव वो भवेत् ॥ २-९७-७२ (१५३२९)
तस्मात्त्वं पुत्र पार्थेन नित्यं स्नेहेन वर्तय।
यश्च पार्थेन सम्बन्धो वर्तते चेन्नरो भुवि ॥ २-९७-७३ (१५३३०)
तस्य नास्ति भयं किञ्चित्त्रिषु लोकेषु भारत।
तस्मात्त्वं जिष्णुना वत्स नित्यं स्नेहेन वर्तय ॥ २-९७-७४ (१५३३१)
दुर्योधन उवाच ॥ २-९७-७५क्ष् (१७०४)
द्यूते पार्थस्य कौरव्य मायया निकृतिः कृता।
तस्माद्धि नो जयस्तात अन्योपायेन नो भवेत् ॥ २-९७-७५ (१५३३२)
धृतराष्ट्र उवाच ॥ २-९७-७६क्ष् (१७०५)
उपायश्च न कर्तव्यः पाण्डवान्प्रति भारत।
पार्थान्प्रति पुरा वत्स बहूपायाः कृतास्त्वया ॥ २-९७-७६ (१५३३३)
तानुपायान्हि कौन्तेया बहुशो व्यतिचक्रमुः।
तस्माद्धितं जीविताय नः कुलस्य जनस्य च ॥ २-९७-७७ (१५३३४)
त्वं चिकीर्षसि चेद्वत्स समित्रः सहबान्धवः।
सभ्रातृकस्त्वं पार्थेन नित्यं स्नेहेन वर्तय ॥ २-९७-७८ (१५३३५)
वैशम्पायन उवाच ॥ २-९७-७९क्ष् (१७०६)
धृतराष्ट्रवचः श्रुत्वा राजा दुर्योधनस्तदा।
चिन्तयित्वा मुहूर्तं तु विधिना चोदितोऽब्रवीत्'॥ २-९७-७९ (१५३३६)
पुनर्दीव्याम भद्रं ते वनवासाय पाण्डवैः।
एवमेतान्वशे कर्तुं शक्ष्यामः पुरुषर्षभ ॥ष २-९७-८० (१५३३७)

ते वा द्वादश वर्षाणि वयं वा द्यूतनिर्जिताः।
प्रविशेम महारण्यमजिनैः प्रतिवासिताः ॥ २-९७-८१ (१५३३८)
त्रयोदशं च स्वजनैरज्ञाताः परिवत्सरम्।
ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश ॥ २-९७-८२ (१५३३९)
निवसेम वयं ते वा तथा द्यूतं प्रवर्तताम्।
अक्षानुप्त्वा पुनर्द्यूतमिदं कुर्वन्तु पाण्डवः ॥ २-९७-८३ (१५३४०)
एतत्कृत्यतमं राजन्नस्माकं भरतर्षभ।
अयं हि शकुनिर्वेद सविद्यामक्षसम्पदम् ॥ २-९७-८४ (१५३४१)
दृढमूलं वयं राज्ये मित्राणि परिगृह्य च।
सारवद्विपुलं सैन्यं सत्कृत्य च दुरासदम् ॥ २-९७-८५ (१५३४२)
ते च त्रयोदशं वर्षं पारयिष्यन्ति चेद्व्रतम्।
जेष्यामस्तान्वयं राजन्रोचतां ते परन्तप ॥ २-९७-८६ (१५३४३)
धृतराष्ट्र उवाच ॥ २-९७-८७क्ष् (१७०७)
तूर्णं प्रत्यानयस्वैतान्कामं व्यध्वगतानपि।
आगच्छन्तु पुनर्द्यूतमिदं कुर्वन्तु पाण्डवः ॥ २-९७-८७ (१५३४४)
वैशम्पायन उवाच ॥ २-९७-८८क्ष् (१७०८)
ततो द्रोणः सोमदत्तो बाह्लीकश्चैव गौतमः।
विदुरो द्रोणपुत्रश्च वैश्यापुत्रश्च वीर्यवान् ॥ २-९७-८८ (१५३४५)
भूरिश्रवाः शान्तनवो विकर्णश्च महारथः।
मा द्यूतमित्यभाषन्त शमोऽस्त्विति च सर्वशः ॥ २-९७-८९ (१५३४६)
अकामानां च सर्वेषां सुहृदामर्थदर्शिनाम्।
अकरोत्पाण्डवाह्वानं धृतराष्ट्रः सुतप्रियः ॥ २-९७-९० (१५३४७)
अथाब्रवीन्महाराज धृतराष्ट्रं जनेश्वरम्।
पुत्रहार्दाद्धर्मयुक्ता गान्धारी शोककर्शिता ॥ २-९७-९१ (१५३४८)
जाते दुर्योधने क्षत्ता महामतिरभाषत।
नीयतां परलोकाय साध्वयं कुलपांसनः ॥ २-९७-९२ (१५३४९)
व्यनदज्जातमात्रो हि गोमायुरिव भारत।
अन्तो नूनं कुलस्यास्य कुरवस्तन्निबोधत ॥ २-९७-९३ (१५३५०)
मा निमज्जीः स्वदोषेण महाप्सु त्वं हि भारत।
मा बालानामशिष्टानामभिमंस्था मतिं प्रभो ॥ २-९७-९४ (१५३५१)
मा कुलस्य क्षये घोरे कारणं त्वं भविष्यसि।
बद्धं सेतुं को नु भिन्द्याद्धमेच्छान्तं च पावकम् ॥ २-९७-९५ (१५३५२)
शमे स्थितान्को नु पार्थान्कोपयेद्भरतर्षभ।
स्मरन्तं त्वामाजमीढं स्मारयिष्याम्यहं पुनः ॥ २-९७-९६ (१५३५३)
शास्त्रं न शास्ति दुर्बुद्धिं श्रेयसे चेतराय च।
न वै वृद्धो बालमतिर्भवेद्राजन्कथञ्चन ॥ २-९७-९७ (१५३५४)

त्वन्नेत्राः सन्तु ते पुत्रा मा त्वां दीर्णाः प्रहासिषुः।
तस्मादयं मद्वचनात्त्यज्यतां कुलपांसनः ॥ २-९७-९८ (१५३५५)
तथा ते न कृतं राजन्पुत्रस्नेहान्नराधिप।
तस्य प्राप्तं फलं विद्धि कुलान्तकरणाय यत् ॥ २-९७-९९ (१५३५६)
शमेन धर्मेण नयेन युक्ता
या ते बुद्धिः साऽस्तु ते मा प्रमादीः।
प्रध्वंसिनी क्रूरसमाहिता श्री-
र्मृदुप्रौढा गच्छति पुत्रपौत्रान् ॥ २-९७-१०० (१५३५७)
अथाब्रवीन्महाराजो गान्धारीं धर्मदर्शिनीम्।
अन्तः कामं कुलस्यास्तु न शक्नोमि निवारितुम् ॥ २-९७-१०१ (१५३५८)
यथेच्छन्ति तथैवास्तु प्रत्यागच्छन्तु पाण्डवाः।
पुनर्द्यूतं च कुर्वन्तु मामकाः पाण्डवैः सह ॥ ॥ २-९७-१०२ (१५३५९)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यूतपर्वणि सप्तनवतितमोऽध्यायः ॥९७.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-९७-९० अकामानां द्यूतमनिच्छतां सताम् ॥
२-९७-९८ त्वन्नेत्रास्त्वमेव नेता येषां ते त्वन्नेत्राः ।दीर्णास्त्वत्तो भिन्नर्म यादाः ॥

सभापर्व - अध्याय ०९८
॥ श्रीः ॥
२.९८. अध्यायः ९८

Mahabharata - Sabha Parva - Chapter Topics
निजनगरं गच्छतो युधिष्ठिरस्य मध्येमार्गं दूताह्वानेन पुनर्निवृत्त्य द्यूत सभाप्रवेशः ॥१.।अनुद्यूतेपि युधिष्ठिरस्य

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततो व्यध्वगतं पार्थं प्रातिकामी युधिष्ठिरम्।
उवाच वचनाद्राज्ञो धृतराष्ट्रस्य धीमतः ॥ २-९८-१ (१५३६०)
उपास्तीर्णा सभा राजन्नक्षानुप्त्वा युधिष्ठिर।
एहि पाण्डव दीव्येति पिता त्वाह नराधिपः ॥ २-९८-२ (१५३६१)

युधिष्ठिर उवाच ॥ २-९८-३क्ष् (१७०९)
धातुर्नियोगाद्भूतानि प्राप्नुवन्ति शुभाशुभम्।
न निवृत्तिस्तयोरस्ति देवतव्यं पुनर्यदि ॥ २-९८-३ (१५३६२)
अक्षद्यूते समाह्वानं नियोगात्स्थविरस्य च।
जानन्नपि क्षयकरं नातिक्रमितुमुत्सहे ॥ २-९८-४ (१५३६३)
वैशम्पायन उवाच ॥ २-९८-५क्ष् (१७१०)
असम्भवो हेममयस्य जन्तो-
स्तथापि रामो लुलुभे मृगाय।
प्रायः समासन्नपराभवाणां
धियो विपर्यस्ततरा भवन्ति ॥ २-९८-५ (१५३६४)
इति ब्रुवन्निववृते भ्रातृभिः सह पाण्डवः।
जानांश्च शकुनेर्मायां पार्थो द्यूतमियात्पुनः ॥ २-९८-६ (१५३६५)
विविशुस्ते सभां तां तु पुनरेव महारथाः।
व्यथयन्ति स्म चेतांसि सुहृदां भरतर्षभाः ॥ २-९८-७ (१५३६६)
यथोपजोषमासीनाः पुनर्द्यूतप्रवृत्तये।
सर्वलोकविनाशाय दैवेनोपनिपीडिताः ॥ २-९८-८ (१५३६७)
शकुनिरुवाच ॥ २-९८-९क्ष् (१७११)
अमुञ्चत्स्थविरो यद्वो धनं पूजितमेव तत्।
महाधनं ग्लहं त्वेकं शृणु भो भरतर्षभ ॥ २-९८-९ (१५३६८)
वयं वा द्वादशाब्दानि युष्माभिर्द्यूतनिर्जिताः।
प्रविशेम महारण्यं रौरवाजिनवाससः ॥ २-९८-१० (१५३६९)
त्रयोदशं च स्वजनैरज्ञाताः परिवत्सरम्।
ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश ॥ २-९८-११ (१५३७०)
अस्माभिर्निर्जिता यूयं वने द्वादश वत्सरान्।
वसध्वं कृष्णया सार्धमजिनैः प्रतिवासिताः ॥ २-९८-१२ (१५३७१)
त्रयोदशं च स्वजनैरज्ञाताः पिरवत्सरम्।
ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश ॥ २-९८-१३ (१५३७२)
त्रयोदशे च निर्वृत्ते पुनरेव यथोचितम्।
स्वराज्यं प्रतिपत्तव्यमितरैरथवेतरैः ॥ २-९८-१४ (१५३७३)
अनेन व्यवसायेन सहास्माभिर्युधिष्ठिर।
अक्षानुप्त्वा पुनर्द्यूतमेहि दीव्यस्व भारत ॥ २-९८-१५ (१५३७४)
अथ सभ्याः सभामध्ये समुच्छ्रितकरास्तदा।
ऊचुरुद्विग्नमनसः संवेगात्सर्व एव हि ॥ २-९८-१६ (१५३७५)
सभ्या ऊचुः। २-९८-१७क्ष् (१७१२)
अहो धिग्बान्धवा नैनं बोधयन्ति महद्भयम्।
बुद्ध्या बुद्ध्येन्न वा बुद्ध्येदयं वै भरतर्षभ ॥ २-९८-१७ (१५३७६)

वैशम्पायन उवाच ॥ २-९८-१८क्ष् (१७१३)
जनप्रवादान्सुबहूञ्शृण्वन्नपि नराधिपः।
ह्रिया च धर्मसंयोगात्पार्थो द्यूतमियात्पुनः ॥ २-९८-१८ (१५३७७)
जानन्नापि महाबुद्धिः पुनर्द्यूतमवर्तयत्।
अप्यासन्नो विनाशः स्यात्कुरूणामितिचिन्तयन् ॥ २-९८-१९ (१५३७८)
युधिष्ठिर उवाच ॥ २-९८-२०क्ष् (१७१४)
कथं वै मद्विधो राजा स्वधर्ममनुपालयन्।
आहूतो विनिवर्तेत दीव्यामि शकुने त्वया ॥ २-९८-२० (१५३७९)
शकुनिरुवाच ॥ २-९८-२१क्ष् (१७१५)
गवाश्वं बहुधेनुकमपर्यन्तमजाविकम्।
गजाः कोशो हिरण्यं च दासीदासाश्च सर्वशः ॥ २-९८-२१ (१५३८०)
हित्वा नो ग्लह एवैको वनवासाय पाण्डवाः।
यूयं वयं वा विजिता वसेम वनमाश्रिताः ॥ २-९८-२२ (१५३८१)
त्रयोदशं च वै वर्णमज्ञाताः स्वजनैस्तथा।
अनेन व्यवसायेन दीव्याम पुरुषर्षभाः। २-९८-२३ (१५३८२)
समुत्क्षेपेण चैकेन वनवासाय भारत ॥ २-९८-२४ (१५३८३)
ग वैशम्पायन उवाच ॥ २-९८-२४क्ष् (१७१६)
एवं दैवबलाविष्टो धर्मराजो युधिष्ठिरः।
भीष्मद्रोणाऽऽवार्यमाणो विदुरेण च धीमता ॥ २-९८-२४ (१५३८४)
युयुत्सुना कृपेणाथ सञ्जयेन च भारत।
गान्धार्या पृथया चैव भीमार्जुनयमैस्तथा ॥ २-९८-२५ (१५३८५)
विकर्णेन च वीरेण द्रौपद्या द्रौणिना तथा।
सोमदत्तेन च तथा बाह्लीकेन च धीमता ॥ २-९८-२६ (१५३८६)
वार्यमाणोपि सततं न च राजन्नियच्छति।
एवं संवार्यमाणोपि कौन्तेयो हितकाम्यया ॥ २-९८-२७ (१५३८७)
देवकार्यार्थसिद्ध्यर्थं मुहूर्तं कलिमाविशत्।
अविष्टः कलिना राजञ्छकुनिं प्रत्यभाषत ॥ २-९८-२८ (१५३८८)
एवं भवत्विति तदा वनवासाय दीव्यति'।
प्रतिजग्राह तं पार्थो ग्लहं जग्राह सौबलः ॥
जितमित्येव शकुनिर्युधिष्ठिरमभाषत ॥ ॥ २-९८-२९ (१५३८९)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यूतपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-९८-१६ संवेगादतिशयात् ॥

सभापर्व - अध्याय ०९९
॥ श्रीः ॥
२.९९. अध्यायः ९९

Mahabharata - Sabha Parva - Chapter Topics
वनाय प्रस्थितान्पाण्डवान्प्रति दुश्शासनकृतापहासः ॥१.।पाण्डवानां बहुप्रतिज्ञाकरणपूर्वकं धृतराष्ट्रसमीपगमनम्

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततः पराजिताः पार्था वनावासाय दीक्षिताः।
अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमम् ॥ २-९९-१ (१५३९०)
अजिनैः संवृतान्दृष्ट्वा हृतराज्यानरिन्दमान्।
प्रस्थितान्वनवासाय ततो दुःशासनोऽब्रवीत् ॥ २-९९-२ (१५३९१)
प्रवृत्तं धार्तराष्ट्रस्य चक्रं राज्ञो महात्मनः।
पराजिताः पाण्डवेया विपत्तिं परमां गताः ॥ २-९९-३ (१५३९२)
अद्य देवाः सम्प्रयाताः समैर्वर्त्मभिरस्थलैः।
गुणज्येष्ठास्तथा श्रेष्ठाः श्रेयांसो यद्वयं परैः ॥ २-९९-४ (१५३९३)
नरकं पातिताः पार्था दीर्घकालमनन्तकम्।
सुखाच्च हीना राज्याच्च विनष्टाः शाश्वतीः समाः ॥ २-९९-५ (१५३९४)
धनेन मत्ता ये ते स्म धार्तराष्ट्रान्प्रहासिषुः।
ते निर्जिता हृतधना वनमेष्यन्ति पाण्डवः ॥ २-९९-६ (१५३९५)
चित्रान्सन्नाहानवमुञ्चन्तु चैषां
वासांसि दिव्यानि च भानुमन्ति ॥
विवास्यन्तां रुरुचर्माणि सर्वे
यथा ग्लहं सौबलस्याभ्युपेताः ॥ २-९९-७ (१५३९६)
न सन्ति लोकेषु पुमांस ईदृशा
इत्येव ये भावितबुद्धयः सदा।
ज्ञास्यन्ति तेत्मानमिमेऽद्य पाण्डवा
विपर्यये पाण्ढतिला इवाफलाः ॥ २-९९-८ (१५३९७)
इदं हि वासो यदि वेदृशानां
मनस्विनां रौरवमाहवेषु ॥
आदीक्षितानामजिनानि यद्व-

द्बलीयसां पश्यत पाण्डवानाम् ॥ २-९९-९ (१५३९८)
महाप्राज्ञः सौमकिर्यज्ञसेनः
कन्यां पाञ्चालीं पाण्डवेभ्यः प्रदाय।
अकार्षिद्वै सुकृतं नेह किञ्चित्
क्लीबाः पार्थाः पतयो याज्ञसेन्याः ॥ २-९९-१० (१५३९९)
सूक्ष्मप्रावारानजिनोत्तरीयान्
दृष्ट्वाऽरण्ये निर्धनानप्रतिष्ठान्।
कां त्वं प्रीतिं लप्स्यसे याज्ञसेनि
पतिं वृणीष्वेह यमन्यमिच्छसि ॥ २-९९-११ (१५४००)
एते हि सर्वे कुरवः समेताः
क्षान्ता दान्ताः सुद्रविणोपपन्नाः।
एषां वृणीष्वैकतमं पतित्वे
न त्वां नयेत्कालविपर्ययोऽयम् ॥ २-९९-१२ (१५४०१)
यथाऽफलाः षण्ढतिला यथा चर्ममया मृगाः।
तथैव पाण्डवाः सर्वे यथा काकयवा अपि ॥ २-९९-१३ (१५४०२)
किं पाण्डवांस्ते पतितानुपास्य
मोघः श्रमः षण्ढतिलानुपास्य।
एवं नृशंसः परुषाणि पार्था-
नश्रावयद्धृतराष्ट्रस्य पुत्रः ॥ २-९९-१४ (१५४०३)
तद्वै श्रुत्वा भीमसेनोऽत्यमर्षी
निर्भर्त्स्योच्चैः सन्निगृह्यैव रोषात्।
उवाच चैनं सहसैवोपगम्य
सिंहो यथा हैमवतः शृगालम् ॥ २-९९-१५ (१५४०४)
भीमसेन उवाच ॥ २-९९-१६क्ष् (१७१७)
क्रूर पापजनैर्जुष्टमकृतार्थं प्रभाषसे।
गान्धारविद्यया हि त्वं राजमध्ये विकत्थसे ॥ २-९९-१६ (१५४०५)
यथा तुदसि मर्माणि वाक्छरैरिह नो भृशम्।
तथा स्मारयिता तेऽहं कृन्तन्मर्माणि संयुगे ॥ २-९९-१७ (१५४०६)
ये च त्वामनुवर्तन्ते क्रोधलोभवशानुगाः।
गोप्तारः सानुबन्धांस्तान्नेताऽस्मि यमसादनम् ॥ २-९९-१८ (१५४०७)
वैशम्पायन उवाच ॥ २-९९-१९क्ष् (१७१८)
एवं ब्रुवाणमजिनैर्विवासितं
दुःशासनस्तं परिनृत्यति स्म।
मध्ये कुरूणां धर्मनिबद्धमार्गं
गौर्गौरिति स्माह्वयन्मुक्तलज्जः ॥ २-९९-१९ (१५४०८)
भीमसेन उवाच ॥ २-९९-२०क्ष् (१७१९)

नृशंस परुषं वक्तुं दुःशासन त्वया।
निकृत्या हि धनं लब्ध्वा को विकत्थितुमर्हति ॥ २-९९-२० (१५४०९)
मैव स्म सुकृतां लोकान्गच्छेत्पार्थो वृकोदरः।
यदि वक्षो हि ते भित्त्वा न पिबेच्छोणितं रणे ॥ २-९९-२१ (१५४१०)
धार्तराष्ट्रान्रणे हत्त्वा मिषतां सर्वधन्विनाम्।
शमं गन्ताऽस्मि नचिरात्सत्यमेतद्ब्रवीमि ते ॥ २-९९-२२ (१५४११)
वैशम्पायन उवाच ॥ २-९९-२३क्ष् (१७२०)
तस्य राजा सिंहगतेः सखेलं
दुर्योधनो भीमसेनस्य हर्षात्।
गतिं स्वगत्याऽनुचकार मन्दो
निर्गच्छतां पाण्डवानां सभायाः ॥ २-९९-२३ (१५४१२)
नैतावता कृतमित्यब्रवीत्तं
वृकोदरः सन्निवृत्तार्धकायः।
शीघ्रं हि त्वां निहतं सानुबन्धं
संस्मार्याहं प्रतिवक्ष्यामि मूढ ॥ २-९९-२४ (१५४१३)
एवं समीक्ष्यात्मनि चावमानं
नियम्य मन्युं बलवान्स मानी।
राजानुगः संसदि कौरवाणां
विनिष्क्रामन्वाक्यमुवाच भीमः ॥ २-९९-२५ (१५४१४)
अहं दुर्योधनं हन्ता कर्णं हन्ता धनञ्जयः।
शकुनिं चाक्षकितवं सहदेवो हनिष्यति ॥ २-९९-२६ (१५४१५)
इदं च भूयो वक्ष्यामि सभामध्ये बृहद्वचः।
सत्यं देवाः करिष्यन्ति यन्नो युद्धं भविष्यति ॥ २-९९-२७ (१५४१६)
सुयोधनमिमं पापं हन्ताऽस्मि गदया युधि।
शिरः पादेन चास्याहमधिष्ठास्यामि भूतले ॥ २-९९-२८ (१५४१७)
वाक्यशूरस्य चैवास्य परुषस्य दुरात्मनः।
दुःशासनस्य रुधिरं पाताऽस्मि मृगराडिव ॥ २-९९-२९ (१५४१८)
अर्जुन उवाच ॥ २-९९-३०क्ष् (१७२१)
'भीमसेन न ते सन्ति येषां वैरं त्वया त्विह।
मत्ता मृगेषु सुखिनो न बुद्ध्यन्ते महद्भयम्'॥ २-९९-३० (१५४१९)
नैवं वाचा व्यवसितं भीम विज्ञायते सताम्।
इतश्चतुर्दशे वर्षे द्रष्टारो यद्भविष्यति ॥ २-९९-३१ (१५४२०)
भीमसेन उवाच ॥ २-९९-३२क्ष् (१७२२)
दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः।
दुःशासनचतुर्थानां भूमिः पास्यति शोणितम् ॥ २-९९-३२ (१५४२१)
अर्जुन उवाच ॥ २-९९-३३क्ष् (१७२३)

असूयितारं द्रष्टारं प्रवक्तारं विकत्थनम्।
भीमसेन नियोगात्ते हन्ताहं कर्णमाहवे ॥ २-९९-३३ (१५४२२)
अर्जुनः प्रतिजानीते भीमस्य प्रियकाम्यया।
कर्णं कर्णानुगांश्चैव रणे हन्ताऽस्मि पत्रिभिः ॥ २-९९-३४ (१५४२३)
ये चान्ये प्रतियोत्स्यन्ति बुद्धिमोहेन मां नृपाः।
तांश्च सर्वानहं बाणैर्नेताऽस्मि यमसादनम् ॥ २-९९-३५ (१५४२४)
चलेद्धि हिमवान्स्थानान्निष्प्रभः स्याद्दिवाकरः।
शैत्यं सोमात्प्रणश्येत मत्सत्यं विचलेद्यदि ॥ २-९९-३६ (१५४२५)
न प्रदास्यति चेद्राज्यमितो वर्षे चतुर्दशे।
दुर्योधनोऽभिसत्कृत्य सत्यमेतद्भविष्यति ॥ २-९९-३७ (१५४२६)
वैशम्पायन उवाच ॥ २-९९-३८क्ष् (१७२४)
इत्युक्तवति पार्थे तु श्रीमान्माद्रवतीसुतः।
प्रगृह्य विपुलं बाहुं सहदेवः प्रतापवान् ॥ २-९९-३८ (१५४२७)
सौबलस्य वधं प्रेप्सुरिदं वचनमब्रवीत्।
क्रोधसंरक्तनयनो निः श्वसन्निव पन्नगः ॥ २-९९-३९ (१५४२८)
सहदेव उवाच ॥ २-९९-४०क्ष् (१७२५)
अक्षान्यान्मन्यसे मूढ गान्धाराणां यशोहर।
नैतेऽक्षा निशिता बाणास्त्वयैते समरे वृताः ॥ २-९९-४० (१५४२९)
यथा चैवोक्तवान्भीमस्त्वामुद्दिश्य सबान्धवम्।
कर्ताहं कर्मणस्तस्य कुरु कार्याणि सर्वशः ॥ २-९९-४१ (१५४३०)
हन्ताऽस्मि तरसा युद्धे त्वामेवहे सबान्धवम्।
यदि स्थास्यसि सङ्ग्रामे क्षत्रधर्मेण सौबल ॥ २-९९-४२ (१५४३१)
सहदेववचः श्रुत्वा नकुलोऽपि विशाम्पते।
दर्शनीयतमो नृणामिदं वचनमब्रवीत् ॥ २-९९-४३ (१५४३२)
सुतेयं यज्ञसेनस्य द्यूतेऽस्मिन्धृतराष्ट्रजैः।
यैर्वाचः श्राविता रूक्षाः स्थितैर्दुर्योधनप्रिये ॥ २-९९-४४ (१५४३३)
तान्धार्तराष्ट्रान्दुर्वृत्तान्मुमूर्षून्कालनोदितान्।
गमयिष्यामि भूयिष्ठानहं वैवस्वतक्षयम् ॥ २-९९-४५ (१५४३४)
गउलूकं च दुरात्मानं सौबलस्य सुतं प्रियम्।
क्रूरं हन्ताऽस्मि समरे तं वै क्रूरं नराधमम्'॥ २-९९-४६ (१५४३५)
निदेशाद्धर्मराजस्य द्रौपद्याः पदवीं चरन्।
निर्धार्तराष्ट्रां पृथिवीं कर्ताऽस्मि नचिरादिव ॥ २-९९-४७ (१५४३६)
वैशम्पायन उवाच ॥ २-९९-४८क्ष् (१७२६)
एवं ते पुरुषव्याघ्राः सर्वे व्यायतबाहवः।
प्रतिज्ञा बहुलाः कृत्वा धृतराष्ट्रमुपागमन् ॥ ॥ २-९९-४८ (१५४३७)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यूतपर्वणि एकोनशततमोऽध्यायः ॥ ९९ ॥

Mahabharata - Sabha Parva - Chapter Footnotes

२-९९-१३ काकयवा निस्तण्डुलं तृणधान्यम् ॥
२-९९-१७ स्मरयिता स्मारयिष्यामि ॥

सभापर्व - अध्याय १००
॥ श्रीः ॥
२.१००. अध्यायः १००

Mahabharata - Sabha Parva - Chapter Topics
युधिष्ठिरेण वनगमनाय भीष्माद्यामन्त्रणम् ॥ १.। पाण्डवान्प्रति विदुरवचनम् ॥ २.।

Mahabharata - Sabha Parva - Chapter Text

युधिष्ठिर उवाच ॥

आमन्त्रयामि भरतांस्तथा वृद्धं पितामहम् ॥
राजानं सोमदत्तं च महाराजं च बाह्लिकम् ॥ २-१००-१ (१५४३८)
द्रोणं कृपं नृपांश्चान्यानश्वत्थामानमेव च।
विदुरं धृतराष्ट्रं च धार्तराष्ट्रांश्च सर्वशः ॥ २-१००-३अग्सौमदत्तिं महावीर्यं विकर्णं च महामतिम्'।
युयुत्सुं सञ्जयं चैव तथैवान्यान्सभासदः ॥ २-१००-४अग्गान्धारीं च महाभागां मातरं च तथा पृथाम्'।
सर्वानामन्त्र्य गच्छामि द्रष्टाऽस्मि पुनरेत्य वः ॥ २-१००-२ (१५४३९)
वैशम्पायन उवाच ॥ २-१००-५क्ष् (१७२७)
न च किञ्चिदथोचुस्तं ह्रियाऽऽसन्ना युधिष्ठिरम्।
मनोभिरेव कल्याणं दध्युस्ते तस्य धीमतः ॥ २-१००-५ (१५४४०)
विदुर उवाच ॥ २-१००-६क्ष् (१७२८)
आर्या पृथा राजपुत्री नारण्यं गन्तुमर्हति।
सुकुमारी च वृद्धा च नित्यं चैव सुखोचिता ॥ २-१००-६ (१५४४१)
इह वत्स्यति कल्याणी सत्कृता मम वेश्मनि।
इति पार्था विजानीध्वमगदं वोऽस्तु सर्वशः ॥ २-१००-७ (१५४४२)
पाण्डवा ऊचुः। २-१००-८क्ष् (१७२९)
तथेत्युक्त्वाऽब्रुवन्सर्वे यथा नो वदसेऽनघ।
त्वं पितृव्यः पितृसमो वयं च त्वत्परायणाः ॥ २-१००-८ (१५४४३)

यथाऽऽज्ञापयसे विद्वंस्त्वं हि नः परमो गुरुः।
यच्चान्यदपि कर्तव्यं तद्विधत्स्व महामते ॥ २-१००-९ (१५४४४)
विदुर उवाच ॥ २-१००-१०क्ष् (१७३०)
युधिष्ठिर विजानीहि ममेदं भरतर्षभ।
नाधर्मेण जितः कश्चिद्व्यथते वै पराजये ॥ २-१००-१० (१५४४५)
त्वं वै धर्मं विजानीषे युद्धे जेता धनञ्जयः।
हन्ताऽरीणां भीमसेनो नकुलस्त्वर्थसङ्ग्रही ॥ २-१००-११ (१५४४६)
संयन्ता सहदेवस्तु धौम्यो ब्रह्मविदुत्तमः।
धर्मार्थकुशला चैव द्रौपदी धर्मचारिणी ॥ २-१००-१२ (१५४४७)
अन्योन्यस्य प्रियाः सर्वे तथैव प्रियदर्शनाः।
परैरभेद्याः सन्तुष्टाः को वोन न स्पृहयेदिह ॥ २-१००-१३ (१५४४८)
एष वै सर्वकल्याणः समाधिस्तव भारत।
नैनं शत्रुर्विषहते शक्रेणापि समोऽप्युत ॥ २-१००-१४ (१५४४९)
हिमवत्यनुशिष्टोऽसि मेरुसावर्णिना पुरा।
द्वैपायनेन कृष्णेन नगरे वारणावते ॥ २-१००-१५ (१५४५०)
भृगुतुङ्गे च रामेण दृष्टद्वत्यां च शम्भुना।
अश्रौषीरसि तस्यापि महर्षेरञ्जनं प्रति ॥ २-१००-१६ (१५४५१)
कल्माषीतीरसंस्थस्य गतस्त्वं शिष्यतां भृगोः।
द्रष्टा सदा नारदस्ते धौम्यस्तेऽयं पुरोहितः ॥ २-१००-१७ (१५४५२)
माहासीः साम्पराये त्वं बुद्धिं तामृषिपूजिताम्।
पुरूरवसमैलं त्वं बुद्ध्या जयसि पाण्डव ॥ २-१००-१८ (१५४५३)
शक्त्या जयसि राज्ञोऽन्यानृषीन्धर्मोपसेवया।
ऐन्द्रे जये धृतमना याम्ये कोपविधारणे ॥ २-१००-१९ (१५४५४)
तथा विसर्गे कौबेरे वारुणे कोपविधारणे ॥
आत्मप्रदानं सौम्यत्वमद्भ्यश्चैवोपजीवनम् ॥ २-१००-२० (१५४५५)
भूमेः क्षमा च तेजश्च समग्रं सूर्यमण्डलात्।
वायोर्बलं प्राप्नुहि त्वं भूतेभ्यश्चात्मसम्पदम् ॥ २-१००-२१ (१५४५६)
अगदं वोऽस्तु भद्रं वो द्रष्टाऽस्मि पुनरागतान्।
आपद्धर्मार्थकृच्छ्रेषु सर्वकार्येषु वा पुनः ॥ २-१००-२२ (१५४५७)
यथावत्प्रतिपद्येथाः काले काले युधिष्ठिर।
आपृष्टोऽसीह कौन्तेय स्वस्ति प्राप्नुहि भारत ॥ २-१००-२३ (१५४५८)
कृतार्थं स्वस्मिमन्तं त्वां द्रक्ष्यामः पुनरागतम्।
न हि वो वृजिनं किञ्चिद्वेद कश्चित्पुराकृतम् ॥ २-१००-२४ (१५४५९)
वैशम्पायन उवाच ॥ २-१००-२५क्ष् (१७३१)
एवमुक्तस्तथेत्युक्त्वा पाण्डवः सत्यविक्रमः।
भीष्मद्रोणौ नमस्कृत्य प्रातिष्ठत युधिष्ठिरः ॥ ॥ २-१००-२५ (१५४६०)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यातपर्वणि शततमोऽध्यायः ॥ १००.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१००-१४ समाधिर्मनः स्वास्थ्यकरो नियमः ॥
२-१००-१९ विधारणे नियमने ॥
२-१००-२० विसर्गे दाने ।संयमे वशीकरणे ।उपजीवनं जीवनहेतुत्वम् ॥

सभापर्व - अध्याय १०१
॥ श्रीः ॥
२.१०१. अध्यायः १०१

Mahabharata - Sabha Parva - Chapter Topics
पाण्डवानां वनप्रस्थानेन खिद्यतां पौराणां वचनानि ॥ १.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

ततः सम्प्रस्थिते तत्र धर्मराजे तदा नृप।
जनाः समन्ताद्द्रष्टुं तं समारुरुहुरातुराः ॥ २-१०१-१ (१५४६१)
ततः प्रासादवर्याणि विमानशिखराणि च।
गोपुराणि च सर्वाणि वृक्षानन्यांश्च सर्वशः ॥ २-१०१-२ (१५४६२)
अथाधिरुह्य सस्त्रीका उदासीना व्यलोकयन्।
न हि रथ्यास्तदा शक्या गन्तुं ताश्च जनाकुलाः ॥ २-१०१-३ (१५४६३)
आरुह्य स्मानतास्तत्र दीनाः पश्यन्ति पाण्डवान्।
पदातिं वर्जितच्छत्रं चेलभूषणवर्जितम् ॥ २-१०१-४ (१५४६४)
वल्कलाजिनसंवीतं पार्थं दृष्ट्वा जनास्तदा।
ऊचुर्बहुविधा वाचो भृशोपहतचेतसः ॥ २-१०१-५ (१५४६५)
जना ऊचुः। २-१०१-६क्ष् (१७३२)
यं यान्तमनुयाति स्म चतुरङ्गबलं महत्।
तमेकं कृष्णया सार्धमनुगच्छन्ति पाण्डवाः ॥ २-१०१-६ (१५४६६)
चत्वारो भ्रातरश्चैव धौम्यश्चैव पुरोहितः।
भीमार्जुनौ वारयित्वा निकृत्या बद्धकार्मुकौ ॥ २-१०१-७ (१५४६७)

धर्म एवास्थितो येन त्यक्त्वा राज्यं महात्मना।
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ॥ २-१०१-८ (१५४६८)
तामद्य कृष्णां पश्यन्ति राजमार्गगता जनाः।
अङ्गरागोचितां कृष्णां रक्तचन्दनसेविनीम् ॥ २-१०१-९ (१५४६९)
वर्षमुष्णं च शीतं च नेष्यत्याशु विवर्णताम्।
अद्य नूनं पृथा देवी सत्यमाविश्य भाषते ॥ २-१०१-१० (१५४७०)
पुत्रान्स्नुषां च देवी तु द्रष्टुमद्याथ नार्हति।
निर्गुणस्यापि पुत्रस्य कथं स्याद्दुःस्वदर्शनम् ॥ २-१०१-११ (१५४७१)
किम्पुनर्यस्य लोकोऽयं जितो वृत्तेन केवलम्।
आनृशंस्यमनुक्रोशो धृतिः शीलं दमः शमः ॥ २-१०१-१२ (१५४७२)
पाण्डवं शोभयन्त्येते षड्गुणाः पुरुषोत्तमम्।
तस्मादस्योपघातेन प्रजाः परमपीडिताः ॥ २-१०१-१३ (१५४७३)
औदकानीव सत्वानि ग्रीष्मे सलिलसङ्क्षयात्।
पीडया पीडितं सर्वं जगदस्य जगत्पतेः ॥ २-१०१-१४ (१५४७४)
मूलस्यैवोपघातेन वृक्षः पुष्पफलोपगः।
मूलं ह्येष मनुष्याणां धर्मराजो महाद्युतिः ॥ २-१०१-१५ (१५४७५)
पुष्पं फलं च पत्रं च शाखास्तस्येतरे जनाः।
ते भ्रातर इव क्षिप्रं सपुत्राः सहबान्धवाः ॥ २-१०१-१६ (१५४७६)
गच्छन्तमनुगच्छामो येन गच्छति पाण्डवः।
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च ॥ २-१०१-१७ (१५४७७)
एकदुःखसुखाः पार्थमनुयाम सुधार्मिकम्।
समुच्छ्रितपताकानि परिध्वस्ताजिराणि च ॥ २-१०१-१८ (१५४७८)
उपात्तधनधान्यानि हृतसाराणि सर्वशः।
रजसाऽप्यवकीर्णानि परित्यक्तानि दैवतैः ॥ २-१०१-१९ (१५४७९)
मूषकैः परिधावद्भिरुद्बिलैरावृतानि च।
अपेतोदकधूमानि हीनसंमार्जनानि च ॥ २-१०१-२० (१५४८०)
प्रनष्टबलिकर्मेज्यामन्त्रहोमजपानि च।
दुष्कालेनेव भग्नानि भिन्नभाजनवन्ति च ॥ २-१०१-२१ (१५४८१)
अस्मत्त्यक्तानि वेश्मानि सौबलः प्रतिपद्यताम्।
वनं नगरमेवास्तु येन गच्छन्ति पाण्डवाः ॥ २-१०१-२२ (१५४८२)
अस्माभिश्च परित्यक्तं पुरं सम्पद्यतां वनम्।
बिलानि दंष्ट्रिणः सर्वे वानि मृगपक्षिणः ॥ २-१०१-२३ (१५४८३)
त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि।
अनाक्रान्तं प्रपद्यन्तः सेवमानं त्यजन्तु च ॥ २-१०१-२४ (१५४८४)
तृणमांसफलादानां देशांस्त्यक्त्वा मृगद्विजाः।
वयं पार्थैर्वने सम्यक्सह वत्स्याम निर्वृताः ॥ २-१०१-२५ (१५४८५)

इत्येवं विविधा वाचो नानाजनसमीरिताः।
शुश्राव पार्थः श्रुत्वा च न विचक्रेऽस्य मानसम् ॥ २-१०१-२६ (१५४८६)
ततः प्रासादसंस्थास्तु समन्ताद्वै गृहे गृहे।
ब्राह्मणक्षत्रियविशां शूद्राणां चैव योषितः ॥ २-१०१-२७ (१५४८७)
गत्वा स्वगृहजालानि उत्पाट्यावरणानि च।
ददृशुः पाण्डवान्दीनान्वल्कलाजिनवाससः ॥ २-१०१-२८ (१५४८८)
कृष्णां त्वदृष्टपूर्वां तां व्रजन्तीं पद्भिरेव च।
एकवस्त्रां रुदन्तीं तां मुक्तकेशीं रजस्वलाम् ॥ २-१०१-२९ (१५४८९)
दृष्ट्वा तदा स्त्रियः सर्वा विवर्णवदना भृशम्।
विलप्य बहुधा मोहाद्दुःखशोकेन पीडिताः।
हाहा धिग्धिग्धिगित्युक्त्वा नेत्रैरश्रूण्यवर्तयन् ॥ २-१०१-३० (१५४९०)
जनस्याथ वजः श्रुत्वा स राजा भ्रातृभिः सह।
उद्दिश्य वनावासाय प्रतस्थे कृतनिश्चयः ॥ २-१०१-३१ (१५४९१)
वैशम्पायन उवाच ॥ २-१०१-३२क्ष् (१७३३)
तस्मिन्सम्प्रस्थिते कृष्णा पृथां प्राप्य यशस्विनीम्।
अपृच्छद्भृशदुःखार्ता याश्चान्यास्तत्र योषितः ॥ २-१०१-३२ (१५४९२)
ततो निनादः सुमहान्पाण्डवान्तः पुरेऽभवत् ॥ २-१०१-३३ (१५४९३)
कुन्ती च भृशशन्तप्ता द्रौपदीं प्रेक्ष्य गच्छतीम्।
शोकविह्वलया वाचा कृच्छ्राद्वचनमब्रवीत् ॥ २-१०१-३४ (१५४९४)
वत्से शोको न ते कार्यः प्राप्येदं व्यसनं महत्।
स्त्रीधर्माणामभिज्ञाऽसि शीलाचारवती तथा ॥ २-१०१-३५ (१५४९५)
न त्वां शन्देष्टुमर्हामि भर्तॄन्प्रति शुचिस्मिते।
साध्वी गुणसमापन्ना भूषितं ते कुलद्वयम् ॥ २-१०१-३६ (१५४९६)
सभाग्याः कुरवश्चेमे ये न दग्धास्त्वयाऽनघे।
अरिष्टं व्रज पन्थानं मदनुध्यानबृंहिता ॥ २-१०१-३७ (१५४९७)
भाविन्यर्थे हि सत्स्त्रीणां वैकृतं नोपजायते।
गुरुधर्माभिगुप्ता च श्रेयः क्षिप्रमवप्स्यसि ॥ २-१०१-३८ (१५४९८)
सहदेवश्च मे पुत्रः सदाऽवेक्ष्यो वने वसन्।
यथेदं व्यसनं प्राप्य नायं सीदेन्महामतिः ॥ २-१०१-३९ (१५४९९)
वैशम्पायन उवाच ॥ २-१०१-४०क्ष् (१७३४)
तथेन्युक्त्वा तु सा देवी स्रवन्नेत्रजलाविला।
शोणिताक्तैकवसना मुक्तकेशी विनिर्ययौ ॥ २-१०१-४० (१५५००)
तां क्रोशन्तीं पृथा दुःखादनुवव्राज गच्छतीम्।
अथापश्यन्सुतान्सर्वान्हृताभरणवाससः ॥ २-१०१-४१ (१५५०१)
रुरुचर्मावृततनून्ह्रिया किञ्चिदवाङ्मुखान्।
परैः परीतान्संहृष्टैः सुहृद्भिश्चानुशोचितान् ॥ २-१०१-४२ (१५५०२)

तदवस्थान्सुतान्सर्वानुपसृत्यातिवत्सला।
स्वजमानाऽवदच्छेकात्तत्तद्विलपती बहु ॥ २-१०१-४३ (१५५०३)
कुन्त्युवाच। २-१०१-४४क्ष् (१७३५)
कथं सद्धर्मचारित्रान्वृत्तस्थितिविभूषितान्।
अक्षुद्रान्दृढभक्तांश्च दैवतेज्यापरान्सदा ॥ २-१०१-४४ (१५५०४)
व्यसनं वः समभ्यागात्कोऽयं विधिविपर्ययः।
कस्यापध्यानजं चेदमागः पश्यामि वो धिया ॥ २-१०१-४५ (१५५०५)
स्यात्तु मद्भाग्यदोषोऽयं याऽहं युष्मानजीजनम्।
दुःखायासभुजोऽत्यर्थं युक्तानप्युत्तमैर्गुणैः ॥ २-१०१-४६ (१५५०६)
कथं वत्स्यथ दुर्गेषु वने ऋद्धिविनाकृताः।
वीर्यसत्वबलोत्साहतेजोभिरकृशाः कृशाः ॥ २-१०१-४७ (१५५०७)
यद्येवमहमज्ञास्यं वने वासं हि वो ध्रुवम्।
शतशृङ्गान्मृते पाण्डौ नागमिष्यं गजाह्वयम् ॥ २-१०१-४८ (१५५०८)
धन्यं वः पितरं मन्ये तपोमेधान्वितं तथा।
यः पुत्राधिमसम्प्राप्य स्वर्गेच्छामकरोत्प्रियाम् ॥ २-१०१-४९ (१५५०९)
धन्यां चातीन्द्रियज्ञानामिमां प्राप्तां परां गतिम्।
मन्ये तु माद्रीं धर्मज्ञां कल्याणीं सर्वथैव तु ॥ २-१०१-५० (१५५१०)
रत्या मत्या च गत्या च ययाऽहमभिसन्धिता।
जीवितप्रियतां मह्यं धिङ्मां सङ्क्लेशभागिनीम् ॥ २-१०१-५१ (१५५११)
पुत्रका न विहास्ये वः कृच्छ्रलब्धान्प्रियान्सतः।
साऽहं यास्यामि हि वनं हा कृष्णे किं जहासि माम्। २-१०१-५२ (१५५१२)
अन्तवत्यसुधर्मेऽस्मिन्धात्रा किं नु प्रमादतः।
ममान्तो नैव विहितस्तेनायुर्न जहाति माम् ॥ २-१०१-५३ (१५५१३)
हा कृष्ण द्वारकावासिन्क्वासि सङ्कर्षणानुज।
कस्मान्न त्रायसे दुःखान्मां चेमांश्च नरोत्तमान् ॥ २-१०१-५४ (१५५१४)
अनादिनिधनं ये त्वामनुध्यायन्ति वै नराः।
तांस्त्वं पासीत्ययं वादः स गतो व्यर्थतां कथम् ॥ २-१०१-५५ (१५५१५)
इमे सद्धर्ममाहात्म्ययशोवीर्यानुवर्तिनः।
नार्हन्ति व्यसनं भोक्तुं नन्वेषां क्रियतां दया ॥ २-१०१-५६ (१५५१६)
सेयं नीत्यर्थविज्ञेषु कथमापदुपागता ॥
स्थितेषु कुलनाथेषु कथमापदुपागता ॥ २-१०१-५७ (१५५१७)
हा पाण्डो हा महाराज क्वासि किं समुपेक्षसे।
पुत्रान्विवास्यतः साधूनरिभिर्द्यूतनिर्जितान् ॥ २-१०१-५८ (१५५१८)
सहदेव निवर्तस्व ननु त्वमसि मे प्रियः।
शरीरादपि माद्रेय मां मा त्याक्षीः कुपुत्रवत् ॥ २-१०१-५९ (१५५१९)
व्रजन्तु भ्रातरस्तेऽमी यदि सत्याभिसन्धिनः।

मत्परित्राणजं धर्ममिहैव त्वमवाप्नुहि ॥ २-१०१-६० (१५५२०)
वैशम्पायन उवाच ॥ २-१०१-६१क्ष् (१७३६)
एवं विपलतीं कुन्तीमभिवाद्य प्रणम्य च।
पाण्डवा विगतानन्दा वनायैव प्रवव्रजुः ॥ २-१०१-६१ (१५५२१)
विदुरश्चापि तामार्तां कुन्तीमाश्वास्य हेतुभिः।
प्रावेशयद्गृहं क्षत्ता स्वयमार्ततरः शनैः ॥ २-१०१-६२ (१५५२२)
धार्तराष्ट्रस्त्रियस्ताश्च निखिलेनोपलभ्य तत्।
गमनं परिकर्षं च कृष्णाया द्यूतमण्डले ॥ २-१०१-६३ (१५५२३)
रुरुदुः सुस्वनं सर्वा विनिन्दन्त्यः कुरून्भृशम्।
दध्युश्च सुचिरं कालं करासक्तमुखाम्बुजाः ॥ २-१०१-६४ (१५५२४)
राजा च धृतराष्ट्रस्तु पुत्राणामनयं तदा।
ध्यायन्नुद्विग्नहृदयो न शान्तिमधिजग्मिवान् ॥ २-१०१-६५ (१५५२५)
स चिन्तयन्ननेकाग्रः शोकव्याकुलचेतनः।
क्षत्तुः सम्प्रेषयामास शीघ्रमागम्यतामिति ॥ २-१०१-६६ (१५५२६)
ततो जगाम विदुरो धृतराष्ट्रनिवेशनम्।
तं पर्यपृच्छत्संविग्नो धृतराष्ट्रो जनाधिपः ॥ ॥ २-१०१-६७ (१५५२७)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यूतपर्वणि एकोत्तरशततमोऽध्यायः ॥ १०१.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१०१-४० शोणिताक्तैकवसना रजस्वला ॥
२-१०१-५१ मह्यं मम ॥
२-१०१-५३ असुधर्मे प्राणधारणे ।अन्तवति विनाशवति ॥

सभापर्व - अध्याय १०२
॥ श्रीः ॥
२.१०२. अध्यायः १०२

Mahabharata - Sabha Parva - Chapter Topics
धृतराष्ट्रेण विदुरम्प्रति पाण्डवानां वनप्रस्थानसमये चेष्टविशेषप्रश्ने तत तच्चेष्टाविशेषकथनपूर्वकं तत्तदभिप्रायावि

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

तमागतमथो राजा विदुरं दीर्घदर्शिनम्।
साशङ्क इव प्रपच्छ धृतराष्टोऽम्बिकासुतः ॥ २-१०२-१ (१५५२८)
कथं गच्छति कौन्तेयो धर्मपुत्रो युधिष्ठिरः।
भीमसेनः सव्यसाची माद्रीपुत्री च पाण्डवौ ॥ २-१०२-२ (१५५२९)
धौम्यश्चैव कथं क्षत्तर्द्रौपदी च यशस्विनी।
श्रोतुमिच्छाम्यहं सर्वं तेषां शंस विचेष्टितम् ॥ २-१०२-३ (१५५३०)
विदुर उवाच ॥ २-१०२-४क्ष् (१७३७)
वस्त्रेण संवृत्य मुखं कुन्तीपुत्रो युधिष्ठिरः।
बाहू विशालौ सम्पश्यन्भीमो गच्छति पाण्डवः ॥ २-१०२-४ (१५५३१)
सिकता वपन्सव्यसाची राजानमनुगच्छति।
माद्रीपुत्रः सहदेवो मुखमालिप्य गच्छति ॥ २-१०२-५ (१५५३२)
पांसूपलिप्तसर्वाङ्गो नकुलश्चित्तविह्वलः।
दर्शनीयतमो लोके राजानमनुगच्छति ॥ २-१०२-६ (१५५३३)
कृष्णा तु केशैः प्रच्छाद्य मुखमायतलोचना।
दर्शनीया प्ररुदती राजानमनुगच्छति ॥ २-१०२-७ (१५५३४)
धौम्यो रौद्राणि सामानि याम्यानि च विशाम्पते।
गायन्गच्छति मार्गेषु कुशानादाय पाणिना ॥ २-१०२-८ (१५५३५)
धृतराष्ट्र उवाच ॥ २-१०२-९क्ष् (१७३८)
विविधानीह रूपाणि कृत्वा गच्छन्ति पाण्डवाः।
तन्ममाचक्ष्व विदुर कस्मादेवं व्रजन्ति ते ॥ २-१०२-९ (१५५३६)
विदुर उवाच ॥ २-१०२-१०क्ष् (१७३९)
निकृतस्यापि ते पुत्रैर्हृते राज्ये धनेषु च।
न धर्माच्चलते बुद्धिर्धर्मराजस्य धीमतः ॥ २-१०२-१० (१५५३७)
योऽसौ राजा घृणी नित्यं धार्तराष्ट्रेषु भारत।
निकृत्या भ्रंशितः क्रोधान्नोन्मीलयति लोचने ॥ २-१०२-११ (१५५३८)
नाहं जनं निर्दहेयं दृष्ट्वा घोरेण चक्षुषा।
स पिधाय मुखं राजा तस्माद्गच्छति पाण्डवः ॥ २-१०२-१२ (१५५३९)
यथा च भीमो व्रजति निगदतः शृणु।
बाह्वोर्बले नास्ति समो ममेति भरतर्षभ ॥ २-१०२-१३ (१५५४०)
बाहू विशालौ कृत्वाऽसौ तेन भीमोपि गच्छति।
बाहू विदर्शयन्राजन्बाहुद्रविणदर्पितः ॥ २-१०२-१४ (१५५४१)
चिकीर्षन्कर्म शत्रुभ्यो बाहुद्रव्यानुरूपतः।
प्रदिशञ्शरसम्पातान्कुन्तीपुत्रोऽर्जुनस्तदा ॥ २-१०२-१५ (१५५४२)
सिकता वपन्सव्यसाची राजानमनुगच्छति।
असक्ताः सिकतास्तस्य यथा सम्प्रति भारत।

असक्तं शरवर्षाणि तथा मोक्ष्यति शत्रुषु ॥ २-१०२-१६ (१५५४३)
न मे कश्चिद्विजानीयान्मुखमद्येति भारत।
मुखमालिप्य तेनासौ सहदेवोऽपि गच्छति ॥ २-१०२-१७ (१५५४४)
नाहं मनांस्याददेयं मार्गे स्त्रीणामिति प्रभो।
पांसूपलिप्तसर्वाङ्गो नकुलस्तेन गच्छति ॥ २-१०२-१८ (१५५४५)
एकवस्त्रा प्ररुदती मुक्तकेशी रजस्वला।
शोणितेनाक्तवसना द्रौपदी वाक्यमब्रवीत् ॥ २-१०२-१९ (१५५४६)
यत्कृतेऽहमिदं प्राप्ता तेषां वर्षे चतुर्दशे।
हतपत्यो हतसुता हतबन्धुजनप्रियाः ॥ २-१०२-२० (१५५४७)
बन्धुशोणितदिग्धाङ्ग्यो मुक्तकेश्यो रजस्वलाः।
एवं कृतोदका भार्याः प्रवेक्ष्यन्ति गजाह्वयम् ॥ २-१०२-२१ (१५५४८)
कृत्वा तु नैर्ऋतान्दर्भान्धीरो धौम्यः पुरोहितः।
सामानि गायन्याम्यानि पुरतो याति भारत ॥ २-१०२-२२ (१५५४९)
हतेषु भरतेष्वाजौ कुरूणां गुरवस्तदा।
एवं सामानि -- न्तीत्युक्त्वा धौम्योपि गच्छति । २-१०२-२३ (१५५५०)
ग्प्रस्थाप्य पाण्डवाञ्शेषान्निः शेषस्ते भविष्यति।
इति धौम्यो व्यवसितो रौद्रसामानि गायति ॥ २-१०२-२४ (१५५५१)
धृतराष्ट्र उवाच ॥ २-१०२-२५क्ष् (१७४०)
किमब्रुवन्नैकृतिकः किं वा नागरिका जनाः।
तथ्येन मे समाचक्ष्व क्षत्तः सर्वमशेषतः ॥ २-१०२-२५ (१५५५२)
विदुर उवाच ॥ २-१०२-२६क्ष् (१७४१)
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा येऽन्ये वदन्त्यथ।
तच्छृणुष्व महाराज वक्ष्यते च मया तव ॥ २-१०२-२६ (१५५५३)
प्रकृतय ऊचुः। २-१०२-२७क्ष् (१७४२)
हाहा गच्छन्ति नो नाथाः समवेक्षध्वमीदृशम्।
अहो धिक्कुरुवृद्धानां बालानामिव चेष्टितम् ॥ २-१०२-२७ (१५५५४)
राष्ट्रेभ्यः पाण्डुदायादाँल्लोभान्निर्वासयन्ति ये।
अनाथाः स्म वयं सर्वे वियुक्ताः पाण्डुनन्दनैः ॥ २-१०२-२८ (१५५५५)
दुर्विनीतेषु लुब्धेषु का प्रीतिः कौरवेषु नः।
इति पौराः सुदुः खार्ताः क्रोशन्ति स्म पुनः पुनः ॥ २-१०२-२९ (१५५५६)
एवमाकारलिङ्गैस्ते व्यवसायं मनोगतम्।
कथयन्तश्च कौन्तेया वनं जग्मुर्मनस्विनः ॥ २-१०२-३० (१५५५७)
एवं तेषु नराग्र्येषु निर्यत्सु गजसाह्वयात्।
अनभ्रे विद्युतश्चासन्भूमिश्च समकम्पत ॥ २-१०२-३१ (१५५५८)
राहुरग्रसदादित्यमपर्वणि विशाम्पते।
उल्का चाप्यपसव्येन पुरं कृत्वा व्यशीर्यत ॥ २-१०२-३२ (१५५५९)

प्रत्याहरन्ति क्रव्यादा गृध्रगोमायुवायसाः।
देवायतनचैत्येषु प्राकाराट्टालकेषु च ॥ २-१०२-३३ (१५५६०)
एवमेते महोत्पाताः प्रादुरासन्दुरासदाः।
भरतानामभावाय राजन्दुर्मन्त्रिते तव ॥ २-१०२-३४ (१५५६१)
वैशम्पायन उवाच ॥ २-१०२-३५क्ष् (१७४३)
एवं प्रवदतोरेव तयोस्तत्र विशाम्पते।
धृतराष्ट्रस्य राज्ञश्च विदुरस्य च धीमतः ॥ २-१०२-३५ (१५५६२)
नारदश्च सभामध्ये कुरूणामग्रतः स्थितः।
महर्षिभिः परिवृतो रौद्रं वाक्यमुवाच ह ॥ २-१०२-३६ (१५५६३)
इतश्चतुर्दशे वर्षे विङ्क्ष्यन्तीह कौरवाः।
दुर्योधनापराधेन भीमार्जुनबलेन च ॥ २-१०२-३७ (१५५६४)
इत्युक्त्वा दिवमाक्रम्य क्षिप्रमन्तरधीयत।
ब्राह्मीं श्रियं सुविपुलां बिभ्रद्देवर्षिसत्तमः ॥ २-१०२-३८ (१५५६५)
ततो दुर्योधनः कर्णः शकुनिश्चापि सौबलः।
द्रोणं द्वीपममन्यन्त राज्यं चास्मै न्यवेदयन् ॥ २-१०२-३९ (१५५६६)
अथाब्रवीत्ततो द्रोणो दुर्योधनममर्षणम्।
दुःशासनं च कर्णं च सर्वानेव च भारतान् ॥ २-१०२-४० (१५५६७)
अवध्यान्पाण्डवान्प्राहुर्देवपुत्रान्द्विजातयः।
अहं चै शरणं प्राप्तान्वर्तमानो यथाबलम् ॥ २-१०२-४१ (१५५६८)
गन्ता सर्वात्मना भक्त्या धार्तराष्ट्रान्सराजकान्।
नोत्सहेयं परित्यक्तुं दैवं हि बलवत्तरम् ॥ २-१०२-४२ (१५५६९)
धर्मतः पाण्डुपुत्रा वै वनं गच्छन्ति निर्जिताः।
ते च द्वादश वर्षाणि वने वत्स्यन्ति पाण्डवः ॥ २-१०२-४३ (१५५७०)
चरितब्रह्मचर्याश्च क्रोधामर्षवशानुगाः।
वैरं निर्यातयिष्यन्ति महद्दुःखाय पाण्डवाः ॥ २-१०२-४४ (१५५७१)
मया च भ्रंशितो राजन्द्रुपदः सखिविग्रहे।
पुत्रार्थमयजद्राजा वधाय मम भारत ॥ २-१०२-४५ (१५५७२)
याजोपयाजतपसा पुत्रं लेभे स पावकात्।
धृष्टद्युम्नं द्रौपदीं च वेदीमध्यात्सुमध्यमाम् ॥ २-१०२-४६ (१५५७३)
धृष्टद्युम्नस्तु पार्थानां स्यालः सम्बन्धतो मतः।
पाण्डवानां प्रियरतस्तस्मान्मां भयमाविशत् ॥ २-१०२-४७ (१५५७४)
ज्वालावर्णो देवदत्तो धनुष्मान्कवची शरी।
मर्त्यधर्मतया तस्मादद्य मे साध्वसो महान् ॥ २-१०२-४८ (१५५७५)
गतो हि पक्षतां तेषां पार्षतः परवीरहा।
रथातिरथसङ्ख्यायां योऽग्रणीरर्जुनो युवा ॥ २-१०२-४९ (१५५७६)
सृष्टप्राणो भृशतरं तेन चेत्सङ्गमो मम।

किमन्यद्दुःखमधिकं परमं भुवि कौरवाः ॥ २-१०२-५० (१५५७७)
धृष्टद्युम्नो द्रोणमृत्युरिति विप्रथितं वचः।
मद्वधायाश्रितोऽप्येष लोके चाप्यतिविश्रुतः ॥ २-१०२-५१ (१५५७८)
सोऽयं नूनमनुप्राप्तस्त्वत्कृते कालपर्ययः।
त्वरितं कुरुत श्रेयो नैतदेतावता कृतम् ॥ २-१०२-५२ (१५५७९)
मुहूर्तं सुखमेवैतत्तालच्छायेव हैमनी।
जयध्वं च महायज्ञैर्भोगानश्नीत दत्त च ॥ २-१०२-५३ (१५५८०)
इतश्चतुर्दशे वर्षे महत्प्राप्स्यथ वैशसम्।
दुर्योधन निशम्यैतत्प्रतिपद्य यथेच्छसि ॥ २-१०२-५४ (१५५८१)
शमं वा पाण्डुपुत्रेण प्रयुङ्क्ष्व यदि मन्यसे। २-१०२-५५ (१५५८२)
वैशम्पायन उवाच ॥
द्रोणस्य --चनं श्रुत्वा धृतराष्ट्रोऽब्रवीदिदम् ॥ २-१०२-५५क्ष् (१७४४)
सम्यगाह गुरुः क्षत्तरुपावर्तय पाण्डवान्।
यदि ते न निवर्तन्ते सत्कृता यान्तु पाण्डवाः। २-१०२-५६ (१५५८३)
सशस्त्ररथपादाता भोगवन्तश्च पुत्रकाः ॥ ॥ २-१०२-५७ (१५५८४)

इति श्रीमन्महाभारते सभापर्वणि अनुद्यतपर्वणि द्व्यधिकशततमोऽध्यायः ॥१०२.।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१०२-१६ असक्ताः परस्परमलग्नाः ॥
२-१०२-३९ द्वीपमाश्रयम् ॥
२-१०२-४८ देवदत्तो देवैर्दत्तः ॥
२-१०२-५० सङ्गमः सङ्ग्रामे इति शेषः ॥
२-१०२-५३ हैमनी हेमन्तसम्बन्धिनी ॥
२-१०२-५४ वैशसं नाशम् ॥

सभापर्व - अध्याय १०३
॥ श्रीः ॥
२.१०३. अध्यायः १०३

Mahabharata - Sabha Parva - Chapter Topics
धृतराष्ट्रसञ्जययोः संवादः ॥१.।

Mahabharata - Sabha Parva - Chapter Text

वैशम्पायन उवाच ॥

वनं गतेषु पार्थेषु निर्जितेषु दुरोदरे।
धृतराष्ट्रं महाराज तदा चिन्ता समाविशत् ॥ २-१०३-१ (१५५८५)
तं चिन्तयानमासीनं धृतराष्ट्रं जनेश्वरम्।
निः श्वसन्तमनेकाग्रमिति होवाच सञ्जयः ॥ २-१०३-२ (१५५८६)
अवाप्य वसुसम्पूर्णां वसुधां वसुधाधिप।
प्रव्राज्य पाण्डवान्राज्याद्राजन्किमनुशोचसि ॥ २-१०३-३ (१५५८७)
धृतराष्ट्र उवाच ॥ २-१०३-४क्ष् (१७४५)
अशोच्यत्वं कुतस्तेषां येषां वैरं भविष्यति।
पाण्डवैर्युद्धशौण्डैर्हि बलवद्भिर्महारथैः ॥ २-१०३-४ (१५५८८)
सञ्जय उवाच ॥ २-१०३-५क्ष् (१७४६)
तवेदं सुकृतं राजन्महद्वैरमुपस्थितम्।
विनाशो येन लोकस्य सानुबन्धो भविष्यति ॥ २-१०३-५ (१५५८९)
वार्यमाणो हि भीष्मेण द्रोणेन विदुरेण च।
पाण्डवानां प्रियां भार्यां द्रौपदीं धर्मचारिणीम्। २-१०३-६ (१५५९०)
प्राहिणोदानयेहेति पुत्रो दुर्योधनस्तव।
सूतपुत्रं सुमन्दात्मा निर्लज्जः प्रातिकामिनम् ॥ २-१०३-७ (१५५९१)
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्।
बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति ॥ २-१०३-८ (१५५९२)
बुद्धौ कलुषभूतायां विनाशे समुपस्थिते।
अनयो नयसङ्काशो हृदयान्नापसर्पति ॥ २-१०३-९ (१५५९३)
अनर्थाश्चार्थरूपेण अर्थाश्चानर्थरूपिणः।
उत्तिष्ठन्ति विनाशाय नूनं तच्चास्य रोचते ॥ २-१०३-१० (१५५९४)
न कालो दण्डमुद्यम्य शिरः कृन्तति कस्यचित्।
कालस्य बलमेतावद्विपरीतार्थदर्शनम् ॥ २-१०३-११ (१५५९५)
आसादितमिदं घोरं तुमुलं रोमहर्षणम्।
पाञ्चालीमपकर्षद्भिः सभामध्ये तपस्विनीम् ॥ २-१०३-१२ (१५५९६)
अयोनिजां रूपवतीं कुले जातां विभावसोः।
को नु तां सर्वधर्मज्ञां परिभूय यशस्विनीम् ॥ २-१०३-१३ (१५५९७)
पर्यानयेत्सभामध्ये विना दुर्द्यूतदेविनम्।
स्त्रीधर्मिणी वरारोहा शोणितेन परिप्लुता ॥ २-१०३-१४ (१५५९८)
एकवस्त्राथ पाञ्चाली पाण्डवानभ्यवैक्षत।
हृतस्वान्हृतराज्यांश्च हृतवस्त्रान्हृतश्रियः ॥ २-१०३-१५ (१५५९९)
विहीनान्सर्वकामेभ्यो दासभावमुपागतान्।

धर्मपाशपरिक्षिप्तानशक्तानिव विक्रमे ॥ २-१०३-१६ (१५६००)
क्रुद्धां चानर्हतीं कृष्णां दुःखितां कुरुसंसदि।
दुर्योधनश्च कर्णश्च कटुकान्यभ्यभाषताम् ॥ २-१०३-१७ (१५६०१)
इति सर्वमिदं राजन्नाकुलं प्रतिभाति मे। २-१०३-१८ (१५६०२)
धृतराष्ट्र उवाच ॥
तस्याः कृपणचक्षुर्भ्यां प्रदह्येतापि मेदिनी ॥ २-१०३-१८क्ष् (१७४७)
अपि शेषं भवेदद्य पुत्राणां मम सञ्जय।
भरतानां स्त्रियः सर्वा गान्धार्या सह सङ्गताः ॥ २-१०३-१९ (१५६०३)
प्राकोशन्भैरवं तत्र दृष्ट्वा कृष्णां सभागताम्।
धर्मिष्टां धर्मपत्नीं च रूपयौवनशालिनीम् ॥ २-१०३-२० (१५६०४)
प्रजाभिःसह सङ्गम्य ह्यनुशोचन्ति नित्यशः।
अग्निहोत्राणि सायाह्ने च चाहूयन्त सर्वशः ॥ २-१०३-२१ (१५६०५)
ब्राह्मणाः कुपिताश्चासन्द्रौपद्याः परिकर्षणे।
आसीन्निष्ठानको घोरो निर्घातश्च महानभूत् ॥ २-१०३-२२ (१५६०६)
दिव उल्काश्चापतन्त राहुश्चार्कमुपाग्रसत्।
अपर्वणि महाघोरं प्रजानां जयन्भयम् ॥ २-१०३-२३ (१५६०७)
तथैव रथशालासु प्रादुरासीद्धुताशनः।
ध्वजाश्चापि व्यशीर्यन्त भरतानामभूतये ॥ २-१०३-२४ (१५६०८)
दुर्योधनस्याग्निहोत्रे प्राक्रोशन्भैरवं शिवाः।
तास्तदा प्रत्यभाषन्त रासभाः सर्वतो दिशः ॥ २-१०३-२५ (१५६०९)
प्रातिष्ठत ततो भीष्मो द्रोणेन सह सञ्जय।
कृपश्च सोमदत्तश्च बाह्लीकश्च महामनाः ॥ २-१०३-२६ (१५६१०)
ततोऽहमब्रुवं तत्र विदुरेण प्रचोदितः।
वरं ददानि कृष्णायै काङ्क्षितं यद्यदिच्छति ॥ २-१०३-२७ (१५६११)
अवृणोत्तत्र पाञ्चाली पाण्डवाना --सताम्।
सरथान्सधनुष्कांश्चाप्यनुज्ञासिषमप्यहम् ॥ २-१०३-२८ (१५६१२)
अथाब्रवीन्महाप्राज्ञो विदुरः सर्वधर्मवित्।
एतदन्तास्तु भरता यद्व-कृष्णा सभां गता ॥ २-१०३-२९ (१५६१३)
यैषा पाञ्चालराजस्य सुता सा श्रीरनुत्तमा।
पाञ्चाली पाण्डवानेतान्दैवसृष्टोपसर्पति ॥ २-१०३-३० (१५६१४)
तस्याः पार्थाः परिक्लेशं न क्षंस्यन्ते ह्यमर्षणाः।
वृष्णयो वा महेष्वासाः पाञ्चाला वा महारथाः ॥ २-१०३-३१ (१५६१५)
तेन सत्याभिसन्धेन वासुदेवेन रक्षिताः।
आगमिष्यति बीभत्सुः पञ्चालैः परिवारितः ॥ २-१०३-३२ (१५६१६)
तेषां मध्ये महेष्वासो भीमसेनो महाबलः।
आगमिष्यति धुन्वानो गदां दण्डमिवान्तकः ॥ २-१०३-३३ (१५६१७)

ततो गाण्डीवनिर्घोषं श्रुत्वा पार्थस्य धीमतः।
गदावेगं च भीमस्य नालं सोढुं नराधिपाः ॥ २-१०३-३४ (१५६१८)
तत्र मे रोचते नित्यं पार्थैः साम न विग्रहः।
कुरुभ्यो हि सदा मन्ये पाण्डवान्बलवत्तरान् ॥ २-१०३-३५ (१५६१९)
तथा हि बलवान्राजा जरासन्धो महाद्युतिः।
बाहुप्रहरणेनैव भीमेन निहतो युधि। २-१०३-३६ (१५६२०)
तस्य ते शम एवास्तु पाण्डवैर्भरतर्षभ।
उभयोः पक्षयोर्युक्तं क्रियतामविशङ्कया ॥ २-१०३-३७ (१५६२१)
एवं कृते महाराज परं श्रेयस्त्वमाप्स्यसि।
एवं गावल्गणे क्षत्ता धर्मार्थसहितं वचः ॥ २-१०३-३८ (१५६२२)
उक्तवान्न गृहीतं वै मया पुत्रहितैषिणा ॥ ॥ २-१०३-३९ (१५६२३)

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वणि अनुद्यूतपर्वणि त्र्यधिकशततमोऽध्यायः। ।

Mahabharata - Sabha Parva - Chapter Footnotes

२-१०३-२२ निष्ठानकः चण्डवात इत्यर्थः । निर्घातो वज्रशब्दः ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org